ग्रं०५६ ॥ ॥श्रीगणेशायनमः॥ ॥दिवाकरपदद्वंद्वंफलद्वंद्वप्रदायकं॥त्रैलोक्यतमसोनाशकर्तृ
१ तत्प्रणमाम्यहं॥१॥योजगत्त्रिजकरमंदराद्रिमथ्यैर्निर्मथ्यप्रथिततरांधकारसिंधुं॥लो
केभ्योवितरतिसत्प्रकाशरत्नंतंवंदेव्रजवनीविनोदबंधुं॥२॥नामंनामंप्रणामोच्चुरत्न
रतचलद्दौचनलिंगनेनत्राम्पङ्गंगाज्ञवेन्दरिन्त्रमजनपरोज्ञानकीवल्लभांघ्री॥तातश्रीनील
कंठमत्तपदकपयालब्धशास्त्रार्थतत्त्वःकुर्वेश्रीशाकुरोहंसरुद्रयरुद्यथ्रीयतेसद्व्रतार्कं
॥३॥अत्रचस्वकर्तव्यविषयोनियतःसंकल्पोव्रतमितिश्रीदत्तः॥तन्न॥अग्निहोत्रसंध्यावंद
नादिविषयेसंकल्पेयेतिप्रसक्तेयुक्तव्रतकिंत्वनिप्रसिद्धिविषयःसंकल्पकविशेषणएव
व्रतंनचव्रतसंकल्पेयेदिस्यनन्वयइतिवाच्यं॥पाकंपचतिदानंदद्यादितिवत्प्रयानुपहार्थ राम
प्रयोगोपपत्तेरितितथा॥ ॥तत्रव्रतेहेमाद्रौगार्ग्यः॥अस्तगेचगुरौशुक्रेबालेवृद्धेमलिम्लुचे॥उ १
द्यापनमुपारंभंव्रतानांनैवकारयेत्॥तत्रैवमनुबृहस्पती॥अग्न्याधानंप्रतिष्ठांचयज्ञदानव्र

तानिच॥मौंगल्यमनिषेकंचमलमासेविवर्जयेत्॥बालेवाथदिवावृद्धेशुक्रेचास्तंगतेगुरौ
॥मलमासेइवैतानिवर्जयेद्देवदर्शनं॥लल्लः॥नीचस्थेवक्रसंस्थेप्यतिचरगतेबालवृद्धा
स्तगेवासंन्यासोदेवयात्राव्रतनियमविधिःकर्णवेधस्तुदीक्षा॥मौंजीबंधोपच्चडापरिण
यनविधिर्वास्तुदेवप्रतिष्ठावर्ज्याःसद्भिःप्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थितेचेति॥नील
स्थोमकरस्थःकल्पतरौ॥देवीपुराणे॥सिंहस्थंचगुरुंशुक्रंसर्वकर्मेषुवर्जयेत्॥प्रारब्धं
नचसमाप्तेतमहाभयकरंभवेत्॥पुत्रमित्रकलत्राणिहित्वाशीघ्रंतस्मिन्नाशयः॥देवाराम
तडागेषुव्रतोद्यानगृहेषुच॥सिंहस्थंमकरस्थंचगुरुंयत्नेनवर्जयेत्॥वसिष्ठः॥सिंहस्ये
तुमघासंस्थंगुरुंयत्नेनवर्जयेत्॥अन्यत्रसिंहभावेतुसिंहस्थोपिनदुष्यतीति॥केषांचि
न्मतेकार्तिकाणांमन्येषांचव्रतानांमंगलस्योदयेप्रारंभंनिषेधति॥हेमाद्रौलोगाक्षिः॥उद्या
निकाशिवपवित्रकमेद्यअज्ञादूर्वाष्टमीफलेविरूढकजागरणि॥स्त्रीणंव्रतमित्यरविंदा

व्र०र्क
२

न्यपिवार्षिकाणिकुर्यादगस्त्यउदितेनमुनानिनिस्मृरिति॥ उद्यानिकाव्रतविशेषः॥
शिवपवित्रकं॥ आषाढ्यामथवाश्रयांविहितंशिवस्यपवित्रारोपणंमेघदूजाव्रतवि
शेषः॥ दूर्वाष्टमी॥ भाद्रशुक्लाष्टमी॥ फलविरूढकंभाद्रशुक्लचतुर्दश्यांपल्लीव्रतापरना
मकं॥ जागरं॥ आश्विनपौर्णमास्यांकोजागरव्रतंविहितंकार्तिकचतुर्दश्यांविहितंवाव्र
तंवा॥ अत्रोक्तयत्रागस्त्योदयस्यावश्यंभावित्वेनविधेरनवकाशापत्तेर्विकल्पोज्ञेयः वार्षि
काणित्यत्रवर्षासुभवानीवार्षिकाणित्येवव्युत्पत्तिर्नतुवर्षेभवानीती तथाशातिशारदा
दिग्रीष्मपर्यंतंमगस्त्योदयानुवृत्तेस्तन्मध्येविहितानांस्त्रीवृतानांस्वधारंभएवापद्ये
तइति अगस्त्योदयकालश्चदिवोदासीयोक्तेतियाम्याहरिसंक्रमाद्वेरेकाधिकेवि रम
शातिमेद्यगस्त्यः॥ सप्तसप्तमेस्त्रंवृषसंक्रमाच्चप्रयातिगर्गादिनिरस्मृनाणि॥ व्रतारंभसमाप्त्यो २
स्तिथिविशिनष्टिहेमाद्रौसत्यव्रतः॥ उदयस्थातिथिर्याहिनभवेदिनमध्यगा॥ सात्वंडातव्र

तानासादारंभश्चसमापनं॥ एतद्व्यतिरिक्तायामखंडायांप्रारंभमाहतत्रैववृद्धवसिष्ठः॥ ख
खंडव्यापिमार्तंडापद्यखंडाभवेत्तिथिः॥ व्रतप्रारंभणंतस्यामनस्तगुरुशुक्रयुगिति॥ अन
स्तमितगुरुशुक्रायांतिथौव्रतमारंभणीयमित्यर्थः॥ रत्नमालायां॥ सोमसौम्यगुरुशुक्रवा
सराः सर्वकर्मसुभवंतिसिद्धिदाः॥ भानुभौमशनिवासरेषुचप्रोक्तमेवखलुकर्मसि
ध्यति॥ विरुद्धसंज्ञाइहयेचयोगास्तेषांमरिष्टःखलुपादआद्यः॥ सर्वेध्वतिस्तुव्यतिपातना
मासवैधृतिरिष्टःपरिघस्यचार्द्धं॥ तिस्त्रस्तुयोगेप्रथमेसवज्रेव्याघातसंज्ञेनवपंचशूले॥
गंडेअतिगंडेषडनाद्यः शुभेषुकार्येषुविवर्जनीयाः॥ ब्रह्मयामले॥ दिनक्षयदारात्रौरिक्त
नक्षयदारिवा॥ नतासांसाम्भुनकार्येषुप्राकुरेवंपुरातनाइति॥ अथदेशः॥ व्यासः॥ सर्वेशि
लोच्चयाःपुण्याः सागराःसरितस्तथा॥ अरण्यानिचपुण्यानिविशेषान्नैमिषंतथा॥ देवीपु
राणे॥ देशोनदीगयाश्रीजगंगानर्मदपुष्करं॥ वाराणसीकुरुक्षेत्रं प्रयागंजंबुकेश्वरं॥ के

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

दारं वामपादं च कुंडं वै पुष्कराह्वयं॥ सोमेश्वरं महापुण्यं तथा चामरकंटकं॥ कालंजरं तथा
विंध्यं यत्र वासो गुहस्य च॥ गुहः स्वामिकार्त्तिकेयः॥ मनुः॥ सरस्वतीदृशद्वत्योर्देव
नद्योर्यदंतरं॥ तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते॥ यस्मिन्देशे य आचारः पारंपर्यक्र
मागतः॥ वर्णानां सांतरालानां स सदाचार उच्यते॥ कुरुक्षेत्रं च मत्स्याश्च पंचालाः शूरसे
निकाः॥ एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनंतरः॥ मत्स्या॥ विराटाः पांचालाः कान्यकुब्जाः शु
रसेनिका मथुरादेशाः अनंतरं समः हिमवद्विंध्ययोर्मध्ये यत्प्राग्विनशनादपि॥ प्रत्य
गेव प्रयागाच्च मध्यदेशः प्रकीर्तितः॥ विनशनं कुरुक्षेत्रं॥ आसमुद्रात्तु वै पूर्वादासमुद्रा
त्तु पश्चिमात्॥ तयोरेवांतरं गिर्योरार्यावर्त्तं विदुर्बुधाः॥ सिंधुनदीपश्चिमतीरमावत्समर्य
माह॥ कृष्णसारस्तु चरति मृगो यत्र स्वभावतः॥ स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः
परः॥ एतान्द्विजातयो देशान्संश्रयेरन्प्रयत्नतः॥ याज्ञवल्क्योपि॥ यस्मिन्देशे मृगः कृष्ण

स्तस्मिन्धर्मान्निबोधतेति॥ अथ व्रताधिकारिणः स्कांदे॥ निजवर्णाश्रमाचारनिरत
शुद्धमानसः॥ अलुब्धः सत्यवादी च सर्वभूतहिते रतः॥ व्रतेष्वधिकृतो राजन्नन्यथा विफलः
श्रमः॥ श्रद्धावान्पापभीरुश्च मदंभविवर्जितः॥ पूर्वं निश्चयमाश्रित्य यथावत्कर्मकार
कः॥ अवेदनिंदको धीमानधिकारी व्रतादिषु॥ निजवर्णाश्रमाचार इत्यनेन चतुर्णामधिका
रो गम्यते॥ अत एव कौर्मे॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तमः॥ अर्चयंति महा
देवं यज्ञदानसमाधिभिः॥ व्रतोपवासनियमैर्होमस्वाध्यायतर्पणैः॥ तेषां वै रुद्रसायुज्यं सा
मीप्यं ताति दुर्लभं॥ सलोकता च सारूप्यं जायते तत्प्रसादतः॥ देवलोपि॥ व्रतोपवासनियमैः
शरीरोत्तापनैस्तथा॥ वर्णाः सर्वेपि मुच्यंते पातकेभ्यो न संशयः॥ अत्राधिकारिविशेषणस्य
पुंस्त्वस्याविवक्षितत्वात्स्त्रीणामप्यधिकारः॥ भारते॥ मां तु पार्थ व्यपाश्रित्य येपि स्युः पापयो
नयः॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिमिति॥ क्वचित्स्त्रीणामप्यधिकारो हेमाद्रौ

व्र०र्क
४

देवीपुराणे॥ स्नातैः प्रमुदितैर्हृष्टैः ब्राह्मणैः क्षत्रियैर्नृपैः॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः॥ स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु॥ वैश्यशूद्रयोर्भक्तिरात्राधिकोपवासो न भवति वैष्णवाः शूद्राश्च ये मोहादुपवासं कुर्वते। त्रिरात्रं पंचरात्रं वा तयोः पुष्टिर्न विद्यत इति प्राच्यलिखित निषेधाद्वृद्धिः फलं॥ सभर्तृकाणां भर्त्राद्यनुज्ञां विना नाधिकारः॥ तथा मदनरत्ने मार्कंडेयपुराणे॥ नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा॥ निःफलं तु भवेत्तस्या यत्करोति व्रतादिकं॥ भर्त्राज्ञया तु सर्वव्रतेष्वधिकारः॥ नार्या भर्तुर्मते नैव व्रतादिनाचरेच्छद् इति कात्यायनोक्तेः॥ तथा च॥ पत्यौ जीवति या नारी उपवासव्रतं चरेत्॥ आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेदिति विष्णुवचनेन भर्त्रननुज्ञापरं॥ यत्तु कश्चित्॥ नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं॥ भर्तृशुश्रूषयैवैता लोकानिष्टान्व्रजंति ताः॥ यद्वै वेश्मोपस्थे पिन्नादिके म कुर्याद्भार्यभिर्चनं संक्रियां च॥ तस्मात्तदुं सा फलं नान्यचित्ता नारी भुंक्ते भर्तृशुश्रूषयैवेति

राम
४

स्त्रीणां सभर्तृकाणामेकादश्याद्युपवासादावनधिकार इति तन्न॥ तस्यापि स्वातंत्र्येण भर्त्रननुज्ञापरत्वात्॥ अत एव व्यासः॥ कामं भर्तुरनुज्ञाता दिष्वधिकारिणीति॥ शंखोपि॥ कामं भर्त्रनुज्ञया व्रतोपवासं नियमाः स्त्रीधर्मा इति नवानुज्ञया व्रतेष्विव यतेऽपि सम्यगधिकारान्निरतिशंकमतस्यात्स्या स्कंसधयन जन्म ज्ञानाजावेनापस्यनावात यज्ञास्कंदस्य भर्तृशुश्रूषाद्यास्नावकवेनाप्युपपन्नादिति॥ नच भर्तृनुज्ञैवाधिकारे सिद्धे विधवाया व्रतानधिकारापत्तिरिति वाच्यं॥ नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा॥ विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहिकमिति मार्कंडेयोक्तेः॥ पित्राद्याज्ञया तस्याधिकार इति हेमाद्रिः॥ स्त्रीणां व्रतग्रहणे विशेषो हेमाद्रौ॥ हारितेंद्रो स्नानं च कार्यं शिरसि स्नातः फलमवाप्नुयात्॥ स्नात्वा स्त्री प्रातरुत्थाय पतिं ज्ञापयेत्सती॥

॥॥ अथ व्रतधर्माः॥ ॥ व्रतसंकल्पविधिर्नारदे॥ गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः॥ औदुंबरं ताम्रमयं उदुंबरं स्मृतं ताम्रेरिति विश्वोक्तेः॥ यद्वा

डाक्टर भाऊदाजी स्मारक
DR. BHAU DAJI MEMORIAL

व्र०र्क स्नात्वा द्विकं कल्पयेदिति कल्पतरुः॥ श्रीदत्तस्तु॥ कल्पतरुमते त्वाकारश्चार्थे नायमर्थः यत्तु
५ नक्तादि कर्तुमिच्छेत्तदप्युक्तविधिनैव गृह्णीयादित्यनेनैवोपपन्नेरित्यदूषयत्॥ ताम्रपात्राद्य
भावे हस्तेनापि जलं गृहीत्वा संकल्पयेदिति तु युक्तं अत एवानंतभट्टीये यथावार्येव धारयेदिति पा
ठः॥ मदनरत्ने देवलः वा सेतु यथा संकल्पयेदिति पाठः। यथाकालफलमुद्दिश्य वेदिस्वर्थः। अत एव मा
र्कंडेयः। संकल्प्य च यथा कुर्यात्स्नानदानव्रतादिके॥ अनंतरं कृतमाह मदनरत्ने देवलः॥ अनुक्त्वा प्रा
तराहारं स्नात्वा समुपसमाहितः॥ सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत्। अत्र प्रातर्व्रतमाचरेदि
सेनान्वयः॥ प्रधानक्रियान्वयस्याभ्यर्हितत्वात्। अनुक्त्वेति तु अशास्त्वाभ्यनुज्ञातेत्वादिन्नरुणानु
वादः॥ केचित्तु॥ व्रतदिने प्रातराहारमनुक्त्वा व्रतमाचरेदित्याहुः॥ तन्न उपवासवतां कार्यमित्य राम
नेनैवानुक्तवतोऽधिकारस्य प्राप्तत्वादेतस्य वैयर्थ्यापत्तेः॥ अन्ये तु पूर्वदिने प्रातराहारमभुक्त्वा ५
अपरदिने नक्तं कृत्वोत्तरदिने स्नात्वा चास्य व्रतादिकं कुर्यादित्याहुः। परे तु सर्वत्र पूर्वेद्युरेव सायंसंध्यो

त्तरं व्रतग्राह्यं वारव्रतादौ बहुशस्तथा दृष्टत्वात्॥ प्रातःस्नात्वेति चान्वयमाहुः॥ सामान्यधर्मा
हेमाद्रौ भविष्ये॥ क्षमा सत्यं दया दानं शौचमिंद्रियनिग्रहः॥ देवपूजाग्निहवनं संतोषस्तेयवर्जनं
॥ सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्थितः॥ देवपूजा यद्देवत्यं व्रतं तस्य पूजा॥ अग्निहवनं तद्
देवतोद्देशेन होमः क्रमात्॥ एतच्च सप्तमीव्रते सूर्यपूजाग्निहवनं नवमीव्रते दुर्गापूजा॥ अनुक्तदे
वताव्रते इष्टदेवतापूजा॥ हवने व्याहृतिहोम इति केचित्॥ अत्र कुमारीणां स्वतंत्रतया चतुर्वर्गसा
धनत्वेन विहितानां व्रतानामनया विधानं रत्वादिरं वीर्यकामस्य स्वयं कुर्यादिति वसंयोगादि पृथक्त्वा
दुपपन्नमिति हेमाद्रिः॥ सर्वव्रतेष्वित्यत्र सर्वव्रतपदं भविष्यपुराणीयसर्वव्रतपरमतो व्रतांतरे वि
ध्यंतरस्यत्व एव होमादीनामंगत्वं नान्यथा॥ अत एवैकादशीव्रतादौ शिष्टानां होमाद्यनाचरणादि
ति केचित्॥ वस्तुतस्तु येष्वेव पुराणांतरोक्तव्रतेषु होमादिविधिरस्ति तद्विषयकमेव सर्वपदमन्यथातदि
न्नपत्वेन संकोचापत्तेरिति पृथ्वीचंद्रोदये भविष्यपुराणे॥ स्नात्वा व्रतवता सर्वव्रतेषु व्रतमूर्तयः॥ पूजाः स्व

व्र॰ र्क
६

एभिष्पापाः शान्तावेन्नमिशापिना ॥ उपोष्ये मन्त्रसामान्ये व्रतान्ते दानमेव च ॥ चतुर्विंशा द्वादश
वा पंच वाऽत्र यथावद्वा ॥ विप्राः प्रमाय यथाशक्ति तेभ्यो दद्याद्दक्षिणां ॥ व्रतमूर्तयस्तद्देवताप्र
तिमाः ॥ देवलः ॥ ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनं ॥ व्रतेष्वेतानि चत्वारि चरितव्यानि नि
त्यशः ॥ स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि ॥ विपद्यते ब्रह्मचर्यं न दारेष्वृतुसंगमादिति
॥ स्वदारेष्वृतुसंगमादिति प्रचिन्माव: ॥ आमिषं मांसं ॥ आमिषमिति पानीयगोवर्ज्यं क्षीरमामि
षं ॥ मसूरमामिषं मस्येफलं जंबीरमामिषं ॥ आमिषं भुक्तिकाचूर्णं मारनालं तथामिषमि
ति स्मृत्यन्तरोक्तं वा ॥ व्रताद्यारंभे वृद्धिश्राद्धं कार्यं ॥ तदाह शातातपः ॥ नानिष्ट्वा तु पितॄन् श्राद्धे कर्म
किंचित्समारभेत् ॥ गृहीतव्रताचरणे मरणे नरत्नेल्लागलेयः ॥ एवं व्रतं गृहीत्वा यो नाचरेत्काममो राम
हितः ॥ जीवन् भवति चाण्डालो मृतः श्वा चैवाभिजायते ॥ काममोहित इति विशेषणाद्व्याध्यादिनानाच ६
रणे न दोषः ॥ तथा च हेमाद्रौ स्कान्दे ॥ सर्वभूतभयं व्याधिः प्रमादो गुरुशासनं ॥ अव्रतघ्नानि पठ्यन्ते सकृ

देतानि शास्त्रतः ॥ सर्वेभ्यो भूतेभ्यः सकाशाः व्रतकर्तुर्भयं ॥ गुरुशासनं गुरोराज्ञा सकृदुक्ताः ऽसकृत्स्ना
गे प्रायश्चित्तं ॥ तदुक्तं स्कान्दगारुडयोः ॥ क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदि ॥ दिनत्रयं न भुं
जीत मुंडनं शिरसोऽथवा ॥ न चात्र प्रायश्चित्तोक्तेरतिक्रान्तहतानाचरणमिति वाच्यं ॥ प्रायश्चित्तमि
दं कृत्वा पुनरेव व्रती भवेदिति स्कान्दात् ॥ अथोपवासधर्माः तत्रोपवासस्वरूपं कात्यायनवृद्धगौ
तमवसिष्ठाभ्यां दर्शितं ॥ उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह ॥ उपवासः स विज्ञेयः सर्वभोगवि
वर्जितः ॥ गुणैस्तज्जपनध्यानतत्कथाश्रवणादयः ॥ उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः ॥ स्मा
सर्वेषु भूतेषु क्षांतिरनसूया शौचमनायासो मंगलमकार्पण्यमस्पृहेतीत्यादि विष्णुधर्मोत्तरगौत
मादिप्रतिपादितैः तदुक्तेनोपास्यदेवताव्रतदेवतावारणं च पापनिवृत्त्या गुणानुष्ठाने न च वसति
तो निराहारस्य वासो वस्थानमुपवास इत्युक्तं भवति ॥ इदं च फलसाधनस्योपवासस्य स्वरूपमु
क्तं ॥ उपवासपदार्थस्तु स्मृतिपुराणव्यवहारे रूढ्या निरावशनमात्रं ॥ वृद्धवसिष्ठः ॥ उपवासे तथा

श्राद्धेनकुर्याद्दंतधावनं॥काष्ठेनेतिशेषः॥अतएवतल्लिदितं॥दंतानांकाष्ठसंयोगोहंतिसप्तकु
लानिवैतिवाक्यशेषाद्विधेरिवनिषेधस्यापिविशेषपरतायुक्तैवतेनाअलाभेवाविशेषेवा
काष्ठानांदंतधावनं॥पर्णादिनाविष्णुश्चेतज्ञिकोक्तेरवःसदैवहिशतिपैठीनसिवचसाअलाभे
दंतकाष्ठानांनिषिद्धायांतथातिथौ॥अपांद्वादशगंडूषैर्विदध्याद्दंतधावनमितिव्यासवचसा
त्त्वपर्णादिनाद्वादशगंडूषैर्वादंतधावनंकार्यमेव॥देवलः॥असकृज्जलपानाच्चसकृत्तांबू
लचर्वणात्॥उपवासःप्रणश्येतदिवास्वापाच्चमैथुनात्॥अशक्तौतुतेनैवजलपानमनुज्ञातं॥अप
येचांबुपानेननोपवासःप्रणश्यति॥अत्ययेजलपानंविनाप्राणात्यये॥विष्णुधर्मे॥असकृज्जलपानंच
दिवास्वापंचमैथुनं॥तांबूलचर्वणंमांसंवर्जयेद्व्रतवासरे॥असकृदुक्त्यासकृज्जलपानेनदोषः॥अत्र
पारणांतंव्रतंज्ञेयंव्रतांतेविप्रभोजनं॥असमाप्तेव्रतेपूर्वेकुर्यान्नैवव्रतांतरमितितस्यापिव्रतवासरत्वात्मां
सनिषेधः॥पारणदिनएव॥नतूपवासदिनेअप्रसक्तभावात्॥अतएवनिर्णयामृतेव्यासः॥वर्जयेत्सा

रघोमासंव्रताहेप्यौषधंसदेति॥अष्टौतान्यव्रतघ्नानिआपोमूलंफलंपयः॥हविर्ब्राह्मणकाम्या
चगुरोर्वचनमौषधमितिस्कांदवचसाऔषधरूपमपिमांसंव्रताहेवर्जयेदित्यर्थः॥विष्णुरहस्ये॥स्व
स्यालोकनगंधादिस्वादनंपरिकीर्तितं॥अन्नस्यवर्जयेत्सर्वंग्रासानांचाभिकांक्षणं॥गात्राभ्यंगंशि
रोभ्यंगंतांबूलंचानुलेपनं॥व्रतस्थोवर्जयेत्सर्वंयच्चान्यद्बलरागकृदिति॥पतितपाखंडिना
स्तिकादिसंभाषणंतन्नाम्नीलादिकमुपवासादिषुवर्जयेदिति॥अत्रादिपदेनतत्तुल्यार्थमया
सर्वशनिषिद्धंतदवित्यर्थतयासंगृह्यते॥अतएवव्रताधिकारेस्मृत्यंतरं॥विहितस्याननुष्ठानमिं
द्रियाणामनिग्रहः॥निषिद्धसेवनंनित्यंवर्जनीयंप्रयत्नतः॥पतितादेर्दर्शनेतुविष्णुपुराणे॥तस्मा
दालोकनात्सूर्यमवेक्षेतमतिमान्नरः॥स्पर्शादौविष्णुधर्मे॥संस्पर्शेचनरःस्नात्वाशुचिरादि
त्यदर्शनात्॥संभाष्यतान्शुचिपदंचिंतयेदच्युतंबुधः॥योगयाज्ञवल्क्यः॥यदिवागुपमलोपःसाद्व्र
तदानक्रियादिषु॥व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं॥यमः॥मानसेनियमेत्वेतेस्मरेद्विष्णु

व्रतार्क ८

म्नामयमिति॥ बृहन्नारदीये॥ रजस्वलां च चांडालं महापातकिनं तथा॥ सूतिकां पतितं चैव
उच्छिष्टरजकादिकं॥ व्रतादिमध्ये शृणुयाद्येषां ध्वनिमुत्तमः॥ अष्टोत्तरशतं तु जपेद्वे
वेदमातरं॥ वेदमाता गायत्रीमित्याचारादर्शे॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥ य
दन्यत्कुरुते किंचिन्न तस्य फलमश्नुते॥ अत्र प्रातःसंध्यैवांगमिति केचित्॥ तान्न चरणास्तु॥
अविशेषात्त्रिसंध्योत्तरकालीनकर्मादौ सांगमिति युक्तमित्याहुः॥ छंदोगपरिशिष्टे॥ सदोप
वीतिना भाव्यं सदा बद्धशिखेन च॥ विशिखो व्युपवीतश्च यत्करोति न तत्कृतं॥ पित्र्यमंत्रानुद्
रणे आत्मालंभेऽवेक्षणे॥ अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे॥ मार्जारमूषकस्प
र्शे आक्रुष्टे क्रोधसंभवे॥ निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत्॥ मार्कंडेयपुराणे॥ शि
रःस्नातश्च कुर्वीत दैवं पित्र्यमथापि वा॥ वाराहपुराणे॥ स्नानसंध्यातर्पणादि जपहोमार्चनं
उपवासव्रताकार्यं सायंसंध्याकृतं विना॥ भगवद्गीतायां॥ तस्मादोमित्युदाहृत्य यज्ञदानतपः

राम ८

क्रियाः॥ प्रवर्त्तंते विधानोक्ताः सततं ब्रह्मवादिनां॥ आपस्तंबः॥ त्रिमात्रस्तु प्रयोक्तव्यः कर्मारंभेषु
सर्वतः इति॥ विस्तरता चेयं सामान्यपरिभाषा तातचरणकृत आचारमयूखे द्रष्टव्या॥ अत्र स्त्रीणां
विशेषो हेमाद्रौ पाद्मे॥ गर्भिणी सूतिकादिश्च कुमारी चाथ रोगिणी॥ यदाशुद्धा तदान्येन कार
येत्प्रयता स्वयं॥ प्रयता शुद्धा स्वयं कुर्यादित्यर्थः॥ पुंसोऽप्येष विधिर्लिंगस्याविवक्षितत्वादिति हे
माद्रिः॥ एवं स्त्री निरजो दर्शनेऽपि कार्यं॥ तथा वसिष्ठः॥ आरब्धे दीर्घतपसां नारीणां यद्रजो भ
वेत्॥ न च तत्र व्रतस्य स्यादुपरोधः कथंचन॥ व्रतस्योपवासस्येत्यर्थः॥ पूजादिकं त्वन्येन कार
येत्॥ तथा च मदनरत्ने मात्स्ये॥ अंतरा तु रजोयोगे पूजामन्येन कारयेत्॥ सूतके प्रारब्धं न वस्ये
व॥ तथा च तत्रैव पूर्वसंकल्पितं पूर्वव्रतं सूतियव्रते॥ तत्कर्त्तव्यं तरैः शुद्धदानार्चनविवर्जितमि
ति॥ केतकारये स्त्रियेरा यां तत्रैव पैठीनसिः॥ नार्यपि स्तु व्रतं कुर्यान्नार्यायाश्च पतिः व्रतं॥ असा
मर्थ्ये यति सामर्थ्यं व्रतभंगो न जायते॥ तत्रैव वायुपुराणे॥ उपवासत्वशक्तस्य आहिताग्निरथा

व्रता० ९

पिता। पुत्रो वाऽथ कारयेद् भ्रात्रा ब्राह्मणो वापि कारयेत्॥ उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत्
॥ नारी च पतिमुद्दिश्य एकादश्यामुपोषिता॥ पुण्यं शतगुणं प्राप्या दित्याह गालवो मुनिः॥ मातामहा
दीनुद्दिश्य एकादश्यामुपोषणे॥ कृते तु ते फलं विप्रास्समस्तं फलमाप्नुयुः॥ एते च प्रतिनिधयो
न काम्ये तथा च मदनः॥ काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके पि च॥ काम्येष्वप्युपक्रमादूर्ध्वं के
चित्प्रतिनिधिं विदुः॥ न स्यात्प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु॥ सदेशकालयोर्नास्ति नारिणे
रग्निरेव सा॥ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कर्हिचित्॥ अथ व्रतहविष्याणि हेमाद्रौ छन्दो
गपरिशिष्टे कात्यायनः। हविष्येषु यवा मुख्यास्तनु व्रीहयः स्मृताः॥ माषकोद्रवगौरादीन् सर्वालाभेपि
वर्जयेत्॥ अत्रैव भविष्यपुराणे॥ व्रीहिषष्टिकमुद्गाश्च कलायाः सतिलं पयः॥ श्यामाकाश्चैव नीवा
रा गोधूमाद्या व्रते हिताः॥ कूष्मांडालाबुवार्ताकिपालक्यं ज्योत्स्निकास्त्यजेत्॥ चरुभैक्ष्यसक्तुक
णाः शाकं दधि घृतं मधु॥ श्यामाकाः शालिनीवाराः पावकं मूलतंडुलं॥ हविष्यव्रतनक्तादावग्निका राम ९

DR. BHAU DAJI
डाक्टर भाऊ दाजी

पादिके हितं॥ मधुमासं विहायान्यत्तैलं च हिमीरितं॥ ‒लकी॥ पलाकीति शाकविशेषः॥ ज्योत्स्नि
काविशेषः॥ ज्योत्स्निका कोशातकी॥ तत्रैव भविष्ये॥ हैमंतिकं सिता स्विन्नं धान्यं मुद्गा यवास्तिला
॥ कलायकंगुनीवारवास्तुकं हिलमोचिका॥ षष्टिका कालशाकं च मूलकं केमुकेतरत्॥ कंद
सैंधवसामुद्रे गव्ये च दधिसर्पिषी॥ पयोनुद्धृतसारं च पनसाम्रहरीतकी॥ पिप्पली जीरकं चैव
नागरंगकतिंतिणी॥ कदली लवली धात्री फलान्यगुडमैक्षवं॥ अतैलपक्वं मुनयो हविष्याणि
प्रचक्षते॥ लवणे मधुसर्पिषी इति विभागः॥ हैमंतिकं धान्यकलमाः तदपि सितं स्विन्नं॥ अस्वि
न्नं हविष्यं कलयाः सतीनापरपर्यायाः मटर इति प्रसिद्धाः॥ हिलमोचिका॥ गौडदेशे लोहंचेति
प्रसिद्धा॥ केमुकं तेमुत्रा इति पूर्वदेशे प्रसिद्धं॥ नागरंगं नारिंगं॥ एरावतो नागरंगो नादेयी भूमिजंबु
के समरात्॥ नागरं चैवेति पाठे नागरं शुंठी॥ लवली॥ रायआवले इति मराराष्ट्रभाषयो अम्लानंफलं
॥ हरफारेवडी इति मध्यदेशभाषया॥ अतैलपक्वमित्येतत्कल्पितं हविष्याणां मेव सीविशेषणं मनुःसु

तन्नानिपयः सोमो मांसं यच्चानुपस्कृतः॥ अक्षारलवणं चैव प्रकृत्या हविरुच्यते॥ अनुपस्कृ
तं तमपक्वं॥ अथ व्रताद्युपयुक्तानि वस्तूनि॥ तत्र पंचरत्नान्यादित्यपुराणे॥ सुवर्णं रज
तं मुक्ता राजावर्त्तप्रवालक॥ रत्नपंचकमाख्यातं शेषं वस्तु ब्रवीम्यहं॥ कनकं कुलिशं नील
पद्मरागं च मौक्तिकं॥ एतानि पंचरत्नानि रत्नशास्त्रविदो विदुरिति समयप्रदीपधृतकालिकापु
राणोक्तानि वा कुलिशं हीरकं॥ स्मृत्यंतरे॥ अभावे सर्वरत्नानां हेम सर्वत्र योजयेत्॥ विष्णुधर्मो
त्तरे॥ मुक्ताफलं हिरण्यं च वैडूर्यं पद्मरागकं॥ पुष्परागं च गोमेदं नीलं गारुत्मतं तथा॥ प्रवालं
युक्तान्युक्तानि महारत्नानि वै नव॥ हेमाद्रौ ब्रह्मांडपुराणे॥ अश्वत्थोदुंबरप्लक्षचूतन्यग्रोध
पल्लवाः॥ पंचभंगा इति प्रोक्ताः सर्वकर्मसु शोभनाः॥ पंचभंगाः पंचपल्लवाः पंचगव्यं तु त
त्रैव स्कांदे॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिर्यथाक्रमं॥ विष्णुधर्मे॥ गोमूत्रस्याग्रतश्चार्द्धं सकृतक्षी
रस्य च त्रयं॥ द्वयं दध्नो घृतस्यैकमेकश्च कुशवारिणः॥ गोमूत्रादिपरिमाणं तातचरणकृतप्रायश्चि

त्तमयूखे ज्ञेयं॥ विष्णुधर्मे॥ गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं॥ आप्यायस्वेति च क्षीरं दधि
क्राव्णेति वै दधि॥ तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं॥ एभिस्तु पंचभिस्तु पंचगव्यं प्र
चक्षते॥ पंचामृतं हेमाद्रौ शिवधर्मे॥ पंचामृतं दधि क्षीरं सिता मधु घृतं नृप॥ मदनरत्ने का
लायने॥ आज्यं क्षीरं मधु तथा मधुरत्रयमुच्यते॥ तत्रैव भविष्ये॥ मधुरो तिक्त लवणकषाय
तिक्तएव च॥ कटुकश्चेति राजेंद्र रसषट्कमुदाहृतं॥ चतुःसमं गारुडे॥ कस्तूरिकाया द्वौ भागौ चत्वा
रश्चंदनस्य च॥ कुंकुमस्य त्रयश्चैकं शशिनः स्याच्चतुःसमा॥ शशिकर्पूरकर्पूरः चंदनं दर्पः कुंकुमं च
समांशकं॥ सर्वगंधमिति प्रोक्तं समस्तसुरवल्लभं॥ दर्पः कस्तूरिका॥ कर्पूरमगरुश्चैव कस्तूरिचंद
नं तथा॥ कंकोलं च भवेदेभिः पंचभिर्यक्षकर्दमः॥ छंदोगपरिशिष्टे॥ कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचंद
नं॥ वचा चंपकमुस्तं च सर्वौषधयो दश स्मृताः॥ पाद्मे॥ रक्तवस्त्रेण राजेंद्र निष्पावा जातिधान्यकं॥ वि
कारवर्गः क्षीरं कुसुंभं कुंकुमं तथा॥ लवणं चाष्टमं तत्र सौभाग्याष्टकमुच्यते॥ रणरावत्सार॥ आजाजी

व्रता० जीरकं॥ आपः कुशी रंकुशांस्त्राणि दध्यक्षतकुशास्तथा॥ यवाः सिद्धार्थकाश्चेति ह्यर्घोष्टांगः प्रकी
११ र्तितः॥ पंचरात्रे॥ रजांसि पंचवर्णानि मंडलार्थं हि कारयेत्॥ शालितंडुलचूर्णेन शुक्लं वा यवसंभ
वं॥ रक्तं कुसुंभसिंदूरगैरिकादिसमुद्भवं॥ हरितालोद्भवं पीतं रजनीसंभवं तथा॥ कृष्णं दग्धयवै
र्हरितं पीतकृष्णविमिश्रं रजनिहरिद्राकौतुकसंज्ञानि॥ भविष्ये॥ दूर्वायवांकुरैश्चैव बाल
कं चूतपल्लवाः॥ हरिद्राद्वयसिद्धार्थशिखिपत्रोरगत्वचः॥ कंकणौषधयश्चैवा कौतुकाख्या
नवा स्मृताः॥ सप्तमृदो मात्स्ये॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥ मृदमानीय कुं
भेषु प्रक्षिपेच्चत्वरात्तथा॥ गोकुलावधिसप्तचत्वरेण सहाष्टौ मृदो भवति॥ हेमाद्रौ भविष्ये
॥ सुवर्णं रजतं ताम्रमारकूटं तथैव च॥ लोहं त्रपु तथा सीसं धातवः सप्त कीर्तिताः॥ आरकूटं पि राम
त्तलं॥ तत्रैव षट्त्रिंशन्मते॥ यवगोधूमधान्यानि तिलाः कंगुस्तथैव च॥ श्यामाकं चीनकं चैव सप्त ११
धान्यमुदाहृतं॥ सप्तदश धान्यानि मार्कंडेयपुराणे॥ व्रीहयश्च यवाश्चैव गोधूमाः कंगुणः स्तिलाः॥ प्रि

यंगवः कोविदाराः कोरदूषाः सतीनकाः॥ माषा मुद्गा मसूराश्च निष्पावाः सकुलत्थकाः॥ आढक्यश्च
णकाश्चैव शणाः सप्तदश स्मृताः॥ कोरदूषाः कोद्रवाः सतीनकाः कलायामटर इति प्रसिद्धाः॥ ता म ८
न्यष्टादशानि॥ स्कांदे॥ यवगोधूमधान्यानि तिलाः कंगुकुलत्थकाः॥ माषा मुद्गा मसूराश्च निष्पावाः श्या
मसर्षपाः॥ गवेधुकाश्च नीवारा आढक्योथ सतीनकाः॥ चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु
॥ हेमाद्रौ क्षीरस्वामी॥ मूलपत्रकरीराग्रफलकांडाधिरूढकाः॥ त्वक्पुष्पं कवकं चेति शाकं दश
विधं स्मृतं॥ करीरं वंशांकुरः अग्रं पल्लवः कांडं नालकं कवकं छत्राकं॥ कलशा उक्ता विष्णुधर्मे हे
मराजतताम्राश्च मृन्मया लक्षणान्विताः॥ यात्रोद्वाहप्रतिष्ठादौ कुंभाः स्युरभिषेचने॥ पंचाशदंगुलवैपु
ल्योत्सेधे षोडशांगुलाः॥ द्वादशांगुलमूलास्तु मुखमष्टांगुलं भवेत्॥ पंचपंचाशतश्च पंचांगुः॥ आ
शारदा॥ पंचाधिकशतमंगुलानि वैपुल्यमित्यर्थ इति तातचरणाः॥ केचित्तु॥ पंचाशदंगुलानि वैपुल्य
मित्यर्थ इत्याहुः॥ प्रतिमाद्रव्यतत्परिमाणं हेमाद्रौ भविष्ये॥ वर्तुलमष्टतंत्रं स्याद्देवताप्रतिमारूपा॥ सौव

णीराजती नाम्नी ब्रह्मजा मात्रीकिं तथा॥ चित्रजा पिष्टलेपोत्थानिज्ञवित्तानुरूपतः॥ आमाषा
त्पर्जपर्यंता कर्तव्याशा ह्युपवर्जितैः॥ अंगुष्ठपर्वादापर्वादारभ्य वितस्त्यवधिका स्मृता॥ तथा
॥ अनुक्तसंख्याय यत्स्याद्धुतमष्टोत्तरं स्मृतं॥ मात्स्ये॥ होमो ग्रहादियज्ञायां शतमष्टोत्तरं भवेत्॥
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते॥ मदनरत्ने ब्राह्मे॥ यथोक्तवस्त्वसंपत्तौ ग्राह्यं तद
नुकारि यत्॥ यवानामिव गोधूमा व्रीहीणामिव शालयः॥ आज्यं द्रव्यमनादेशे जुहोतिषु विधी
यते॥ मंत्रस्य देवतायाश्च प्रजापतिरिति स्थितिः॥ मंत्रस्य देवतायाश्च विधाने प्रजापतिर्देवता समस्तव्या
हृतिर्मंत्रः॥ स्मृत्यंतरेऽपि॥ न आम्नातसमं कुत इति॥ गारुडे प्रणवादि नमोंतं च चतुर्थ्यंतं च सत्तम। देवतायाः स्व
कं नाम मूलमंत्रः प्रकीर्तितः॥ केषांचित्प्रतिनिधिरुक्तो हेमाद्रौ विष्णुधर्मे॥ दध्यलाभे पयः कार्यं मध्व
लाभे तथा गुडः॥ घृतप्रतिनिधिं कुर्यात्पयो वा दधि वा नृप॥ तत्रैव मैत्रायणीयपरिशिष्टे॥ दर्भाभावे
काशाः प्रतिनिधिः पैठीनसिः॥ सर्वाभावे यवाः प्रतिनिधिः तत्रैव आज्यहोमेषु सर्वेषु गव्यमेव भवे

त्घृतं॥ तदलाभे महिष्याज्यं आजमाविकमेव तु॥ तदलाभे तु तैलं स्यात्तदभावे तु जार्तिलं॥ तदलाभे
तु कौसुंभं तदभावे तु सर्षपं॥ हेमाद्रौ परिशिष्टे कात्यायनः॥ अनंतगर्भिणं साग्रं कौशं द्विदलमे
व च॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥ आज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु॥ अथेध्मा
पालाशाश्च स्युस्तदलाभे खादिरोदुंबराणां तदभावे सर्ववनस्पतीनां सर्वकंटकी वर्जं प्राण्याकृतिर्दि
र्घापर्वशरीकारस्मादिनाचेत्स्रुवगर्तं पुरिता॥ दैवेन तीर्थेन चरुपक्षे हविः स्वंगारिणस्वर्चिषि पावके
स्यः॥ योनर्चिषि जुहोत्यग्नौ व्यंगारिणि च मानवः॥ मंदाग्निरामयावी च दरिद्रश्चैव जायते॥ तस्मात्समि
द्धे होतव्यं नासमिद्धे कथंचन॥ आरोग्यमिच्छता पुंसा त्रिषु मासेषु तिक्ती तथा॥ जुहृषुश्च हुते चैव
पाणिस्पर्शस्तु वादिभिः॥ न कुर्यादग्निधमनं न कुर्याद्व्यजनादिना॥ मुखेनैके धमंत्यग्निं मुखाद्ध्येषो
धिजायते॥ अथ धूपाः॥ हेमाद्रौ भविष्ये॥ अगरुचंदनं मुस्तासिल्हकं वृषणं तथा॥ समभागं तु कर्तव्यं
धूपोयममृताह्वयः॥ सिल्हकं सिल्हाद इति प्रसिद्धं॥ वृषणं कस्तूरी॥ तथा षडंगकुष्ठं द्विगुणं गुडस्य

व्र०र्क
१२

लोहात्रयं पंचनखस्य भागाः॥ हरितकिः सर्जरसः समांशी भागैकमेकं त्रिलवं शिलाजं॥ वनस्य च
त्वारि पुरस्य चैको धूपोदशांगः कथितो मुनींद्रैः॥ सर्जरसः राल इति प्रसिद्धः॥ मांसी जटामांसी॥
त्रिलवं त्रिभागं घनः कर्पूरः पुरः गुग्गुलुः॥ अथ सुवर्णमानं॥ याज्ञवल्क्यः॥ जालसूर्यमरीचिस्थं त्र
सरेणू रजः स्मृतं॥ तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते॥ गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु
ते त्रयः॥ कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश॥ पलं सुवर्णाश्चत्वारः पंच वापि प्रकीर्तितं॥ र
जतमानमाह॥ द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते॥ शतमानं तु दशभिर्धरणैः पलमेव तु॥ निष्कः
सुवर्णाश्चत्वार इति॥ ताम्रमानमाह॥ कार्षिकः पण इति॥ पलचतुर्थांशेन कर्षेण मितः कार्षिक
स्ताम्रसंबंधी पणो भवति॥ कर्षसंज्ञश्च॥ तेषोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयमिति तेषो ड
श माषः षोडशाक्षः स एव कार्ष इत्यर्थः॥ धरणस्यैव पुराण इति संज्ञांतरं॥ तेषोडश स्याद्धरणं
पुराणश्चैव राजत इति मिताक्षरायां स्मृतेः॥ शतमानपले पर्याये सुवर्णचतुष्टयं समतोलितं रूप्य

राम
१२

राजतो निष्क इत्यर्थः सुवर्णनिष्कस्तु चतुः सौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः इति मनूक्तेः स च पल
समान एव॥ कांस्यकार्षपण इत्यर्थ छायायां देशभेदेन कार्षापणो भिन्न इत्याह॥ हेमाद्रौ नारदः॥ कार्षा
पणो दक्षिणस्यां दिशि रौप्यः प्रवर्तते॥ पणैर्निबद्धः पूर्वस्यां षोडशैव पणाः स तु षोडश पणेन अष्टौ
द्वबुका कार्षापणः पूर्वस्यामित्यर्थः॥ तावता लभ्यं रूप्यं दक्षिणस्यामिति अत एव निर्णये पितामहव
रणाः नीलाचलां॥ विराटकभांदव काकद्वयं पसा काकिणी माषपणश्च तस्य॥ तेषोडशाद्रम्मः
द्रावगम्यो द्रम्मस्तथा षोडशानिश्च निष्क इति॥ अथ धान्यमानं भविष्ये॥ पलद्वयं च प्रसृतं विद्यु
र्णं कुडवं मतं॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः॥ आढकैस्तैश्चतुर्भिश्च द्रोणस्तु
कथितो बुधैः॥ कुंभो द्रोणद्वयं शूर्पश्चत्वारि द्रोणास्तु षोडश॥ द्रोणद्वयस्यैव शूर्प इति संज्ञा पलं
च कुडवः प्रस्थ आढको द्रोण एव च॥ धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः॥ द्रोणैः षोड
शभिः खारी विंशत्या कुंभ उच्यते॥ कुंभैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्तिताः॥ विंशत्ये

व्रता०
१४

अत्रापि द्रोणैरिति संबध्यते॥ तथा च कुंभो द्रोणद्वयमिति॥ पलानां द्विशतिर्द्रोणमितः कुंभ इति पक्षां
तरं॥ एतेषां च स्थूलाधिकपक्षाशक्तिदेशकालाद्यपेक्षया व्यवस्था ज्ञेया॥ अथ होमद्रव्यमानं
सिद्धांतशेखरे द्रव्यप्रमाणानि वक्ष्यंतेथ यथाक्रमं॥ कर्षप्रमाणमाज्यं स्यान्मधुक्षीरे च तत्समं॥
तंडुलानां शुक्तिमात्रं पायसं प्रसृते समं॥ कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिता मताः॥ अन्नं
ग्राससमं ग्राह्यं शाकं ग्रासार्धमात्रकं॥ मूलानां तु त्रिभागः स्यात्कंदानामष्टमोंशकः॥ इक्षुः प
र्वप्रमाणः स्यादंगुलद्वितयं लता॥ प्रादेशमात्रसमिधो व्रीहिणां मंजलिसमाः॥ तिलसक्तुकणादी
नां मृगीमुद्राप्रमाणतः॥ पत्रपुष्पफलादीनां प्रमाणाकृतिरिष्यते॥ चंद्रश्रीखंडकस्तूरीकुं
कुमागईमाः॥ हरिमंथसमाः प्रोक्ताः गुग्गुलुर्बदरोपमः॥ हरिमंथश्चणकः॥ आकृतीनामिद
मानं कथितं वेदवेदिभिः॥ स्यात्रीमुद्रा मृगीमुद्रा होमे सर्वफलप्रदेति॥ मानांतरं शारदातिलक
टीकायां पदार्थादर्शे॥ कर्षमात्रमिदं होमे शुक्तिमात्रं पयः स्मृतं॥ उक्तानि पंचगव्यानि शुक्तिमा

राम
१४

त्राणि साधुभिः॥ तत्समे दधिमधुदुग्धे लंग्राससमानमुदाहृतं॥ दधि प्रसृतमात्रं स्यात् ला
जास्तु मुष्टिसंमिताः॥ पृथुकास्तत्प्रमाणाः स्युः सक्तवोपि तथाविधाः॥ पलार्धं गुडमानं च शर्करा
पि तथाविधा॥ ग्रासार्धमात्रमन्नानि मिक्षुः पर्वप्रमाणकः॥ एकं स्यात्सत्रपुष्पं च तथा धूपादि क
ल्पयेत्॥ मातुलिंगं चतुःखंडं पनसं दशधाकृतं॥ अष्टधा नालिकेरं च चतुर्धा कदलीफलं॥ वि
धाकृतं फलं वैल्वं कपित्थं खंडितं द्विधा॥ व्रीहयो मुष्टिमानाः स्युर्मुद्गमाषायवास्तथा॥ तंडुला
स्तुलसद्व्रीकोद्रवा मुष्टिसंमिताः॥ लवणं शुक्तिमात्रं स्यान्मरीचाम्लेकविंशति॥ घृतस्य कार्षि
को होमः क्षीरस्य मधुनस्तथा॥ शुक्तिमात्राकृतिर्दध्नः प्रसृतिः पायसस्य तु॥ खंडत्रयं तु मूलानां
फलानां स्वप्रमाणतः॥ ग्रासमात्रं तु होतव्या इतरेषां तु तंडुलाः॥ अक्षतास्तु यवा प्रोक्ता अत्रा
वे व्रीहयः स्मृताः॥ तदभावे तु गोधूमा नखंडिततंडुलाः॥ येषां केषांचिदन्येषां द्रव्याणामप्यलं
भवे॥ सर्वत्रास्यमुपादेयं भरद्वाजमुनेर्मतात्॥ सर्वप्रमाणमाकृत्या पंचांगुलगृहीतयेति॥ त

डाक्टर भाऊ दाजी इत्यादि स्मारक
DR. BHAU DAJI
MEMORIAL

व्रता०
१५

वस्त्रं चाहतसंपूर्णं तन्मानेन सुस्मवर्णं च ॥ इक्षूणां पर्वकं नाम लतानामंगुलद्वयं ॥ चंद्रचंदनका
श्मीरकस्तूरिय(क्) कर्दमान् ॥ कल्पयेत्समितानेतान् गुग्गुलुं वरस्थितं ॥ इध्मस्तु वेणहोतसं
पाणिना कठिनं हविः ॥ स्त्रुवपूर्णं ह्यवाः प्रोक्ताः कठिनाग्रासमात्रकाः ॥ व्रीहयो यवगोधूमप्रियं
गुतिलश्शालयः ॥ स्वरूपेणैव होतव्या इतरेषां च तंडुलाः ॥ अथ ऋत्विग्वरणं ॥ हेमाद्रौ पाद्मे ॥ बा
लाग्निहोत्रिणं विप्रं सुरूपं च गुणान्वितं ॥ सपत्नीकं च संपूज्य भूषयित्वा च भूषणैः ॥ पुरोहितं
मुख्यमतं कृत्वा संवृणुयादृत्विजः ॥ चतुर्विंशत् गुणोपेतान् सपत्नीकान्निमंत्रितान् ॥ अहतांबरसंछ
न्नान्स्रग्विणः सुविभूषितान् ॥ अंगुलीयकानि च तथा कर्णवेष्टान्प्रदापयेत् ॥ तत्रैव लैंगे वस्त्र
युग्मं तथोष्णीषकुंडलेकं वभूषणं ॥ अंगुलीभूषणं चैव मणिबंधस्य भूषणं ॥ एतानि चैव स
र्वाणि प्रारंभे धर्मकर्मणां ॥ पुरोहिताय दत्वाथ ऋत्विग्भ्यः संप्रदापयेत् ॥ सर्वोक्तभूषणं सर्वं सौ राम
उष्णीषं वस्त्रसंयुतं ॥ दद्यादेतत्प्रयोक्तभ्यः आच्छादनपटं तथा ॥ एतानां मधुपर्कमाह ॥ तत्रैव वि १५

तत्रैव विश्वामित्रः ॥ संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेत् ॥ अपूज्यात्कारयत्कर्मकिल्बिषे
नैव युज्यते ॥ ऋत्विक्संख्यामाह ॥ तत्रैव मात्स्ये ॥ हेमालंकारिणः कार्याः पंचविंशति ऋत्विजः ॥
दूषयेद्वा समं सर्वानाचार्ये द्विगुणं भवेदिति ॥ दक्षिणयातोषयेदित्यर्थः ॥ अथ सर्वतोभद्रमं
डलं ॥ हेमाद्रौ स्कांदे ॥ प्रागुदीच्यागता रेखा कुर्यादेकोनविंशति ॥ खंडेंदुस्त्रिपदः कोणः शृंख
लापंचभिः पदैः ॥ एकादशपदा वल्ली भद्रं तु नवभिः पदैः ॥ चतुर्विंशसदा वापी परिधिर्विंशतिः
पदैः ॥ मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतं ॥ श्वेतेंदुः शृंखला कृष्णा वल्लीनीलेन पूरयेत्
॥ भद्रारुणा सिता वापी परिधिः पीतकर्णिकः ॥ बाह्यांतरदलश्वेता कर्णिका पीतवर्णिका ॥ परि
ध्या वेष्टितं पद्मं ॥ बाह्ये सत्वरजस्तमः ॥ तन्मध्ये स्थापयेद्देवान्ब्रह्माद्यांश्च सुरासुरान् ॥ इति सर्व
तोभद्रं ॥ अथ लिंगतोभद्रं ॥ आग्नेये ॥ चतुर्विंशतिरालेख्याः रेखाः प्राग्दक्षिणायताः ॥ कोणेषु
शृंखलापंचपदावल्यस्तु पार्श्वतः ॥ पदैर्नवभिरालेख्याश्चतुर्भिर्लघुशृंखलाः ॥ लघुवल्ल्यपदैः षड्

ग्रं०र्ष्ट स्ततोष्टादशभिःपदैः॥कृत्वालिंगनिवाप्यस्मुस्त्रयोदशभिरंतरा॥ततोवीथीद्वयेचैवपीठंकुर्या
१६ द्विचक्रणः॥तस्यापदापंचपदाद्वाराण्यपितथैवच॥एकादशीतिपदंमध्येपद्मंस्वस्तिकमुच्यते
॥कोणेषुशृंखलाःकार्याःपदैस्त्रिभिरतःपरं॥पदैश्चतुर्भिर्दिक्षुस्युःर्भद्राण्येषांसमंततः॥ए
कादशपदावल्योमध्येष्टदलमालिखेत्॥पद्मेनवपदेह्येवंलिंगतोभद्रमुच्यते॥शृंखलाःकृ
ष्णवर्णेनवल्लीनीलेनपूरयेत्॥रक्तेनशृंखलालग्नावल्लिःपीतेनपूरयेत्॥लिंगानिकृष्णवर्णा
निश्वेतेनाप्यथवापिका॥पीठंस्वपादश्वेतेनपीतेनद्वारपूरणं॥मध्येस्युःशृंखलारक्ताःवल्ली
नीलेनपूरयेत्॥भद्राणिपीतवर्णानिपीतापंकजकर्णिका॥दलानिश्वेतवर्णानियद्वाचित्रा
णिकल्पयेत्॥तिस्रोरेखाबहिःकार्याःसितरक्तासितक्रमादिति॥अथचतुर्लिंगोद्भवंलैंगेरेखास्त्व राम
ष्टादशप्रोक्ताश्चतुर्लिंगेसमुद्भवे॥कोणेषुत्रिपदश्वेतस्त्रिदैःकृष्णशृंखलाः॥वल्लीसप्तपदानीला १६
भद्रंरक्तंचतुष्पदं॥भद्रपार्श्वेमहालिंगंकृष्णमष्टादशैःपदैः॥शिवस्यपार्श्वतोवापिकुर्यात्तंचपदांसि

तां॥पद्ममेकंतथापीतंभद्रंवाप्योस्तुमध्यतः॥शिरसिशृंखलायाश्चकुर्यात्पीतंपदत्रयं॥लिंगानां
स्कंधतःकोष्ठाविंशतिरक्तवर्णकाः॥परिधिःपीतवर्णैस्तुपदैःषोडशभिःस्मृतः॥पदैस्तुन
वभिःपद्माद्रूपपद्मंसकर्णिकं॥अथद्वादशलिंगोद्भवं॥तत्रैव॥प्रागुदीच्यायतारेखाःषट्
त्रिंशद्विप्रकल्पयेत्॥पदानिद्वादशशतंपंचविंशतिरेवच॥खंडेंदुःत्रिपदःकोणेशृंखला
षट्पदैःस्मृता॥त्रयोदशपदावल्लिर्भद्रंतुनवभिःपदैः॥त्रयोदशपदावापिलिंगमष्टादशैः
स्मृतं॥लिंगत्रयस्यपंक्तौतुशोभाकोष्ठचतुर्दश॥तेषामुपरिपंक्तौतुकोष्ठाःसप्तदशैवतु॥प्रजापंक्ति
स्तुविज्ञेयाःपरितःपरिकल्पिताः॥प्रजापंक्त्यंतरापंक्तौकोष्ठद्वाविंशतिसंख्यया॥परिधिःसचविज्ञेयोमं
डलोरंतरादयोःपरिध्यंतरकोणेषुसर्वतोभद्रमालिखेत्॥विशेषश्चात्रवितेपःशृंखलाषट्पदान्न
वेत्॥त्रयोदशपदावल्लीभद्रंतुनवभिःपदैः॥पंचविंशत्पदावापिपरिधिःषोडशात्मकः॥मध्येनव
पदंपद्मंकर्णिकाकेसरान्वितं॥सत्वरजस्तमोवर्णैःपरितोमंडलस्यतु॥त्रयःपरिधयःकार्यास्तत्रयथा

व्रतार्क० ण्किारयेत्॥सितेंदुःशंखकुंदाभास्तावच्छीनिलाप्रकीर्तिताः॥नंद्यावेवारुणंज्ञेयंवापिस्याद्धुतव
१७ र्णिका॥ लिंगानिकृष्णवर्णानिपार्श्वतोद्वादशैवतु॥परिधिःपीतवर्णःस्यात्कर्मतंचंपवर्णकं॥
॥ ॥इतिलिंगतोभद्रमंडलानि॥ अथमंडलदेवताः॥तत्रमध्येब्रह्माणं॥ब्रह्मजज्ञानंगोतमोब्र
ह्मात्रिष्टुप्॥ब्रह्मस्थानेप्रजनेविनियोगः॥एवमग्रेपि॥ ब्रह्मजज्ञानं॥ततउदीच्यांमारभ्यवायव्यपर्यं
तंसोमादयोवायव्यांताअष्टौलोकपालास्थापनीयाः॥ तत्रआप्यायस्वगोतमःसोमोगायत्री॥ॐ
आप्यायस्व० अग्नीत्वाजिगत्नःसुनःशेपईशानोजगती॥अभित्वादेवसवितः॥इंद्रंवोमधुच्छं
दाइंद्रोगायत्री॥ॐइंद्रंवोविश्वतः॥अग्निकाण्वोमेधातिथिरग्निर्गायत्री॥ॐअग्निदूतं॥यमायसो
मंयमोनुष्टुप्॥ यमायसोमं०॥मोषुणःघोरःकण्वोनिर्ऋतिर्गायत्री॥मोषुणः॥तत्वायामिशुनःशे राम
पोवरुणस्त्रिष्टुप्॥तत्वायामि०॥वायोशतंगोतमोवायुरनुष्टुप्वायोशतं०वायुसोममध्येध्र १७
ुवोवत्सरः॥जरयाअत्रमैत्रावरुणिर्वसिष्ठोवसवस्त्रिष्टुप्॥जरयाअत्रसोमेशानमध्येएकाद

शरुद्राः॥आरुद्रासःश्यावाश्वएकादशरुद्राजगती॥आरुद्रासः॥ईशानेंद्रमध्येद्वादशादित्याः॥सानुसा
मर्त्योमत्स्योद्वादशादित्यागायत्री॥सा॥नुकृतियात्॥इंद्राग्निमध्येअश्विनाराहूगणोगोतमोविनावु
स्त्रिंकअश्विनावर्तिः॥अग्नियममध्येविश्वेदेवाः॥स्वपेस्टकात्॥ॐमासोमधुच्छंदाविश्वेदेवा
गायत्री॥ॐमासः॥यमनिर्ऋतिमध्येसप्तयक्षान्॥अभित्यंदेवंसवितुर्यक्षाप्रकृतिः अभित्यंदेवंसवि
तारमोण्योःकविक्रतुमर्चामिसत्यसवंरत्नधामभिप्रियंमतिंकविं॥ऊर्ध्वायस्यामतिर्भाअदि
द्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुःकृपास्वः॥निर्ऋतिवरुणमध्येभूतनागान्॥आयंगौः
सार्पराज्ञीगायत्री॥आयंगौः॥वरुणवायुमध्येगंधर्वाप्सरसः॥अप्सरसामेतत्राकुष्ठभ्रंगोगंध
र्वाप्सरसोनुष्टुप्॥अप्सरसांगंधर्वाणां०॥ब्रह्मणोयमध्येस्कंदनंदीश्वरशूलमहाकालान्॥कुमा
रंकुमारस्त्रिष्टुप्॥कुमारंमाता०॥वृषभंवृषभोवैतनोवृषभोनुष्टुप्॥वृषभंमा०॥ब्रह्मेशान
मध्येदक्षादीन्सप्त॥अदितिर्द्यौर्वामदेवोदक्षादिर्दक्षोनुष्टुप्॥अदितिर्द्यौर्जनिष्टाः॥ब्रह्मेंद्रमध्येदुर्गां

व्रता० विष्णुंच॥ तामग्निवर्णामिति अग्निर्दुर्गा त्रिष्टुप्॥ तामग्निवर्णां० इदं विष्णुः काण्वो मेधातिथिर्वि
१८ ष्णुर्गायत्री॥ इदं विष्णुः॥ ब्रह्माग्निर्मध्ये स्वधां॥ उदीरतां शंखः स्वधा त्रिष्टुप्॥ उदीरतामवर
ताः॥ ब्रह्मयममध्ये मृत्युरोगान्॥ परं मृत्यो शंकायनो मृत्युरोगास्त्रिष्टुप्॥ परं मृत्यो अनुपरे
हि० ब्रह्मनिर्ऋतिमध्ये गणपतिं गणानां त्वा गृत्समदो गणपतिर्जगती गणानां त्वा० ब्रह्मवरु
णमध्ये अपः॥ शन्नो अंबरीषः सिंधुद्वीप आपो गायत्री शन्नो देवीः॥ ब्रह्मवायुमध्ये मरुतः॥ म
रुतो यस्य राहूगणो मरुतो गायत्री० मरुतो यस्य॥ ब्रह्मणः पादमूले कल्किकाधः पृथिवीं॥ स्यो
ना मेधातिथिर्भूमिर्गायत्री॥ स्योना पृथिवी॥ तत्रैव गंगादिनद्यः इमं मे सिंधुक्षित्प्रैयमेधा
गंगायमुनासरस्वत्यो जगती॥ इमं मे गंगे यमुने॥ तत्रैव सप्तसागरान् वा धाम्नो राजन्नितो वरु राम
ण नो मुंच॥ यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुंच॥ सुमित्र्या न आपो ओषधी १८
हिंसीरतो विश्वस्य वारत्वे चरुणनो मुंच॥ तदुपरि मेरुं नमइति नाम्ना मेरुं॥ ततो मंडलाद्बहिः सो

मादिसमीपेत क्रमेणायुधानि गदां त्रिशूलं० वज्रं० शक्तिं० दंडं० खड्गं पाशं० अंकुशं० तद्बाह्येपु
नरपि तेनैव क्रमेण गौतमं० भरद्वाजं० विश्वामित्रं० कश्यपं० जमदग्निं० वसिष्ठं० अत्रिं अरुंधतीं०
तद्बाह्ये पूर्वादि ऐंद्री० कौमारी० ब्राह्मी॥ वाराही० चामुंडा० वैष्णवी० माहेश्वरी० विनायकं० इत्यष्टौ
शक्तयः प्रतिष्ठाप्य प्रत्येकं संपूज्य वा पूजयेत्॥ इति मंडलदेवताः॥ अथ मुद्रालक्षणानि॥ हेमाद्रौ॥ सं
मुखीकृतहस्तौ द्वौ किंचित्संकुचितांगुली॥ मुकुलीनु समाख्याता पंकजं प्रसृतैव सा॥ ह्वौ क्ता
मुकुलिया च प्रदेशे निःसृतांगुलिः॥ व्याकोशा मुद्रा मुकुलाप्य मुद्रां प्रदर्शयेत्॥ अंगुष्ठे वक्षिता
तौ तु स्वकीयांगुलिवेष्टितौ॥ उभौ वा निमुखौ हस्तौ योजयित्वा तु निष्ठुरां॥ तर्जन्यं कुंचितं कृत्वा तथै
व कनीयसी अधोमुखी दृष्टिः स्वा स्थिता मध्ये कस्य तु॥ चतस्रः स्थोस्थिताः पृष्ठे अंगुष्ठौ द्वे कृतः कु
रु॥ नाराच्यवस्थितौ द्वौ तु व्योममुद्राप्रकीर्तिता॥ तेषां तरे सर्वदेवता पूजने साधारणेन षण्मुद्रा चैतं
॥ देवता देन संतुष्टा सर्वदा सन्मुखी भवेत्॥ अंगुष्ठो निक्षिपेज्जे यं मुद्रा सा वाहनी मता॥ संगृह्य मिदि

व्रता० ये स्येयं मुद्रा त्वावाहनी स्मृताः॥ अधोमुखी त्वियं चेत्स्यात्स्थापनी मुद्रिका मता॥ उच्छ्रितांगुष्ठितो ऊर्ध्व
१९ स्संमुखीकरणं भवेत्॥ प्रहृष्टांगुलिकौ हस्तौ मिथः श्लिष्टौ तु सम्मुखौ॥ कपित्थे हृदयं सेयं मुद्रा
प्रार्थनसंज्ञिका॥ इत्येवं सर्वदेवानां पूजने षट् प्रदर्शयेत्॥ शिवपूजने लिंगमुद्रा॥ उच्छ्रितं दक्षि
णांगुष्ठं वामांगुष्ठेन बंधयेत्॥ वामांगुलीर्दक्षिणाभिरंगुलीभिश्च वेष्टयेत्॥ लिंगमुद्रेयमाख्याता
शिवसान्निध्यकारिणी॥ श्रीकामः श्रीं स्निक्कवीत राज्यकामस्तु नेत्रयोः॥ मुखे त्वन्नाद्यकामस्तु श्री
वायां रोगशांतिकृत्॥ हृदये सर्वकामी च ज्ञानार्थी नाभिमंडले॥ राज्यकामस्तु गुह्ये वै राष्ट्रकामस्तु
पादयोः॥ रामपूजने प्रदर्श्या मुद्राः॥ तथा च रामार्चनचंद्रिकायामगस्त्यः॥ आवाहनी स्थापनी च
सन्निधीकरणी तथा॥ सुसंनिरोधनी मुद्रा सुमुखीकरणी तथा॥ संकलीकरणा चैव महामुद्रा राम
तथैव च॥ शंखचक्रगदापद्मधेनुकौस्तुभगारुडाः॥ श्रीवत्सवनमाले च योनिमुद्रां प्रदर्शयेत् १९
॥ एताभिः संप्रदर्श्याभिर्मुद्राभिस्तु प्रचक्रुणः॥ यो राममर्चयेन्नित्यं मोदयेत्स सुरेश्वरं॥ द्रावयेद

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

पि विघ्नांस्ततः प्रार्थितमाप्नुयात्॥ मूलाधाराद्द्वादशांतमानीतकुसुमांजलिः॥ त्रिस्थानगततेजो
भिर्विनितः प्रतिमादिषु॥ आवाहनीयं मुद्रा स्याद्देवार्चनविधौ मुने॥ एषैवाधोमुखी मुद्रा स्था
पने स्यादिते पुनः॥ उन्नतांगुष्ठयोगेन मुष्टीकृतकरद्वयं॥ सन्निधीकरणी मुद्रा देवार्चनविधौ
मुने॥ अंगुष्ठगर्भिणी सैव मुद्रा स्यात्सन्निरोधिनी॥ उत्तानमुष्टियुगला सम्मुखीकरणं मता॥ अंगै
र्देवांगविन्यासः संकलीकरणी भवेत्॥ अन्योन्यांगुष्ठसंलग्ना विस्तारितकरद्वयी॥ महामुद्रेयमा
ख्याता न्यूनाधिकसमापनी॥ कनिष्ठानामिकामध्यां तस्यां गुष्ठादनद्यतः॥ गोपितांगुलमूलेन सम्ब
द्धा मुकुलीकृता॥ करद्वयेन मुद्रा स्यात् शंखाख्येयं सुरार्चने॥ अन्योन्याभिमुखस्पृष्टाभिः स्वयं तु वेष्टये
त्॥ अंगुलिभिः प्रयत्नेन मंडलीकरणं मुने॥ चक्रमुद्रेयमाख्याता गदामुद्रा ततः परं॥ अन्योन्याभिमुखा
श्लिष्टाः ततः कौस्तुभसंज्ञकाः॥ कनिष्ठेऽन्योन्यसंलग्ने चिबुके हि परस्परं॥ वामस्य तर्जनी मध्ये मध्यानामि
कयोरपि॥ वामानामिकसंस्पृष्टा तर्जनी मध्यमोत्थिता॥ पर्यायेण नतांगुष्ठद्वयी कौस्तुभलक्षणं॥

ग्रं०र्क २० कनिष्ठान्यो न्यसंलग्नौ वीपरीतं तु योजिता॥ अधस्तात्स्थापितां गुष्ठा मुद्रा गारुडसंज्ञका॥ तर्जन्यं
गुष्ठमध्यस्था मध्यमानामिका द्वयी॥ कनिष्ठानामिका मध्य तर्जन्यग्र करद्वयी॥ मुने श्रीवत्समु
द्रेयं वनमाला च वेत्ततः॥ कनिष्ठानामिका मध्या मुष्टिरुन्नत तर्जनी॥ परिक्रांता शिरस्तु वैस्त
र्जनी मांरिवौकसः॥ योनिमुद्रा समाख्याता द्यो जत्कर द्वया श्रिता॥ तर्जन्या क्रष्टमध्यां ते स्थितानां
मिक युग्मिका॥ मध्यस्थ त स्थितां गुष्ठायेयं शिशमुने॥ इति मुद्रालक्षणं॥ अथोपचाराः परार्थ
द्रष्टे ज्ञानमालायां॥ अष्टत्रिंशत्सोडशावा दशपंचोपचारकाः॥ तान्विनमं प्रवक्ष्यामि केतेते
श्रवक्त तैश्च किं॥ अर्घं च पाद्याचमने मधुपर्कमुपस्पृशं॥ स्नानं नीराजनं वस्त्रमाचमनं चोप
वीतकं॥ पुनराचमनं भूषे च दर्शनालोकनं ततः॥ गंधपुष्पे धूपदीपौ नैवेद्यं च ततः क्रमात्॥ पानी राम
यं तोयमाचामं हस्तवास्ततः परं॥ हस्तवासकरोद्वर्तनं॥ तांबूलमनुलेपनं च पुष्पदानं पुनः पुनः २०
॥ गीतं वाद्यं तथा नृत्यं स्तुतिश्चैव प्रदक्षिणं॥ पुष्पांजलि नमस्कारावष्टत्रिंशत्समीरिताः॥ इत्यष्ट

त्रिंशत्॥ आसनं स्वागतं चार्घ्यं पाद्यमाचमनीयकं॥ मधुपर्कास्नानस्नात वसनाभरणानि च॥ सुगं
धः सुमनो धूपो दीपो मन्नेन तर्पणं॥ माल्यानुलेपने चैव नमस्कार विसर्जने॥ इति षोडश॥ अ
र्घ्यपाद्याचमार्सेन मधुपर्काचमान्यपि॥ गंधादयो निवेद्यांता उपचारा दशाक्रमात् इति दश॥ गं
धपुष्पे धूपदीपौ नैवेद्यं पंचमं स्मृतं॥ मिति पंच॥ शारदातिलके षोडशो काः॥ आसनस्नान
वस्त्रा भूषणानि परिस्पृश द्वादशा महाकपिलरात्रे॥ गंधं तैलमयो दद्यादेवस्याप्रतिमं ततः
॥ दूर्वांश्चविविस्तु क्रांता चरणा कं पद्ममेव च॥ पाद्यांगानि चत्वारि कथितानि समासतः॥ कर्पूर
मगरुं पुष्पद्रव्याण्याचमनीयके॥ सिद्धार्थमक्षतं चैव दूर्वांचतिलमेव च॥ पंच गंधं फलं पुष्पम
ष्टांगं त्वर्घ उच्यते॥ स्नाने वस्त्रे तथा नैवेद्याचमनीयकं॥ उद्वर्तनं तत्रैव॥ रजनी सह देवी च शि
रीषं लक्ष्मणा च॥ महानन्ना कुरंगत्वाल्लिउद्वर्तनमिहोच्यते॥ मंत्रतंत्र प्रकाशे॥ चक्रुतागंधपु
ष्पाणि स्नानपात्रे तथान्वयं॥ तत्रैव॥ इतीयाचावे प्ररात्म्या रूपाणिताः स्तंडुलाः शुभाः॥ अगस्त्यसंहि

व्रं०र्क तापं॥ तथान्यमनंतपात्रेपिदद्याक्षातिफलंमुने॥ एवंगमपिकांकोतंज्ञात्वान्यमतीपके॥ उक्तंच
२१ व्यासाज्ञेनतंत्रांतरे॥ तंडुलान्प्रक्षिपेत्तेषुद्रव्याभावेतुतत्स्मरन्॥ प्रयोगपारिजातेव्यासः॥ प्रति
मापटयंत्राणांनित्यस्नानंनकारयेत्॥ कारयेत्पर्वदिवसेयदावामलधारणं॥ ज्ञानमालायां॥
नार्कंतैरर्चयेद्विष्णुं नतुलस्यागणाधिपं॥ नदूर्वयायजेद्देवीं बिल्वपत्रैर्दिवाकरं॥ उन्मत्तक
मपुष्पंचविष्णोर्बर्ज्यंसदाबुधैः॥ अकृतामुपयवाःप्रोक्ताइतिपदार्थादर्शोक्तेःत्वाद्यवाना
मेवंप्रतिषेधोमतंतंडुलादीनां॥ तंत्रांतरे॥ महानिषेकंसर्वत्रचरात्रेनैवप्रकल्पयेत्॥ सर्वत्रै
वप्रशस्तोक्तःशिवसूर्यार्चनंविनेतिविस्तरेस्तुतातच्चरकृतेआचारमयूखेद्रष्टव्यं॥ अथव्र
तोद्यापनानुक्तौविधिः॥ षष्ठीचंद्रोदयेनंदीपुराणे॥ कुर्यादुद्यापनंतस्यसमाप्तौयदुदीरितं राम
॥ उद्यापनंविनायत्तुतद्व्रतंनिष्फलंभवेत्॥ यत्रचोद्यापनंनोक्तंव्रतानुगुणतश्चरेत्॥ वित्तानु २१
सारतोदद्यादनुक्तोद्यापनेव्रते॥ गांचैवकांचनंदद्याद्व्रतस्यपरिपूर्तये॥ समाप्तावुद्यापन

मनुक्तोद्यापनविषयं॥ उक्तोद्यापनेतु॥ आदौमध्येपवासंतेव्रतस्योद्यापनंभवेदितिवचना
त्रितयस्यापि॥ अथव्रतभंगेसंपूर्णव्रतविधिर्हेमाद्रौभविष्ये॥ युधिष्ठिरउवाच॥ संपूर्णता
मनुष्ठानांव्रतानांतुजनार्दन॥ कुरुप्रसादंगुप्तार्थमेतन्मेवक्तुमर्हसि॥ श्रीकृष्णउवा
च॥ ॥साधुसाधुमहाबाहोहोक्तनराज्ञायुधिष्ठिर॥ रहस्यंपरंरहस्यंतेकथयामिव्रतेतव॥
संपूर्णताकृतायत्रतत्रत्सम्यक्फलप्रदं॥ यद्व्रीर्णैर्नरनारीभिर्नवेत्संपूर्णकारकं॥ अवश्य
तद्वकर्तव्यंसंपूर्णफलकांक्षिभिः॥ किंचिद्भंगप्रमादेनपतितंव्रतिनोस्थितं॥ तत्संपूर्णंभवेत्सर्वं
व्रतेनानेनपांडव॥ उपवासैर्बहुविधैर्महामोहात्पांडव॥ पतनंकिंचिदेवस्यात्तद्विघ्नविनाशकं
॥ तत्संपूर्णंभवेत्सार्थमसंसंशयः॥ कांचनंरूप्यकरूपंशक्तिमिनानुघटापयेत्॥ सत्यव्रतस्य
योदेवस्सरूपंविनिर्मितं॥ व्रतंत्रीपुंसयोर्वापयद्यारब्धंयव्रतंकिंचन॥ तच्चनिष्पादिकंकिंचिद्
बासवंतथास्थितं॥ दिग्भुजंपंकजारूढंसौम्यंप्रहसिताननं॥ निष्पादितंशिल्पिनाचतस्मिन्नेवादि

व्रता० नेपुनः ॥तन्मानेतु पुनः प्राप्ते ब्राह्मणो विधिनागृहे॥ स्नापयेत्समसादध्वाघृतक्षौद्ररसांबुभिः॥
२२ गंधचंदनपुष्पैश्च स्रजां कुर्यात्समाहितः॥ तो यत्पूर्णस्य कुंभस्य मुखे विन्यस्य देवतां॥ धूप
दीपाकृतैर्वस्त्रैः रत्नैर्बलिपकारकैः॥ अर्घ्यमिदद्यात्तन्नाम्नामंत्रेणानेन पांडव॥ उपास
नस्य दानस्य प्रायश्चित्तं कृतांजले॥ शरणं वः प्रपन्नास्मः कुरुध्वाद्यदयां पुनः॥ प्रसन्नो भव
ति तस्य चिन्न चर्यव्रतस्य च॥ कुरु प्रसादं संपूर्णं व्रतं संजायतां मम॥ यच्छिद्रं तपच्छिद्रं यच्छि
द्रं यज्ञकर्मणि॥ तत्सर्वं त्वत्प्रसादेन संपूर्णं जायतां मम॥ पूर्वदक्षिणपश्चात्तु उत्तरेषु च बलिं हरेत्
॥ उर्ध्वधस्तात्सर्वेभ्यो दिक्पालेभ्यो नमो नमः॥ पादौ च जानुनी चैव कटिशीर्षकवस्त्राति॥ कुक्षि
तु रुद्रयंपृष्ठं वाक् च कृष्णश्च शिरोरुहान्॥ पूजयित्वा स्मरेद्बस्य ततः पश्चात्क्षमापयेत्॥ पूजितस्त्वं
यथा ब्रात्मानमस्तेस्तु सुरोत्तमः॥ ऐहिकामुष्मिकीं देवकार्यसिद्धिं दिशस्व मे॥ एवं क्षमापयित्वा राम
तु देवं रूपविधानतः॥ तन्मूर्तिं च द्विजातिभ्यो विधिवत्प्रतिपादयेत्॥ स्नित्वा पूर्वामुखो विप्रो २२

गृह्णीयाद्दर्भपाणिना॥ विप्रहस्ते प्रयच्छेद्दाता चैवोत्तरामुखः॥ मंत्रेणानेन कौंतेय सोपवासः प्रप
न्नतः॥ इदं व्रतं मया खंडं कृतमासीत्सुराद्विज॥ तत्सर्वं पूर्णमेवास्तु तव मूर्तिप्रदानतः॥ ब्राह्मणोपि
प्रयच्छेत मंत्रेणानेन तद्व्रतं॥ वाक्यं पूर्णमितं प्रज्ञामंत्रेनानेन ते पुरा॥ संपूर्णं स्यात्प्रदेन्तव पूर्णमि
तोरथाः॥ ब्राह्मणाय प्रकृत्वा षतेतत्मन्पंते दिव्यौकसः॥ सर्वदेवमया विप्रा न तद्वचनमन्यथा॥ जल
धिः क्षारतां नितः पावकः सर्वभक्षतां॥ सहस्रनेत्रः शक्रोपि कृता विप्रैर्महात्मभिः॥ ब्राह्मणानां तु
वचनैर्ब्रह्महत्याविनिर्गति। अश्वमेधफलं सांपत्ननन्नतेनात्र संशयः॥ आसवा स्मी किवचनात्स
राशरवसिष्ठयोः॥ गर्गगौतमधौम्यात्रिवसिष्ठांगिरसस्तथा॥ वचनान्नारदादीनां पूर्णं भवतु मे व्र
तं॥ एवंविधविधानेन गृहीत्वा ब्राह्मणे व्रजेत्॥ रामात्स्वेतये सर्वब्राह्मणस्य यः स्वगृहं स्वयं॥ ततः
पंचमहायज्ञान्निर्वर्त्ये भोजनादिकं॥ एवं यः कुरुते नत्सा व्रतमेतन्नरो त्तमः॥ तस्य संपूर्णतां याति
तद्व्रतं पत्युरा कृतं॥ खंडं संपूर्णतां याति प्रसन्ने वतदैवते॥ मातानि यानि मर्त्यमोहवशाद्गृहीत्वा

जन्मांतरेष्वपि तरेणसमक्करेण॥ संपूर्णव्रजनपरस्मपुरोत्तवं तिपर्वव्रतानि परिपूर्णफलप्रदानि.
॥ अथसर्वव्रतेषु सामान्यतः पूजाविधिः॥ सहस्रशीर्षेत्यावाहनं॥ आगच्छागच्छ देवेश ते
जोराशे जगत्पते॥ क्रियमाणां मया पूजां गृहाण सुरसत्तम॥ पुरुषएवेत्यासनं॥ नानारत्नसमायु
क्तं कार्त्तस्वरविभूषितं॥ आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां॥ एतावानिति पाद्यं॥ गंगादिस
र्वतीर्थेभ्यो मयाप्रार्थनयाहृतं॥ तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यतां॥ त्रिपादूर्ध्वेत्यर्घ्यं
॥ नमस्ते देवदेवेश नमस्ते धरणीधर॥ नमस्ते कमलाकांत अर्घ्यं नः प्रतिगृह्यतां॥ तस्माद्विरा
ळित्याचमनीयं॥ कर्पूरवासितं तोयं मंदाकिन्याः समाहृतं॥ आचम्यतां जगन्नाथ मया दत्तं हि भक्ति
तः॥ यत्पुरुषेणेति स्नानं॥ गंगा च यमुना चैव नर्मदा च सरस्वती॥ तापी पयोष्णी रेवा च ताभ्यः स्ना
नार्थमाहृतं॥ तोयमेतत्सुखस्पर्शं स्नानार्थं प्रतिगृह्यतां॥ तं यज्ञमिति वस्त्रं॥ सर्वभूषाधिके दे
वलोकलज्जानिवारणे॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यतां॥ तस्माद्यज्ञात्सर्वहुतः संभृत

मिति यज्ञोपवीतं॥ दामोदर नमस्तेस्तु त्राहि मां भवसागरात्॥ ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्त
म॥ तस्माद्यज्ञात्सर्वहुत इति गंधं॥ श्रीखंडं चंदनं दिव्यं गंधाढ्यं सुमनोहरं॥ विलेपनं सुरश्रेष्ठ प्री
त्यर्थं प्रतिगृह्यतां॥ तस्मादश्वा इति पुष्पं॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो॥ मया
हृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां॥ यत्पुरुषमिति धूपं॥ वनस्पतिरसोद्भूतो गंधाढ्यो गंध
उत्तमः॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां॥ ब्राह्मणोस्येति दीपं॥ आज्यं च वर्तिसंयुक्तं
वह्निना योजितं मया॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापहं॥ चंद्रमा इति नैवेद्यं॥ अन्नं चतुर्वि
धं स्वादु रसैः षड्भिः समन्वितं॥ भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यतां॥ इदं फलं मया देव स्था
पितं पुरतस्तव॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥ नाभ्या आसीदिति तांबूलं॥ पूगीफलं मह
द्दिव्यं नागवल्लीदलैर्युतं॥ कर्पूरादिसमायुक्तं तांबूलं प्रतिगृह्यतां॥ सप्तास्यासन्निति दक्षिणा॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे॥ चंद्रादित्यौ च

व्र.ता० धरणी विष्णुरग्निस्तथैव च॥ त्वमेव सर्वज्योतिषी आर्तिक्यं प्रतिगृह्यतां॥ इति नीराजनं॥ यज्ञेन य
२४ ज्ञमिति पुष्पांजलिः॥ नमस्ते पुंडरीकाक्ष नमस्ते त्वमरप्रिय॥ नमस्ते कमलाकांत वासुदेव नमो
स्तु ते॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ तानि तानि विनश्यंतु प्रदक्षिणपदे पदे॥ इ
ति प्रदक्षिणा॥ नमः सर्वहितार्थाय जगदाधारहेतवे॥ साष्टांगोयं प्रणामस्तु प्रयत्नेन मया कृ
त इति नमस्कारः॥ इति सामान्यपूजाविधिः॥ ॥इति मीमांसकनीलकंठनंदात्मजशंकर
कृतौ व्रतार्के परिभाषासमाप्तिमकाणि यात॥ अथ चैत्रप्रतिपद्व्रतानि॥ वर्जयित्वा मधौ यस्तु द
धिक्षीरघृतैक्षवं॥ दद्याद्वस्त्राणि सूक्ष्माणि रसपात्रैर्युतानि च॥ रसपात्रैर्दध्यादिपात्रैः॥ सं
पूज्य विप्रमिथुनं गौरी मे प्रीयतामिति॥ हेमाद्रौ पाद्मे॥ वर्जयेच्चैत्रमासे तु यस्तु गंधानुलेप
नं॥ शुक्तिं गंधभृतां दद्याद्विप्राय श्वेतवाससी॥ तस्मात्तु दक्षिणां दद्यात्सर्वकामार्थसिद्ध राम
ये॥ गंधदानवस्त्रदानमंत्रौ॥ नंदनावासमंदारवृंदारकार्चितं॥ चंदनं त्वत्प्रसादान्मे सा २५

प्रानंदप्रदोस्तु वा॥ शरण्यं सर्वलोकानां लज्जाया रक्षणं परं॥ सुवेषधारि त्वं यस्माद्वासः शांतिप्र
यच्छ मे॥ इति मंत्राभ्यां गंधवाससी दद्यात्॥ अथ चैत्रशुक्लप्रतिपदि संवत्सरारंभविधिर्ब्राह्मे
॥ अत्र प्रतिपत्सूर्योदयव्यापिनी ग्राह्या॥ ॥भगवानुवाच॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमे
हनि॥ शुक्लपक्षे समग्रं तु तदा सूर्योदये सति॥ इति ब्राह्मात्॥ प्रवृत्ते मधुमासे तु प्रतिपद्युदिते र
वाविति न विष्णोत्तरख्व॥ दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्वैव विस्तरो वसंतराजे बाजिराजे
तथैव च॥ पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति वृद्धवसिष्ठवचनादिति बहवः॥ युक्तं
तु दिनद्वये तद्व्याप्तौ संबंधाभावे संवत्सरारंभशुक्लकार्यं लोकप्रसक्तं विद्वद्वचनं सर्वमुताग्रा
त्यता विधायकं॥ दिनद्वये तत्संबंधे तु संपूर्णत्वाद्दैवत्वात्पूर्वा ग्राह्येकदा कार्यमित्याकांक्षा
विरहाद्वैतत्सर्वयुतत्वविरहात्कैनैतद्वचनात्प्रवैति बाले प्रवर्तयामास तथा कालस्य गणनामपि
॥ ग्रहान्नक्षत्रं तु मासान्पर्वान्संवत्सराधिपान्॥ ददौ सर्वग्रहा बान्ब्रह्मा सर्वदेवसमागमे॥ ब्राह्मा

सन्नायां ब्रह्मणमनिर्द्देश्यं तनुं ततः॥ तथोक्तेस्ते नमस्यंतस्तुवंतश्चाप्युपासते॥ ततस्तेत्र ततस्तु
श्रूषागत्वाचैवस्वमालयं॥ स्वानिस्वान्यथकर्माणि तेनिरिक्तास्तुचक्रिरे॥ ब्राह्मीसन्नाका
मरूपाविशेषेणतदात॥ धारयत्यमलंरूपमनिर्देश्यं मनोहरं॥ ततः प्रवृत्तियोधर्मः पूर्वैव
प्रवर्तितैः कृतः॥ अद्यापिगुरुः सुतरां कर्त्तव्योसौप्रयत्नतः॥ तत्र कार्यमिहाशांतिः सर्वकल्म
षनाशिनी॥ सर्वोत्पातप्रशमनी कलिदुःखप्रनाशिनी॥ आयुःप्रदापुष्टीकरीधनसौभाग्य
वर्द्धिनी॥ मंगल्यानपवित्राच लोकद्वयसुखावहा॥ तस्यामादौ चसंपूज्यो ब्रह्मलोकमलसंभवः
॥पाद्यार्घपुष्पधूपैश्च वस्त्रालंकारभोजनैः॥ होमैर्बलिस्तुपचारैश्च तथाब्राह्मणतर्पणैः॥ ततः॥
क्रमेण देवेभ्य पूजा कार्या प्रियकः पृथक्॥ कृत्वोंकारनमस्कारौ कुशोदकतिलाहुतैः॥ पुष्प
धूपप्रदीपैश्च भोजनैश्च यथाक्रमं॥ मंत्रसंपूजनार्थंतु बहुरूपं प्रतिस्फशोत॥ मंत्रमितिजातावेक
वचनं॥ बहुरूपंमंत्रंनानारूपान्मंत्रान्परिगृह्णीयादित्यर्थः॥ तेन ॐ नमो ब्रह्मण इत्यादि विलि

वेपरमात्मनेममइत्येवमंत्रवाक्यं हंदोपान्तादेक्ताशष्टतुर्थ्यंताः॥ प्रणवादयोनमोंतामंत्र
त्वेनस्मात्याः॥ ॐ नमो ब्रह्मणे तुभ्यं कामाय चमहात्मने॥ नमस्तेस्तु निमेषाय त्रुट्ये च नमोस्तु ते
॥लवाय च नमस्तुभ्यं नमस्ते क्षणाय च॥ नमोनमस्ते काष्ठायै कलायै ते नमो नमः॥ नाडिकायै तु
सूक्ष्मायै मुहूर्ताय नमो नमः॥ नमो निशाभ्यः पुण्येभ्यो दिवसेभ्यश्च नित्यशः॥ पक्षाभ्यां चाथमा
सेभ्यः ऋतुभ्यः षड्भ्य एवच॥ अयनाभ्यां च पंचभ्यो वत्सरेभ्यश्च सर्वदा॥ नमस्कृत युगादिभ्यो
गतेभ्यश्च नमो नमः॥ अष्टाविंशतिसंख्येभ्यो नमः॥ राशिभ्यः करणेभ्यश्च व्यतीपाते च एव च
॥प्रतिवर्षाधिपेभ्यश्च विश्रान्तोभ्यो नमः सदा॥ नमोस्तु कुलनागेभ्यः सानुयात्रेभ्य एवचा॥ सानु
यात्रेभ्यः सानुचरेभ्यः॥ नमश्चतुर्दशभ्यश्च मनुभ्योस्तु नमो नमः॥ नमः पुरंदरेभ्यश्च तत्क्षये
भ्यो नमो नमः॥ पंचाशते नमो नित्यं दक्षकन्याभ्य एवच॥ नमो देवेभ्यस्सन्नप्रयेज्ञपापैचापसर्वदा
॥नक्षत्रायनमस्तुभ्यं सर्वाभिजनकायच॥ नमस्ते बहुरूपिणे अधिपुत्राय पतिनिः सहितायचा॥ नं

व्रता० २६ नमोबुध्येनिग्रायेधनदायच॥नलकूबरायपद्मायगुह्यकस्वामिनेनमः॥नमोस्तुशंखपद्मा
भ्यांनिधिभ्यांमेघनिस्सदा॥जंदकाय्यैनमोनित्यंसुरभ्यैचनमोनमः॥वेदवेदांगवेदांतविद्यास
स्थेभ्यएवच॥नागयक्षसुपर्णेभ्योनमोस्तुगरुडायच॥सप्तभ्यश्चसमुद्रेभ्यःसागरेभ्यश्चस
र्वदा॥उत्तरेभ्यःकुरुभ्यश्चनमोहैरण्वतायच॥भद्राश्वकेतुमालाभ्यांनमःसर्वत्रसर्वदा॥इलावृ
तायचनमोहरिवर्षायचैवहि॥नमःकिंपुरुषेभ्यश्चभारतायनमोनमः॥नमोजारदनेदेभ्योन्व
भ्यश्चापसर्वदा॥पातालेभ्यश्चसप्तभ्योनरकेभ्योनमोनमः॥कालाग्निरुद्रशेषाभ्यांहरयेक्रोड
रूपिणे॥सप्तभ्यस्त्वथलोकेभ्योमहाभूतेभ्यएवच॥मनसेबुद्धयेचैवनमःप्रकृतयेतथा॥पुरु
षायाग्निमानायनमोस्त्वव्यक्तमूर्तये॥हिमवत्प्रमुखेभ्यश्चपर्वतेभ्योनमस्तथा॥पौराणिभ्य राम
श्चगंगाभ्यःसप्तभ्यश्चनमोनमः॥नमोस्त्वाद्यमुनिभ्यश्चसप्तभ्यश्चाथसर्वदा॥नमोस्तुपुष्करादि
भ्यस्तीर्थेभ्यश्चपुनःपुनः॥निम्नगाभ्योनमोनित्यंवितस्ताद्याभ्यएवच॥चतुर्दशभ्योदीर्घेभ्योधाराली २६

भ्योनमोनमः॥नमोधात्रेविधात्रेचछंदोभ्यश्चनमोनमः॥सुरभ्यैरावणाभ्यांचनमोभूयोनमोन
मः॥नमस्तथोच्चैःश्रवसेध्रुवायचनमोनमः॥नमोस्तुधन्वंतरयेशास्त्रास्त्राभ्यांनमोनमः॥वि
नायककुमाराभ्यांविघ्नेभ्यश्चनमःसदा॥शाखायचविशाखायनैगमेयायवैनमः॥नमस्कं
दग्रहेभ्यश्चनमोमातृभ्यएवच॥ज्वरायरोगपतयेभस्मप्रहरणायच॥ऋषिभ्योबालखिल्येभ्यः
केशवायनमःसदा॥अगस्त्ययेनारदायव्यासादिभ्योनमः॥सोमपेभ्यश्चनमोस्तुषितेभ्योनमः
सदा॥अदितिभ्योनमोनित्यंद्वादशभ्यश्चसर्वदा॥एकादशभ्योरुद्रेभ्यःसपत्निभ्योनमोनमः॥नमो
नासत्यदस्राभ्यामश्विभ्यांनित्यमेवहि॥साध्येभ्योद्यदशभ्यश्चपौराणेभ्योनमःसदा॥आयुधे
भ्योलोकवाहनेभ्योएकोनपंचाशतेचमरुद्भ्यश्चनमोनमः॥शिल्पाचार्यायदेवायनमस्तेविश्वक
र्मणे॥अष्टभ्योलोकपालेभ्यःसानुगेभ्यश्चसर्वदा॥आयुधेभ्योवाहनेभ्योवर्मभ्यश्चनमःसदा॥आस
नेभ्योदुंदुभिभ्योदेवेभ्यश्चनमःसदा॥देवसद्मसगंधर्वपीठाभ्येभ्यश्चनिसदा॥दिग्भ्यःसप्तभ्योदेभ्यःदे

DR. BHAU DAJI

तेभ्यश्च नमो नमः॥ स्तुतस्तेभ्यश्च देवेभ्यो नागगणेभ्य एव च॥ नमस्ते वक्रतुंडाय विघ्नेशाय परमात्म
ने॥ अथवा किं वक्रतुंडोक्तेन मंत्रेण तेनैवार्चयेत्॥ प्राङ्मुखोदङ्मुखो वा विप्रान् देवानुद्दिश्य पूर्व
वत्॥ अथवा किमत्र विस्तारेण ब्राह्मणेनैव देवतोद्देशेन पूजयेदित्यर्थः॥ पूर्ववत् संप्रोक्तक्रमेण
अर्घैः पुष्पैश्च धूपैश्च वस्त्रैर्माल्यैः सहृष्टकं। सहृष्टकं सरोमांचं हृष्टरोमा सन्नर्चयेदित्यर्थः
धनधान्यादिविभवैर्दक्षिणाभिश्च सर्वदा॥ इतिहासपुराणानां प्रवक्तृंश्च द्विजोत्तमान्॥ कालज्ञान्
वेदवेदज्ञांस्तस्मात् संबंधीबांधवान्॥ अनेनैव तु मंत्रेण स्वाहांतेन पृथक् पृथक्॥ यविष्ठायाग्न
ये होमः कर्तव्यः सर्वकर्मयोः॥ वेदविद्रूपी दत्वा स्थाने प्राधानिके तथा॥ यविष्ठाय श्रेष्ठाय वेद
वित्त्वे वेदोक्तविधिज्ञः मदनरत्ने तु वेदत इति पठित्वा वेदोक्तविधिनेति व्याख्यातं॥ चतुर्थी आज्य
भागो। प्राधानिके स्थानिके स्थाने प्रधानहोमारंभे॥ होमारंभे ततः कुर्यान्मंगलाजेननं नरः
मदनरत्ने॥ शालाशेनान्ततः कार्यं मंगलाजेननं तदिति पाठः॥ भोजयित्वा द्विजान् सर्वान् समस्त राम
२७

बंधीबांधवान्॥ विशेषेण च प्रोक्तं कार्यश्चापि महोत्सवः॥ नवसंवत्सरारंभः सर्वसिद्धिप्रवर्त
कः॥ इति संवत्सरारंभविधिः॥ अथात्रैव विष्णुधर्मोत्तरोक्तमारोग्यप्रतिपद्व्रतं॥ पुष्कर उवाच
॥ संवत्सरावसाने तु पंचदश्यामुपोषितः॥ प्रातः प्रतिपदि स्नातः कुर्याद्व्रतमनन्यधीः॥ पूजयेद्
भास्करं देवं वर्णकैः कमले कृते॥ वर्णकैः रक्तश्वेतनीलपीतादिभिः॥ शुक्लेन गंधमाल्येन
चंदनेन सितेन पुष्पेण च॥ तथा कुंडलधूपेन घृतधूपेन भार्गव॥ कुंडुरुः सल्लकीनिर्यासः॥ अप
पैः सैकतैर्दद्यात् परमान्नेन भूरिणा॥ सैकतैः शर्कराविकारैः॥ ओदनेन च शुक्लेन सताज्य
ण सर्पिषा॥ सताज्यमेनिक्षीरेण॥ चषकैः शुक्लैर्वक्ति ब्राह्मणतर्पणैः॥ पूजयित्वा जगद्धाम
दिननाथं चतुर्थिके॥ आहारं प्रथमं कुर्यान्निर्घृतं मनुजोत्तम॥ सर्वं च मनुजश्रेष्ठ घृतहीनं वि
वर्जयेत्॥ तुरुष्कान् सकृद्देवान्नमाहारं च समाचरेत्॥ पानीयपानं कुर्वीत ब्राह्मणानुमतेऽशनः॥
प्रथममाहारं प्रथमग्रासं॥ सर्वं प्रथमं प्रथमं चाहारं। एकमेव ग्रासं भक्षयित्वा अवशिष्टान्नमन्नं

व्रता० त्यजेत्॥ ब्राह्मणानुमत्या पुनराहारमाहारमेव सिद्धान्नभोजनं पुनः पानीयपानं कुर्यादित्यर्थः॥ ब्रा
२९ ह्मणानुमत्या भुंजानोपि घृतहीनं न भुंजीत॥ घृतहीनं विवर्जयेदिति निषेधात्॥ संवत्सरमिदं
कृत्वा ततः सा स्त्री त्रयोदश्यां॥ पूजनं देवदेवस्य तस्मिन्नहनि भार्गव॥ संवत्सरं संवत्सरस्य शुक्लप्रति
पत्सु॥ त्रयोदश्यामिति लिंगदर्शनात्॥ सवस्त्रं सहिरण्यं च ततो दद्याद्द्विजातये॥ पूजनं पूजोपकार
णं प्रतिमादि॥ व्रतेनानेन धर्मज्ञ रोगमेवं व्यपोहति॥ आरोग्यमाप्नोति गतिं तथाग्र्यां यशस्तथा
रम्यं पुत्रांश्च भोगान्॥ व्रतेन सम्यक् पुरुषोथ नारी समर्चयेद्यस्तु जगत्प्रधानं॥ जगत्सूर्यं॥ ॥इति
आरोग्यप्रतिपद्व्रतं॥ अथास्यामेवोक्तं विद्याव्रतं॥ मदनरत्ने विष्णुधर्मे॥ मार्कंडेय उवाच॥ अ
ष्टपत्रं तु कमलं विन्यसेद्वर्णकैः शुभैः॥ ब्राह्मणं कर्णिकायां तु सम्यक् संपूजयेत् विभुं॥ ऋग्वेदं पू राम
र्वपत्रे तु यजुर्वेदं तु दक्षिणे॥ पश्चिमे सामवेदं तु उदक् चाथर्वणं तथा॥ आग्नेये च तथांगानि ध २९
र्मशास्त्राणि नैर्ऋते॥ पुराणं चैव वायव्ये ऐशान्यां न्यायविस्तरं॥ एवं विन्यस्य धर्मज्ञः सोपवासः शुभ

जपेत्॥ चैत्रशुक्लमथारभ्य सोमवासो जितेंद्रियः॥ तदा प्रतिपदं प्राप्य शुक्लपक्षस्य यादव॥ संव
त्सरं महाराज शुक्लांगं धानुलेपनैः॥ पुष्पैर्माल्येन धूपदीपैरतंद्रितः॥ संवत्सरांते गां दद्या
द्व्रते चीर्णे नरोत्तम॥ इदं व्रतं यस्तु करोति राजन् स वेदविद्यासु विधर्मनिष्ठः॥ कृत्वा सदा षड्
द्वादश वत्सराणि विरंचिलोकं पुरुषः प्रयाति॥ ॥इति विद्याप्रतिपद्व्रतं॥ ॥ अथात्रैव भविष्योक्तं ति
लकव्रतं॥ श्रीकृष्ण उवाच॥ ॥वसंते किंशुकाशोकशोभिते प्रतिपत्तिथौ॥ शुक्लायां तस्यां कु
र्वीत स्नानं नियममास्थितः॥ नारी नरो वा राजेंद्र संतर्प्य पितृदेवताः॥ नद्यास्तीरे तडागे वा गृहे वा
तद्वाजतः॥ पिष्टातकेन विलिखेद्वत्सरं पुरुषाकृतिं॥ पिष्टातकं पटवासको गंधद्रव्यचूर्णवि
शेषः॥ ततश्चंदनचूर्णेन गंधधूपादिनार्चयेत्॥ मत्सरं नामभिः पश्चान्नमस्कारांतयोजितैः॥ मा
सर्तुनामभिश्चैव वसंतादिनामभिः॥ पूजयेद्ब्राह्मणैर्विप्र मंत्रैर्वेदोदितैः शुभैः॥ संवत्सरोसी
ति पठन्मंत्रं वेदोदितं द्विज॥ नमस्कारेण मंत्रेण शरद्वीपीस्यं प्रपूजयेत्॥ शरद्वीपीसनेन स्त्रीणां पद

व्रता० २९ न्नत॥ तासां विशेषविध्यभावे वैदिकमंत्रानधिकारात्संवत्सरे॥ त्सिपरिवत्सरो सीत्यादि पञ्चविंदत्र
सिद्धोमंत्र॥ नमस्कारेण मंत्रेण संवत्सरायतमइत्यादिना॥ एवमभ्यर्च्य वासोभिः पक्वान्नमनिवेद
येत्॥ कालोद्भवैर्मूलफलैर्नैवेद्यैर्मोदकादिभिः॥ ततस्तं प्रार्थयेत्सार्घपुरः स्थित्वा कृतांजलिः॥
भगवंस्त्वत्प्रसादेन वर्षेऽस्मिन्निहितामुमे॥ संवत्सरोपवर्गोमेविलयंयातु शेषतः॥ एवमुक्त्वाप
यास्त्रीमादत्वाविप्रायदक्षिणां॥ ललाटपट्टेतिलकं कुर्याच्चंदनपंकजं॥ ततः प्रभृत्यनुदिनं ति
लकालंकृतमुखः॥ धार्यसंवत्सरं यावच्छुचितेवनभक्तजः॥ एवं नरो वा नारी वा व्रतमेतत्स
माचरेत्॥ सदैव पुरुषव्याघ्र भोगान्भुवि भुनक्त्यसौ॥ व्रतमेतत्पिशाचाये दुर्वारावैरिणो
ग्रहाः॥ निरर्थकाभवंत्येते तिलकं वीक्ष्य तत्क्षणात्॥ निरर्थकाः प्रयोजयन्त्यां निष्फलकरणो राम
भ्रसमर्पाइस्यर्थः॥ अत्रवसंतेमतिपत्तिपिः॥ सुखातस्यां प्रकुर्वीत तिवसंतप्रयुक्ता प्रतिपत् २९
लध्वा॥ तयाव्रतमिदं चैत्रे गृहीतं द्विजसन्निधौ॥ इत्यनेनेति चैत्रस्यैवेति विज्ञायते॥ पूर्वमा

सीन्महीपालो नाम्ना शत्रुंजयो जयी॥ चित्रलेखेति तस्याभूद्भार्या चारित्र्यभूषणा॥ तयाव्रतमि
दं चैत्रे गृहीतं द्विजसन्निधौ॥ वत्सरं तनपित्वा हृदि जनार्दनं॥ हंतुमाक्रम्य कामो वा समागच्छति
यः पुरः॥ प्रयाति प्रियभक्त्या हृष्ट्वा तु तिलकं नरः॥ सपत्नीदर्पप्रहरा वशीकृतमहीतला॥ भर्तु
र्हष्टा भक्तृष्टास्या सुखमास्ते निराकुला॥ यावत्करेण निर्मृतो भक्तपुत्रः सवेदनः॥ शिरोर्तिना
संप्रपातः सुहृदां सुखनायकः॥ शिरोर्त्तिनाप्रयातः शिरोवेदनाप्रयातः॥ शिरोवेदनायुक्तः॥
धर्मराजपुरा प्राप्तः सर्वभूतापहारकाः॥ तस्मिन्क्षिरो महाराज धर्मराजस्य किंकराः॥ तस्या प्रम
नुप्राप्ताप्रविष्टाः गृहमंडनाः॥ शत्रुंजयं समानेतुं कालमृत्युः पुरःसराः॥ पार्श्वस्थिता चित्रलेखं पति
लकालंकृताननां॥ दृष्ट्वा भ्रष्टसंकल्पा पराङ्मुखगताः पुनः॥ गतेषु तेषु सनृपः पुत्रेण सह भारत॥ निरु
जो बुभुजे भोगान्सर्वकर्मनिर्जितान्प्रभुजान्॥ अक्रमेण समाख्यातं मम सर्वं युधिष्ठिर॥ एतत्त्रिलो
कतिलकाख्यं विभूषणं च शुभं व्रतं सकलदुःखहरं परं च॥ इत्यं समाचरति यः स सुखं निरस्तसमस्त

व्रता० २०

प्रयाति परमच्युतमिंदुमौलेः॥ इति तिलकव्रतं॥ अथ श्रावणशुक्लप्रतिपदादि सोमवासर
मारभ्य वारपंचकं रोटकव्रतं॥ ॥युधिष्ठिर उवाच॥ हृषीकेश त्वया कारि व्रतं दानान्यनेक
धा॥ श्रोतुमिच्छामि देवेश व्रतं संपत्तिदायकं॥ येन व्रतेन देवेश पुनराज्यं लभामहे॥ तथा
व्रतं तु मे ब्रूहि पावद दानं कृपाकर॥ भगवानुवाच॥ ॥वदामि शृणु भद्रं पार्थ लक्ष्मी वृद्धिप्रदायकं
॥ धर्मार्थकाममोक्षाणां निदानं परमं व्रतं॥ युधिष्ठिर उवाच॥ ॥केन चादौ पुराचीर्णं मर्त्यलोके
न प्रकाशितं॥ विधिना केन कर्तव्यं तत्सर्वं ब्रूहि केशव॥ श्री भगवानुवाच॥ आसीत्सौम्यपत्ते
राजा सोमो नामेति विश्रुतं॥ क्षत्रधर्मेति कुशलः प्रजापालनतत्परः॥ तस्य राज्ये प्रजाः सौम्याः स
र्वधर्मपरायणाः॥ तस्य राजस्तु वामाख्यः सोपि सौम्यः शुभावहः॥ तस्मिन्सरस्के सौम्यं च सदा सौ
म्यं शुभाशुभं॥ अन्त सोमेश्वरो देवो लोकानां पालनाय च॥ तत्रासीत्सोमशर्मा ब्राह्मणो वेदपा
रगः॥ वेदार्थविच्छास्त्रविच्च शुद्धाचारो तिदुर्बलः॥ तस्य भार्या सुशीला च सा पुरंध्री चालभाषिणी

राम २०

भर्तृशुश्रूषणारता कल्याणी प्रियवादिनी॥ सो करोद्बकरं वार्धकणयज्ञं दिने दिने॥ तल लभते धिकं
नेन धनं धान्यं तथैव च॥ अतिवलेद रविन्नस्तु विचार्यं च पुनः पुनः॥ किं करोमि क्व गच्छामि
स भार्यो हिं महीतले॥ केन कर्मविपाकेन ईदृशं लभ्यते फलं॥ अथवार्थकरं धर्मः देवेश
जादिकं शुभं॥ मम मे शोकरोद्भक्ति दैत्यनाशाय पार्थिवः॥ कदाचित्वेदाविन्नो सो प्रजगाम
सरोवरं॥ अन्न सोमेश्वरः प्रत्यक्षस्तस्मिन्सोमसरोवरे॥ ब्रह्मणरूपेण कृपया परया युतः॥
तेन संदुःखितो दृष्टः सोमशर्मा द्विजोत्तमः॥ किमर्थं क्लिश्यते दुःखं त्वया प्रवरेण च॥ किंचिद
स्तु नास्ति पूर्वं तद्धर्मी दृशं फलं॥ तस्य तद्वचनं श्रुत्वा ब्राह्मणस्त्विदमब्रवीत्॥ सोमो विप्रवे
रश्रेष्ठ व्रतमेकं वदामि ते॥ तेनोदिष्टं व्रतं चेदं सर्वसंपत्तिदायकं॥ सोमशर्मोवाच॥ भो भो ब्राह्म
ण ब्रूहि व्रतं तत्त्वमेव मे॥ यस्यानुष्ठानमात्रेण लक्ष्मी वृद्धिः प्रजायते॥ कस्मिन्मासे च कर्त
व्यं किं दानं कस्य भोजनं धनं ज्ञानाय कर्तव्यं कस्य देवस्य पूजनं॥ कैस्तु पुष्पैः प्रकर्तव्या

पूजाम्वारुतराम्प्रभुना॥ नैवेद्यं किं द्रव्यं देयं अर्घं कैस्तु फलैर्न वे तत्। परितुष्टोसि विप्रेंद्र तत्सर्वं ब्रूहि
मे प्रभो॥ [redacted]उवाच॥ साधु त्वया विप्र पृष्टं व्रतं वृद्धिप्रदायकं॥ विधानं तस्य वक्ष्यामि सर्वसिद्धि
प्रदायकं॥ विधानं तस्य वक्ष्यामि सर्वसिद्धिप्रदायकं॥ श्रावणे च सिते पक्षे प्रथमे सोमवासरे॥
प्रकर्तव्यं व्रतं विप्र व्रतं नियमपूर्वकं॥ सार्द्धमासत्रयं विप्र कर्तव्यं विधिपूर्वकं॥ बिल्वदलैस्तु
कर्तव्यं चतुर्दश्यां तु कार्त्तिके॥ व्रतारंभे तु कर्तव्यो नियमस्तु विचक्षणैः॥ अद्यास्मिन् व्रते देवरोट
कस्य मनोहरं॥ करोमि परया भक्त्या यां हि मां परया गुरो॥ दिने दिने प्रकर्तव्या पूजा देवस्य शूल
पिनः॥ कथा विनातन्नोक्तं प्रत्यहं च पुनः पुनः॥ उपोषणं चतुर्दश्यां कर्तव्यं विधिपूर्वकं॥
प्रवृत्तिर्न त्वारि दिने तस्मिन् कर्तव्यं रोटकव्रतं॥ चतुर्दश्यां निराहारः स्थित्वा चैव परेहनि॥ भोक्ष्यामि
पार्वतीनाथ सर्वसिद्धिप्रदायक॥ उपोषणमंत्रः॥ कृत्वा मध्याह्निकं कर्म नित्यपूजादिकं तथा
॥ तस्यां रात्रौ तु कर्तव्या पूजा देवस्य शूलिनः॥ प्रशस्ते चैतत्प्रदेशे तु कर्तव्यं पुष्पमंडपं॥ पूज

स्तत्र विधिवो देवो धर्मकामार्थसिद्धये॥ क्षीरादिस्नपनं कुर्याच्चंदनादिविलेपनं॥ कस्तूरागुरुसक
र्पूरं मगना विविमिश्रितं॥ पुष्पैर्नानाविधैर्दिव्यैः पूज्यो देवो महेश्वरः॥ धनकामेन कर्तव्या
पूजा देवस्य शूलिनः॥ बिल्वपत्रैरखंडैश्च तुलसीपत्रकैस्तथा॥ नीलोत्पलैः श्वारूतैः कर्तव्या
पुष्पवर्द्धनः॥ कल्हारकमलैश्चैव कुमुदैश्चातिशोभनैः॥ चंपकैर्मालतीपुष्पैः कुंदैश्च प्रभा
वहैः॥ मंदारैश्चार्कपुष्पैश्च पूजा चान्यैः शिवप्रियैः॥ अन्यैर्नानाविधैः पुष्पैः ऋतुकालोद्भवैः
शुभैः॥ धूपैर्नानाविधैः पार्थपुण्यवर्द्धनसाधकैः॥ दीपास्तत्र प्रकर्तव्या घृतपूर्णमनोरमाः
॥ नैवेद्यैः पेयैस्तथा नोमैः स्वाद्भिश्च शिवप्रियैः॥ अन्यैर्नानाविधैरम्यैः तथा विप्रवरैस्तुतं
॥ नैवेद्यं तु प्रकर्तव्यं रोटकानां विशेषतः॥ कर्तव्या रोटकाः पंच पुरुषाहारमानतः॥ द्वौ तु वि
प्राय दातव्यौ देवेद्यार्थं सदा बुधैः॥ तस्मांच भोजनं प्रभुंज्या एको देवाय दातव्यो नैवेद्यार्थं सदा बु
धैः॥ महेशाय प्रदातव्यं तांबूलं सुमनोहरं॥ अर्घदानं प्रकर्तव्यं धनसंपत्तिदायकं॥ पोचफलेनारिके

व्रता० लंजंबीरंबीजपूर्वकं॥ कर्कटीं च स्तुनाशरूमातुलिंगं मनोरमं॥ अखोटकानि दाडिंगं नाणानि च
३२ मानि च॥ कर्कटी च स्तुनाप्रोक्ता अर्घदाने मनोहरा॥ अन्यैर्नानाविधैः पार्थ ऋतुकालोद्भवैः शु
भैः॥ यः करोत्यर्घदानं च तस्य पुण्यं वदाम्यहं॥ रत्नां च सागरैर्युक्तां रत्नैश्चान्यैर्मनोरमैः॥ दत्वा य
त्फलमाप्नोति तेन तत्फलमाप्नुयात्॥ अनेनैव विधानेन तत्कार्यं व्रतसिद्धये॥ पंचवर्षं तु कर्तव्यं प्र
तुलं धनमीप्सुभिः॥ पश्चाद्धुद्यापनं कुर्यादक्षोटकाख्यव्रतस्य च॥ उद्यापने तु कर्तव्यो हेमरूप्यो
तुरोटको॥ ॥इति श्रीशिवपुराणे बिल्वरोटकव्रतं॥ ॥अथ कार्त्तिकद्वितीया सा च परा क्रमापि
नीप्रात्या॥ ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमं॥ स्नानं कृत्वा भानुजायां यमलोकं न पश्य
ति॥ ऊर्जे शुक्लद्वितीयायां पूजितस्तर्पितो यमः॥ वेष्टितः किन्नरैर्हृष्टैस्तस्मै यच्छति वांछितं मिति राम
स्कांदात्॥ दिनद्वये अपराह्णव्याप्तावव्याप्तौ वा परैव॥ युग्मादिति युग्मवाक्यात्॥ हेमाद्रौ भवि ३२
ष्ये॥ प्रथमाभावऐव्यासितपक्षात्पूर्वे परा॥ ततीय युगे मासि च तुर्थी कार्त्तिके भवेत्॥ श्राव

णे कलुषा नाम तथा नाड्डे च निर्मला॥ आश्विने प्रेतसंचारा कार्त्तिके याम्यता मतेति च तत्रोद्विती
यादुपक्रम्य प्रथमायां किंचित्तापद्वितं सरस्वती॥ तृतीयायां प्रारंभ कर्तव्यत्वेन तत्त्वपित्वा
चतुर्थ्यामस्यां कर्तव्यत्वमुक्तं कार्त्तिकशुक्लपक्षे तु द्वितीयायां युधिष्ठिर॥ यमो यमुनया पूर्वं
भोजितः स्वगृहेऽर्चितः॥ अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता॥ अस्मान्निजगृहे पार्थ न भो
क्तव्यमतो नरैः॥ यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनं॥ दानानि च प्रदेयानि भगिनीभ्यो विशेषतः
॥ स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः॥ सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः॥ प्रति
पन्नकाः तत्रस्थाने मतापितृभगिनिहस्तात् द्वितीयायां तथा तपः॥ पितृमातुः स्वसुश्चैव द्वती
यायां तयोः करात्॥ भोक्तव्यं सहजाया भगिन्या हस्ततः परं॥ सर्वासु भगिनीहस्तात् भोक्तव्यं
बलवर्द्धनं॥ धनं यशस्यमायुष्यं धर्मकामार्थसाधकं॥ यस्यां तिथौ यमुनया यमराजदेवः संभो
जितो निजकराच्च स्वसृसौहृदेन॥ तस्मात्स्वसुः करतलोऽद्य यो भुनक्ति प्राप्नोति रत्नधनधान्यम

Dr BHAU DAJI

व्रता०
२१

नुत्तमं स्मृतं ॥ ॥इति हेमाद्रौ भविष्ये यमद्वितीयाविधिः ॥ अत्रैव भ्रातृद्वितीयाविधिर्लिख्यते ॥ त्वेवंसरे
॥ यस्तु भोजयते नारी भ्रातरं युग्मके तिथौ ॥ अर्चयेच्चापि तांबूलैर्न सा वैधव्यमाप्नुयात् ॥ भ्रा
तुरायुःक्षयो राजन्न भवेत्तत्र कर्हिचित् ॥ तथा ॥ यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् ॥ अ
र्घश्चात्र प्रदातव्यो यमाय सहजद्वयैः ॥ भ्रातृमन्त्रेणान्यैः अर्घमंत्रस्तु ॥ एह्येहि मार्तंडज पाशह
स्त यमांतकालोकधरामरेश ॥ भ्रातृद्वितीयाकृतदेवपूजां गृहाण चार्घ्यं भगवन्नमस्ते ॥ धर्म
राज नमस्तुभ्यं नमस्ते यमुनाग्रज ॥ पाहि मां किंकरैः सार्धं सूर्यपुत्र नमोऽस्तु ते ॥ लैंगे ॥ कार्तिके तु
द्वितीयायां शुक्लायां भ्रातृपूजनं ॥ या न कुर्याद्विनश्यंति भ्रातरः सप्तजन्मसु ॥ पाद्मे ३ उत्तरखंडे ॥ न
द्येव गिनि जो मातस्त्वदं घ्रीसरसिरुहे ॥ श्रेयसे चनमस्तुभ्यं भ्रागतोऽस्मि तवालयं ॥ मंडवा कं ततः
श्रुत्वा सत्वरं क्रियते तदा ॥ आद्य भ्रातस्मृतिभ्रातस्त्वया धन्यास्मि चालयं ॥ मंडवा कं ततः श्रु
त्वा सत्वरं क्रियते तदा ॥ आद्य भ्रातस्त्वमानदा ॥ नोक्तं यं तेद्य मज्जे हे स्वायुषे ममभाद्रे ॥ कार्तिकेशु

राम
२१

क्लपक्षस्य द्वितीयायां सहोदरः ॥ यमो यमुनया पूर्वं भोजितः स्वगृहे चितः ॥ अस्मिन्दिने यमेनापि नारी
वा पुरुषे पिवा ॥ अपविद्धाकर्मपाशैः स्वेच्छयापेय चेतिहि ॥ यापेमोविनमुख्यास्ते मुक्ताः कर्मणिश्च
हितैः ॥ अतिथ्यास्याम मस्कृत्य ततो चयेत्सर्वान्नागिन्यः संस्थाबंधनात् ॥ तेषां महोत्सवो वृत्तो यमरा
ष्ट्रे सुखावहः ॥ तस्मान्वधोत्र मज्जेहे भोजनं कुरु कार्तिके ॥ आशिषः प्रतिगृत्यास्य ानमस्कृत्य ततोर्च
येत् ॥ सर्वाभगिन्यः संस्थास्ते श्रातु नृपतः स्मृता ॥ वस्त्रास्त्रियामस्कार्यं निजवित्तानुसारतः ॥ भ्रातृरायुष्य
हर्षं चभगिनीनिर्यमस्य वै ॥ पूजनीयाम यत्नेन भीतिनाश्चविधानतः ॥ मार्कंडेयो बलिर्व्यासो हनुमांश्च वि
भीषणः ॥ कृपो द्रोणिः परशुराम अष्टैते चिरजीविनः ॥ मार्कंडेय महाभाग सप्तकल्पांतजीविनः ॥ चि
रंजीविषयात्वं तिययामे भ्रातरं कुरु ॥ इति भ्रातृद्वितीयाविधिः ॥ ॥ इति श्रीमहादेवकं वाल जनहस्तांकूर
कृते व्रतार्के द्वितीयाव्रतानि ॥ ॥ अथ तृतीयाव्रतानि ॥ तत्र चैत्रशुक्लतृतीयायां सौभाग्यशयन
व्रतं ॥ मात्स्ये मस्य उवाच ॥ वसंतमासमासाद्य तृतीयायां जनप्रियं ॥ सौभाग्याय सदा स्त्रीभिः कार्यं तु

व्र॰ता॰
२४

नसुरवे प्सुतिः॥ सुक्लपक्षस्य पूर्वाह्ने तिलैः स्नानं समाचरेत्॥ तस्मिन्नहनि सा देवी किल विश्वात्मना स
ता॥ पाणिग्रहणिकैर्मंत्रैरुद्वाहे वरवर्णिनि॥ तया सहैव देवेशं तृतीयायां समर्चयेत्॥ फलैर्नानावि
धैर्धूपैर्दीपैर्नैवेद्यसंयुतैः॥ प्रतिमां पंचगव्येन तथा गंधोदकेन च॥ स्नापयित्वार्चयेद्गौरीमिंदुशे
खरसंयुतां॥ नमोस्तु पाटलायैतु पादौ देव्याः शिवस्य तु॥ शिवायेति च संकीर्त्य जयायै गुल्फयोस्तथा॥
त्र्यंबकायेति रुद्रस्य भवान्यै जंघयोर्युगं॥ शिवं रुद्रेश्वरायेति जयायै इति जानुनी॥ संकीर्त्य हरिके
शाय तथोरु वरदे नमः॥ ईशायेशं कटिं देव्याः शंकरायेति शंकरं॥ कुक्षिद्वयेति कोटव्यै शूलिनः शूल
पाणये॥ मंगलायै नमस्तुभ्यमुदरं चापि पूजयेत्॥ सर्वात्मने नमो रुद्रमैशान्यै च कुचद्वयं॥ शिवं वेदात्मने
तद्वद्रुद्राण्यै कंठमर्चयेत्॥ त्रिपुरघ्नाय विश्वेशमनंतायै करद्वयं॥ त्रिलोचनायेति हरं बाहू कालानलप्रि
ये॥ सौभाग्यभवनायेति भूषणानि समर्चयेत्॥ नमोर्द्धनारीशहरमसितांगीति नासिकां॥ नमउ राम २४
ग्राय लोकेशं ललितेति पुनर्भ्रुवौ॥ शर्वाय पुरहंतारं भद्रेत्येतयालकं॥ नमः श्रीकंठनाथाय शि

वंकेशांतथार्चयेत्॥ नीमोग्रसौम्यरूपिण्यै शिवं सर्वात्मने नमः॥ शिवमभ्यर्च्य विधिवत्सौभा
ग्याष्टकमिस्यतः॥ एवं निवेद्य तत्सर्वमग्रतः शिवयोः पुनः॥ चैत्रे शृंगोदकं प्राश्य स्वपेद्भूमा
वरिंदम॥ पुनः प्रभाते तु तथा कृतस्नानजपः शुचिः॥ संपूज्य द्विजदांपत्यं माल्यवस्त्रविभूषणैः॥
सौभाग्याष्टकसंयुक्तं सुवर्णप्रतिमाद्वयं॥ प्रीयतामत्र ललिता ब्राह्मणाय निवेदयेत्॥ एवं संव
त्सरं यावत्तृतीयायां सदा मुने॥ प्राशने दानमंत्रे च विशेषोयं निबोध मे॥ गोशृंगोदकमादौ स्याद्वै
शाखे गोमयं पुनः॥ ज्येष्ठे मंदारकुसुमं बिल्वपत्रं शुचौ स्मृतं॥ श्रावणे दधि संप्राश्यं नभस्ये च कु
शोदकं॥ क्षीरमाश्वयुजे मासि कार्तिके पृषदाज्यकं॥ मार्गशीर्षे तु गोमूत्रं पौषे संप्राशयेत्
घृतं॥ माघे कृष्णतिलांस्तद्वत्पंचगव्यं च फाल्गुने॥ ललिता विजया भद्रा भवानी कुमुदा शिवा॥
वासुदेवी तथा गौरी मंगला कमला सती॥ उमा दानकाले तु प्रीयतामिति कीर्तयेत्॥ मल्लिका शो
ककमलं कुंदं तगरं मालती॥ कदंबं करवीरं च बाणमम्लानकुंकुमं॥ सिंदुवारं च सर्वेषु मा

व्रता० ३५ सेपुक्रमशःस्मृतं॥ बाणनीलकुरंटकैः॥ जपाकुसुंभकसुंभमालतीशतपत्रिकैः॥ यथालाभंप्रश
स्तानिकरवीरसितासिते॥ एवंसंवत्सरंयावत्पुष्पैर्विधिवन्नरः॥ स्त्रीवाप्नतूताकुमारीवाविधवाव
भ्यर्चयेद्भक्तितः॥ व्रतांतेशायनंदद्यात्सर्वोपस्करसंयुतं॥ उमामहेश्वरहैमंवृषभंचगवांस
ह॥ स्थापयित्वाचशयनेब्राह्मणायनिवेदयेत्॥ गोयुग्मंहैमं॥ अन्यानपियथाशक्त्यामिथुनानिव
रादिभिः। धान्यालंकारगोदानैरभ्यर्च्यधनवांचयेत्॥ वित्तशाठ्येनरहितःपूजयेद्गतविस्मयः
॥ एवंकरोतियःसम्यक्सौभाग्यशयनव्रतं॥ सर्वान्कामानवाप्नोतिपदमानंत्यमश्नुते॥ फल
स्यैकस्यचसांगमेतत्कुर्वन्समाचरेत्॥ यत्रकीर्तिसमाप्नोतिप्रतिमासंनराधिप॥ सौभा
ग्यारोग्यरूपायुर्वस्त्रालंकारभूषणैः॥ नवियुक्तोभवेद्राजन्नब्देषुचशतत्रयं॥ यस्तुद्वादश राम ३५
वर्षाणिसौभाग्यशयनव्रतं॥ करोतिसप्तवाष्टौवाश्रीकंठभवनेऽमरैः॥ पूज्यमानोवसेत्सम्य
क्यावत्कल्पायुतत्रयं॥ नारीवाकुरुतेयापिकुमारीवानरेश्वर॥ सापितत्फलमाप्नोतिदेव्यानु

व्रता० ३६ बीभवत्सामिबालवैधव्यनाशनं॥ अरुंधतीव्रतंपुण्यंनारीसौभाग्यदायकं॥ यत्कृत्वाबालवैधव्या
न्मुच्यतेनात्रसंशयः॥ कृतमेतत्पुराविप्रगौर्याद्विजिंकरतोत्तरां॥ व्रतं॥ यमुनातीरमासाद्यत्वदृष्टत
दादिना॥ तस्यैनार्यैमतारेव्याकृतमेतद्व्रतंमया॥ तेनपुण्येनमहताव्रतजेनमुनीश्वराः॥ स्वानारी
वागमत्स्वर्गंमुक्तावैधव्यतस्तदा॥ इत्थंव्रतफलंसम्यगुपदिश्यमुनिश्वराः॥ कृतमन्येष्वबहुभि
स्तेपिमुक्तानसंशयः॥ अरुंधतीव्रतमिदमेतत्कार्यंमुनिश्वराः॥ नारीवैधव्यतोमुच्येत्सौभाग्यं
प्राप्नुयात्परं॥ ॥ इतिहेमाद्रौस्कांदेअरुंधतीव्रतं॥ अथवैशाखशुक्लतृतीयायामक्षय्यतृती
तृयाकृत्यानि॥ यंइयंचमासादौपूर्वाह्णव्यापिनीग्राह्या॥ देवशुक्लेदेतयाकृष्णेयुगादिक
वयोविदुः॥ शुक्लेपौर्वाह्णिकेग्राह्येकृष्णेचैवापराह्णिकेइतिगारुडात्॥ अत्रपूर्वाह्णपरात्तु
नारदीयात्पूर्वाह्णेतुसदाग्राह्यास्तास्तास्तुक्रमानुपुनरयः॥ दैवेकर्मणिपित्र्येचकृष्णेचैवाप राम ३६
राह्णिकारतिगारुडाच्च॥ अत्रपूर्वाह्णपरास्तुधाविभागपराविशद्धेति॥ अथविधिः॥ वैशाखस्य

ना॥ तेनपापेनविप्रेंद्र सोनारीत्वंप्राप्तवान्द्विज॥ सनारीपः परित्यज्य निर्दोषां कुलसंभवां॥ यातिवेश्यां
तरंवाथ अंधा इव महार्णवे॥ परदाररतो वा स्यादन्यो वा कुरुते स्त्रियं॥ सो मृतजन्मनि देवेशि स्त्री
भूत्वा विधवा भवेत्॥ या नारी तु परं सक्त्वा मनोवाक्कायकर्मभिः॥ रहः करोति वै देवि जारं गत्वा वा
पुरुषांतरं॥ भोगान्भुक्त्वा च या पापिन्मेदन्नममहासती॥ तेन कर्मविपाकेन सा नारी विध
वा भवेत्॥ स्वपत्नीं कुलसंभूतां पतिव्रतरतां सतीं॥ अनुकूलां परित्यज्य परां यो याति वै नृ
पः॥ स पापी जायते तस्मिन्स्त्री हीनो विप्र जन्मनि॥ अनेन सदृशं देवि लोकेस्मिन्नास्ति
पातकं॥ न वैधव्यात्परो व्याधिर्न वैधव्यात्परो ज्वरः॥ न वैधव्यात्परः शोको न वैधव्यात्परो
कुग्रहः॥ निरयो न च वैधव्यात् तद्वैधव्यं न जानन्तु॥ तेन पापेन वंध्या जायते बालरंडिका॥ इति त
स्य वचः श्रुत्वा सा गौरी सा च विस्मिता भवत्॥ पप्रच्छ तं महादेवं गौरी सा करुणान्विता॥ केनेदं
शमनं याति वाज वैधव्यदायकं॥ नश्यते कर्मणा केन तन्मां वद त्वं प्रभो कुरु॥ महादेव उवाच॥ शृणु दे

वि हिध्यं वै हि सौभाग्यं देहि सुव्रते॥ अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तु ते॥ मूलमंत्रेण प्रा
र्थना॥ अरुंधति महाभागे वसिष्ठप्रियवादिनि॥ सौभाग्यं देहि मे देवि धनं पुत्रांश्च सर्वदा॥
उत्तरार्घ्यं॥ द्विभुजां चारुसर्वांगीं साक्षसूत्रकमंडलुं॥ प्रतिमां कांचनीं कृत्वा नाममंत्रैः परिपूज
येत्॥ ॐ देवि वंद्यै नमः पादौ पूजयामि॥ लोकवंद्यै॰ जानुनी॰ संपत्क्रियायै कटिं॥ गंभीर
नाभ्यै॰ नाभिं॰ लोकधात्र्यै॰ स्तनौ॰ जगद्धात्र्यै॰ कंठं॰ शान्त्यै॰ बाहू॰ वरदायै॰ हस्तौ॰ धन्यै मुखं॰
अरुंधत्यै॰ शिरः॰ सकलप्रियायै॰ शिखां॰ वसिष्ठप्रियायै॰ सर्वांगं॰ ततो नीराजनं॰ पुष्पांजलि
श्च॰ वंशपात्रे स्थितं सर्वं वाणकं द्रव्यसंयुतं॥ अरुंधतीप्रीणनार्थं ब्राह्मणाय ददाम्यहं॥ वाणकं
मूलविसर्जनमंत्रः॥ गच्छ देवि यथास्थानं सर्वालंकारभूषिते॥ अरुंधति नमस्तुभ्यं देहि सौभाग्यमु
त्तमं मम॥ विसर्जनं॥ इति अरुंधतीपूजनं॥ अथ कथा॥ स्कांदे॥ स्कंद उवाच॥ अरुंधतीव्रतं व
क्ष्ये नारीसौभाग्यदायकं॥ येन चीर्णेन वै सम्यक् नारी सौभाग्यमाप्नुयात्॥ जायते रूपसंपन्ना

व्र०र्क
२१

पुत्रपौत्रसमन्वितां॥ वसंते तु समासाद्य हतीयां पुरुषर्षभ॥ स्नानं कृत्वा तु वै सम्यक् कृत्रिरात्रोपो
षिता सती॥ मिथुनानि च चत्वारि समाहूय पतिव्रता॥ पूजयेत्पुष्पतांबूलैर्गंधैर्वस्त्रैस्तथा हि तैः
॥ कुंकुमागरुकर्पूरैः सिंदूरैर्मृगनाभिभिः॥ विजापदेन संस्थाप्य जीरकं लवणान्वितां॥ लोष्टके
न समायुक्तं वस्त्रयुग्मेन वेष्टितं॥ आवाहयेन्महादेवि वसिष्ठप्राणसमितां॥ पतिव्रतानां सर्वासां
मुख्यां वैदेवभामिनीं॥ द्विभुजां चारुसर्वांगीमरुंधतीं कमंडलुं॥ प्रतिमां कांचनीं कृत्वा नाममंत्रैः प्र
पूजयेत्॥ देववंद्यै नमः पादौ जानुन्यां लोकवंदिते॥ कटिं संपूजयेत्तस्याः सर्वसंतिदायिनि॥ ना
भीं गंभीरनाभ्यै तु लोकधाम्न्यै तथा स्तनौ॥ जगद्धात्रि तथा स्कंधौ बाहू शांत्यै नमस्तथा॥ हस्तौ
तु वरदायेति मुखं धृत्यै नमः पुरः॥ अरुंधत्यै नमः पूजयेच्छिरस्तु सकलप्रिया॥ एवं संपूज्य तां देवीं
गंधपुष्पोपचारकैः॥ पूजयित्वा सती देवी तथा चार्घ्यं प्रदापयेत्॥ अरुंधती महाभागे वसिष्ठ
प्रियवादिनि॥ सौभाग्यं देहि मे देवि धनं पुत्रांश्च सर्वदा॥ उत्तरार्घ्यमंत्रः॥ पुत्रान्देहि धनं देहि

राम
२१

सौभाग्यं देहि सुव्रते॥ अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तु ते॥ प्रार्थनामंत्रः॥ उवासिनीः प्र
शस्याः सम्माम्य द्विजसत्तमाः॥ प्रगंधाक्षतैः पुष्पैर्दद्यात् स्वर्पेणनरुकान्॥ होमं चैव तदा कुर्या
त्समिद्भिश्च तिलैः पृथक्॥ अष्टोत्तरशतं संख्या सार्थनामं मंत्रतः सुधीः॥ मिथुनानि च संपूज्य भूषण
च्छादनादिभिः॥ नानाविधोपचारैश्च चतुर्विंशतिसंख्यया॥ आचार्यं च समभ्यर्च्य वस्त्राभरणा
नि च॥ शय्यां सोपस्करां दद्यात् कांस्यपात्रं सदीपकं॥ छत्रं चामरं चैव धेनुं दद्यात्सशोभ
नां॥ पश्चात् भोजयित्वा च स्त्रियः सर्पान्समोदकान्॥ मोदकान्कांचनं चैव तथा वस्त्रं यथा
विधि॥ पोलिका घृतपूपाश्च पूरिकाश्च विशेषतः॥ सोहोलिकाश्च दातव्या एकैकं द्विगुणं
तथा॥ भोजनं कृपणपर्यन्तं दीनानाथांश्च पूजयेत्॥ एवं व्रतं समाप्याय पश्चाद्भक्तं समाचरेत्॥
अनेनैव विधानेन मानिनी निर्कुरुते व्रतं॥ अवैधव्यत्वमाप्नोति तथा जन्मसहस्रकं॥ पुत्रपौ
त्रसमायुक्ता धनधान्यसमाव्रता॥ माघे वर्षशतं साप्य महत्त्वर्गं महाव्रतं॥ स्वर्गमश्नुते पिता

DR BHAU DAJI

तुपदंगच्छेदनामयं॥ देवनार्यायया स्वर्गे कथितं नायतिथेवच॥ रात्रनार्यामहानागास्सर्वकाम
फलप्रदं॥ पुरावृत्तमिदं विप्राः शृणुध्वं व्रतमुत्तमं॥ आसीद्द्विजः पुराविप्राः सर्वशास्त्रविशार
दः॥ तस्मै कां कन्यका जाता रूपेणप्रतिमाभुवि॥ ततो विवाहं सम्यग्वै पितातस्या करोद्द्विजः॥
वोऽनरं गत्वा सा जाता निर्वेदादगमद्गृहात्॥ यमुनातीरमासाद्य चकार विपुलं तपः॥ एकान्तरादि
कैश्चैव कृच्छ्रचांद्रायणैस्तथा॥ मासोपवासनियमै रात्मानं मानयत्ससौतां॥ कदावि
दागतस्तत्र भवान्यौ यमिरा शिवः॥ यमुनातीरमासाद्य विनितां तां ददर्श सा॥ कृपयाचस
दागौरी महादेवमुवाच सा॥ देवकेनेदृशी प्राप्ता बाला वैधव्यतां दृशां॥ वदेश्वर महादेव कृ
पांकुरु कृपानिधे॥ महादेव उवाच॥ अयं विप्रः पुरा गौरी कुलसीतलजातो भुवि॥ तेन कन्या पालि
ता सत्यपापुवती सती॥ सता विवाह्य तरुणी विदेशं गतमद्विजः॥ तस्मात्कृतिथं कालं साप्रश्र
मीतुरागमं॥ नागतस्तु नदा विप्रो यावज्जीवं गतो द्विजः॥ तस्मा जन्म गतं सर्वं निःफलं पतिनावि

रहजालिता॥ ॥इतिमास्वमोस्तागपद्यापनव्रतं॥ ॥अथैषगौयरिशेलोस्सवः॥ ॥तदुक्तं हेमा
द्रौ देवीपुराणे॥ ततीयायां यजेद्देवीं शंकरेणसमन्वितां॥ कुंकुमागरु कर्पूर मणिवस्त्रसम
र्चितां॥ सुगंधपुष्पधूपैश्च दमनेन सुमालिना॥ आंदोलं तरोलेये दस शिवोमातुष्टयेसदा॥
रात्रौ जागरणं कार्यं प्रातर्देया तु दक्षिणा॥ सौभाग्यायस्सदा स्त्रीभिः कार्या पुत्रसुखार्थिभिः॥ अ
थ चैत्रशुक्ल तृतीयायामरुंधतीव्रतं॥ तत्र स्त्रीणामेवाधिकारः॥ अवैधव्यादि फलस्र
वणात्॥ अथ पूजा॥ अस्मकालिकापुक्ते मंडले पूजयेत्तु सां॥ अरुंधतीमहादेवीं वसि
ष्टसहितां सतीं॥ आवाहनं॥ अरुंधती महादेवी सर्वसौभाग्यदायके॥ दिव्यं सुचारु वेषं च आ
सनं प्रतिगृह्यतां॥ आसनं॥ सुचारु शीतलं दिव्यं नानागंधसुवासितं॥ पाद्यं गृहाण देवेशि अ
रुंधती नमोस्तुते॥ पाद्यं॥ अरुंधती महाभागे वसिष्ठप्रियवादिनि॥ अर्घ्यं गृहाण कल्या
णि भर्तासह नमोस्तुते॥ अर्घ्यं॥ गंगातोयं समानीतं सुवर्णकलशोस्थितं॥ आचम्यतामहा

नागेवसिष्टेसहितेनघे॥ आचमनं॥ गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः॥ स्नापितासिमया दे
वीतथा शांतिकुरुष्वमे॥ स्नानं॥ नानारागसमुद्भूतं दिव्यंचारुमनोहरं॥ वस्त्रंगृहाण देवेशि अ
रुंधती नमोस्तुते॥ वस्त्रं॥ कर्पूरकुंकुमैर्युक्तं हरिद्रादिसमन्वितं॥ कस्तुरिकासमायुक्तं चंदनं
प्रतिगृह्यतां॥ चंदनं॥ अक्षताश्च सुराः श्रेष्ठाः कुंकुमाक्ताः सुशोभनाः॥ मालाजंकारसि मर्थं
प्रसन्नं प्रतिगृह्यतां॥ इत्यक्षता॥ माल्यादीनि सुगंधीनि मालत्यादीनि वैप्रभुः॥ मयाहृतानि
पुष्पाणि पूजार्थं प्रतिगृह्यतां॥ पुष्पं॥ वनस्पतिरसोद्भूतो गंधाढ्यो गंधउत्तमः॥ आघ्रेयः स
र्वदेवानां धूपायं प्रतिगृह्यतां॥ धूपं॥ आज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया॥ दीपं गृहा
ण देवेशि त्रैलोक्यतिमिरापहं॥ दीपं॥ अन्नं चतुर्विधं स्वादैः रसैः षड्भिः समन्वितं॥ नैवेद्यं
गृह्यतां देवी प्रसादं कुरु सर्वदा॥ नैवेद्यं॥ पुंगीफलं महादिव्यं नागवल्लीदलैर्युतं॥ कर्पूरादि
समायुक्तं तांबूलं प्रतिगृह्यतां॥ तांबूलं॥ इदं फलमिति फलं॥ हिरण्यगर्भ इति दक्षिणा॥ पुष्पा

तृतीयायां स्त्रीसमेतं जगद्गुरुं॥ नारायणं प्रपूजयेथाः पुष्पधूपविलेपनैरितितथा॥ यो स्यां ददाति करका
न्वारिबीजसमन्वितान्॥ संयाति पुरुषो वापि लोकान्वै हेममालिनः॥ बीजमंत्रं॥ हेममालिहर यः तथा
॥ वैशाखस्य शुक्लपक्षे तु तृतीयायां तथैव च॥ गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः॥ तथा॥ त
त्रैव॥ कृत्तवाच॥ बहुनात्र किमुक्तेन विंबक्फकुरमालया॥ वैशाखस्य सिताम्यैकां तृतीयामक्ष
यां प्रपूण्यु॥ तस्यां स्नानं जपो होमः स्वाध्यायः पितृतर्पणं॥ दानं च क्रियते तस्यां तत्सर्वं चादिहाक्षयं॥
आदिः कृतयुगस्येयं युगादिस्तेन कथ्यते॥ सर्वपापप्रशमनी सर्वसौख्यप्रदायिनी॥ पुरा महोदये पार्थ
वणिगासीत्सुनिर्धनः॥ प्रियंवदः सत्यवृत्तिर्देवब्राह्मणपूजकः॥ पुण्यकथा नैकचित्तो सकुटुंबका
कुलोपि सन्॥ तेनश्रुतनता वा समानातृतीया रोहिणीयुताः॥ यदा बुधसंयुक्ता तदा सा तु महत्तमा॥
तस्यां परिपते किंचिदक्षयं स्यान्न देवदि॥ इति श्रुत्वा स गंगायां संतर्प्य पितृदेवताः॥ गृहमागत्य करका
न्सान्नानुदकसंयुतान्॥ स्वच्छ तंडुलपूर्णकुंभान् जलेन विमलेन च॥ यवगोधूमचणकान् सक्तुदध्यो

दनंतया॥ इत्युक्तो रविकांतं स्वर हिरण्यं स्वशक्तितः॥ सुविप्रदेन मनसा ब्राह्मणे सो ददौ वणि
क्॥ भार्यया वार्यमाणोपि कुटुंबासक्तचित्तया॥ तावत्तस्थौ स्थिरे सत्वे मत्वा सर्वं विनश्वरं॥ ध
र्मनित्यमतिः पार्थ कालेन बहुना ततः॥ जगाम पंचत्वमसौ वासुदेवमनुस्मरन्॥ ततः स क्षत्रियो
जातः कुशावत्यां युधिष्ठिर॥ बल्यवचात्ययातस्य समस्पधर्मसंयुता॥ राज्यं जग्मुर्महाराज तैः समा
प्तवरदक्षिणैः॥ सरद्वीगो हिरण्यानि दानं सम्मान्य हर्ति शं॥ बुभुजे कामतो भोग्यान् दीनांधांस्त
र्पयत्शनैः॥ तथाप्यकृष्यमेवास्य रूपं पातितवदनं॥ श्रद्धापूर्वं द्वितीयायां पदत्तं विना विना॥
इत्येतत्ते समाख्यातं श्रूयतामत्र यो विधिः॥ द्वितीयायां समासाद्य स्नात्वा संतर्प्य देवताः॥ एकभक्तं
तदा कुर्याद्वासुदेवं प्रपूजयेत्॥ गुडकुल्माषकल्याणं माल्यानं सर्वरसैः सह॥ ग्रैष्मिकं सर्वसे
वाल्पसंप्रदाने प्रशस्यते॥ छत्रोपानत्प्रदानं च गोधूकां चैव वाससां॥ यद्यदिष्टतमं या मत्तद्देवप
मर्पिकय॥ एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि॥ अनाख्येयं न मे किंचिदस्य स्वस्य स्तुतेन

मा॥ अस्यां तिथौ रूपमुपैति कल्यं नदत्तं तेनाकृपेपि कथिता मुनितिः स्नीपा॥ उद्दिश्य देवतपि दृतक्रि
यते मनुष्यैः स्वाहरूपं भवति नारत सर्वमेव॥ इति भविष्योत्तरोक्तमरूपद्वितीयाव्रतं॥ अस्यामे
व विष्णुधर्मोत्तरोक्तमरूपद्वितीयाव्रतं॥ ॥ वैशाखस्य शुक्लपक्षे तु द्वितीयायामुपोषितः॥ अरूपं
फलमाप्नोति सर्वस्य सुकृतस्य तु॥ तथा मार्गशीर्षिकेपि तद्विशेषेण च पूजिता॥ तत्र जसंकृतंद
त्तं सर्वमक्षयमुच्यते॥ अस्यां सा तिथि तस्मात्तस्यां सुकृतमरूपं॥ अर्चितः पूजितो विष्णुस्तेन सो
प्यरूपास्मृता॥ अर्कस्तैस्तु नरः स्नातो विष्णोर्दत्वा तथा कृतान्॥ सक्तुश्च संस्कृतांश्चैव कृत्वा च भ्यु
क्तं॥ एवमक्रूरतृतीयानां सर्वासां तु फलं भवेत्॥ इति विष्णुधर्मोक्तमरूपतृतीयाव्रतं॥ अथ चाग्र
हाश्रावणशुक्लतृतीयायां स्वर्णगौरीव्रतं॥ तत्र पूजा॥ देव देवि समागच्छ प्रार्थयेहं जगन्मते॥ इमां
मया कृतां पूजां गृहाण सुरसत्तमे॥ आवाहनं॥ भवानि त्वं महादेवि सर्वसौभाग्यदायके॥ अनेक
रत्नसंयुक्तमासनं प्रतिगृह्यतां॥ आसनं॥ सुचारुशीतलं दिव्यं नानागंधसुवासितं॥ पाद्यं गृहा

व्रता० ४१

णदेवेशि महादेवि नमोस्तुते॥ पाद्यं॥ श्रीपार्वती महाभागे शंकरप्रियवादिनी॥ अर्घ्यं गृहाण
कल्याणि भर्त्रा सह पतिव्रते॥ अर्घ्यं॥ गंगातोयं समानीतं सुवर्णकलशोस्थितं॥ आचम्य
तां महाभागे रुद्रेण सहिते नघे॥ आचमनं॥ गंगासरस्वती रेवा कावेरी नर्मदा जलैः॥ स्नापितासि
मया देवि तथा शांतिं कुरुष्व मे॥ स्नानं॥ सर्वसत्वाधिके सौम्ये लोकलज्जानिवारणे॥ मयोपपा
दिते तुभ्यं वाससी प्रतिगृह्यतां॥ वस्त्रं॥ कर्पूरकुंकुमैर्युक्तं हरिद्रादिसमन्वितं॥ कस्तूरि
कासमायुक्तं चंदनं प्रतिगृह्यतां॥ चंदनं॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो॥ मया
हृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां॥ पुष्पं॥ दिव्यद्रुमरसोद्भूत कालागुरुघृतान्वितः॥ आदी
पते मया ह्येष सर्वेभ्यो घ्राणतर्पणः॥ धूपं॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया॥ दीपं गृ
हाण देवेशि त्रैलोक्यतिमिरापहं॥ दीपं॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं॥ नैवेद्यं गृ राम ४१
ह्यतां देवी प्रसादं कुरु सर्वदा॥ नैवेद्यं॥ कर्पूरैलालवंगादि तांबूलीदलसंयुतं॥ क्रमुकस्य फ

लं चैतत्तांबूलं प्रतिगृह्यतां॥ तांबूलं॥ इदं फलं मया देवी स्थापितं पुरतस्तव॥ तेन मे सफलावा
प्तिर्भवेज्जन्मनि जन्मनि॥ फलं॥ हिरण्यगर्भमिति दक्षिणा॥ पुत्रान्देहि धनं देहि सौभाग्यं देहि सु
व्रते॥ अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तुते॥ प्रार्थना॥ नवानाद्य महादेव्या व्रतसंपूर्णहेत
वे॥ प्रीतये द्विजवर्याय वायनं प्रददाम्यहं॥ वायनमंत्रः॥ नानाषोडशपक्वान्नैर्वेणुपात्राणि
षोडश॥ कुर्याद्वस्त्रादि निर्युक्तान्याहूय द्विजदंपती॥ व्रतोद्यापनपूर्णार्थं ब्राह्मणाय ददाम्यहं
॥ स्थूलं कृताः सुवासिन्यः पातिव्रतेन भूषिताः॥ मम कामसमृद्ध्यर्थं प्रतिगृह्णंतु भूषिताः॥ ॥
इति गौरीपूजा॥ ॥ अथोद्यापनं॥ युधिष्ठिर उवाच॥ उद्यापनविधिं ब्रूहि तृतीयायाः सुरेश्वरः
॥ नकितः श्रोतुमिच्छामि व्रतसंपूर्णहेतवे॥ श्रीकृष्ण उवाच॥ उद्यापनविधिं वक्ष्ये सावधानेन
वै शृणु॥ त्रिहस्तं द्विप्रमाणेन प्रतिसंदक्षिणोत्तरे॥ प्रसकक्षागपिराजेंद्र तव गेचर्मनिष्पते॥ गोम
यमात्रं स छिप्प्य गोमयेन विचक्षणः॥ मंडलं कारयेत्तत्र नानावर्णसुशोभनं॥ तन्मंडलपार्श्वेतु

व्रता० ४२

पद्ममष्टदलं विलिखेत्॥ तन्मध्ये स्थापयेत्कुंभमव्रणं मन्मयं शुभं॥ ताम्रपात्रं प्रकुर्वीत पलैः षो
डशभिस्तथा॥ तदर्द्धेनैव वा कुर्याद्वित्तशाठ्यं विवर्जयेत्॥ कर्षमात्रसुवर्णेन प्रतिमां का
रयेद्बुधः॥ तदर्द्धं मध्यमं प्रोक्तं तदर्द्धं तु कनिष्ठकं॥ कृत्वा रूपं प्रयत्नेन पार्वत्या च हरस्य च
॥ अथ ताम्रमये पात्रे प्रतिमां तत्र विन्यसेत्॥ श्वेतवस्त्रयुगच्छन्नं श्वेतयज्ञोपवीतिनं॥ प्राग
न्नं च तिलैः पूर्णं पकलशोपरि विन्यसेत्॥ पार्वत्यास्तु युगं दद्यात् स्थापयित्वा विधानतः॥ वेदोक्तेन
प्रतिष्ठां च कर्त्तव्या तु यथाविधि॥ पंचामृतेन स्नपनं कृत्वा देवस्य चोत्तमं॥ स्नानं च कारयेत्पश्चा
त्ततः पूजां समारभेत्॥ चंदनेन सुगंधेन सुपुष्पैश्च पूजयेत्॥ धूपं च कल्पयेद्धूपं चंदनागरु
संयुतं॥ नानाप्रकारनैवेद्यं तथा दीपं च कारयेत्॥ अर्चयेत्स जपेन्मंत्रान् गंधपुष्पैः फलाक्षतैः
॥ आवाहनादिकर्त्तव्यं पुराणागमसंभवैः॥ कार्या विधानतः पूजा भक्तिश्रद्धासमन्वितः॥ देवदे
व समागच्छ प्रार्थयेत्तं जगत्पते॥ इमां मया कृतां पूजां गृहाण सुरसत्तम॥ एवं पूजा प्रकर्त्तव्या रात्रौ

राम ४२

Dr. BHAU DAJI MEMORIAL

जागरणं ततः॥ गीतनृत्यादिसंयुक्ता कथा पुस्तकवाचनं॥ अर्चयेत्सर्वदेवं पश्चाद्धोमं च कार
येत्॥ स्वगृह्योक्तविधानेन कृत्वाग्निस्थापनं ततः॥ प्रातश्चैव ततो होमं नवग्रहपुरःसरं॥ तिलांश्च
यवसंमिश्रानाज्येन च परिप्लुतान्॥ संकर्षणेति पर्यंतान् कृत्वा विधिवदाचरेत्॥ एवं समाप्य होमं तु
तत्राचार्यं प्रपूजयेत्॥ अर्घ्यपुष्पप्रदानेन वस्त्रालंकारभूषणैः॥ शक्त्या सदक्षिणं कुर्यात्प्राका
रैर्गोधिकान्वितां॥ धेनुं सदक्षिणां कृत्वा सुशीलां च पयस्विनीं॥ सुवर्णशृंगीं रौप्यखुरीं कांस्य
दोहनसंयुतां॥ रत्नपुच्छां वस्त्रयुतां ताम्रपृष्ठीमलंकृतां॥ सवत्सामव्रणां नद्धां धेनुं दद्यात्प्रयत्नतः
॥ सुवर्णेन समोपेतामाचार्याय च साधवे॥ षोडशाभिः प्रकारैश्च पक्वान्नैः प्रीणयेद्द्विजान्॥ षोडशप्र
मितैर्दद्याद्ब्राह्मणेषु प्रयत्नतः॥ वंशपात्रैश्च विततैः पक्वान्नकान्नवायनैः शुभैः॥ अन्येभ्यो ब्राह्मणे
भ्यश्च दक्षिणां च प्रयत्नतः॥ प्रपन्नपरया भक्त्या प्रदद्याद्वित्तसारतः॥ बंधुभिः सह भुंजीत नियतश्चाप
रेहनि॥ एवं कृत्वा नरः सार्थं परिपूर्णं व्रतीपतः॥ ॥ इति श्रीभविष्योत्तरपुराणे स्वर्णगौरीव्रतोद्यापनं स

समाप्तं॥ ॥अथ कथा॥ पुरा कैलासशिखरे सिद्धगंधर्वसेविते॥ उमयासहितः स्कंदः पप्रच्छ त्रि-
वमव्ययं॥ स्कंद उवाच॥ करुणासागरेशान लोकानां हितकाम्यया॥ व्रतकथय देवेश पुत्रपौत्र-
प्रवर्द्धनं॥ श्रीशंकर उवाच॥ साधु पृष्टं महाभाग कथयामि षडानन॥ स्वर्णगौरीव्रतं नाम सर्वसं-
पत्करं नृणां॥ पुरा सरस्वतीतीरे विमलाख्या महापुरी॥ तत्र चंद्रप्रभो नाम राजाभूद्भुवनदीपकः॥ त-
स्य स्त्री रूपलावण्यसौंदर्यस्मरविभ्रमा॥ महादेवी विशालाख्ये द्वे भार्ये वामगे रुचे॥ तयोः प्रियत-
रा ज्येष्ठा तस्यासीन्नृपतेर्नर्मता॥ स एकदाचिद्वनं भेजे मृगयासक्तमानसः॥ तत्र शार्दूलवाराहवन-
माहिषकुंजरान्॥ हत्वा बभ्राम तस्मात्स सरसीं विपिनं महत्॥ चकोरचक्रकारंडवचंचरीकव्याता-
कुलं॥ उत्फुल्लहल्लकोद्दामकुमुदोत्पलमंडितं॥ अप्सरसमवनीसौरे ददर्शाप्सरसां सरः
॥ स माप्लाय्य सरः क्षीरं पीत्वा जलमनुत्तमं॥ ततो गौरीमर्चयंतं ददर्शाप्सरसां गणं॥ किमे-
तदिति पप्रच्छ राजा राजीवलोचनः॥ स्वर्णगौरीव्रतमिदं क्रियते स्माभिरुत्तमं॥ सर्वसंपत्करं

नृणां तत्कुरुष्व नरोत्तम॥ राजोवाच॥ विधानं किंदृशं व्रत किं फलं विस्तरान्मम॥ ता ऊचुर्योषि-
तः सर्वा नभो मासी तृतीयके॥ आरब्धव्यं व्रतमिदं गौर्याः षोडशवत्सरान्॥ तच्छ्रुत्वा सोपि तन्मा-
हव्रतं नियतमानसः॥ गुणैः षोडशसंयुक्तं दोरकं दक्षिणे करे॥ बबंध नेन मंत्रेण करिष्येहं ह-
तं तव॥ ततः कृत्वा व्रतं देव्यामदिराम दुत्तमः॥ प्रथतं दोरकं हस्ते दृष्ट्वा च पतिकोपना॥ त्रुटित्वा
साच विक्षेप बाह्यस्य शुष्कतरूपरि॥ न कर्त्तव्यं न कर्त्तव्यं इति राज्ञी वदत्यपि॥ तेन संस्पृष्टमात्रे-
ण तरुः पल्लवतां गतः॥ तद्वितीया वतो दृष्ट्वा विस्मयाकुलिता भवत्॥ तस्मात्तं दोरकं छिन्नं गृहीत्वा
सा बबंध ह॥ ततस्तद्व्रतमहात्म्यात्सतिप्रियतरा भवत्॥ देवीव्रतापचारेण सा सत्काद्दुःखिता
वने॥ भ्रमयोसामहादेवि ध्यायंती निःसमन्विता॥ मुनीनामाश्रमे पुण्ये निवसंति स्म किंचि-
त्॥ निवारितामनुव्रतैर्गच्छ पापे कथा सुखं॥ धावंति पिनं घोरं गणाध्यक्षैर्ददर्श ह॥ तेन दृष्ट-
पि सा गौरीं स्मा प्रहस्तुपेक्षिता॥ ततो ददर्श पतल्लगच्छंति वसरोद्वयं॥ ततो नवाप्ति यं चाग्रे स

व्रत्० वनिरगन्भूषितां॥ पद्मपतिशानकेस्तद्वद्व्रजंतिचैवमानुषी॥ तेस्तैर्निरीक्ष्य ताईशानिविस्मि
४४ तिषसादरं॥ ततस्तत्कृपयागौरीप्रादुरासीन्महासती॥ तांदृष्ट्वादंडवद्भूमौनत्वास्तुत्वानृप
प्रिया॥ जयदेविनमस्तुभ्यंजयभक्तवरप्रदे॥ जयशंकरवामांगेमंगलेसर्वमंगले॥ ततोबध्वा
वस्त्रेजत्रागौरीमभ्यर्च्यतिप्रतां॥ चक्रेदेवीव्रतंतस्मैददौसौभाग्यसंपदं॥ इतितस्याःप्रसादेनस
र्वान्भोगान्नवाप्यच॥ अंतेशिवपुरंप्राप्तकांताभिःसहितोनृपः॥ पांडौमुने व्रतमिदं कथितंशि
वायाःकुर्यान्निमस्त्रियतेरोगवितावगौर्याः॥ प्राप्यश्रियंसमधिकंतुविशत्रुसंघांनिर्जित्य
निर्मलपदंसहसाप्रयाति॥ ॥ इतिश्रीस्कंदपुराणेगौरीखंडेस्वर्णगौरीव्रतंसंपूर्णं॥ अथभाद्र
शुक्लतृतीयायांवशिष्ठपरिग्रहंहरितालिकाव्रतं॥ तद्वपरविद्धापाकार्यं॥ मुहूर्तमात्रसत्वे राम
पिदिनेगौरीव्रतंपरेइतिमाधवोक्तेः॥ तत्रैवव्रतविधिः॥ मासपक्षाद्युल्लिख्यममसमस्तपाप ४४
क्षयपूर्वकसप्तजन्मराज्यसौभाग्यादिविवृद्धयेउमामहेश्वरसायुज्यसौभाग्यादिविवृद्धयेउमा

महेश्वरसायुज्यसिध्यर्थंहरितालिकाव्रतंकरिष्ये॥ तत्रादौगौरीयुक्तंमहेश्वरंपूजयिष्ये॥ अथ
ध्यानं॥ पीतकौशेयवसनांहेमाभांकमलासनां॥ भक्तानांवरदांनित्यंपार्वतींचिंतयाम्यहं॥ मंदा
रमालाकुलितालकायैकपालमालांकितशेखराय॥ दिव्यांबरायैचदिगंबरायनमःशिवायैच
नमःशिवाय॥ इतिध्यानं॥ देवदेविसमागच्छप्रार्थयेहंजगन्मये॥ इमांमयाकृतांपूजांगृहाणसुर
सत्तमे॥ शिवगौरीभ्यांनमः॥ आवाहनं॥ भवानित्वंमहादेविसर्वसौभाग्यदायके॥ अनेक
रत्नसंयुक्तमासनंप्रतिगृह्यतां॥ आसनं॥ सुचारुशीतलंदिव्यंनानागंधसमन्वितं॥ गृहाणदे
विदेविशिमहादेविनमोस्तुते॥ पाद्यं॥ श्रीपार्वतिमहाभागेशंकरप्रियवादिनि॥ अर्घ्यंगृहाणक
ल्याणीभर्त्रासहपतिव्रते॥ अर्घ्यं॥ गंगाजलंसमानीतंसुवर्णकलशेस्थितं॥ आचम्यतांमहाभागे
रुद्रेणसहितेनघे॥ आचमनीयं॥ गंगासरस्वतीरेवाकावेरीनर्मदाजलैः॥ स्नापितासिमयादे
वितयाशांतिंप्रयच्छमे॥ स्नानं॥ आप्यायस्वेत्यादिभिःपंचामृतैःस्नपयेत्॥ आप्यायस्वेतिपयसा

व्रता० ४५ ॥दधिक्राव्ण्ण इति दध्ना॥ घृतं मिमिक्ष इति घृतेन॥ मधुवाता इति मधुना॥ स्वादुः पवस्वेति शर्क
रया॥ पंचामृतं॥ शुद्धोदकेन वारुणैः स्नानं॥ हरिद्रासुगंधद्यैस्सद्वर्तनं॥ पुनराचमनं॥ सर्वस
त्वाधिके रम्ये लोकलज्जानिवारणे॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यतां॥ वस्त्रं॥ कर्पूरा
गरुसंयुष्टं कुंकुमादिसमन्वितं॥ कस्तुरिकासमायुक्तं चंदनं प्रतिगृह्यतां॥ गंधं॥ रंजिताः कु
सुमौघेन अक्षताश्चातिशोभनाः॥ ममैषां देवि दानेन प्रसन्ना भव पार्वति॥ अक्षताः॥ म
ल्लिकाबकुलचंपकपाटलाब्जपुन्नागजातिकरवीररसालपुष्पैः॥ बिल्वप्रवालतुल
सीदलमालतिभिस्त्वां पूजयामि जगदीश्वरि मे प्रसीद॥ पुष्पाणि॥ देवद्रुमरसोद्भूतः कृ
ष्णागरुसमन्वितः॥ आनीतोयं मया धूपो भवानि प्रतिगृह्यतां॥ धूपं॥ त्वं ज्योतिः सर्वदेवा राम
नां तेजसां तेज उत्तमं॥ आत्मज्योतिः परं धाम दीपोयं प्रतिगृह्यतां॥ दीपं॥ अन्नं चतुर्विधं स्वा ४५
दु रसैः षड्भिः समन्वितं॥ भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यतां॥ नैवेद्यं॥ पुनराचमनीयं॥ मल

याचलसंभूतं कर्पूरेण समन्वितं॥ करोद्वर्तनकं चारु गृह्यतां जगतः पते॥ करोद्वर्तनं॥ इदं फ
लमिति फलं॥ कर्पूरैलालवंगादितांबूलीदलसंयुतं॥ क्रमुकस्य फलं देवि तांबूलं प्रतिगृ
ह्यतां॥ तांबूलं॥ हिरण्यगर्भेति दक्षिणां॥ वज्रमाणिक्यवैडूर्यमुक्ताविद्रुममंडितं॥ पुष्परागस
मायुक्तं कांचनं प्रतिगृह्यतां॥ नीराजनं॥ अथ नामपूजा॥ उमायै नमः॥ गौर्यै०॥ पार्वत्यै० जग
द्धात्र्यै० जगत्प्रतिष्ठायै० शांतिरूपिण्यै० हराय नमः॥ महेश्वराय० शंभवे० शूलपाणये० पिना
कधृषे० शिवाय० पशुपतये० महादेवाय पुष्पांजलिं०॥ यानि कानि च पापानि ब्रह्महत्यासमानि च॥ तानि तानि विनश्यंति प्रदक्षिणपदे पदे॥ इति प्रदक्षिणा॥ अन्यथा शरणं नास्ति त्वमेव
शरणं मम॥ तस्मात्कारुण्यभावेन रक्ष महेश्वरी॥ इति नमस्कारः॥ ततो वैणपात्रस्थं वायनं द
द्यात्॥ अन्नं सुवर्णपात्रस्थं सवस्त्रफलदक्षिणं॥ वायनं गौरीविप्राय ददामि प्रीतये तव॥ सौभा
ग्यारोग्यकामानां सर्वसंपत्समृद्धये॥ गौरीगिरीशतुष्ट्यर्थं वायनं ते ददाम्यहं॥ मिति मंत्राभ्यां वायनं

दद्यात्॥ अथ कथा॥ मंदारमालाकुलितालकायै कपालमालांकितशेखराय॥ दिव्यांबरायै
च दिगंबराय नमः शिवायै च नमः शिवाय॥ कैलासशिखरे रम्ये गौरी पृच्छति शंकरं॥ गुह्याद्गु
ह्यतरं गुह्यं कथयस्व महेश्वर॥ सर्वेषां धर्मसर्वस्वमनायासं महत्सुखं॥ प्रसन्नोसि यदा नाथ
तथ्यं ब्रूहि ममाग्रतः॥ केन त्वं हि मया प्राप्तस्तपोदानव्रतादिना॥ अनादिमध्यनिधनो भर्त्ता
चैव जगत्प्रभुः॥ ॥ईश्वर उवाच॥ शृणु देवि प्रवक्ष्यामि तवाग्रे व्रतमुत्तमं॥ यद्गोप्यं मम सर्वस्वं
कथयामि तव प्रिये॥ यथा चोडुगणे चंद्रो ग्रहाणां भानुरेव च॥ वर्णानां च यथा विप्रो देवानां
विष्णुरुत्तमः॥ नदीषु च यथा गंगा पुराणानां तु भारतं॥ वेदानां च यथा साम इंद्रियाणां मनो यथा
॥ पुराणवेदसर्वस्वं आगमेन यथोदितं॥ एकाग्रेण शृणुष्वैतत् यथा वृत्तं पुरातनं॥ येन तुल्य(?)
प्रत्नो व न प्राप्तमर्द्धासनं मम॥ तत्सर्वं कथयिष्येहं त्वं मम प्रेयसी यतः॥ भाद्रे मासि सिते पक्षे
तृतीया हस्तसोमयुक्॥ तदनुष्ठानमात्रेण सर्वपापैः प्रमुच्यते॥ शृणु देवि त्वया पूर्वं यद्व्रतं च

रितं महत्॥ तत्सर्वं कथयिष्यामि यथा वृत्तं हिमाचले॥ पार्वत्युवाच॥ कथं व्रतं मया नाथ व्रताना
मुत्तमं व्रतं॥ तत्सर्वं श्रोतुमिच्छामि त्वत्सकाशान्महेश्वर॥ ईश्वर उवाच॥ आसीत्तत्र महाद्रिर्यो
हिमवान्नगसत्तमः॥ नानाभूमिसमाकीर्णो नानाद्रुमसमाकुलः॥ नानापक्षिसमायुक्तो नानामृग
विचित्रितः॥ यत्र देवाः सगंधर्वाः सिद्धचारणगुह्यकाः॥ विचरंति यथा देवि गंधर्वाध्वनिसंकु
लं॥ स्फाटिकैः कांचनैः शृंगैर्मणिवैडूर्यभूषितैः॥ भुजैर्लिखन्निवाकाशं सुहृदो मंदिरं यथा॥ हि
मेन पूरितो नित्यं गंगाध्वनिविनोदितः॥ पार्वती त्वं तत्र बाल्ये परमाचरती तपः॥ अब्दद्वादशकं
देवी धूम्रपानमधोमुखी॥ संवत्सरं चतुःषष्टी पक्वपर्णाशनं कृतं॥ दृष्ट्वा तां तेन तत्कष्टं चिंतया दुः
खितोऽभवत्॥ कस्मै देया मया कन्या एवं चिंतातुरोऽभवत्॥ तदैवांबरतः प्राप्तो ब्रह्मपुत्रस्तु धर्मवित्
॥ नारदो मुनिशार्दूलः शैलपुत्रीदिदृक्षया॥ दत्त्वार्घ्यं विष्टरं पाद्यं नारदायोक्तवान् गिरिः॥ शैल उवाच॥
किमर्थमागतः स्वामिन् वरदस्त्वं मुनिसत्तम॥ महद्भाग्येन संप्राप्तं त्वदागमनमुत्तमं॥ नारद उवाच

Dr. BHAU DAJI

शृणु त्रैलोक्येशेमेवाक्यं विष्णुना प्रेषितोस्म्यहं॥ योग्यं योग्याय दातव्यं कन्यारत्नमिदं त्वया॥ वासुदेव
समो नास्ति ब्रह्म विष्णु शिवादिषु॥ तस्मै देया त्वया कन्या अत्रार्थे सिमंतं मम॥ गिरिरुवाच॥ वासु
देवसमो देवः कन्यां प्रार्थयते यदि॥ तदा मया प्रदातव्या त्वदागमन गौरवात्॥ इत्येवं गदितं श्रु
त्वा तत्रैवांतर्दधे मुनिः॥ ययौ पीतांबर धरं शंखचक्र गदाधरं॥ कृतांजलिपुटो नत्वा मुनी
द्रस्सम भाषत॥ नारद उ०॥ शृणु देव भवत्कार्यं विवाहो निश्चितस्तव॥ हिमवांस्तु तदा गौरी मुखा
च्छ वचनं मुदा॥ दत्तासि त्वं मया पुत्री देवाय गरुडध्वजे॥ श्रुत्वा वाक्यं पितुर्देवी सखिभिः सा
तावनं॥ सिंह व्याघ्र मृगै व्याप्तं तत्र सुमानि जने॥ सख्युवाच॥ किमर्थं दुःखिता देवि कथयस्व
ममाग्रतः॥ यतो भवत्सन्निहितं करिष्येहं न संशयः॥ पार्वत्युवाच॥ सखि शृणु मम प्रीता मनो
भिलाषितं मया॥ कपर्दिनं च भर्तारं करिष्येहं न संशयः॥ एतन्मे चिंतितं कार्यं नातेन क्रतमन्य
था॥ तस्मादेहं परित्यागं करिष्येहं सखिप्रिये॥ पार्वत्या वचनं श्रुत्वा सखी वचनमब्रवीत्॥

पिता पत्र न जानाति गमित्वा मोहितद्वने॥ इत्येवं संमतं कृत्वा नीतासि त्वं महद्वने॥ पितानीरिक्षय
मास हिमवांस्तु गृहे गृहे॥ केन नीतासि मे पुत्री देव दानव किन्नरैः॥ नारदाय कृतं सत्यं किं दास्ये ग
रुडध्वजे॥ इत्येवं चिंतया विष्टो मूर्छितो निपपात ह॥ हाहा कृत्वा प्रधावंति लोकास्ते गिरिपुंगवं
॥ ऊचुर्गिरिवरं सर्वे मूर्छाहेतुं गिरे वद॥ गिरिरुवाच॥ दुःखस्य हेतुं शृणुत कन्यारत्नं हृतं मम॥ दष्टा
काल सर्पेण सिंहव्याघ्रेण वा हृता॥ न जाने क्व गता पुत्री केन दुष्टेन वा हृता॥ चकंपे शोकसंतप्तो वा
तेनेव महातरुः॥ गिरिर्वनाद्वनं याति स्त्वदा लोकनकारणात्॥ सिंहव्याघ्रैश्च भल्लूकैर हिभिः स
हितं त्वयं॥ त्वं चापि विपिने घोरे व्रजंती सखिभिः सह॥ तत्र दृष्ट्वा नदीं रम्यां तत्तीरे च महागुहां॥ तां
प्रविश्य सखि सार्धं मन्नभोग विवर्जिता॥ संस्थाप्य चानुकं लिंगं पार्वत्या सहितं मम॥ याद्व
तीयाभाद्रपदे हस्तनक्षत्र संयुता॥ तत्र वादित्र गीतेन रात्रौ जागरणं कृतं॥ तेन व्रतप्रभावे
न आसनं चलितं मम॥ संप्राप्तो हं तदा तेन यत्र त्वं सखिभिः सह॥ प्रसन्नो स्मि मया प्रोक्तं वरं ब्रू

व्रता० ४८ हिवराननेः॥ पार्वत्युवाच॥ यदि देव प्रसन्नोसि भर्त्ता भवतु मे हरः॥ तथेत्युक्त्वा तु तां देवीं कैलासं
पुनरागतः॥ ततः प्रभाते संप्राप्ते नद्यां सर्वविवर्जितं॥ पारणं तु कृतं तत्र सख्या सार्द्धं त्वया शुभे
॥ हिमवानपि तं देशमाजगाम वनं घनं॥ चतुर्दशान्तरीक्ष्यंस्तु विह्वलः पतितः पुनः॥ दृष्ट्वा तत्र
नदीतीरे प्रसुप्तं कन्यकाद्वयं॥ उत्थाप्योत्संगमारोप्य रोदनं कृतवान् गिरिः॥ सिंहव्याघ्रादिभि
स्त्वकवने दुष्टे कुतः स्थिता॥ पार्वत्युवाच॥ शृणु तात मया ज्ञातं त्वं दास्यसि विष्णवे तु मां॥ तदन्यथा कृतं
त तातेनाहं वनमागता॥ दत्तासि तात यदि मामीश्वराय तदा गृहे॥ आगमिष्यामि नैवं चेदिह स्था
स्यामि निश्चितं॥ तथेत्युक्त्वा हिमवतानीतासि त्वं गृहं प्रति॥ पश्चाद्दत्ता त्वमस्माकं कृत्वा वैवा
हिकिं क्रियां॥ तेन व्रतप्रभावेन सौभाग्यं साधितं त्वया॥ अद्यापि व्रतराजं तं न कस्यापि निवे
दितं॥ नामास्य व्रतराजस्य शृणु देवि यथाभवत्॥ आलिभिर्हरिता यस्मात्तस्मात्सा हरितालिका स्या राम ४८
॥ पार्वत्युवाच॥ नामेदं कथितं नस्य विधिं वद मम प्रभो॥ किं पुण्यं किं फलं चास्य केन च क्रिय

ते व्रतं॥ ईश्वर उवाच॥ शृणु देवि विधिं वक्ष्ये नारीणां व्रतमीदृशं॥ करिष्यसि प्रयत्नेन यदि सौ
भाग्यमीच्छसि॥ आच्छादन हि वस्त्रैस्तु नानावर्णविचित्रितैः॥ चंदनेकेन सुगंधेन लेपयेद्गृ
हमंडलं॥ शंखदुंदुभिमृदंगैस्तु कारयेद्बहुनिःस्वनैः॥ नानामंगलगीतं च कर्तव्यं मम सद्मनि॥ स्था
पयेद्वालुका लिंगं पार्वत्या सहितं मम॥ पूजयेद्बहुपुष्पैश्च गंधधूपादिभिर्नवैः॥ नानाप्रकारनै
वेद्यैः पूजयेज्जागरं चरेत्॥ नारिकेलैः पुगफलैः जंबीरैर्बकुलैस्तथा॥ बीजपूरैः सनारंगैः फलै
श्चान्यैश्च भूरिशः॥ ऋतुकालोद्भवैर्भूरिप्रकारैः कंदमूलकैः॥ धूपादिगंधैश्च तथा मंत्रेणानेन
पूजयेत्॥ नमः शिवाय शांताय पंचवक्त्राय शूलिने॥ नंदिभृंगिमहाकालगणयुक्ताय शंभवे॥
शिवायै हरकांतायै प्रकृत्यै सृष्टिहेतवे॥ शिवायै सर्वमांगल्यै शिवरूपे जगन्मये॥ शिवे कल्या
णदे नित्यं शिवरूपे नमोस्तु ते॥ शिवरूपे नमस्तुभ्यं शिवायै सततं नमः॥ संसारभयसंतापात्त्रा
हि मां सिंहवाहिनि॥ येन कामेन देवि त्वं पूजितासि महेश्वरि॥ राज्यं सौभाग्य संपत्तिं देहि मामंब

पार्वति॥ मंत्रेणानेन देवि त्वां प्रजपित्वा यथा सह॥ कथां श्रुत्वा विधानेन दद्याद्दन्नं च नारि भोः
ब्राह्मणेभ्यो यथाशक्त्या देया वस्त्र हिरण्यगाः॥ अन्येभ्यो दीयते स्त्री तिस्त्रीणां वा नृपणादिकं
॥ नवत्रीसहकं तां श्रुत्वा भक्तियुक्तेन चेतसा कृत्वा व्रतेश्वरं देवि सर्वपापैः प्रमुच्यते॥ सप्तज-
न्म न वैधव्यं सौभाग्यं चैव वर्द्धते॥ तृतीयायां तु या नारी आहारं कुरुते यदि॥ सप्तजन्म भवे वं-
ध्या वैधव्यं जन्म जन्मनि॥ दारिद्र्यं पुत्रशोकं च कर्कशा दुःखभागिनी॥ पतते नरके घोरे नो-
पवासं करोति या॥ राजते कांचने ताम्रे वैणवे नाथ मन्मये॥ भाजने विन्यसेद्दत्तं सवस्त्र फलदक्षि-
णां॥ ब्राह्मणाय विशेषेण यदि द्यादं ते च पारणं॥ एवं विधिया कुरुते च नारी त्वया समाना रमते च भ-
र्त्रा॥ भोगाननेकान् भुवि भुज्यमाना सायुज्यमंते लभते हरेण॥ अश्वमेधसहस्राणि वाजपे-
यशतानि च॥ कथाश्रवणमात्रेण फलं सुलं लभते नरैः॥ एतत्ते कथितं देवि तवाग्रे व्रतमुत्तमं॥ को-
टियज्ञकृतं पुण्यमस्यानुष्ठानमात्रतः॥ ॥इति श्री भविष्योत्तरपुराणे हरितालिकाव्रतं॥ ॥

अथोद्यापनं॥ पार्वत्युवाच॥ उद्यापनविधिं ब्रूहि तृतीयायाः सुरेश्वर॥ भक्तितः श्रोतुमिच्छा-
मि व्रतसंपूर्तिहेतवे॥ महादेव उवाच॥ उद्यापनविधिं वक्ष्ये व्रतराजस्य शोभने॥ यस्यानुष्ठान-
मात्रेण संपूर्णं हि व्रतं भवेत्॥ चतुस्तंभं चतुर्द्वारं कदलीस्तंभमंडितं॥ घंटिकाचामरयुतं
कमलै रूपशोभितं॥ चंदनागरुकर्पूरैर्लेपितं मंडपं शुभं॥ मध्ये वितानं बध्नीयात्संचव
तोरणं कृतं॥ तन्मध्ये कारयेत्सम्यं पंचवर्णैः सुशोभनैः॥ तस्योपरि न्यसेद्व्रीहिद्रोणेन परिसंमि-
तान्॥ सौवर्णं राजतं ताम्रं कलशं विन्यसेद्बुधः॥ पंचरत्नानि निक्षिप्य सर्वौषधिसमन्वितं॥ तस्यो-
परि न्यसेत्पात्रं सौवर्णं राजतं शिवा॥ वृषारूढं महादेवं रजतेन विनिर्मितं॥ सर्वावयवसंयुक्तां गौ-
रीं हेम्ना विनिर्मितां॥ पूजयेत्तत्र गंधाद्यैः पुष्पैर्नानाविधैः शुभैः॥ रात्रौ जागरणं कुर्याच्छ्रीकथावा-
चनपूर्वकं॥ ततः प्रभाते विमले कृत्वा स्नानादिकर्म च॥ पूर्ववत्पूजयेद्देवं पश्चाद्धोमं च कारये-
त्॥ स्वगृह्योक्तेन विधिना कृत्वाग्निस्थापनं ततः॥ प्रारंभेच्च ततो होमं नवग्रहपुरःसरं॥ तिलाज्यय-

वसंमिश्रानाज्येनव परिप्लुतान्॥ जुहुयाद्रुद्रमंत्रेण गौरीमंत्रेण वेदवित्॥ अष्टोत्तरशतं वापि अ
ष्टाविंशतिमेव वा॥ एवं समाप्य होमं तु तत्राचार्यं प्रपूजयेत्॥ सुवर्णरत्नवासोभिर्गां च दद्याद्य
विधि॥ शय्यासोपस्करं दद्याचार्याय प्रयत्नतः॥ षोडशा द्विजयुग्मांश्च पक्वान्नाद्यैश्च भोजयेत्॥ सौ
भाग्यद्रव्यवस्त्राणि वंशपात्राणि षोडश॥ दातव्यानि प्रयत्नेन ब्राह्मणेभ्यो यथाविधि॥ अन्येभ्यो
द्विजवर्येभ्यो दक्षिणां च प्रयत्नतः॥ तपसी परया भक्त्या श्रद्धया शिवतुष्टये॥ उद्दिश्य पार्वतीत्रं
वसर्वं कुर्याद्दत्तं द्वितः॥ बंधुभिः सह भुंजीत नियतश्च परेऽहनि॥ एवं या कुरुते नारी व्रतराजं सुम
ध्यमे॥ सौभाग्यं महदिवं तस्याः सप्तजन्मनसंशयः॥ ॥इति श्री भविष्योत्तरपुराणे तृतीयोद्यापनं ह
रितालिकातृतीयाव्रतं॥ ॥ अथहस्तरुंगत्वारंवाचारभ्यासंहस्तगौरीव्रतं॥ ॥सूत उवाच॥
कुंत्यां च वनउपेतायां हस्तिनापुरमुत्तमं॥ मानितायां नरेंद्रैश्च तनयैः पंचभिः सह॥ तस्याः कुश
लमन्विच्छन्नाजगाम माधवः॥ अभिनंद्य सुखासीनं देवदेवं जनार्दनं॥ उवाच कुंती सा तं रा

व्यग्रगल्भमिदं वचः॥ कुंत्युवाच॥ धन्यास्मि कृतकृत्यास्मि सनाथास्मि परंतप॥ साहं संभाविता द्यासि
त्वया सर्वजगद्गुरो॥ यदि मे सुप्रसन्नोसि तदा चक्ष्व व्रतं विभो॥ यद्विधाय सुखं राज्यं प्राप्नुयां तनयैः
सह॥ ॥कृष्ण उवाच॥ कुंती ते कथयिष्यामि व्रतानामुत्तमं व्रतं॥ यत्कृत्वा सुखसंतानं धनधान्यस
मन्वितं॥ विधयद्भक्तापुण्यं सत्पुत्रा राज्यमाप्स्यसि॥ हस्तगौरीव्रतं भद्रे कुरुष्व शुचिमानसा॥ य
त्कृत्वा सर्वतः संपन्ना जनेवांछितं फलं॥ कुंती उवाच॥ यत्त्वोक्तं ते व्रतं नाथ विधानं तस्य कीदृशं
॥ केन पूर्वं कृतं देव तन्मे ब्रूहि जनार्दन॥ कृष्ण उवाच॥ कैलासशिखरे देवी हस्तस्थे च दिवा
करे॥ दिवा प्रसुप्तगौरी तु सहरसंनिधिमागता॥ सा सुप्ता देववरेवेशं स्वप्ने रुद्रं ददर्श ह॥ अर्द्धदेहं
वृषारूढं स्वमर्द्धं चंद्रकलाधरं॥ किमिदं तन्ममाचक्ष्व तत्पतेमानसं मम॥ ईश्वर उवाच॥ देवी प्र
श्नि जिज्ञासि हस्त रुद्रं गतेरवौ॥ न स्वप्नं संदिवातत्र तस्येदं विहितं फलं॥ शृणु देवी त्वया येन
दंडितोहं विलोकितः॥ त्वया रब्धव्रतं देवी मदाराधनकाम्यया॥ अरण्येस्मिन्प्रसन्नोस्मि तव

याच समुद्दितं॥ अमर्षी व्रतपानेन दृष्टोहं ताह शास्त्रया॥ तत्कुरुष्वाधुना देवि हस्तिगौरी
व्रतं शुभं॥ पार्वत्युवाच॥ आदिष्टं तां व्रतं नाथ विधानेन महेश्वर॥ आरंभो सकदा कार्यः को
विधिः कस्य पूजनं॥ ईश्वर उ०॥ मंडपे स्थापनं कुर्यात्सिर्वालं कारभूषिते॥ अन्वहं कांचनैः
पुष्पैः फलमुक्तान्वितैः शुभैः॥ नैवेद्यैः पंचखाद्यैश्च श्रुणुयात्सहं कथां॥ दिने चतुर्दशे
मासे स्थापयेत्प्रतिमां शुभां॥ पक्वान्नैः पूरितैः शुभ्रैः सार्धं सार्धं त्रयोदश॥ सार्धं त्रयोद
शादिने नैवेद्यमुपकल्पयेत्॥ फलमूलानि चान्यानि तावंति समुपाहरेत्॥ पूजयेच्च सुवर्ण
पुष्पैश्चामैः सुगंधिभिः॥ चंदनैर्धूपदीपैश्च तांबूलैश्च फलादिभिः॥ ध्यायेच्च हृदये गौरीं ह
रहेरंबसंयुतां॥ दक्षिणां च ततो दत्वा नत्वा देवीं विसर्जयेत्॥ सार्द्धत्रयोदशानयादोपकाश्चोलि
कान्विताः॥ सुवासिन्यै स्त्रियै दत्वा तावतः स्वयमाहरेत्॥ व्रतं समाचरेद्देवी यावद्वर्षं त्रयोदश
॥ स्वर्णनागजं गौर्यादि प्रतिवर्षं विसर्जयेत्॥ ततश्चतुर्दशे वर्षे तदुद्यापनमाचरेत्॥ संस्था

प्यगणाध्यक्षं गौरीकांचनी कांचने गजे पश्चाद्वैदिकविधिना पूज्य सुवासिनीस्त्रयोदश॥ चतु
र्दशेप्यद्विवसे संजाते प्रातः स्थिता कृत्वोपवासनियमं गते गौरीं प्रपूजयेत्॥ पक्वान्न
स्वर्णपात्रेषु त्रयोदश सुतिक्षिपेत्॥ स्त्रीभ्यश्च कंचुकीर्दत्वा भोजयित्वा विसर्जयेत्॥ ए
वं देवी व्रतं कृत्वा सर्वान्कामानवाप्नुयात्॥ अशक्तोनुसरा कार्या प्रतिमा मृत्तिकामयी
॥ पात्राणि वैणवान्येव पीतपुष्पाणि चैव हि॥ कृष्ण उवाच॥ ततश्चक्रे व्रतं गौरी प्राप्तासा
वांछितं फलं॥ समर्प्येतद्व्रतं कुंती कुरुश्रेष्ठ समन्विता॥ अथ पत्नी व्रतं कुंती सन्निधानं त
दाकरोत्॥ गंधारी चापि तच्छ्रुत्वा व्रतं चक्रे यथाविधि॥ तुष्टा च भक्तिभावेन पुष्टा गौरी ततोब्र
वीत्॥ पार्वत्युवाच॥ कुंति तेपरितुष्टास्मि वरं वरय सुव्रते॥ कुंत्युवाच॥ देहि मे सर्वसंपत्ति
सर्वसौख्यसदोदयं॥ व्रतमेतत्पुरा कृपात्त्वल्लोकमवाप्स्यति॥ नदरीद्र्यं न वैधव्यं न शोको
नापि दुष्कृतं॥ कष्टं वापहतं देवि कदाचित्संभविष्यति॥ तथेत्युक्त्वा ततो गौरीतत्रैवांतरधीय

व्रता०
५२

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

ता॥एतद्व्रतंसफलदुःखविनाशहेतुसौभाग्यदंसफलभावनयाचरंती॥ययोषितःस्तुख
मनतमिहापिभुक्त्वागौरीपतिरताःस्ततोलभंते॥ ॥इतिश्रीभविष्योत्तरपुराणेहरगौरीव्रतं
॥ ॥अथभाद्रशुक्लतृतीयायांकोटीश्वरीव्रतं॥मदनरत्नेस्कांदे॥स्कंदोवाच॥ देवलोकेम
हादेविगणिकासौख्यसंयुताः॥ मर्त्यलोकेतथासर्वाःस्त्रियःसौभाग्यगर्विताः॥कथंभाग्य
भोगाश्चलभंतेपरमेश्वरि॥पार्वत्युवाच॥शृणुष्वेदंपरंगुह्यंसर्वकामफलप्रदं॥दुर्भगानांच
नारीणांसौभाग्यकरणंपरणंपरं॥लक्ष्मेश्वरीतिविख्यातंततःकोटीश्वरीव्रतं॥तृतीयायांतु
शुक्लपक्षेतुमासिभाद्रपदेभवेत्॥तस्मिन्व्रतंतुसंग्राह्यंयावद्वर्षचतुष्टयं॥उपवासेनकर्तव्यं
वर्षेवर्षेतुसुंदरी॥अखंडानांतंदुलानांतिलानांवासुलोचने॥लक्षमेकंचविज्ञायरूपे
त्वयसिरोभने॥क्षीरसंमिश्रितैःकार्यंदिव्यास्तत्रसुलोचने॥कृत्वातुपुष्पप्राकारंपुष्पमाला
भिर्मंडितं॥तस्यामपार्वतींदेवींपूजयेद्भक्तिशक्तितः॥पूजयेद्विविधैःपुष्पैःकुंकुमागरुचं

राम
५२

दनैःअगंधैर्धूपैश्चनैवेद्यैःफलैश्चविविधैस्तथा॥वस्त्रेणचैववरक्तेनपूजयेत्परमेश्वरी॥नमोन
मस्तेदेवेशिलक्ष्मेश्वरिनमोस्तुते॥कोटेश्वरीनमस्तुभ्यंनमस्तेहरवल्लभे॥उमादेविनमस्तुभ्यंका
त्यायनीनमोस्तुते॥नमःकालिमहाकालीशिवदुर्गेनमोस्तुते॥नमःशर्वाणिरुद्राणिअपर्णेशंकर
प्रिये॥सर्वव्रतरतेदेवित्राहिसंसारसागरात्॥पूजामंत्रः॥नमोलक्ष्मेश्वरिदेविकोटिश्वरी
नमोस्तुते॥गृहाणार्घ्यंमयादत्तंशंकरेणसमंमम॥अर्घ्यमंत्रः॥पुराव्रतपरंशुभ्रेकारुण्यनि
धिमव्ययं॥गौरीणिर्मितयेद्धृतामाद्यांस्त्वेवमुदीरितः॥एवंबंधविधानेनकरोतितियत्व्रतं
॥नतस्याःस्याद्दारिद्र्यंनचदुष्टवियोजनं॥अष्टपुत्राभवेन्नारीभर्तारंचगुणाधिकं॥सुरूपंगु
णिनंकांतंपंडितंप्रियदर्शनं॥ईश्वरंचैवराजानंलभतेदीर्घायुषंप्रियं॥दातारंचैवभोक्तारंस
मस्तजनवल्लभं॥सुशीलंधार्मिकंशूरंचंद्रवत्प्रियदर्शनं॥सुरूपासुभगाचैवसदापत्युःप्रिया
भवेत्॥मदपत्नावाणीहाकुरुतेराजसत्तमं॥रोहिणीपतिमांलेभेचंद्रव्रतनिषेवणात्॥राण्देवी

स्तुतन्नरिमादिस्तंप्राप्यसस्मतिं॥ इदंते कथितं भद्रे व्रतं कोटिश्वरीपरं॥ लक्षेश्वरीति विख्यातंकु
हलं तेमनोहरं॥ इति कोटीश्वरीव्रतं॥ अथाश्विनशुक्लचतुर्थीयायां बृहद्गौरीव्रतं॥ तत्रमंत्र॥ चतुर्भु
जां सुवर्णाभां नानालंकारभूषितां॥ पाशांकुशधरां देवीं ध्यायेत्सर्वार्थसिद्धदां॥ कमंडलुधरां
स्वस्थां पात्रपात्रं च बिभ्रती॥ ध्यानं॥ एहिमातर्विश्वरूपे त्वं त्रिगुणे परमेश्वरि॥ आवाहयामि भ
क्त्या त्वां प्रसन्ना भव सर्वदा॥ आवाहनं॥ हेमरत्नकृतं देवि आसनं ते विनिर्मितं॥ पाशांकुशध
रा देवी आसने स्थापयाम्यहं॥ आसनं॥ अक्षमालांकुशधरे वीणापुस्तकधारिणी॥ गंगाद
त्तं मया तोयं पाद्यार्थं प्रतिगृह्यतां॥ पाद्यं॥ अर्घ्यं ददामि ते मातर्नक्षत्रानामनयंकरे॥ गृहाण त्वं
बृहद्गौरी नमस्कारस्तु ते मम॥ अर्घ्यं॥ नक्षत्रानामिष्टदे मातः सर्वालंकारसंयुता॥ आचम्यतां ज
गन्मातर्बृहद्गौरि नमोस्तु ते॥ आचमनं॥ ततः पंचामृतस्नानं॥ स्नापयामि जगन्मातस्त्वां सुतीर्थ
जलेन वै॥ प्रार्थयित्वा महादेवी सद्यः स्नानविनाशिनी॥ स्नानं॥ वस्त्रधौतं मया देवी दुकूलं नव

निर्मितं॥ भक्त्या समर्पितं मातर्गृह्यतां जगदंबिके॥ वस्त्रं॥ अथ सिंदूरहरिद्राकुंकुमादिसौभाग्य
द्रव्याणि निवेदयेत्॥ मलयाचलजं शुभ्रं घनसारमनोहरं॥ गंधं गृहाण देवि त्वं बृहद्गौरि नमो
स्तु ते॥ गंधं॥ चंपकादीनि पुष्पाणि भक्त्या नीतानि मे शुभे॥ प्रतार्थं गृह्यतां देवि जातीपुन्नागमा
लती॥ माल्यादीनि सुगंधीनि पुष्पं॥ धूपोयं गृह्यतां देविका लागरुघृतान्विता॥ आघ्रेयः स
र्वदेवानां देवद्रुमरसोद्भवः॥ धूपं॥ दीपं गृहाण देवेशि त्रैलोक्यतिमिरापहं॥ वह्निना योजितं मातः
बृहद्गौरि नमोस्तु ते॥ दीपं॥ नैवेद्यं गृह्यतां देवी इति नैवेद्यं॥ कर्पूरैलालवंगादिनागवल्लीदलैर्युतं
॥ पूगीफलयुतं देवि तांबूलं प्रतिगृह्यतां॥ तांबूलं॥ हिरण्यगर्भगर्भस्थमिति दक्षिणा॥ धारयिष्या
मि भद्रे त्वां रक्षार्थं मम सर्वदा॥ आयुर्देहि यशो देहि सौभाग्यं देहि मे शिवे॥ दोरकबंधनं॥ क्षेम
संपत्करे देवी सर्वसौभाग्यदायिनी॥ सर्वकार्यप्रदे देवी गृहाणार्घ्यं नमोस्तु ते॥ ततश्च द्वादशार्घ्याः॥ गगना
तरसंदीप्तक्षीराब्धिमथनोद्भवा॥ नानासितदिगान्तोगर मानुजनमोस्तु ते॥ पक्वान्नं सफलं पुष्कमिति

वायणं॥ आहूतासि मया देवि पूजितासि मया शुभे॥ मम सौभाग्यदानाय यथेच्छा तत्र गम्यतां॥
विसर्जनं॥ इति पूजा॥ अथ कथा॥ विजयोवाच॥ अथान्यद्वद हरितगौरीव्रतं वक्ष्यामि कल्मकं॥ मासि मा
र्गपदे पक्षे तृतीयायां च तद्व्रतं॥ प्रातरेव दंतधावनं चंद्रोदये॥ तत्र पूजाविधानाकल्पपक्षे पूजानुष्ठा
नाचाराद्व॥ पक्षोक्तं कल्पः॥ आयनेव हरितगौरीशाखाम्रफलैः सह॥ निक्षिप्य देवतावेद्यां तस्
धःस्थिकतां शुभां॥ नरसेवं शोदयं हृष्ट्वा स्नात्वा धौतांबरावृता॥ सखिभिः सहिता सम्यग्गत्वं कलशं प्र
जयेत्॥ गौरीं मा वान्य विधिवत्स्थिकतां मंडले शुभे॥ गंधपुष्पाक्षतादिभ्यो धूपदीपैरनेकधा॥ स
र्वोपचारैर्हरितिपंचपंचाशन्निर्वपेत्॥ एवं प्रपूज्य यथाशक्त्या कृत्वा चैव प्रदक्षिणं॥ दोरकं बंधयेत्
स्थात्तंतुपंचकनिर्मितं॥ बध्नामि दोरकं नित्यमात्व दत्तं स्वस्वरायणं॥ आयुर्देहि यशो देहि
सौभाग्यं देहि मे शुभे॥ अनेन दोरकं — — धाम्बं दायार्घ्यं निवेदयेत्॥ हेमसंपत्करे देवि सर्वसौभा
ग्यदायिनी॥ सर्वकामप्रदे देवि गृहाणार्घ्यं नमोस्तु ते॥ गगनांगणसंदीप्तेति च दद्यार्घ्यः॥ कथा

मेतां शृणु पापघ्नीं येन तन्मनाः सदा॥ ततो गोधूमचूर्णेन पंचभिः कुंडवैर्मितं॥ पक्वान्नं सर्वविप्रा
य दत्वा भुंजीत स्वयं॥ एवं वै पंच वर्षाणि कृत्वा व्रतमनुत्तमं॥ सर्वान्कामानवाप्नोति नात्र कार्या
विचारणा॥ कृष्णोवाच॥ केन चादौ पुराचीर्णं व्रतं यत्नतपोदितं॥ इमितं कोपि जनेवा व्रतस्यास्य
प्रभावतः॥ विजयोवाच॥ शृणु कं मे यथा सर्वं पार्वसाकथितं यथा॥ सूत उवाच॥ शृणुध्वमृषयः
सर्वे नैमिषारण्यवासिनः॥ पुराकृतयुगस्यादौ सर्वव्रतहितैषिणा॥ शंभुना कथितं गौर्ये तद्व्र
तं कथयाम्यहं॥ कदाचिदुपतिः पार्वती पर्यपृच्छत॥ शंभो त्वां परिपृच्छामि करुणाकर शंकर॥ स
र्वबाधोपशमनं सर्वकामफलप्रदं॥ व्रतानां सर्वदानानामुत्तमं ब्रूहि तत्वतः॥ आयुरारोग्यदं दे
व पुत्रपौत्रप्रदायकं॥ तद्व्रतं ब्रूहि देवेश यद्यहं तव वल्लभा॥ ईश्वर उवाच॥ शृणु देवि परं गुह्यं व्रतं प
रमदुर्लभं॥ पुरा नृप परस्यांते पांडोः प्रियकरांगना॥ वर्षषोडशसंपूर्णा संपन्ना नवयौवना॥ सा व प
तान्नु साकंती भर्तारमिदमब्रवीत्॥ केन कर्मविपाकेन पुत्रहीनास्मि दुःखिता॥ अनपत्यप्रतीका

रामिदानीं ब्रूहि तत्त्वतः॥ पांडुरुवाच॥ ऋषिशापोस्ति मे नंदे तपस्तेन न विष्यति॥ नतु लब्धं वनं श्रु
त्वा पितृगेहे भ्रमगान्स्वयं॥ पितुर्गेहे कर्तुमिच्छा कुंती व्यासं ददर्श ह॥ नमस्कृत्य च तं प्राह कुंती सुकृतितां
गतिः॥ कुंत्युवाच॥ तात मे कथयाद्य त्वं पुत्रसंतानदायकं॥ सर्वसंपत्प्रदं नॄणां व्रतमेकं महामुने॥
व्यास उवाच॥ शृणु त्वं बृहतीगौर्याख्यं व्रतं संतानदायकं॥ भाद्रकृष्णतृतीयायां निशि चंद्रोदये शुभे॥
स्नानं कृत्वा तु विधिवन्मौनी भूत्वा व्रतं चरेत्॥ सर्वसंपत्करं स्त्रीणां धनपुत्रान्नसौख्यकृत्॥ न
हिरण्यादिदानानां सर्वेषामधिकं व्रतं॥ पंचवर्षविधानं तु ततउद्यापनं चरेत्॥ उद्यापनविधा
नेन संपूर्णं फलमश्नुते॥ अंते तु कारयेन्नंदे सौवर्णं बृहतीफलं॥ षष्ठ्युत्तरं चतुर्भिश्च शुभे बीजै
र्युतं तु तत्॥ देव्याः पुरस्तु संस्थाप्य सर्ववस्तु परिपूजयेत्॥ आचार्यं पूजयेन्नंदे विप्रांस्तथैव च॥
सुवासिनीः पंच पत्न्या वस्त्रालंकारभूषणैः॥ कंचुकैश्चैव ताटंकैः कंठसूत्रैर्हरिप्रिया॥ वं
शपात्राणि युग्मानि सूत्रैः संवेष्टितानि च॥ सिंदूरजीरकं चैव सौभाग्यद्रव्यसंयुतं॥ गोधू

ममपिष्टजातं च बृहतीफलचंपकं॥ वायनानि च पंचैव ताम्रे दत्वा तु जोनयेत्॥ अर्घ्यं दत्वा वायना
नि दत्वा तु जीवनाय नमः॥ तत्फलं धारयेत्कंठे सर्वकामसमृद्धये॥ ततः प्रातः समुत्थाय समालंकारा
सखिजनैः॥ गीतवाद्यपुतानद्यां गौरीं तां तु विसर्जयेत्॥ आकृतास्ति मया देवि पूजितासि मयाशुभे॥
मम सौभाग्यसंतानयत्थेष्टं गम्यतां त्वया॥ तद्व्रतप्रभावेन काचिद्ब्राह्मणकन्यका॥ पति
मजीवयामास निर्जरं यमकिंकरात्॥ तस्माद्धरत्वं व्रतमेतदाद्यमायुः प्रदं पुत्रसमृद्धिदं च
॥ कुमैश्चर्यौत्रैश्च पुत्राश्च परमा गौरीप्रसादाद्भवजीववत्सा॥ यदिदं शृणुयान्नित्यं श्रावयेच्चा
समाहितः॥ स तु तुष्टा विपुलानंतो गान्ते शिवपदं व्रजेत्॥ ॥ इति भविष्योत्तरे बृहद्गौरी
व्रतं॥ इदं कर्णाटकेषु प्रसिद्धं॥ मार्गशीर्षे मासि पौषे वा कृष्णतृतीयायां सौभाग्यसुंदरीव्रतं॥ तच्च चतु
र्थीयोगे पुनायां कार्यं॥ न द्वितीयाविद्धायां॥ द्वितीयावेधरहिता तृतीयायां सौभाग्यसितान्न वेत्
॥ चतुर्थीयोगिनि किंचिद्भुत्वा कापि फ्रान वेदिति कथायामुक्तेः॥ नारद उवाच॥ भगवंतेन ज्ञात्

व्रता० ५६

ह्यानानावर्णास्तथा गुणाः॥ स्वेदजाश्चांडजाश्चैव उद्भिजाश्च जरायुजाः॥ देवासुराः सगंधर्वाः सिद्
द्धोरगराक्षसाः॥ एके सुरूपाः सुभगा वलितश्चापरे तथा॥ तथान्ये दुःखसंयुक्ताः कणमुकाश्चप
गवः॥ दुःशीला दुर्भगा दीनाः परकर्मकराः सदा॥ एतन्मे हृदि संतापसंशयं छेत्तुमर्हसि॥ ब्रह्मोवा
च॥ शृणु वत्स प्रवक्ष्यामि त्वं भक्तोसि प्रियोपि मे॥ कर्मबीजप्रभावं हि शरीराणां च नौतिकं॥ येस्तद्दाना
जायंते सुरूपाः सुरूपाः सुखिनो नराः॥ तपःप्रभावाज्जायंते वलितः सुभगास्तथा॥ अदत्तदाना
जायंते परकर्मकराः सदा॥ परापवादवक्तारः परद्रव्यापहारिणः॥ हंतारः प्राणिनां चैव अप्रमदा
णां च नष्टकाः॥ कुमशोर्नरकान्भुक्ता जायंते कुष्ठिता नराः॥ दरिद्राः पंगवो मूकाः काणा यादुर्भ
गास्तथा॥ नारद एवं स्वकर्मोत्थे नरा नार्यश्च दुःखिताः॥ नारद उवाच॥ उपायं ब्रूहि भगवन्येन कर्मक्ष राम
यं भवेत्॥ तपो दानं व्रतं तीर्थं शरीरस्य च शोषणं॥ दुःखसंतापतप्तानां जीवितान्महदेश्वरं॥ ब्रह्मोवा ५६
च॥ शृणु नारद यत्नुत्यं व्रतानामुत्तमं व्रतं॥ सर्वदुःखप्रशमनं व्याधिदारिद्र्यनाशनं॥ सुखसौभा

ग्यजननं पुत्रपौत्रप्रदायकं॥ सुरूपं च सौभाग्यकरणं कामदं तथा॥ नारीणां च विशेषेण सुखसौभाग्य
दायकं॥ वसिष्ठाय पुरा प्रोक्तं ऋषीणां च समागमे॥ कैलासशिखरे रम्ये शंकरेण महात्मना॥ नारद उ
वाच॥ कस्मात्प्रोवाच भगवान्कृपा कस्माद्भायते॥ ब्रह्मोवाच॥ दृष्ट्वाद्भुतं च सौभाग्यं अरुंध
त्या जगन्मुखं॥ तथा रूपं च शीलं च सौभाग्यमतुलं तथा॥ कृत्वा शिरःप्रकंपं च जहास समशंकरः॥
दृष्ट्वा चकारणं देवं वसिष्ठः स्मितकारणं॥ ईश्वर उवाच॥ अहो व्रतस्य माहात्म्यं पश्य त्वं ऋषिस
त्तमाः॥ पुरा जन्मनि यत्नस्य दासी कर्मकरा सदा॥ भिक्षान्नो जनानित्यं उच्छिष्टा शायना सदा॥ कुरू
पाङ्गभंगादीना हरूणा गतदनाषिणी॥ नाम्ना मेघवती ख्याता दुर्दशा विरुनाम्युना॥ एकदा प्रेषणार्थं
मागता ब्राह्मणसन्निधौ॥ श्रुतं व्रतं च नारीणां वाच्यमानं द्विजन्मना॥ सौभाग्यसुंदरी नामक्षी या स
र्वकामदा॥ तन्वी रागमे जास्त्रे सर्वकामफलप्रदा॥ मया प्रकाशितं शर्वं प्रार्थितं नो मया तथा॥ ना
णितासां प्रसंगाच्च मेघवत्या प्रसंगतः॥ कृत्वितं चैव नैवेद्यं दत्तं दानं च किंचन॥ हविष्यं च वयो

व्रता
५७

ब्दिष्टं पारणं च नयाकृतं ॥ केवलं च व्रतं चीर्णं श्रद्धापूतेन चेतसा ॥ श्रद्धया धार्यते धर्मो ब
हुभिर्यैर्राशिभिः ॥ ऋषयश्च क्रिरे धर्मं श्रद्धया भावितात्मनः ॥ तेन धर्मविपाकेन निषधाधि
पतेः सुता ॥ सुरूपा च सुशीला च सर्वलक्षणसंयुता ॥ संस्मरणं वियवाशां तात स्यादेव्याः प्रसा
दतः ॥ अद्दिष्टमनोजनाज्जातानिषदानां च योनिषु ॥ स्वदत्तदानाञ्जातात पसाञ्चो गवर्जिता ॥
व्रतमन्मा वा जायंते सुरूपा च पतिव्रता ॥ महासौभाग्यसंयुक्ता सा स्यात्स्त्री रिवापराः ॥ सर्व
कामप्रदा देवी नंदिनि वसते गृहे ॥ नह्यतं चास्ति देवर्षे सर्वकामफलप्रदं ॥ नारद उवाच ॥ व्रत
स्यास्य विधिं ब्रूहि को विधिः किं च पूजनं ॥ कस्मिन्मासे प्रकर्तव्यं देवता का प्रकीर्त्तिता ॥ किं पुष्प
किं च नैवेद्यं ध्यानं कस्य च पूजनं ॥ ब्रह्मोवाच ॥ व्रतस्यारंभणं चारो मार्गशीर्षेथ माघके ॥ द्वितीया
वेधरहिता तत्तीया या सिता भवेत् ॥ चतुर्थीयोगिनि किं विद्युद्वावापि यदा भवेत् ॥ उपवासं प्र
कुर्वीत दंतधावनपूर्वकं ॥ अपामार्गेण कुर्वीत दंतमुद्दीत दाव्रती ॥ उमे देवी नमस्तुभ्यं सौभाग्य

राम
५७

Dr. BHAU DAJI
डाक्टर भाऊदाजी

विहारिणी ॥ ममास्मिन्महेशानि करिष्ये व्रतमुत्तमं ॥ सांनिध्यं कुरु मे देवि व्रतेस्मिन्हरिवल्लभे
॥ नियममंत्रः ॥ सौभाग्यसुंदरीनामव्रतिनी सा प्रकीर्त्तिता ॥ सर्वकामप्रदा देवी सर्वसत्त्वव
शंकरी ॥ तस्या दर्शनमात्रेण सदा मज्जायते जगत् ॥ द्रोणपुष्पैश्च संपूज्या दारिमं चार्घहेतवे ॥
नैवेद्ये मोदकान्दद्यात्कर्पूरं माघ्रापयेद्व्रती ॥ तत्पौषासिते पक्षे तृतीया या व्रतं भवेत् ॥ वेधि
कादंतकाष्ठं च मरुकेण प्रजनं ॥ राजसौभाग्यदा नाम सुंदरी पूजयेत्ततः ॥ धात्रीफलं दद्देरथकिं
कोलप्राशयेन्निशि ॥ नैवेद्ये वटकाः कार्या घृतशर्करयान्विताः ॥ कंकोलं बुत दाप्राश्य राजसौ
भाग्यहेतवे ॥ घृतेन बोधयेद्दीपं रात्रौ जागरणं सदा ॥ सर्वकामप्रदा देव सर्वदुःखहरा परा ॥ सर्वैश्व
र्यप्रदा देवी सर्वपापहरा सदा ॥ एकापि बहुधा स्नानं नामरूपप्रभेदतः ॥ माघमासे च संप्राप्ते वदर्या
दंतशोधनं ॥ प्रातः कुर्वीत विप्र संरूपसौभाग्यहेतवे ॥ अपराह्णे ततः स्नात्वा सर्वाभरणभूषिता ॥ स
तपुष्पैश्च संपूज्या रूपसौभाग्यसुंदरी ॥ नारिकेलार्घदानं च नैवेद्यं कृशरान्नता ॥ प्राशनं चैव क

स्तस्त्रिरूपसौभाग्यसंयुता॥ पूजयेत्तत्र सा सर्वकामसौभाग्यसुंदरी॥ फाल्गुनस्यासिते पक्षे प्रातर्नि
यमसंयुता॥ सौभाग्यसुंदरी बिल्वदंतकाष्ठं तु कारयेत्॥ स्नानं कृत्वा तया नारी कांचनारैश्च पू
जयेत्॥ नैवेद्यं सक्तवस्तत्र घृतशर्करयान्वितः॥ पंककर्दमजोलेपो धूपश्चागरुसंभवः॥ सवास्तु
चस्त्रीपासु विधिरेष प्रकीर्तितः॥ बीजपूरार्घदानं च प्राशनं चंदनोदकं॥ प्राशनस्य प्रभावेन स
वनि कामानवाप्नुयात्॥ पारणं च प्रकर्तव्यं सह सर्वैश्च बांधवैः॥ चैत्रे मासि प्रकर्तव्या रतीपा
पप्रणाशिनी॥ प्रयत्नेन प्रकर्तव्यो सुखसौभाग्यसुंदरी॥ दंतकाष्ठं प्रकुर्वीत नंदवृक्षसमुद्भवं॥
पूजा मदनकेनैव लेपो बिल्वफलं स्मृतं॥ नैवेद्यं मंडुकाः प्रोक्ताः शर्कराघृतसंयुताः॥ सुखसौभा
ग्यप्राप्त्यर्थं प्राशनं वस्त्रधारिणः॥ वैशाखस्यासिते पक्षे तृतीयायामुपोषयेत्॥ मालतीस्तक
धूपं च नियमग्रहणं ततः॥ पतिसौभाग्यदा देवि सुंदरी पूजयेत्ततः॥ पद्मैः सितैः सुरक्तैश्च माधविका
भिश्च पूजनं॥ दधि तक्रं सकर्पूरं शर्करा घृतसंयुतं॥ नैवेद्यं कल्पयेद्देवि आम्रार्घं चाम्रफलं भवेत्

॥ हस्तोदकं च संप्राश्य पुष्टिसौभाग्यमाप्नुयात्॥ ज्येष्ठे मासि तृतीयायां उपवासपरो भवेत्॥ यूथिका
दंतकाष्ठं च लावण्यसुभगार्थिनी॥ मल्लिकाकुसुमैः पूजां यक्षकर्दमचर्चितां॥ लावण्यसुभ
गां देवि सुंदरीं पूजयेत्ततः॥ कदलीफलार्घदानं च नैवेद्यं घृतपूरिका॥ मौक्तिकांबु ततः पीत्वा
लावण्यसुभगा भवेत्॥ आषाढे च ततो मासि प्रतिसौभाग्यसुंदरी॥ प्रातरुत्थाय कर्तव्यं दंतकाष्ठ
मर्कजं॥ नियमं तत्र कर्तव्यं तृतीयायां विशेषतः॥ बिल्वपत्रैः कोमलैश्च पतिसौभाग्यसुंदरी
॥ जंबूफलार्घदानं च नैवेद्यं पायसं स्मृतं॥ शर्कराघृतसंयुक्तं सुंदरि प्रीयतां मम॥ विद्रुमांबुनि शिप्रा
प्यं प्रह विषापारणं स्मृतं॥ सपत्नीनां पुरं नैव सा पश्यति कदाचन॥ श्रावणे मासि संप्राप्ते तृतीयायामुपो
षिता॥ वीरिणि दंतकाष्ठं च जातीपुष्पैश्च पूजनं॥ सर्वैश्च पंचसौभाग्यसुंदरीं पूजयेत्ततः॥ नैवेद्यं मु
द्गकं सारं पर्पटी पायसं तथा॥ कदलीफलार्घदानं च प्राशने गजदंतपयः॥ गजाश्च पशुदासीनां हेम
रत्नादिकं समं॥ ईश्वरि सर्वलोकानां भगवत्यां प्रसाद तः॥ मासि भाद्रपदे मासे पूज्या सौभाग्यसुंदरी॥

व्रता० ५८

दंतकाष्ठंतुकर्त्तव्यंमातुलिंगीसमुद्भवं॥उत्पलैःपूजयेद्देविश्वेपेकिकोटिकिफलं॥नैवेद्ये
शोकवर्त्तिमांपिवेन्माणिक्यजंपयः॥कर्पूरागुरुकस्तूरिसुरवेसेदेषुगंधिना॥आश्वयुजसि
तेपक्षेतृतीयायांव्रतंचरेत॥दंतकाष्ठंप्रकर्तव्यंमरुवकसमुद्भवं॥उत्पलैःपूजयेद्देवीपूज
येच्चपल्लनकैः॥पूजयेत्सरयाभक्त्यापुत्रसौभाग्यसुंदरी॥उत्पलैःशतपत्रैश्चपूजाकार्याप्रय
त्नतः॥नारंगमर्घदानार्थंकूष्मांडंचापिकल्पयेत॥नैवेद्येगणकान्सुत्रान्घृतशर्करया
न्वितान॥औदुंबरंपयःप्राश्यसुंदरीप्रियतांमम॥पुत्रपौत्रसमायुक्तासुखसौभाग्यसुंदरी॥का
र्त्तिकेमासिसंप्राप्तेतृतीयामुपवासः॥औदुंबरंदंतकाष्ठंकृत्वाव्रतमुपाचरेत॥केतकीमिश्र
सौभाग्यनाम्नासंयोगसुंदरि॥निवेदयेत्तपांश्चसुगंधांछालिसंनवान॥अखोडंचार्घदाने
चलवंगंप्राशयेन्नरः॥सावित्रीयोगंचनामेतिपिरभ्यातसुतादिनिः॥एवंचीर्णेव्रतेकुर्यादुद्याप राम ५८
नविधितनः॥सर्वशास्त्रमधियानआगमेषुविशारदं॥आचार्यप्रार्थयेत्मातमार्गशीर्षेय

याविधि॥चीर्णेव्रतामहाचार्यउद्यापनविधिमम॥व्रतवैकल्पनाशायथथाशास्त्रंसमाहितः॥सुं
दरीमंडलंकार्यंगौरीतिलकमेवच॥उमामहेश्वरंदेवंसौवर्णेनतुकारयेत॥व्रतारंभेयथाशक्त्या
राजतंवापिकारयेत॥वित्तशाठ्यंनकुर्वीतसतिद्रव्येकामार्थिना॥वर्षप्रयुक्तांमूर्तितामेवंमंड
लेर्चयेत॥सर्वोपहारैर्गंधैश्चपुष्पैर्नानाविधैरपि॥एकैवसाजगन्माताबहुरूपैर्व्यवस्थिता॥
॥रूपैर्द्वादशभिश्चैवपरस्यासौभाग्यसुंदरी॥ततःपद्मपत्रांदेवीरक्तवस्त्रोपशोभितां॥रक्ताभरण
शोभाढ्यांरक्तकुंकुमचर्चितां॥ध्यात्वाध्येवंविधांदेवींपूजयेदेकमानसः॥रात्रौजागरणंका
र्यंगीतवादित्रनिःस्वनैः॥ततःसर्वाणिपुष्पाणिनैवेद्यानिफलानिच॥अर्घार्घपरिकल्पानि
सर्वकामार्थसिद्धये॥ततःप्रभातेविमलेस्नानंकृत्वाविधानतः॥कुसुंभकुसुमैर्होमंकिंशुकै
र्वापिकारयेत॥अष्टोत्तरशतंहुत्वातिलंमधुत्रयसमन्वितं॥तदभावेतुकर्त्तव्यंशतपत्रैर्विधानतः॥अ
स्तुटेनचमंत्रेणगौरीणंमुखरूपसमाचरेत॥भोजयेच्चप्रयत्नेनचत्वार्यष्टौप्रयत्नतः॥मिष्टान्नेनसप

लीकाननुत्क्वा वै परिधापयेत्॥ वस्त्रालंकारणैश्चैव यथाशक्त्या प्रपूजयेत्॥ सौभाग्यवस्त्रं
चैकैकनारीणां चैव दापयेत्॥ ततो हस्ते प्रदातव्यं कुंकुमं लवणं गुडं॥ नारीकेलं तथा वस्त्री
त्वक्सिंदूरकज्जलं॥ मंगलाष्टकमेतद्वै दत्वा सौभाग्यमाप्नुयात्॥ आचार्यं सपत्नीकं वस्त्रालं
कारणैः शुभैः॥ परिधाप्य यथाशक्त्या मंडलं तत्समर्पयेत्॥ प्रार्थयेद्व ततो देवीं सर्वसौभाग्य
सुंदरी॥ पूजितासि मया देवि सर्वसौभाग्यसुंदरि॥ दत्वा मत्प्रार्थितान्कामान्गच्छ देवि यथासु
खं॥ मूर्तिं च मंडलं देव्या उपहारांश्च सर्वशः॥ गुरो गृहाण सर्वं त्वं सुंदरी प्रीयतामिति त्वत्प्रसादा
न्मया चीर्णं व्रतमेतत्सुदुर्लभं॥ कृमस्व विप्र शार्दूल त्वत्प्रसादात्सुमुखो भव॥ एवं चीर्णव्रता नारी कृत
कृत्या न वे नर॥ येनेदं च कृतं वत्स संप्राप्तः जन्मतः फलं॥ नातः परतरं किंचित्कृतं सौभाग्यदं परं रेहं
ते शिवलोके भुक्त्वा भोगान्मयेप्सितान्॥ इति सौभाग्यसुंदरीव्रतं॥ ॥ इति मीमांसकमहनीलकंठा
त्मजनदशंकरकृतौ व्रतार्के तृतीयाव्रतानि॥ ॥ अथ चतुर्थीव्रतानि॥ तत्र श्रावणकृष्णचतुर्थ्यां

संकष्टचतुर्थीव्रतं॥ तत्र चंद्रोदयव्यापिनी कार्या॥ श्रावणे बहुलेपक्षे चतुर्थ्यां तु विधूदये॥ गणेशं
प्रपूजयित्वा तु चंद्रायार्घ्यं प्रदीयते इति कथायां तत्र प्रजाविभानात् दिनद्वये तथा भावव्याप्तौ वा सर्व
मातृयोगणेश्वरे इति वचनात्॥ अथ व्रतविधिः॥ मासपक्षाद्युल्लिख्य विद्याधनरोगमुक्तिसंकष्ट
नाशनकामः स्त्री तु भर्त्रादिकामः संकष्टचतुर्थीव्रतं करिष्य इति संकल्प्य सौवर्णां हैमीं ताम्रम
न्मयाद्यप्रतिमां गणपतिमूर्तिं कृत्वा मंडलं संभूषणं वस्त्रयुक्तं कुंभं तत्स्थाप्य प्रतिष्ठाप्य पूजयेत्वा षोडशोप
चारैः प्रपूजयेत्॥ लंबोदरं चतुर्बाहुं त्रिनेत्रं रक्तवर्णकं॥ नानारत्नैः सुवेषाढ्यं प्रसन्नास्यं विचिंत
येत्॥ ध्यायेद्गजाननं देवं सततं कांचनसुप्रभं॥ चतुर्भुजं महाकायं सूर्यकोटिसमप्रभं॥ आवाहनं
॥ आगच्छ त्वं जगन्नाथं सुरासुरनमस्कृत॥ अनाथनाथ सर्वज्ञः विघ्नराज कृपांकुरु॥ गणाध्यक्षाय
नमः॥ आसनं॥ गोसात्त्वं सर्वलोकानां मिंद्रादीनां विशेषतः॥ भक्तपारम्यविच्छेत्ताय एकदंतनमोस्तु
ते॥ विघ्नराजाय नमः॥ पाद्यं॥ मोदकाभाय पर्णेन जक्तानां वरदायका॥ देवदेव नमस्तेस्तु भक्तानां

व्रता०
६१

फलदोभव॥ लंबोदरायनमः॥ अथार्घ्यमंत्रः॥ महाकाय महारूप अनंतफलदायक॥
देवदेव नमस्तेस्तु सर्वेषां पापनाशन॥ शंकरसूनवे नमः अर्घ्यं॥ स्नानं पंचामृतेनैव गृहाण
नायक॥ अनाथनाथ सर्वज्ञ नमो मूषकवाहन॥ उमासुताय नमः आचमनं॥ कुरुष्वाचमनं
देव सुरवंद्य सुवाहन॥ सर्वाधिदलनस्वामी नीलकंठ नमोस्तु ते॥ वक्रतुंडाय नमः वस्त्रं॥ वस्त्र
युग्मं त्वं० व्रलतत्वं सोत्तरीयं गृहाण गणनायक॥ आरक्तं ब्रह्मसूत्रं च कनकस्योत्तरीयकं॥ कु
ब्जायनमः॥ चंदनं॥ गृहाण ईश्वर सर्वज्ञ रक्तचंदनमुत्तमं॥ कारुण्याकर युंजाद्धौ गौरीसुत नमो
स्तु ते॥ गणेशाय नमः॥ पुष्पं॥ सुगंधि रक्तमाल्यं च गृहाण नायक॥ विनायक नमस्तु ते शिवसू
नो नमोस्तु ते॥ विघ्ननाशिने नमः॥ अतेनैव नाम्ना दूर्वांकुकुमाकृतान् रेयाः॥ धूपं॥ दशांगं
गुग्गुलं धूपमुत्तमं गणनायक॥ गृहाण देवदेवेश उमासुत नमोस्तु ते॥ विकर्णाय नमः दीपं॥ सर्वतु
सर्वरत्नाद्य सर्वेषां विबुधाधिपे॥ गृहाण मंगलं दीपं घृतकर्पूरसंयुतं॥ वामनाय नमः॥ नैवेद्यं

राम
६१

गृह्यतां देव नाना मोदकसंयुतं॥ सर्वालिफलसंयुक्तं सर्वभक्तिसमन्वितं॥ सर्वदेवाय नमः
फलं॥ फलान्यमृततुल्यानि गंधिन्यघनाशन॥ आनितानि मया शक्त्या गृहाणेमानि सर्वदा॥ स
र्वविघ्नविनाशिने नमः॥ तांबूलं॥ तांबूलं गृह्यतां देव नागवल्लीदलैर्युतं॥ कर्पूरैलादिसंयुक्तं सु
गंधमुखभूषणं॥ विघ्नहंत्रे नमः॥ सर्वदेवाधिदेवाय सर्वसिद्धिप्रदायक॥ नमस्कृतां मीमा
हृतां गृहाणेमां सुरप्रभो॥ सर्वदेवाय नमः॥ एवं पूजां प्रकर्तव्या षोडशैरुपचारकैः॥ मोदका
न्कारयेन्मातस्तिलजाान्दशापार्वति॥ देवाग्रे स्थापयेत्पंच पंच विप्राय कल्पयेत्॥ विप्रापित्वा
नुतां विप्रः भक्तिभावेन देववत्॥ दक्षिणां च यथाशक्त्या दत्वा पंचैव मोदकान्॥ नक्तं येन्नि
शि चंद्रस्य अर्घ्यं दत्वा यथाविधि॥ चंद्रार्घ्यमंत्रः॥ क्षीरसागरसंभूत सुधारूप निशाकर॥ गृह्य
णार्घ्यं मया दत्तं गणेशप्रीतिवर्द्धनं॥ मोदकदानमंत्रः॥ विप्रवर्ज नमस्तुभ्यं मोदकान्वै ददाम्यहं॥
मोदकान्सकलान्मंत्रदेवरक्तिण्या न्वितान्॥ आपदुद्धारणायाय गृहाण द्विजसत्तम॥ गणेशाराध्य

व्रता०
६२

ना॥ अबुद्धमितिरिक्तं वा द्रव्यंहीनं मया कृतं॥ तत्सर्वं पूर्णतां यातु विघ्नराज गणेश्वर॥ ब्राह्मणा
न्भोजयेद्देव यथाशक्त्येन यथासुखं॥ स्वयं भुंजीत यं चैव मोदकान्फलसंयुतान्॥ अशक्तश्चे
कमन्नं वा भुंजीत दधिसंयुतं॥ अथवा भोजनं कार्यमेकवारं हिमाद्रिजे॥ प्रतिमां गुरवे दद्याद
चार्याय सदक्षिणां॥ वस्त्रकुंभसमायुक्तां आदौ मंत्रानिमं जपेत्॥ विसर्जनमंत्रः॥ गच्छ गच्छ सुर
श्रेष्ठ स्वस्थाने त्वं गणेश्वर॥ व्रतेनानेन मे नित्यं यथोक्तफलदो भव॥ अथ कथा॥ हेमाद्रौ स्कां
दे। ऋषय ऊचुः॥ दारिद्र्यशोककष्टाद्यैः पीडितानां च वैरिभिः॥ राज्यभ्रष्टैर्नृपैः सर्वैः क्रिय
ते किं मुनाधिभिः॥ धनहीनैर्नरैः स्कंद सर्वैरुपद्रवपीडितैः॥ विद्यापुत्रगृहभ्रष्टै रोगयुक्तैः सु
खार्थिभिः॥ कर्तव्यं किं वदोपायं युतः क्षेमार्थसिद्धये॥ स्कंद उवाच॥ शृणुध्वमृषयः सर्वे व्रतानां
मुत्तमं॥ संकष्टहरणं नाम पुत्रेहसुखदायकं॥ येनोपायेन संकष्टं तरंति भुवि देहिनः॥ यत्तं देव
कीपुत्रः कृष्णो धर्मायदत्तवान्॥ अरण्ये क्लिश्यमानाय पुनः क्षेमार्थसिद्धये॥ यथा कथितवान्पू

राम
६२

BHAU DAJI MEMORIAL

र्वं गणेशो भ्रातरं प्रति॥ कथा कथितवान्श्रीशो द्वापरे पांडवान्प्रति॥ ऋषय ऊचुः॥ कथं क
थितवानंब पार्वती श्रीगणेश्वर॥ तथा स्कंद तिष्ठतु तयोर्लोकानुग्रहकारिणः॥ स्कंद उवा
च॥ पुरा कृतयुगे पुण्ये हिमाचलसुता सती॥ तपस्तप्तवती भूरि नटेशः शंकरः पतिः॥ तदा सस्मा
र देवं गणेशं पूर्वजं सुतं॥ तत्क्षणादागतं दृष्ट्वा गणेशं परिपृच्छति॥ पार्वत्युवाच॥ तपस्तप्तं मया घो
रं दुस्तरं लोमहर्षणं॥ न प्राप्तो पार्वतीकांतो गिरिशो मम वल्लभः॥ संकष्टतरणं दिव्यं व्रतं नारदभक्त
वान्॥ त्वदीयपक्ष तत्त्वा वक्ष्य स्व पुरातनं॥ तच्छ्रुत्वा पार्वती वाक्यं संकष्टहरणं व्रतं॥ प्रीत्या कथि
तवान्देवो गणेशानसिद्धिदः॥ श्रीगणेश उवाच॥ श्रावणे बहुले पक्षे चतुर्थ्यां तु विधूदये॥ गणेशं
पूजयित्वा तु चंद्रायार्घ्यं प्रदीयते॥ पार्वत्युवाच॥ क्रियते केन विधिना किं कार्यं किं च पूजनं॥
उद्यापनं कदा कार्यं मंत्राः के स्युस्तु पूजने॥ किं ध्यानं श्रीगणेशस्य गणेशाव वद विस्तरात्॥ श्री
गणेश उवाच॥ चतुर्थ्यां प्रातरारभ्य दंतधावनपूर्वकं॥ प्रारभ्य व्रतमिदं पुण्यं संकष्टहरणं शुभं॥

कर्त्तव्यमिति संकल्प्य व्रतेस्मिन्गणपं स्मरेत्॥ स्वीकारमंत्रः॥ निराहारोस्मि देवेश यावद्बं द्रो
द्योभवेत्॥ भो स्वामिन्रजयित्वाहं संकष्टात्तारयस्व मां॥ एवं संकल्प्य गजेंद्र स्नात्वा कृष्णति
लैः शुभैः॥ आह्निकं तु विधायैव पश्चात्स्नपयेद्गणाधिपं॥ त्रिनिमषैस्तदर्द्धेन तता यांशेन
वा पुनः॥ यथाशक्त्या तु वा हेम्नः प्रतिमा क्रियते मया॥ माषमात्रेण दर्द्धस्य तता यांशेन वा पु
नः॥ हेमाभावे तु रूप्यस्य ताम्रस्यापि यथासुखं॥ सर्वथैव दरिद्रेण क्रियते मृन्मयी शुभा॥ वि
त्तशाठ्यं न कर्त्तव्यं कृते कार्यं विनश्यति॥ जलपूर्णं वस्त्रयुतं कुंभं तस्योपरि न्यसेत्॥ पञ्चामृ
तेन स्नपनं धूपपुष्पैः प्रपूजयेत्॥ गणेशोग्रवाच्या॥ एवं व्रतं तु कर्त्तव्यं प्रतिमासं त्वयाद्रिजे॥ यावज्जी
वं तु वा वर्षाण्येकविंशतिपार्वति॥ अशक्तावेकवर्षे च प्रतिवर्षमथापि वा॥ उद्यापनं तु कर्त्तव्यं
चतुर्थ्यां श्रावणे सिते॥ स्वीकारश्च तथा कार्यः संकष्टहरणेति यो॥ नलापतं यथाचार्यं सर्वशा
स्त्रविशारदः॥ अर्घ्यपाद्यादिदानेन तेनोक्तं विधिमाचरेत्॥ एकविंशति विप्रांश्च वस्त्रालंकारभूष

णैः॥ पूजयेद्गोहिरण्याद्यैः कृत्वादौ विधिना ततः॥ होमयेन्मोदकान्पश्चात्तिलजान्घृतसं
युतान्॥ अष्टोत्तरसहस्रं वा नो चेदष्टोत्तरं शतं॥ अष्टाविंशतिसंख्याते मोदकैर्वसिशार्करैः
॥ अशक्तोष्टौ सुजातं चूर्णजान् जुहुयाज्जातवेदसि॥ पुष्पमंडपिका कार्या गणेशाह्लादकारि
णी॥ पूजयेत्तत्र गणपं नक्तं संकष्टदमनं॥ गीतैर्वादित्रनिनदैर्भक्तिभावपुरस्कृतैः॥ पुराणश्र
वणध्यानैस्तोषयेच्छ्रीगणेश्वरं॥ एवं जागरणं कार्यं शक्त्या दानादिकं तथा॥ सपत्नीकमथाचार्यं
भूषयेद्वस्त्रभूषणैः॥ उपानच्छत्रगोदानकमंडलुफलादिभिः॥ शय्यावाहनरत्नदानधनधान्य
गृहादिभिः॥ यथाशक्त्या प्रकर्त्तव्यं दाति याभावमिच्छता॥ एकविंशतिविप्रांश्च भोजयेन्नाम
भिर्मम॥ गजास्यो विघ्नराजश्च लंबोदरशिवात्मजौ॥ वक्रतुंडः शूर्पकर्णः कुब्जश्चैव गणेश्वरः॥
विघ्ननाशो विकटो वामनः सर्वदैवतः॥ सर्वार्त्तिनाशी भगवान्विघ्नहर्त्ता च धूम्रकः॥ सर्वदेवाधि
देवश्च सर्वे षोडश वै स्मृताः॥ एकदंतः कृष्णपिंगो बालचंद्रो गणेश्वरः॥ गणपश्चैकविंशश्च स

वर्णते गणेश्वरात्॥ दुर्गोपेंद्रश्च रुद्रश्च कुलदेव्याधिकं भवेत्॥ विशेषेणास्य दशाग्निर्मोदकैः वर्धितं
स्मृतं॥ एवं कृतविधानेन प्रसन्नो दंतसंज्ञायः॥ ददामि वांछितान्कामान् तद्व्रतं मत्प्रियं कुरु॥ श्री
कृष्ण उवाच॥ एवं तु कथितं सर्वं गणेशेन स्वयं नृप॥ पार्वत्या तत्कृतं राजन् व्रतं संकष्टनाशनं॥
व्रतेनानेन संप्राप्ते महादेवपति स्वकं॥ तत्कुरुष्व महाराज व्रतं संकष्टनाशनं॥ चतुर्थ्यां संकष्-
टानामस्कंदेन कथिता ऋषीन्॥ ऋषिभिर्लोककामैस्तैर्लोके ततमिदं व्रतं॥ सूत उवाच॥ कृतं
युधिष्ठिरेणैव राज्यकामेन वै द्विज॥ तेन प्राप्तं हि हस्तात्स्वराज्यं शात्रवान्स्वयं॥ तस्मात्सर्वप्रयत्नेन व्रतं
कार्यं विचक्षणैः॥ येन धर्मार्थकामाश्च मोक्षश्चापि भवेत्किल॥ यः करोति व्रतं विप्राः सर्वकामार्थ-
सिद्धिदं॥ स वांछितं फलं याति पश्चाद्गाणेशतां व्रजेत्॥ यदा यदा परं विप्रा नरः प्राप्नोति संकटं॥
तदा तदा प्रकर्तव्यं व्रतं संकटनाशनं॥ त्रिपुरं हंतुकामेन कृतं देवेन शूलिना॥ त्रैलोक्यजयकामेन
महेंद्रेणैव तत्कृतं॥ रावणेन कृतं पूर्वं बालिबंधनसंकटे॥ स्वकीयं प्राप्तवान् राज्यं गणेशस्य प्रसाद-

तः॥ सीतान्वेषणकामेन कृतं वायुसुतेन च॥ संकष्टहृष्टवान् सायं सीतां राममप्रियां पुरा॥ द-
मयंत्या कृतं पूर्वं नलान्वेषणकारणात्॥ सा पतिं नैषधं लेभे पुण्यश्लोकं द्विजोत्तमाः॥ अहल्या निश-
ति लेभे गोतमं प्राणवल्लभं॥ विद्यार्थी प्राप्नुयाद्विद्यां धनार्थी धनमाप्नुयात्॥ पुत्रार्थी पुत्रमा-
प्नोति रोगी रोगाद्विमुच्यते॥ इति श्रीसंकष्टचतुर्थीव्रतं॥ अथ श्रावणे कार्तिके वा शुक्लच-
तुर्थ्यां विघ्नपतिव्रतं भविष्योत्तरे सौरपुराणे॥ स्कंद उवाच॥ केन व्रतेन भगवान्सौभाग्यमतुलं भवेत्॥
पुत्रपौत्रधनैश्वर्यैर्मनुजः सुखमेधते॥ तन्मे वद महादेव व्रतानामुत्तमं व्रतं॥ ईश्वर उवाच॥ अस्ति विघ्नप-
ते व्रतं त्रैलोक्यविश्रुतं॥ जगद्वशात्पुराचीर्णं पार्वत्या श्रद्धया सता॥ सरस्वत्या महेंद्रेण विष्णुना धनदेन
च॥ अन्यैश्च देवैश्च मुनिभिर्गंधर्वैः किन्नरैस्तथा॥ चीर्णमेतद्व्रतं सर्वैः पुराकल्पे षडानन॥ चतुर्थ्यां
नवे शुक्लातु मासस्य पुण्यदा॥ तस्यां व्रतमिदं कुर्यात्कार्तिक्यां वा षडानन॥ कार्तिके वा कार्तिकसंबंधिमा-
शुक्लचतुर्थ्यां गजाननं चतुर्बाहुमेकदंतं विधायितं॥ विधाय हेम्ना विघ्नेशं हेमपीठासनस्थितं॥ तदा हेम-

व्र.ता० ६५ मयीत्वंनिराधारेव्यवस्थितां॥ संस्थाप्यविघ्नकर्तारंकलशेताम्रभाजने॥ वेष्टितंरक्तवस्त्रेणस
र्वतोभद्रमंडले॥ पूजयेद्रक्तकुसुमैः पत्रिकाभिश्चपंचभिः॥ बिल्वपत्रमपामार्गंशमीदूर्वाहरिप्रिया॥
हरिप्रियाभ्युलसि॥ अन्यैःसुगंधकुसुमैर्यथालभ्यैःसुगंधिभिः॥ फलैश्चमोदकैःपश्चादुपहारंप्र
कल्पयेत्॥ यथावदुपचारैश्चपूजयेद्गिरिजासुतं॥ उमासुतनमस्तुभ्यंविश्वव्यापीसनातनः॥ वि
घ्नौघंछिंधिसकलंसर्वपापंविदारिणे॥ अर्घमंत्रः॥ गणेश्वरायदेवायउमापुत्रायवेधसे॥ इतमा
द्यमयदत्तामिगृहाणभगवान्मम॥ विनायकायशूरायवरदायगजानन॥ उमासुतायदेवायकु
मारगुरवेनमः॥ लंबोदरायदेवायसर्वविघ्नापहारिणे॥ उमांगमलसंभूतोदानवानांवधायवै
॥ अनुग्रहायलोकानांसदेवःपातुविश्वधृक्॥ धूपमंत्रः॥ परंज्योतिःप्रकाशायसर्वसिद्धिप्रदायक॥
॥ दीपंतुभ्यंप्रदास्यामिमहादेवात्मजेनमः॥ दीपमंत्रः॥ गणानांत्वागणपतिंहवामहेकविंकवीना
मुपमश्रवस्तमं॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं॥ उपहारमंत्रः॥ग राम ६५

णेश्वरगणाध्यक्षगौरीपुत्रगजाननः॥ व्रतंसंपूर्णतांयातुत्वत्प्रसादादिभानन॥ प्रार्थनामंत्रः॥ ए
वंसंपूज्यविघ्नेशंयथाविभवविस्तरैः॥ सोपस्कारंगणाध्यक्षमाचार्यायनिवेदयेत्॥ गृहाण
भगवन्भक्तगणराजसदक्षिणं॥ व्रतंत्वद्दानाद्यसंपूर्णंयातुसुव्रत॥ दानमंत्रः॥ एवंयःपंच
वर्षाणिकृत्वोद्यापनमाचरेत्॥ ईप्सितान्लभतेकामान्देहांतेशंकरंपदं॥ अथवाशुक्लपक्षस्य
चतुर्थ्यांसंयतेंद्रियः॥ कुर्याद्वर्षत्रयंत्वेवंसर्वसिद्धिमवाप्नुयात्॥ उद्यापनंविनायस्तुकरोतिव्रतमु
त्तमं॥ तेनशुक्लतिलैःकार्यंप्रातःस्नानंषडाननं॥ हेम्नावारजतेनापिकृत्वागणपतिंबुधः॥ पंचगव्ये
नुसंस्थाप्यदूर्वाभिःसमपूजयेत्॥ मंत्रैस्तुरचितैर्नाम्नादूर्वायुक्तैःशिवध्वज॥ दूर्वायुक्तैर्दशभि
मंत्रैःपूजा॥ दूर्वायुक्तैःपंचगव्यैःस्नातं॥ तेनदशनाममंत्राउक्ताः॥ स्कंदपुराणे॥ गणाधिपनमस्ते
स्तु॥ उमापुत्राघनाशन॥ विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक॥ एकदंतेभवक्रेतितथामूष
कवाहन॥ कुमारगुरवेतुभ्यमेभिर्नामपदैःक्षयगिति॥ इत्येवंकथितंवत्ससर्वसिद्धिप्रदंशुभं॥ व्र

व्रता० ६६

तं दूर्वागणपते किमन्यच्छ्रोतुमिच्छसीति॥ इति सौरपुराणोक्तं दूर्वागणपतिव्रतं॥ अथ स्त्रानुवार
युक्तायां यस्यां कस्यांचिच्छुक्लचतुर्थ्यां मासस्य दूर्वागणपतिव्रतं स्कांदे॥ कैलासशिखरे रम्ये स
र्वदेवनिषेविते॥ सिद्धसंघसमाकीर्णे गंधर्वगणसेविते॥ देव्याः सह महादेवो दिव्यैर्नर्मैर्विनो
दितः॥ जितासि त्वं जितेत्याह पार्वतीपरमेश्वरः॥ सापि त्वं जित इत्याह सविवादस्तयोरभूत्॥ चित्र
नेमिस्तदा दृष्टो मृषा तारमभाषत॥ तदा क्रोधसमाविष्टा गौरी शापं ददौ ततः॥ प्रसादिता ततस्ते
न विशापं च जगाद सा॥ यदा सरोरे रम्ये चरिष्यति भवान् भुवि॥ तदा स्वर्गणिकाः सर्वा इहसंति त्वां
समागताः॥ तदा त्वं विशापस्त्वमित्युक्तः स पपात ह॥ ततः कतिपयाहोभिः कस्मिंश्चित्सरोवरे॥
कस्तोन्नत्वाथ संत्तमद्द्रष्टस्वर्विलासिनी॥ ततस्तु सादरं गत्वा पप्रच्छ प्रणिपत्य ताः॥ किमेतद्दो
महाभागाः ह्यजयात्वभिवांछितं॥ ततस्ताः प्रब्रुवंस्तस्मै दूर्वाविघ्नेश्वरं व्रतं॥ किंपते स्मान्निरिह व
परत्राभिष्टसिद्धये॥ ततोऽब्रवीन्महाराजा व्रतं मे दातुमर्हथ॥ येनाहं गिरिजाशापान्मुच्येयं विरुः

राम ६६

स्थितः॥ ततस्ताः प्रब्रुवन्सर्वा व्रतमेतदनुत्तमं॥ दूर्वाविघ्नेश्वरो यत्र पूज्यते सर्वसिद्धिदः॥ शु
क्लपक्षे चतुर्थी या भानुवारेण संयुता॥ तस्यां तिथौ समारभ्य षण्मासान् व्रतमाचरेत्॥ प्रसह
षं नमस्कारः षट् दूर्वा षट् प्रदक्षिणं॥ शुक्लपक्षे चतुर्थ्यां च प्रत्येकं चैकविंशतिः॥ एकभक्तं
च कर्तव्यं कथां च शृणुयादिमां॥ ध्यायेद्दिनायकं देवं समाहितमनाः शृणु॥ तरुणं तरुणसंकाशं
सर्वाभरणभूषितं॥ जटाकलापसुभगं कुंकुमेनोपराजितं॥ गजाननं प्रसन्नास्यं सिंदूरतिल
कांकितं॥ विशालवक्षसं नागं मुक्तामणिविभूषितं॥ चतुर्भुजं सुराराध्यं किंकिणीकंकणैर्युतं॥ पा
शांकुशधरं देवं दंतमोदकधारिणं॥ महोदरं महानाभं बद्धकुक्षिं बुधान्वितं॥ सुंदरं सुकसर्वांगं सि
नास्यमपराजितं॥ प्रणतामरसंदोहमौलिमालिकारत्तके॥ विराजितांघ्रिकमलं सर्वदेवनमस्कृ
तं॥ स्त्रीशक्तरं देवं सर्वभूतोपकारकं॥ एवं ध्यात्वा जपेन्नित्यं विमोनायकमंत्रतः॥ एवं चरितवा ष
ण्मासान् सुविः समपरायणः॥ पश्चाद्गंधादिदूर्वाभिरर्चयित्वा सदा पुनः॥ उपद्यापनं च कुर्यान्तु देश

व्रता० ६५

कालानुसारतः॥ततोमगधदेशस्यमानेनयवसिद्धकं॥दशमानकमादायदशांशंवापिमोद
कान्॥कृत्वाघृतेनतत्सम्यक्षड्देवायषडाननो॥षड्ब्राह्मणायप्रदातव्याश्रोत्रियायकुटुंबिने॥विना
यकोगणाध्यक्षोविघ्नेशःश्रीगणाधिपः॥वरदःसुमुखश्चैववरवर्षिष्ठैःप्रपूजयेत्॥षड्दूर्वाश्चत
धारद्यात्महाराजाप्रकल्पयेत्॥एवंकृतेमहेशानप्रीत्यर्थमितिवांछितं॥तथेत्युक्त्वाचित्र
नेमिःप्रीणयित्वाक्षिपकं॥शापान्मुक्तःसतशंभुमध्यगात्सहमन्त्रिवा॥शंकरेणततःपृष्टश्चि
त्रनेमिस्तथाजगौ॥व्रतंकृत्वाततःशंभुर्गणेशस्यकुतूहलात्॥गौरीकोपप्रसादायशिवोपिकृत
वांस्तथा॥सापिदेवीशिवेनोक्तंचक्रेव्रतमनुत्तमं॥कार्त्तिकेयोपिमात्रोक्तस्वशस्युर्दशोच्छया॥व्र
तंचकारनंदाचकार्त्तिकेयोक्तमादरात्॥सोपिराजाप्रसादायपुत्रार्थंचचकारह॥ततःक्रमेण
लोकेस्मिन्प्रचचारितमुत्तमं॥व्रतंदूर्वागणेशस्यसर्वसिद्धिकरंपरं॥शोकव्याधिनयोद्वेग
बंधसनवर्तिते॥विमुक्तःपुत्रपौत्रादिधनधान्यसमाहृतः॥इहलोकेसुखीभूत्वापश्चाच्छि

राम ६५

वपुरंव्रजेत्॥व्रतेनानेनदूर्वाख्यविघ्नेशस्यप्रसादतः॥यःपठेत्सरयान्नित्यंकथांतांचदिनेदि
ने॥शृणुयाद्वापिसततंसर्वसिद्धिमवाप्नुयात्॥इतिस्कंदपुराणोक्तंदूर्वागणपतिव्रतांतरंसमाप्तं॥
अथभाद्रशुक्लचतुर्थ्यांसिद्धिविनायकव्रतं॥हेमाद्रौस्कांदे॥तच्चमध्याह्नव्यापिन्यांकार्यं॥भाद्र
शुक्लतिलैःस्नात्वामध्याह्नेपूजयेन्नृपेतिगणपतिकल्पेतत्रैवपूजाविधानात्॥दिनद्वयेतद्व्याप्तौ
वव्याप्तावेकदेशव्याप्तौवापूर्वैवतथापराच॥चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते॥मध्याह्न
व्यापिनीसातुपरतश्चेत्परे॥हनीतिवृहस्पत्युक्तेः॥अथव्रतविधिः॥मासपक्षाद्युल्लिख्यजयपु
त्रादिकामःस्त्रीतुसौभाग्यश्रीसिद्धिविनायकप्रीत्यर्थंसिद्धिविनायकपूजनमहंकरिष्येइतिसं
कल्प्यषोडशोपचारैःपूजांकुर्यात्॥एकदंतंशूर्पकर्णंगजवक्त्रंत्रिलोचनं॥पाशांकुश
धरंदेवंध्यायेत्सिद्धिविनायकं॥ध्यायेद्गजाननंदेवंतप्तकांचनसन्निभं॥चतुर्भुजंमहाका
यंसर्वाभरणभूषितं॥दंताक्षमालापरशुपूर्णमोदकधारिणं॥मोदकासक्तशुंडाग्रमेकदं

Dr. BHAU DAJI

व्र॰गा॰ तं विनायकं ॥ ध्यानं ॥ आवाहयामि विघ्नेश सुरराजार्चितेश्वर ॥ अनाथनाथ सर्वज्ञ पूजार्थं
६८ गणनायक ॥ आवाहनं ॥ विचित्ररत्नरचितं दिव्यास्तरणसंयुतं ॥ स्वर्णसिंहासनं चारु गृह्णी
ष्व सुरपूजितं ॥ आसनं ॥ अर्घ्यं च फलसंयुक्तं गंधपुष्पाक्षतैर्युतं ॥ गृहाण ध्वरूनमेसूगहा
णाकरुणानिधे ॥ अर्घ्यं ॥ सर्वतीर्थसमुद्भूतं पाद्यं गंधादिसंयुतं ॥ विघ्नराज गृहाणेदं भग
वन्भक्तवत्सल ॥ पाद्यं ॥ दध्याज्यमधुसंयुक्तं मधुपर्कं मयाहृतं ॥ गृहाण सर्वलोकेश गणनाथ
नमोस्तु ते ॥ मधुपर्कं ॥ विनायक नमस्तुभ्यं त्रिदशैरभिवंदित ॥ गंगोदकेन देवेश सद्य आच
मनं कुरु ॥ आचमनं ॥ स्नानं पंचामृतं दिव्यं सर्वतीर्थहृतैर्मया ॥ गंधतोयैरुमापुत्र गृह्णीष्वा
भीष्टदायक ॥ स्नानं ॥ रक्तवस्त्रद्वयं देव देवांगसदृशं प्रभो ॥ सर्वप्रद गृहाणेदं लंबोदर हरात्म राम
ज ॥ वस्त्रं ॥ राजतं ब्रह्मसूत्रं च कांचनं चोत्तरीयकं ॥ गृहाण चारु सर्वज्ञ भक्तानां भक्तवत्सल ॥ य ६८
ज्ञोपवीतं ॥ नानाविधानि दिव्यानि नानारत्नोज्ज्वलानि च ॥ भूषणानि गृहाणार्घ्य पार्वतीयनंदन ॥ आ

भरणं ॥ गंधं गृहाण भगवन्सर्वगंधसमन्वितं ॥ गणाध्यक्ष नमस्तुभ्यं भक्ताभीष्टफलप्रद ॥
गंधं ॥ अक्षतान्धवलान्देव गृहाण द्विरदानन ॥ अनाथनाथ सर्वज्ञ गीर्वाणपरिपूजित ॥ अक्ष
तान् ॥ सुगंधीनि च पुष्पाणि जातिकुंदमुखान्यपि ॥ विविधानि च पत्राणि गृहाण गणनाय
क ॥ पुष्पं ॥ अथांगपूजा ॥ गणेशाय नमः ॥ पादौ पूजयामि ॥ विघ्नराजाय नमः जानुनी॰ आखु
वाहनाय॰ ऊरू॰ हेरंबाय॰ कटिं ॥ कामारिसूनवे॰ नाभिं ॥ लंबोदराय॰ उदरं ॥ गौरीसुताय॰ स्त
नौ ॥ गणनायकाय॰ हृदयं ॥ स्थूलकंठाय॰ कंठं ॥ स्कंदाग्रजाय॰ स्कंधौ॰ पाशहस्ताय॰ हस्तौ
॥ गजवक्त्राय॰ मुखं ॥ विघ्नहर्त्रे सर्वेश्वराय॰ शिरः ॥ श्रीगणाधिपाय नमः सर्वांगं पूजयामि ॥ अ
थ पत्रपूजा ॥ सुमुखाय॰ मालतीपत्रं ॥ गणाधिपाय भृंगराज॰ उमापुत्राय॰ बिल्व
पत्रं ॥ गजाननाय॰ दूर्वापत्रं॰ लंबोदराय बदरीपत्रं ॥ हरसूनवे॰ धत्तूरपत्रं॰ गजकर्णा
य॰ तुलसीपत्रं॰ वक्रतुंडाय॰ शमीपत्रं ॥ गुहाग्रजाय॰ अपामार्गपत्रं॰ एकदंताय॰ बृहती

व्रता०
६५

पत्रं० विकटाय० करवीरपत्रं विनायकाय० अश्मंतपत्रं॥ कपिलाय० अर्कपत्रं० गजदंताय०
अर्जुनपत्रं० विघ्नराजाय० विष्णुक्रांतपत्रं० बटवे० दाडिमपत्रं॥ सुराग्रगणाय० देवदारु॥ भा
लचंद्राय० मरुपत्रं० हेरंबाय० सिंदूरपत्रं० चतुर्भुजाय० अमलपत्रं॥ सर्वेश्वराय० अगस्ति
पत्रं० एवं एकविंशतिपत्राणि समर्पयेत्॥ दूर्वायुग्मं गृहीत्वा तु गंधपुष्पाक्षतैर्युतं॥ जये
श॥ सिद्धिविघ्नेशं प्रत्येकं सर्वनामभिः॥ गणाधिप नमस्तेस्तु उमापुत्राघनाशन॥ विनायकेश
पुत्रेति सर्वसिद्धिप्रदायक॥ एकदंतेभवक्त्रेति तथा मूषकवाहन॥ कुमारगुरवे तिसंपू
जनीयाः प्रयत्नतः॥ दशांगं गुग्गुलं धूपं सुगंधं च मनोहरं॥ गृहाण सर्वदेवेश उमापुत्र नमोस्तु
ते॥ धूपं॥ सर्वज्ञ सर्वलोकेश त्रैलोक्यतिमिरापहं॥ गृहाण मंगलं दीपं रुद्रप्रिय नमोस्तुते॥ राम
दीपं॥ सफलान्सगुडांश्चैव मोदकान्घृतपाचितान्॥ नैवेद्यं सफलं दद्यात् नमस्ते विघ्नना ६५
शिने॥ नैवेद्यं॥ ततश्चाचमनं॥ करोद्वर्तनं॥ इदं फलमिति फलं॥ तांबूलं गृह्यतां देव गृहाण सु

रद्विजित॥ अनाथ सर्वज्ञ मा सुवर महेश्वरः॥ तांबूलं॥ हिरण्यगर्भमिति दक्षिणा॥ विघ्नेश्वर वि
शालाक्ष सर्वाभीष्टफलप्रद॥ प्रदक्षिणं करोमि त्वां सर्वान्कामान्प्रयच्छ मे॥ प्रदक्षिणा॥ नमस्ते
विघ्नसंहर्त्रे नमस्ते ईप्सितप्रद॥ नमस्ते देवदेवेश नमस्ते गणनायक॥ यन्मयाचरितं देव व्र
तमेतत्सुदुर्लभं॥ त्वत्प्रसादात्गणेश त्वं सफलं कुरु सर्वदा॥ प्रार्थना॥ विनायक नमस्तुभ्यं सतत
मोदकप्रिय॥ अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ वायनमंत्रः॥ विनायकस्य प्रीतिं मां वस्त्र
युग्मसमर्पितं॥ तुभ्यं संप्रददे देवः प्रीयतां मे गजाननः॥ विनायक गणेशान सर्वदेवनमस्कृत॥ पा
र्वतीप्रिय विघ्नेश मम विघ्नं विनाशय॥ प्रतिमादानं॥ गणेशः प्रतिगृह्णाति गणेशो वै ददाति च॥ गणे
शस्तारको भ्यां गणेशाय नमो नमः॥ इति पूजाविधिः॥ अथ कथा॥ ऋषय ऊचुः॥ निर्विघ्नेन तु का
र्याणि कथं सिध्यंति सूतज॥ अर्थसिद्धिः कथं नृणां पुत्रसौभाग्यसंपदः॥ दंपत्योः कलहे चैव बंधु
भेदे तथा नृणां॥ उदासीनेषु लोकेषु कथं सुमुखता भवेत्॥ विद्यारंभे तथा नृणां नष्टापांचकृषौ

तपानंदनंमतं॥ नृपतेःपरचक्रेचजयसिद्धिःकथंनवेत्॥कांदेवतांनमस्कृत्यकार्यसिद्धिर्नवे
न्नृणां॥एतत्समस्तंविस्तार्यब्रूहिमेसूतपृच्छतः॥ ॥सूतउवाच॥ ॥सत्त्रद्वयोःपुराविप्राःकुरु
पांडवसेनयोः॥पृष्टवान्देवकीपुत्रंकुंतिपुत्रोयुधिष्ठिरः॥युधिष्ठिरउवाच॥निर्विघ्नेनजयंम
त्यंवंदेदेवकीनंदन॥कांदेवतांनमस्कृत्यसम्प्राप्स्येजनेमहि॥कृष्णउवाच॥पूजयत्वंगण
ध्यक्षमुमामलसमुद्भवं॥तस्मिन्संपूजितेवीरधुवंराज्यमवाप्स्यसि॥युधिष्ठिरउवाच॥देव
केनविधानेनपूजनीयागणाधिपः॥पूजितस्तुतिथौकस्यांसिद्धिदोगणदोभवेत्॥कृष्णउवाच
॥मासिभाद्रपदेशुक्लेचतुर्थ्यांपूजयेन्नृप॥मासेमासिश्रावणेतुमार्गशीर्षेथवाभवेत्॥गज
वक्त्रंतुशुक्लायांचतुर्थ्यांपूजयेन्नृप॥यदाचोद्भवतेभक्तिस्तदापूज्योगणाधिपः॥प्रातःशुक्ल
तिलैःस्नात्वामध्याह्नेपूजयेन्नृप॥निष्कमात्रसुवर्णेनतदर्धार्धेनवापुनः॥स्वशक्त्यागणाध्य
यस्यस्वर्णरौप्यमयाकृतिः॥अथमन्मयीकुर्याद्वित्तशाठ्यंनकारयेत्॥गणनाथसिद्धिविना

यकः॥तद्रूपंचस्कांदे॥एकदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजं॥पाशांकुशधरंदेवंध्यायेत्सिद्धि
विनायकं॥कृत्वापूजांप्रयत्नेनस्नाप्यपंचामृतैःपृथक्॥गणाध्यक्षेतिनाम्नावैगंधंदद्या
द्भक्तितः॥आवाहनासनार्घ्यंचदत्त्वापश्चात्प्रयत्नतः॥रक्तंसर्वांगदेवस्त्रयुग्मंदद्याच्चभ
क्तितः॥विनायकेतिपुष्पाणिधूपंचोमासुतायच॥दीपंरुद्रप्रियायेतिनैवेद्यंविघ्ननाशि
ने॥किंचित्सुवर्णंपूजांचताम्बूलंचसमर्पयेत्॥ततोदूर्वांकुरान्ग्राह्याविंशतिश्चैकमेवहि॥
॥पूजनीयप्रयत्नेनएभिर्नामपदैःसदा॥गणाधिपनमस्तेस्तुउमापुत्राघनाशन॥विनायके
शपुत्रेतिसर्वसिद्धिप्रदायक॥एकदंतेभवक्त्रेतितथामूषकवाहन॥कुमारगुरवेतुभ्यंपूजनी
यःप्रयत्नतः॥दूर्वायुग्मंगृहीत्वातुगंधपुष्पाक्षतैर्युतं॥एकैकेनतुनाम्नातुदत्त्वेकंसर्वनाम
भिः॥अथैकविंशतिगव्यमोदकान्घृतपाचितान्॥स्थापयित्वागणाध्यक्षसमीपेकुरुनंदन॥
दशविप्रायदातव्यंस्वयंचाद्यात्तथादश॥एकंगणाधिपेदद्यात्सनैवेद्यंनृपोत्तमः॥ज्ञातरूपम

व्र॰ता॰ ७१ यंदेवब्राह्मणायनिवेदयेत्॥ कृत्वानैमित्तिकंकर्मपूजयेदिष्टदेवतां॥ ब्राह्मणान्भोजयेत्पश्चा
त्भुंजीयात्तैलवर्जितं॥ विजयस्तेनवैरत्नंसत्यंसत्यंमयोदितं॥ वैष्णवाद्यासुदीक्षासुआदौ
पूज्योगणाधिपः॥ तस्मिन्संपूजितेविष्णुरिंद्रोमांचतथाह्युमाः॥ हव्यवाहमुखादेवाःपूजि
तास्युर्नसंशयः॥ चंडिकाद्यामातृगणाःपरितुष्टाभवंतिच॥ तस्मिन्संपूजितेविप्राःगणनाथेसिद्धवि
नायके॥ यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः॥ सिध्यंतिसर्वकार्याणिसिद्धिदस्यप्रसाद
तः॥ ॥इतिसिद्धिविनायकव्रतं॥ ॥हेमाद्रौभविष्योत्तरे॥ मासिभाद्रपदेशुक्लाशिवानो
केप्रपूजिता॥ तस्यांस्नानंतथादानंउपवासोर्चनंतथा॥ क्रियमाणंशतगुणंप्रसादाद्दंतिनोन
प॥ चतुर्थीसनुषंगः॥ तस्यामेवचंद्रदर्शनेदोषमाहपराशरः॥ कंन्याऽदित्येचतुर्थ्यांतु राम
शुक्लेचंद्रस्यदर्शनं॥ मिथ्याभिदूषणंकुर्यात्तस्मात्पश्येन्नतंसदा॥ तद्दोषशांतयेविष्णुपुराणे॥ ७१
सिंहःप्रसेनमवधीत्सिंहोजांबवताहतः॥ सुकुमारकमारोदीस्तवह्येषस्यमंतकः॥ अपस्य

मंतकोपाख्यानं॥ नंदिकेश्वरउवाच॥ शृणुष्वैकाग्रचित्तःसनगणेश्वरव्रतमुत्तमं॥ कर्तव्यंशु
क्लपक्षेतुसदाकार्यंप्रयत्नतः॥ सनत्कुमारयोगींद्रयदिच्छेच्छुभमात्मनः॥ नारीवापुरु
षोवापियःकुर्यान्व्रतमुत्तमं॥ मोचयत्याशुविघ्नेंद्रःसंकष्टादतितंतरं॥ अपवादहरंचैवसर्व
विघ्नप्रणाशनं॥ कांतारेविषमेवापिगव्हेराजकुलेतथा॥ सर्वसिद्धिकरंचैवव्रतानामुत्तमो
त्तमं॥ गजाननप्रियंचापत्रिषुलोकेषुविश्रुतं॥ अतोनविद्यतेब्रह्मन्सर्वसंकष्टनाशनं॥ सनत्कुमा
रउवाच॥ केनचादौपुराचीर्णंममज्ञोकेकथंनतं॥ एतत्समस्तंविस्तार्यब्रूहिगणेश्वरंव्रतं॥ नंदिकेश्वरउवा
च॥ कृतंव्रतंजगन्नाथेवासुदेवःप्रतापवान्॥ आदिष्टंनारदेनैवव्यपाजांछनशांतये॥ सनत्कुमारउवा
च॥ षड्गुणैश्वर्यसंपन्नेसृष्टिसंहारकारकः॥ वासुदेवोजगन्नाथोप्राप्तवान्लांछनंकथं॥ एतदाश्च
र्यमाख्यातंब्रूहित्वंनंदिकेश्वरः॥ नंदिकेश्वरउवाच॥ भुवोभारावतारार्थंवसुदेवसुतावुभौ॥ राम
कृष्णौसमुत्पन्नौमहायुधौ॥ जरासंधभयात्कृष्णोद्वारकांसमकल्पयत्॥ विश्वकर्मणा

व्रता० ७२ माल्यपुरी हाटकनिर्मितां॥ तत्रयोद्धासाहस्रं स्त्रीणां चैव वराधिकं॥ अवतानिमनोज्ञातितेषां
मध्येव्यकल्पयत्॥ पारिजाततरुश्चैव तां मांश्रोगायकल्पयत्॥ यादवानां गृहास्तत्र षट्पंचाशत्
कोटयः॥ अन्येपि बहवो लोकावसंति विगतज्वराः॥ यत्किंचित्त्रिषुलोकेषु सुंदरं तत्र दृश्यते॥ सत्रा
जितप्रसेनाख्यौ पुत्रावुग्रस्य विश्रुतौ॥ अंभोधीतिरमासाद्य तन्मनस्कतया च सः॥ सत्राजित
स्तपस्तेपे सूर्यमुद्दिश्य बुद्धिमान्॥ व्रतं निरसनं गत्वा तत्सूर्यसंबद्धलोचनः॥ ततः प्रसन्नो भगवान् सत्रा
जित पुरःस्थितः॥ सत्राजितोपि संतुष्टो देवदेवं दिवाकरं॥ तेजोराशे नमस्तेस्तु नमस्ते सर्वतोमुख॥
विश्वव्यापिन्नमस्तेस्तु नमस्ते विश्वरूपिणे॥ काश्यपेय नमस्तेस्तु हरिदश्व नमोस्तु ते॥ ग्रहराज
नमस्तेस्तु नमस्ते च उडुरोचिषे॥ वेदत्रय नमस्तेस्तु सर्वदेव नमोस्तु ते॥ प्रसीद पाहि देवेश सु
दृष्ट्या मां दिवाकर॥ इत्थं संस्तूयमानोसौ देवदेवो दिवाकरः॥ स्निग्धगंभीरमधुरं स सत्राजितमुवा
चह॥ वरं ब्रूहि प्रसन्नोस्मि यत्ते मनसि वर्त्तते॥ सत्राजित महाभाग तुष्टोहं तव निश्चयात्॥ सत्राजि राम ७२

दुवाच॥ स्यमंतकमणिं देहि यदि तुष्टोसि भास्कर॥ ददौ तस्य च यद्रत्नं स्वकंठादवतार्य सः॥ सू
र्यउवाच॥ भाराष्टकं स्वर्णं नित्यं स्रवते सौ महामणिः॥ सुविष्मता सदा धार्यं रत्नमेतन्महो
तन्मे॥ सत्राजित रूपेणैव त्वदश्रुचीहंति मन्नवं॥ इत्युक्त्वांतर्दधे देवो तेजोराशिर्दिवाकरः॥ त
केवरत्नव्रजमानरूपो पुरीं सकस्मद्विवेश सत्वरं॥ दृष्ट्वा तु लोका मनसा दिवाकरं संचिंतयंत
स्तिमिराहृद्दृष्टयः॥ समागतोयं हरिदश्वरीभीति जनार्दनं द्रष्टुमसंशयेन॥ नायं सहस्रांशुरिती
हलोकाः सत्राजितोयं मणिकंठभास्वरः॥ स्यमंतकं महारत्नं दृष्ट्वा तत्केशवं मंडलो॥ स्पृहां च
क्रे जगन्नाथो न जहार मणिं ततः॥ सत्राजितो ज्ञात नयो याचयिष्यति मां हरिः॥ प्रसेनाय ददौ भ्रा
त्रे ध्यायेश्रु विना त्वया॥ एकदा कंवदेशो सौ कृत्वा संमणिमुत्तमं॥ मृगयार्थी उनार्यापयपयोरु
स्मेन संयुतः॥ अश्वारूढोसु विश्वासोहतः सिंहेन तत्क्षणं॥ रत्नमादाय सिंहोपि गच्छन्जांबव
ताहतः॥ निस्ता सविवरे रत्नं ददौ पुत्राय जांबवान्॥ पुरीं विवेश कस्मोपिस्तकेः समसैः समा

डाक्टर भाऊदाजी ... Dr. BHAU DAJI MEMORIAL

व्रता०
७३

हृतं॥ प्रसेनोप्यापितापातिहृतः कृष्णेननिश्चितं॥मणिलोभेनमहाकष्टं बांधवः पापीनाह
तः॥द्वारकावासिनःसर्वेजनाऊचुःपरस्परं॥तयापवादसंततःसकृष्णोपिनगराद्बहिः॥सहो
वतैर्यथारण्यंदृष्ट्वासिंहेनपातितं॥प्रसेनंचाहनपुतंतस्मादनुसरंयतः॥ऋक्षेणनिहतंदृष्ट्वा कृ
ष्णस्तत्पदैर्गतः॥विवेशाथोजनं ज्ञातमंधकारंस्वतेजसा॥निवारयन्ददर्शाग्रेप्रासादंबकुच
मिकं॥कुमारंजांबवंतस्यदोलामसमीनच्युतिं॥मणिमसंबमानंचददर्शभगवान्हरिः॥रूपयौ
वनसंपन्नाकन्याजांबवतिपुनः॥दोलांदोलयमानांचददर्शकमलेक्षणः॥विस्मयंचमहद्भ
क्रे दृष्ट्वातांचारुहासिनीं॥सिंहःप्रसेनमवधीत्सिंहोजांबवनाहतः॥सुकुमारकुमारोदीस्त
वत्येसस्यमंतकः॥मदनज्वरदाहार्तादृष्ट्वातंकमलेक्षणं॥अवाचत्ततितंबालागम्यतामिति
॥इत्युक्तीत्वावेगेनयावद्धेतुजांबवान्॥इत्याकर्ण्यहसनसौरीःशांखंदध्मौप्रतापवान्॥श्रु
कर्ण्यसहसोत्थायऋक्षःसयुयुधेततः॥तयोर्युद्धमभूद्घोरंहरिजांबवतस्तदा॥द्वारकावासिनः

राम
७३

सर्वेगतास्तेसप्तमेदिने॥मतःकृष्णोनकिंवानिःसंदिग्धंविचार्यतु॥परलोकक्रियांचक्रुःपरेतस्य
तुतेतदा॥एकविंशद्दिनंयावद्धाऋक्षःसरणोविभुः॥युयुधेतेनऋक्षेणयुद्धकर्माणितोषितः॥
जांबवान्भातकंनस्मृत्वादृष्ट्वादेवजनंमरत॥जांबवानुवाच॥अजेयोहंसुरैःसर्वैर्यक्षराक्षस
दानवैः॥त्वयाजितोहंदेवेशदेवस्त्वमसिनिश्चितं॥जानेत्वांवैस्वतेजोनामयाबलमीदृशं॥इतिप्र
साद्यदेवेशंददौमणिमनुत्तमं॥सुतांजांबवतींचाथभार्यार्थेविदवर्णिनि॥पाणिंचग्राहयामा
मासदेवदेवंचजांबवान्॥मणिमादायदेवोपिजांबवत्यापिसंयुतः॥तदृष्ट्वातंसमाजघ्नेद्वारका
वासिनाततः॥सत्राजितस्यमणिंवंदत्तवान्संसदिस्थितः॥मिथ्यापवादसंशुद्धिप्राप्तवान्मधुसू
दनः॥रेसुरथ्यासत्राजितोपिसंत्रस्तःकृष्णायप्रददौसुतां॥सत्यनामांमहाबुद्धिर्दोसर्वगुणा
न्वितां॥शतधन्वाक्रूरसुरस्यायादवाधुष्टमानसा॥सत्राजितेनतेवैरंचक्रुरत्नाभिलाषिणः॥उरा
त्माशतधन्वापिगतेकृष्णेपिकृचवित॥सत्राजितंनिहत्यासौमणिंजग्राहपापधी॥कृष्णेनपुरतःसत

व्रता०
७४

नामन्वेषेविचिंतितं ॥ अंतरिक्षेबहिः कोपि कृष्णः कपटनायकः ॥ बलदेवपुरोवाक्यमुवाचध
रणीधरणीधरः ॥ हत्वासत्राजितंकृष्णमणिमादायगच्छति ॥ निहत्यशतधन्वानं गृहीत्वारत्नमा
वयोः ॥ मम्मभोगंचतद्रत्नंनविष्यतिनसंशयः ॥ एतच्छुत्वाजयत्तोसौशतधन्वापियादवः ॥ अ
रूपारूढनामानंमणिंसंप्रददौचलः ॥ आवांस्यवडवांवेगान्निर्गतोदक्षिणांदिशं ॥ रथस्थावनुग
च्छेतांतत्स्यामजनार्दनौ ॥ शतयोजनमात्रेणमसारवडवातदा ॥ पलायमानोनिहतःपदातिस्तु
पदातिना ॥ रथस्थेबलदेवेतुहरिणारत्नलोभिना ॥ अदृष्टंतत्रतद्रत्नंबलदेवंपुरोवदत् ॥ त
दाकर्ण्यमिताराषाद्बभाषवचनंबली ॥ कृष्णत्वंसदाकृष्णलोभीपापीसुनिश्चितं ॥ अर्थापिस्वजनं
हंसिकस्त्वांबंधुःसमाश्रयेत् ॥ अनेकशपथैःकृष्णोबलदेवंप्रसादयत् ॥ सोपिधिक्कृष्णपित्युक्त्वा राम
ययौवैदर्भमंडलं ॥ कृष्णोपिरथमारुह्यद्वारकांप्रययौपुनः ॥ तथैवोचुर्जनाःसर्वेनसाधिपानयेद्र ७४
त्रिः ॥ विश्वासितोरत्नलोभान्मेषेण्माताबलोवली ॥ तच्छ्रुत्वादिनवदनः पापीनैवरिमातिवः ॥ इष

पित्राप्यसंतप्तोबलवमगजस्वनिः ॥ अक्रूरोपिविनिःक्रम्यतीर्थयात्रामिषात्ततः ॥ काशीगत्वासु
स्वेनासौगत्वायत्रपतिम्प्रभुं ॥ तोषमुसादयामासतेनद्रव्येणबुद्धिमान् ॥ सुरालयगृहेश्रित्रैर्ना
रंसमकल्पयत् ॥ नदुर्भिक्षंनवैरोगाईतयोनचविद्रुराः ॥ श्रुत्विनाधार्यतेतन्नमणिःसूर्यस्यनिःसृ
तः ॥ ज्ञानत्नापितिसर्वज्ञोमानुषत्वावमाश्रितः ॥ लोकाचारंतथासाप्य अज्ञानंचसमाश्रितः ॥ बंधुवैर
समुत्पन्नंलोकतंस्मुपस्थितं ॥ वृथापवादवक्तव्यंजायमानंकथंसहेत् ॥ इतिचिंतातुरंकृष्णंनार
दः समुपस्थितः ॥ दृष्ट्वाबुकृष्णंतां पप्रच्छसुखासीनस्ततोब्रवीत् ॥ नारदउवाच ॥ किमर्थंविद्यसेदेव
किंवातेशोककारणं ॥ यथारतंसमाचक्षेनारदायचकेशवः ॥ ज्ञानामिकारणंदेवयदर्थंलांछनंत
वा ॥ त्वयानाद्यपरेश्रुतकेचतुर्थ्यांचंद्रदर्शनं ॥ कृतेनसमुत्पन्नंलांछनंतुवृथैवहि ॥ श्रीकृष्णउवा
च ॥ वदनारदसेश्रिभ्रंकोदोषश्चंद्रदर्शने ॥ किमर्थंतु द्वितीयायांतस्यकुर्वंतिदर्शनं ॥ नारदउ
वाच ॥ गणनाथेनसंशप्तश्चंद्रमारूपदर्पितः ॥ त्वद्दर्शनेनराणांहिवपानिंदाभविष्यति ॥ श्रीकृ

व्रता० ७५

स्कंद उवाच॥ किमर्थं गणनाथेन मस्तके चंद्रः सुधामयः॥ इदमाख्यानकं श्रेष्ठं यथावद्वक्तुमर्हसि
॥नारद उवाच॥ गणनामाधिपः सेन रुद्रेण ब्राह्मणः पुरा॥ अणिमा महिमा चैव लघिमा गरिमा
तथा॥ प्राकाम्यं शिवशीत्वं च अर्थकामो वसायिता॥ तार्पयित्वा प्रददौ देवो गणेशाय प्रजापतिः॥ प्र
जपित्वा गणाध्यक्षं स्तुतिं कर्तुं प्रचक्रमे॥ ब्रह्मोवाच॥ गजवक्त्र गणाध्यक्ष जंबोदर वरप्रद॥ वि
द्याधीश महादेवेश सृष्टिसंहारकारक॥ संपूजयेद्गणाध्यक्षं मोदकाद्यैः प्रयत्नतः॥ तेषां प्रजायते
सिद्धिर्विनिघ्नेन न संशयः॥ असंपूज्य गणाध्यक्षं ये वांछंति सुरासुराः॥ न तेषां जायते सिद्धि
कल्पकोटिशतैरपि॥ त्वद्भक्त्यातु गणाध्यक्ष विष्णुः पालयते सदा॥ रुद्रोपि संहरत्सा सृत्व छ
क्रैव करोम्यहं॥ इत्थं संस्तूयमानोसौ देवदेवो गजाननः॥ उवाच परमप्रीतो ब्रह्माणं जगतां प
तिं॥ गणेश उवाच॥ वरं ब्रूहि मदास्यामि यत्ते मनसि वर्त्तते॥ ब्रह्मोवाच॥ क्रियमाणस्य मे सृष्टि
निर्विघ्नं जायतां प्रभो॥ एवमस्त्विति देवोसौ गृहीत्वा मोदकान्करे॥ सत्यलोकात्समागच्छन्

राम ७५

चेच्छया गगने शनैः॥ चंद्रलोकं समासाद्य वसितो गणनायकः॥ अथ हास्यं महच्चक्रे सोमो
रूपमदान्वितः॥ तं दृष्ट्वा कोपताम्राक्षो गणनाथः शशाप ह॥ दर्शनीयः सुरूपो हं सुंदरश्चाह
मित्ययं॥ गर्वितोसि मदेशांक त्वं फलं प्राप्स्यसि सत्वरं॥ अद्य प्रभृति लोकास्त्वां न हि पश्यंति पापि
नो॥ ये पश्यंति प्रमादेन त्वां नरा मृगलांछनं॥ मिथ्याभिशापसंयुक्ता भविष्यंति हि ते ध्रुवं॥ हाहा
कारो महाञ्जातः श्रुत्वा शापं च भीषणं॥ अंतःस्थानवदनः श्चंद्रो जलं समाविशत्॥ कुमुदे
कुमुदे नाथः स्थितस्तत्र कृतालयः॥ ततो देवर्षिगंधर्वा निराशा दिनमानसाः॥ तुरगस्था हं पुरोधा
य जग्मुस्ते तु पितामहं॥ दृष्ट्वा पितामहं देवं ते संस्तुश्चंद्रचेष्टितं॥ दत्तः शापो गणेशेन कृपया
मास्तु राद्रशात्॥ विचार्य भगवान्ब्रह्मा तान्सुरानिदमब्रवीत्॥ गणेशशापो देवेशाः शक्य
ते केन चान्यथा॥ कर्तुं मिंद्रेण मया विष्णुनापि निश्चितं॥ तमेव देवदेवेशं ब्रह्मध्वंशा
रणं सुराः॥ स एव शापमोक्षं च करिष्यति न संशयः॥ देवा ऊचुः॥ केनोपायेन वरदो गजवक्त्रो

व्रता०
७६

गणेश्वरः ॥ पितामह प्राह तदस्माकं वरप्रदो ॥ पितामह उवाच ॥ चतुर्थ्यां देवदेवास्मौ पूजनीयः प्र-
यत्नतः ॥ कृष्णपक्षे विशेषेण नक्तं कुर्याद्व्रतप्रियं ॥ अपूपैर्घृतसंमिश्रैर्मोदकैः परितोष-
येत् ॥ मधुरान्नं हविष्यं च स्वयं भुंजीत कामतः ॥ स्वर्णरूपं गणेशस्य दातव्यं द्विजसत्तमे ॥ आत्मा-
च दक्षिणां दद्याद्विप्राणां भोजनं कारयेत् ॥ एवं समस्ते सर्वे प्रेषयामास गीष्पतिः ॥ मृगत्वा कथ-
यामास चक्रे ब्रह्मोदितं तु यत् ॥ व्रतं चक्रे ततश्चंद्रो यथोक्तं ब्रह्मणा पुरा ॥ आविर्बभूव भगवा-
न्गणेशो व्रततोषितः ॥ तस्मै क्रीडमानं गणनायकं चतुष्टाव हृष्टश्च कलानिधानः ॥ त्वं
कारणं कारणकारणानां वेत्तासि वेद्यं च हरे प्रसीद ॥ प्रसीद देवेश जगन्निवास गणेश लं-
बोदर वक्रतुंड ॥ विरंचिनारायणपूज्यमान क्षमस्व मे गर्वकृतं च हास्यं ॥ ये त्वां स संस्मरण- राम
णेशं भजंते वा ते तिमिरं विदितार्थसिद्धिं ॥ तेनैव नष्टा निमितं च लोके ज्ञातो मया ते सकलप्रभा- ७६
वः ॥ ये चाप्युदासीननरास्तु पापास्ते यांति पापं नरके सदैव ॥ एवं संस्तुयमानो सोमेनेंदुना

य गजाननः ॥ श्रीगणेश उवाच ॥ तुष्टोऽहं तव दास्यामि वरं ब्रूहि निशाकरः ॥ चंद्र उवाच ॥ लो-
कानां दृश्यो यो हं भवामि पुनरेव हि ॥ विपापोऽहं विशापोऽहं त्वत्प्रसादाद्गणेश्वरः ॥ श्रीगणेश उवा-
च ॥ वरमन्यं प्रदास्यामि नैतदेयं न पातव ॥ विशापं कुरु देवेश प्रार्थयामो वयं ततः ॥ विशाप-
मकरोद्वंद्वं कमलासनगौरवात् ॥ शुक्लपक्षे चतुर्थ्यां तु ये पश्यंति सदैव हि ॥ मिथ्यापवादमा-
यासेते प्राप्स्यंति न संशयः ॥ मासादौ पूर्वमेव त्वां ये पश्यंति सदा जनाः ॥ भाद्रपद्यां शुक्लप-
क्षस्य तेषां दोषो न जायते ॥ तदाप्रभृति लोकेषु द्वितीयायां कृतादरः ॥ चंद्रस्य दर्शनार्था-
य गणनाथेन भाषितं ॥ भाद्रे शुक्लचतुर्थ्यां तु पश्यं पश्यति पार्थिव ॥ मिथ्यापवादमलिनः आ-
वर्षांतं स्यात्प्रजापते ॥ पुनरेव तु पप्रच्छ कलावान्गणनायकं ॥ केनोपायेन देवेश तुष्टो भवसि
तद्वद ॥ गणेश उवाच ॥ सदा कृष्णचतुर्थ्यां तु मोदकाद्यैः प्रपूज्य मां ॥ ततो हिरण्यसहितं त्वां च
समभ्यर्च्य विधानतः ॥ यथाशक्त्या च मद्रूपं स्वर्णेन परिकल्पितं ॥ दत्वा द्विजाय भुंजीत नायक

व्रता० ७७ यांश्च कृत्वा विधानतः॥ सदा तस्य करिष्यामि संकष्टस्य निवारणं॥ नारद उक्त चतुर्थ्यां तु म
न्मयं प्रतिमां शुभां॥ होमान्ते वेतु कर्तव्यानानापुष्पैः प्रपूजयेत्॥ ब्राह्मणान् भोजयेत् पश्चा
द्गणगरच विशेषतः॥ स्थापयेद्व्रणं कुंभं धान्यस्योपरि शोभितं॥ यथाशक्त्या तु मद्रूपं श्री ग
कुंभेन निर्मितं॥ वस्त्रयुग्मसमाच्छन्नं मोदकाढ्यैः प्रपूजयेत्॥ रक्तांबरधरो मंत्री ब्राह्मणश्च
पुरतः शुचिः॥ रोहिणी सहितस्त्वं च पूजां प्राप्य च मत्सुराः॥ रजतस्य तु रूपं ते यथाशक्त्या वि
निर्मितं॥ वस्त्राणि वस्त्रियायेति गणाधिपत नमोस्तु ते॥ गंधं लंबोदरायेति पुष्पं सिद्धिप्रदाय च॥
॥ धूपं गजमुखायेति दीपं मूषकवाहने॥ विघ्ननाशाय नैवेद्यं फलं सर्वार्थसिद्धि
दे॥ तांबूलं कामरूपाय दक्षिणां धनदाय च॥ इत्युक्त्वैस्तथा द्यन्नामभिस्त्वं गणाकरं शुभं
॥ विसर्जनं समारंभैः सर्वसिद्धिप्रदायकं॥ एवं संपूज्य विघ्नेशं कथां श्रुत्वा विधानतः॥ पूर्णे
णेनेन तत्सर्वं ब्राह्मणाय निवेदयेत्॥ दानेनानेन देवेश प्रीतो भव गणेश्वर॥ सर्वत्र सर्व ७७

दा देव निर्विघ्नं कुरु सर्वदा॥ मानोन्नतिं च राज्यं च पुत्रपौत्रान् प्रदेहि मे॥ गावो धान्यं च वासि दद्यात्
वस्त्रं शक्तितः॥ दत्वा तु ब्राह्मणे सर्वं स्वयं भुंजीत कामतः॥ मोदकाद्यपमधुरं लवणक्षारवर्जि
तं॥ एवं करोति यश्चेदं तस्याहं सर्वदा जयं॥ सिद्धिदं धनधान्यं च ददामि विपुलां श्रियं॥ इत्युक्त्वांत
र्धे देवो गणनाथो विनायकः॥ तद्व्रतं कुरु कृष्ण त्वं ततः शुद्धिमवाप्स्यसि॥ नारदेनैवमुक्त
व्रतं चक्रे हरिः स्वयं॥ मिथ्यापवादसंशुद्धिर्दिष्टी यां कृष्णयाचितं॥ ये श्रृण्वंति तवाख्यानं स्यमं
तकमणियकं॥ चंद्रस्य चरितं सर्वं तेषां दोषो न जायते॥ भाद्रशुक्लचतुर्थ्यां तु चंद्रस्य दर्शनं
क्वचित्॥ जातं तत्परिहारार्थं श्रोतव्यं समवमिवत्॥ यदा यदा मनः कष्टं संदेहश्चोपजायते॥ तदा त
दा च श्रोतव्यं आख्यानं कष्टनाशनं॥ एवमुक्त्वा ततो देवो गणेभ्यः कृष्णतोषितः॥ यदा यदा पद्मपति
कार्यं स्थितं नारी नरश्चापि करोति सद्व्रतं॥ सिद्ध्यंति कार्याणि मनसेप्सितानि विकिंडः स्ववरं विघ्न
हरे प्रसन्ने॥ श्रावणस्यासिते पक्षे च तुर्थ्यामिवनुग्रतो॥ व्रतं कुर्यान्नरो ग्रस्य यावन्मासचतुष्टयं॥

व्रता० इतिस्यमंतकाख्यानं॥ अथभाद्रशुक्लचतुर्थ्यांकदीश्वरविनायकव्रतं॥ तद्विधिः॥ तिथ्यादिस्मृत्वाम
५८ मचतुर्विधपुरुषार्थसिध्यर्थंकपर्दीगणेशव्रतमहंकरिष्येमूलमंत्रेणषडंगन्यासंकृत्वा
पूजांसमारभेत॥ तत्रादौपीठपूजा॥ ॐनमोभगवतेसकलगुणात्मशक्तियुक्तायानंताययोगपी
ठात्मनेनमः॥ अष्टदलकेसरेषु॥ ॐतीव्रायैनमः॥ ॐज्वालिन्यै० ॐनंदायै० ॐभोगदायै०
ॐकामरूपिण्यै० ॐउग्रायै० ॐतेजोवत्यै० ॐसत्यायै० मध्येविघ्ननाशिन्यैनमः॥ अथध्यानं॥ एक
दंतंमहाकायंलंबोदरगजाननं॥ विघ्ननाशकरंदेवंहेरंबंप्रणमाम्यहं॥ इमांपूजांगृहाणेशक
पर्दीगणनायक॥ आगच्छेत्यतित्रिवारंपठन्॥ विनायकनमस्तुभ्यंउमामलसमुद्भव॥ इमां
मयाकृतांपूजांगृहाणसुरसत्तम॥ सहस्रशीर्षेत्यावाहनं॥ अनेकारत्नसमायुक्तंमुक्ताम राम
णिविभूषितं॥ स्वर्णसिंहासनंचारुप्रीत्यर्थंप्रतिगृह्यतां॥ पुरुषएवेदमित्यासनं॥ गौरी ५८
सुतनमस्तेस्तुशंकरप्रियकारक॥ भक्त्यापाद्यंमयादत्तंगृहाणप्रणतप्रिय॥ एतावानस्येति

पाद्यं॥ व्रतमुद्दिश्यविघ्नेशगंधपुष्पादिसंयुतं॥ गृहाणार्घ्यंमयादत्तंसर्वसिद्धिप्रदायक॥ तस्मा
द्विराडित्याचमनीयं॥ अनाथनाथसर्वज्ञगीर्वाणपरिपूजित॥ स्नानंपंचामृतंदेवगृहाणगण
नायक॥ आप्यायस्वदधिक्राव्णघृतंमिमिक्षीरेमधुवाताघृतस्वादुःपवस्व॥ इतिपंचामृतस्नानं॥ गंगा
जलसमायुक्तंमयानीयंकृपयाममम॥ स्नानंत्वीकुरुविघ्नेशकपर्दिगणनायक॥ यत्पुरुषेणे
तिस्नानं॥ हरिद्रक्तयुग्मंदेवदेवांगवसनोपमं॥ भक्त्यादत्तंगृहाणेशलंबोदरहरात्मज॥ तंय
ज्ञमितिवस्त्रं॥ नानालंकारसंयुक्तंनानारत्नविभूषितं॥ अनेकदिव्याभरणंप्रीत्यर्थंप्रतिगृह्यतां॥
इत्याभरणं॥ राजतंब्रह्मसूत्रंचकांचनंचोत्तरीयकं॥ नानाचंद्रनमस्तुभ्यंगृहाणवरदोभव॥ तस्मा
द्यज्ञादितिपवित्रोपवीतं॥ गंधकर्पूरसंयुक्तंदिव्यचंदनमुत्तमं॥ विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्र
तिगृह्यतां॥ पुरुषएवेदइत्यासनं॥ तस्माद्यज्ञात्सर्वहुतऋचइतिगंधं॥ अक्षतान्धवला
देवसुरगंधर्वपूजित॥ भक्त्यारत्नाग्रहाणेमान्सर्वसिद्धिप्रदायकइत्यक्षताः॥ सुगंधी

व्रता०
७९

नि च पुष्पाणि वरसिद्धिप्रदायकं॥ कपर्दिगणनाथस्य श्वेतपुष्पं ददाम्यहं॥ तस्मात् स्वाच्च
नाथ त्वेति पुष्पं॥ अथांगपूजा॥ कपर्दिगणनाथाय नमः पादौ पूजयामि॥ गणेशाय० गण
नाथाय॥ ऊरू० गणक्रीडाय० कटिं० वक्रतुंडाय० हृदयं पू० लंबोदराय० कंठं॥ गजाननाय०
स्कंधौ० हेरंबाय० हस्तौ० विकटाय० मुखं० विघ्नराजाय० नेत्रे० धूम्रवर्णाय० शिरः॥ कप
र्दीने नमः सर्वांगं पूजयामि॥ षडंगैः प्रथमावरणं॥ वक्रतुंडाय एकदंष्ट्राय महोदराय ग
जाननाय० विकटाय० विघ्नराजाय धूम्रवर्णाय नमः॥ इति द्वितीयावरणं॥ ब्राह्म्यै० माहेश्वर्यै०
कौमार्यै० वैष्णव्यै० वाराह्यै० इंद्राण्यै० चामुंडायै० महालक्ष्म्यै नमः॥ इत्यष्टदलेषु तृतीया
वरणं॥ इंद्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० कुबेराय० ईशानाय० निर्ऋ
तिवरुणयोर्मध्ये अनंताय नमः॥ इंद्रेशानयोर्मध्ये ब्रह्मणे इति चतुर्थावरणं॥ वज्राय० श
क्तये० दंडाय० खड्गाय० पाशाय० अंकुशाय० गदायै० त्रिशूलाय० चक्राय इति पंचमावरण

राम
७९

दशांगं गुग्गुलं धूपं चंदनागरुसंयुतं॥ उमासुत नमस्तुभ्यं गृहाण वरदो भव॥ यस्तु लक्षं धूपं ध
रिति धूपं॥ गृहाण मंगलं देव घृतवर्तिसमन्वितं॥ दीपं ज्ञानप्रदं चारु रुद्रप्रीय नमोस्तुते॥ ब्रा
ह्मणे स्येति दीपं॥ नैवेद्यं॥ चंद्रमा मितिनैवेद्यं॥ इदं फलमिति फलं॥ सर्वफलसमायुक्तं ना
गवल्लीदलैर्युतं॥ चूर्णकर्पूरसंयुक्तं गृहाण गणनायक॥ नाभ्या आसीदिति तांबूलं॥ हिरण्यगर्भ
गर्भस्थं हेमबीजं विभावसोः॥ सप्तास्यामन्निति दक्षिणा॥ गणाधिप नमस्तेस्तु नमस्ते स्कंदना
मा॥ लंबोदर नमस्तेस्तु नमस्ते त्वंबिकासुत॥ एकदंत नमस्तेस्तु नमस्तेस्तु भवप्रिय॥ स्कंदाग्रज
नमस्तेस्तु नमस्तेस्तु फलप्रद॥ कपर्दिगणनाथस्य सर्वसंपत्प्रदायिनः॥ यज्ञेन यज्ञमिति पुष्पांजलि
॥ प्रदक्षिणं तु देवेश सर्वकार्येषु सर्वदा॥ कपर्दिगणनाथस्य मीप्सितार्थफलप्रद॥ इति प्रदक्षिणा
॥ नमस्करोमि देवेश सर्वविघ्नहरो भव॥ श्रीं घ्रं मम वांछितं देहि परत्र च परां गति॥ इति नमस्कारः॥ अ
पवित्रस्य चारीर जा॥ अकणिन सुष्टिगलितानतंडुला नसवराटकान॥ विप्राय बस्वेद यातगंभ पु

ष्यार्चितायच॥ तंडुलैश्चैव दैवसापाकेनान्नेन शोभना॥ कपर्दिगणनाथोसौ प्रीयतां तंडुलैः
सदा॥ कथां श्रुत्वा देवमुद्वासयेत्॥ अथ कथा॥ कदाचिदुपविष्टश्च पार्वत्या सह शंकरः॥ इतिप्रा
हप्रियं तां किं द्यूतेच्छा रतिरस्ति ते॥ हरोदरमिषाजेतुं वांछितं प्रत्युवाच सा॥ ममापि तस्मिन्सास्ते
व त्वया यद्दीव्यते पणः॥ तव किं किमनीशं तु दास्यामि परमेश्वर॥ लोकत्रयं वा पृच्छस्व किम
न्यैर्वचनैर्वृथा॥ सच्छामि पश्चादेतन्मे दीयतामिति नोच्यते॥ यदि त्वया दशानीतु विश्वासो नास्ति
मे त्वयि॥ वाक्यमेवंविधं श्रुत्वा सर्वसावासनां बिके॥ नविश्वासमपि तुं केन शक्यते किं पुनर्यमः॥ सो
त्तुं वनेन का देवी द्युते ह्यासीत्तथैव चेत्॥ पणः कल्प्यः प्रक्रियतां पिण्रोति शाम्भ हे सदा॥ तावंसरि
त्स्य पार्वत्या पणमाकल्प्य यत्नतः॥ त्रिशूलं त्रिदशान्सर्वान्सा स्मर्थं च उरे दद्रौ॥ तस्मिन्कर्मणि
तं जित्वा पणमप्यग्रतोछिवा॥ एवं डमरुदीनि तामस्मानि जयत्स्यपक॥ दीनोन्तत्वा महादेवो न
वानिमब्रवीरिति॥ शार्दूलचर्मतन्मध्ये मम च गिरिजे मम॥ नचैवं वक्तुमुचितं किं देव प्रीतिमान्वि

हा॥ दास्यामि सति किं दृष्टे पूर्वं स्मरसि किं न ही॥ अविचिंत्य ब्रवीषि त्वं जगदीशा कृपानिधे॥ इति ह
त्वा कृतापन्नो देवको न्यो यथा मया॥ आद्यादशादिने देवि तक रिष्यामि भाषणं॥ तथेत्युक्त्वा महा
देवस्तत्क्षणं च निरोदधा॥ किं दद्यामि घुगच्छामि किं जीवनमतः परं॥ इति संचिंत्य सान्वेषु मुद्या
नं प्रसमपद्यत॥ गिरिजा तत्र वनिता वृंदे दृष्ट्वा ब्रवीदिति॥ किमर्थमागताः सर्वाः किं मे तत्त्रितयेधु
ना॥ कपर्दिगणनाथस्य व्रतं कर्त्तुमिहागताः॥ पूजेषा तस्य चेदानीमस्माभिः श्रूयते कथा॥ कि
मर्थं तत्कृतं नार्यो युष्माभिः क्रियते वने॥ फलमप्यथवा नास्ति पार्वतीसहता भृतं॥ प्रवृत्ते
किं त्वया देवि न रनारीन्निरं विके॥ अनिष्ट सिद्धिरस्मात्तु लभ्यते नु वनत्रये॥ यतः कपित्वा ग
तवान्भिः कपस्तु महेश्वरः॥ तव संदर्शनाद्धे वव तत्क रिष्ये व्रतोत्तमं॥ व्रतस्येतस्य किं दानं विधानं
किं हशं म्म॥ सर्वं विचिंत्स्य मनसा कथयंतु सुरांगना॥ काले विधानं दानं च व्रतस्यास्य फलानि
च॥ तत्सर्वं सावधानेन वदामः शृणु पार्वति॥ स्त्रिय ऊचुः॥ मलादिदोषरहिते स्वत्तु भक्तिवासरे॥

व्रता०
८१

मासे कार्यं व्रतं सम्यग्गणेशप्रीतिमानसैः॥ तैलतांबूलभोगादीन् वर्जयित्वा शिवप्रिये॥ मंद
वारे तु भुंजीयादेकवारं मितं यथा॥ प्रातःकाले शुचिर्भूत्वा स्नानं कुर्याद्विधानतः॥ नदीतडा
गे कूपे वा शुद्धशुक्लातिलैः सह॥ संध्यादिकं तथा त्यायं सर्वं निर्हृत्य यत्नतः॥ अर्चनागारमा
साद्य गोमयेनोपलिप्य च॥ गोचर्ममात्रं तन्मध्ये कुर्यात्संधेन मंडलं॥ तन्मध्येष्टदलं पद्मं तन्म
ध्ये गणनायकं॥ पूजयेच्च बहुकुसुमैर्हरिद्रामिश्रिताक्षतैः॥ गां गं गे गौ गुश्च न्यासं कृत्वा
ततः परं॥ मंत्रेणानेन कुसुमैर्देवमावाह्य निक्षिपेत्॥ अथवा गणनाथस्य प्रतिमां तस्य पू
जयेत्॥ ततस्तद्गतचित्तः सन् ध्यानं कुर्याद्विधानतः॥ एकदंतं महाकायं लंबोदरगजाननं
॥ विघ्ननाशकरं देवं हेरंबं प्रणमाम्यहं॥ इमां प्रसन्नां गत्वा गणेश कपर्दिगणनायक॥ आगच्छे
ति त्रिरुच्चार्य कुर्यादावाहनादिकं॥ पुराणमंत्रैरथवा वेदमंत्रैश्च षोडश॥ पूजयेद्दूर्वा
भिश्च मूलमंत्रेण वा ततः॥ तत्तत्प्रकाशकैर्मंत्रैर्गंधपुष्पाक्षतादिभिः॥ इंद्रादिलोकपालां

राम
८१

श्च पूजयेद्देवसन्निधौ॥ लंबोदर नमस्तेस्तु नमस्ते त्वंबिकासुत॥ एकदंत नमस्तेस्तु नम
स्ते त्वीप्सितप्रद॥ कपर्दिगणनाथस्य सर्वसंपत्प्रदायिनः॥ पूजाप्रकारमप्येतत् सर्वं तातिश्रु
तिः स्मृते॥ अकरणं जलिमितान्हविष्यव्रीहितंडुलान्॥ स्वशुभाय यत्नेन संशोध्य चूर्णं कु
र्यान्महेश्वरि॥ शिवे तच्चूर्णं प्रथमे जानु वारेर्धं चैव तत्॥ कुर्याद्द्वितीये संपूर्णं चैव द्रवासिष्टका
ष्टकं॥ तृतीये पायसान्नं च दध्यन्नं चतुर्थकं॥ आनीय पाकं शाकं सम्यक् देवं संपूज्य भक्ति
तः॥ कल्पितान्यानि विधिवद्दीयंते यानि यानि च॥ तेषां ते ब्राह्मणश्रेष्ठं तस्मै सम्यक्समर्पये
त्॥ ततः शुद्धाय वरवेद्याद्देकं वराल्पकं॥ पुष्पावितानं तु जानांश्च भुंजीयाद्गगमसकं॥ याक्र
मं ते ये न कुर्वन्नास्ति भक्तवंतिहि॥ इत्युक्त्वा तां न वाती तुस्त्रियोपि गतकल्मषा॥ तासां तु वच
नं श्रुत्वा तदानीमकरोद्व्रतं॥ तत्क्षणाद्ब्रह्म विश्वेशः प्रसन्नः समजायत॥ त्रिलोककारणं देवं शं
करुणाकरशंकरं॥ द्विनाम नव्यगतिकान् काचकस्य याहि मां॥ तुष्टश्च शंकरं प्राह कथमेत

व्रता० त्वया कृतं॥ कपर्दिगणनाथस्य महात्म्यं किं न सिद्धति॥ व्रतस्यैतस्य महात्म्यं ज्ञातुं भगवान्स्वयं॥
८२ उद्दिश्यागमनं विष्णोरकरोत्तत्कृते शिव॥ तदा च गरुडारूढः समागत्यैनमब्रवीत्॥ मदागम
निमित्तं किं किं कृतं शंकर त्वया॥ ममापि ज्ञापनीयं तद्दिसुक्तेनापयपल्लिवः॥ अथैतदकरो विष्णु
हृदिस्यागमनं विधेः॥ आगतं मन विधिः शीघ्रं ममाज्ञापय माधव॥ प्रयोजनं नास्ति विधे त्वरा
गमनकारणं॥ एकदंतव्रतं किंचित् नवत्सैवनसंज्ञायः॥ इंद्रागमनमुद्दिश्य पतदानीं तेन तत्कृते
॥ आगत्य सहसा सोपि ममाज्ञापय विश्वतक॥ हेरंबव्रतमहात्म्यं दृष्टमेवं कृतं मया॥ ममा
पि ज्ञापनीयं दि सुक्तो विधिनोदितं॥ विक्रमादित्यमुद्दिश्य व्रजीत दकरोद्ब्रुमः॥ आगत्याह
मनुष्यस्त्वं रंभेमत्तः किमिच्छितं॥ कपर्दिहस्तवदनव्रतमहात्म्यमिदं वं॥ इति ज्ञातुं ममाभीष्ट राम
मेतच्च श्रुत्वा तदाब्रवीत्॥ विधानं तस्य महात्म्यं ज्ञापनीयं त्वयेति मे॥ पप्रच्छ विक्रमादित्यं उक्तु ८२
कः सन् पुरंदर॥ पुरंदरमुखात् ज्ञानं तत्सर्वं स्वपुरीं प्रति॥ व्याघ्रुवत्पयो राज्ञा पराक्रमप

रायणा॥ कपर्दिशव्रतं कृत्वा मतिष्या पुरतो वदन्॥ जेष्यामि सकजानव्रतन्न भाष्यान्विम
हाल्लाते॥ तस्य व्रतस्य किं दान मिति साग्रह विक्रमी॥ प्रत्युवाच प्रिया कामोटद्यादेकं वराट
कं॥ एवं चेत्तन्न कतन्न कर्तुं शंमहेहे यत्र कुत्रचित्॥ इत्यादि दूषणं दास्यु कष्टमगधिमवा
पसा॥ सुरीचिपर्वशात्कुष्ठ स्तस्याः सर्वे नस्यातवं त्वपात्रेति सर्वराज्यं विनश्यति॥ अर्क
स्य वचनं श्रुत्वा कुष्ठामश्नमवापसा॥ मरीचिर्यावशात्कुष्ठसाः सर्वे मुनीश्वराः॥ तिष्ठि
स्य योगमार्गेण सर्वे तान् ब्रुवती सती॥ कपर्दीशव्रतारूपादेवं प्रासंतवे स्तवः॥ कुरुष्व तद्व्रतं स
म्यक् सर्वे निंदं न विष्यति॥ ऋषीणामाज्ञया कृत्वा कपर्दीशव्रतं महत्॥ तदा निराजमहिषी दिव्यदे
हमवापसा॥ अस्मिन्नंतरिति काले नवाम्या सहवांकरो दृष्टपयो वृषारूढो नुवनानि चतुर्दश॥
मध्ये मार्गे द्विजेंद्रस्य रोदनं नवव ह्वजना॥ श्रुत्वा ब्राह्मणमारोटीः किमर्थं तव रोदनं॥ नकिंमप
स्ति मे देवि दारिद्र्या देव केप जाता॥ एवं यदि न वेदिषि कपर्दिशव्रतं कुरु॥ एतत्कर्तुं व्रतं देवि सामर्थ्य

DR. BHAU DAJI MEMORIAL

व्रता० ८४

नास्तिमे धुना॥ विक्रमार्कपुरे सर्ववैश्यो दास्यति तत्कुरु॥ कपर्दिशव्रतेनैव मंत्रित्वं प्राप्स्यसि
ध्रुवं॥ दारिद्र्यमोचनं सम्यग्भविष्यति न संशयः॥ गृहं प्रति समागम्य गृहीत्वा तं द्विजात्
वैश्यान्गृहीत्वा तत्सर्वं निर्दानीमकरोद्व्रतं॥ तस्मिन्नर्कपुरे विप्रस्तन्मंत्रित्वमवापसः॥ अप
पत्यकपर्दीशव्रतं वैश्यः सतकृपणात॥ अकरोत्स्वसुताया अवविक्रमः पतिरस्त्विति॥ व्रत
प्रभावाद्राजसुतामुपयेमे विक्रमः स्वसुतां॥ अनेनैव विवाहेन परां प्रीतिमवाप सा॥ एवमंतरिते
काले मृगयार्थं प्रविश्य सः॥ गहनं स्तूरषार्तः सन्ययौ मुनिवराश्रमं॥ उपचारैः श्रमं नीत्वा ते
षामर्कोऽभिनोरम्यां॥ रमणीयाश्रयाश्रमे तस्मिन्दर्शयामास विक्रमः॥ इत्यं प्रहृष्टचित्तस्य
वनिदातव्येषां समागतं॥ तवेयं महिषी सुकान्येनास्मै समर्पयेत्॥ समं महिष्या स्वपुरीं दिनान
रानरे पुनः॥ हृष्टः स नरविक्रमादित्य पुंस्त्रमास्याहनृपतिः॥ कपर्दिगणनापस्य व्रतं कृत्वा त्रिपा
--॥ अवेयं विक्रमादित्य समक्लान्शत्रुमंडलान्॥ गणनाथव्रतेनैव पुत्रपौत्रवतः ससः॥ राम ८४

धनधान्यादिसंपद्भिः सुखेनत्स्वसद्भुवि॥ एतदेवव्रतं कृत्वा पुनरश्रमलब्धवान्॥ इमां क
थां पंचवारं प्रथमे नानुवासरेदिति पेचरतो येव वर्षे द्व्याश्रयाव्रतो॥ एकाग्रमेतदेको नास्ति
तिश्लोकात्मकाशितं॥ भक्तिसेत्मथा कृत्वा क्रिमंपांतितयोपिसितं॥ इति स्कांदे कपर्दिविनायक
व्रतं॥ अथ कार्तिककृष्ण चतुर्थ्यां करकचतुर्थीव्रतं॥ ॥ अत्र स्त्रीणामेवाधिकारस्तासामेव फ
लतः श्रुतेः॥ ॥ अथ व्रतविधिः॥ ॥ आचम्य मासपक्षाद्युल्लिख्य मे नागपुत्रपौत्रादिसुस्थिरश्री
प्राप्तये करकचतुर्थीव्रतं करिष्ये इति संकल्प्य वटं विलिख्य तदधस्ताच्छिवं वटदृशषण्मुखयुक्तां गौ
रीं विलिख्य तापे इत्योपचारैः पूजयेत्॥ तन्मंत्रः॥ नमः शिवायै सर्वायै सौभाग्यं संततिं शुभां॥ प्र
कुल्लकिपुकान्नं नारीणां महरवल्लभे इति तत्तो नाममंत्रेण शिवषण्मुखयोः पूजा कार्या॥ त
तः पक्वान्नमन्दशकरकान्ब्राह्मणे भोद्यात्॥ नतः पिष्टकनैवेद्यं जोऽस्मं सर्वं निवेदयेत्॥ त
तश्चंद्रोदये तार्घ्यं चंद्रायार्घं दद्यात्॥ अथ कथा॥ ॥मांधातोवाच॥ ॥ अर्जुनेऽनुगते तस्मिन्लिंद

व्रत० ८४

लोकगिरिं प्रति॥ विषण्णमनसा सुभ्रु द्रौपदी समचिंतयत्॥ अहो किरीटीनामकर्मसमाक
र्मसमारब्धं महेश्वरः॥ विघ्नप्रवणमेतद्धि बहवः परिपंथिनः॥ चिंतयित्वेति सा देवी कृष्णा कृष्णं
जगद्गुरुं॥ भर्तुः प्रियचिकीर्षंती सा पप्रच्छ विघ्नवारणं॥ ॥द्रौपद्युवाच॥ ॥कथयस्व जगन्नाथ
व्रतमेकं सुदुर्लभं॥ यत्कृत्वा यांति विघ्नानि विजयस्ते सदा प्रिय॥ ॥कृष्णउवाच॥ ॥एतदर्थं महा
भागे त्वं तु पृष्ट किलो मया॥ एतत्प्रश्नः कृतः पूर्वं पार्वत्या शंकरं प्रति॥ तस्याः स्तवं च तं श्रुत्वा
प्राह देवो महेश्वरः॥ शृणु देवि वरारोहे त्वत्स्वामित्वं महेश्वरि॥ पति विघ्नहरो स्याद्धरकारकास्मात्
तुष्टीकां॥ पार्वत्युवाच॥ ॥भगवन् किंदृशी प्रोक्ता च तुष्टीकरकान्विता॥ विधानं कीदृशं प्रोक्तं केन
च पुरा कृता॥ ईश्वरउवाच॥ ॥शाकंभर्यां पुरे रम्ये विद्रुमसमाकुले॥ स्वर्णस्तंभसमाकीर्णे रक्त
प्राकारशोभिते॥ दिव्यनारीजनालोकवशीकृतजगत्त्रये॥ वेदध्वनिसमायुक्ते स्वर्गादपि मनोहरे
॥ वेदधर्मा द्विजस्तत्र वसन् देशे विशारदः॥ पत्नी तस्यैव विप्रस्य नाम्ना नीलावती शुभा॥ तस्यां राम ८४

स जनयामास पुत्रान् सप्तामितौजसः॥ कन्यां वीरवतीनाम्नीं सर्वलक्षणसंयुताः॥ नीलो
१११ तःस्नानमभिधायगंगायगगनमेखलोमितिहरिवंशे याव्रतकं तथैवोक्तयशस्करि॥ स्नानम
भ्यधिकंकार्यं भक्त्यषस्यमलेजले॥ अमत्रवाजलेस्नानंशुक्लपक्षेहरिप्रिये॥ एतद्गंगा
व्रतंनामसर्वकामप्रदंशुभं॥ सप्तसप्तचसप्तापकुलानिहरिवंशजे॥ स्त्रीतारयतिधर्मज्ञे
यंगंगाव्रतकचारिणी॥ येदकुंभस्तहस्तेतुगंगायाव्रतकेशुभे॥ तारणंपारणंचैवतद्व्रतंस
र्वकामिकमिति॥ ॥इतिगंगाव्रतं॥ ॥अथशुक्लादिश्रावणकृष्णसप्तम्यांशीतलाव्रतं॥
॥ ॥तत्रमध्याह्नव्यापिनीकार्या॥ तथाचमाधवीयेहारितः॥ पूजाव्रतेषुसर्वेषुमध्याह्न
व्यापिनितिथिरिति॥ अथविधिः॥ मासपक्षाद्युल्लिख्यममावैधव्यारारियनत्रवियोगपुत्र राम
शोकधनधान्यनाशयेशीतलाव्रतंकरिष्येइति संकल्प्ययथामिलितोपचारैः शीतलांपू १११
जयिष्यइतिसंकल्प्यैकंकलशंस्थाप्यतदुपरिशीतलांपूजयेत्॥ तत्रमध्यानंस्कांदे॥ वंदे

DR BHAU DAJI

हंशीतलांदेवीरासभस्थांदिगंबरां॥ मार्जनीकलशोपेतांशूर्पालंकृतमस्तकामितिकुंभेसं
स्थापयेद्देवीपूजयेन्नाममंत्रतः॥ शीतलेत्वंहमेपापंपुत्रसौख्यफलप्रदे॥ धनधान्यप्रदेदेवि
पूजांगृह्णनमोस्तुते॥ इतिप्रार्थनांविधाय॥ शीतलेशीतलाकारेअवैधव्यफलप्रदे॥ श्रावणस्या
सितेपक्षेअर्घ्यंगृह्णनमोस्तुते॥ स्त्यर्घ्यंदद्यात्॥ शीतलेमातीपष्कानिदधाचैवसमन्विता॥ नै
वेद्यंचप्रकुर्वीतघृतमिश्रंचसुंदरि॥ गौराणांभोजयेत्सप्तपूजनीयाप्रयत्नतः॥ ॥इतिपूजा
विधिः॥ ॥अथकथा॥ ॥हेमाद्रौभविष्यपुराणे॥ ॥कृष्णउवाच॥ ॥प्रसिद्धंश्रूयतांरम्यंनग
रंहस्तिनापुरं॥ इंद्रद्युम्नश्चराजाभूत्तत्पतिर्लोकपालकः॥ धर्मशर्मात्रिधानामतस्यभार्या
यशस्विनी॥ क्रियानाम्नात्रसाध्वीचदानशीलाप्रियंवदा॥ बभूवप्रथमंपुत्रोमहाधर्मेति
नामतः॥ नंदनेपित्रवासत्यात्कालेन्यास्मिन्तपोजनत्॥ द्वितीयातनयापुत्रीतस्यतातागुणो
त्तम॥ पुत्रीलक्षणसंपन्नाशुभकारीतिनामतः॥ वरधेसापितुर्गेहेसर्वांगगुणसुंदरि॥ नाम्ना

रूपेण सा बाला सर्वापि सगुणाधिका॥ सामुद्रिकगुणोपेता पद्महस्ता प्रियंवदा॥ परोहद्दहमा
नेन लक्ष्मीवान्रूपवान्गुणैः॥ समाययौ च जग्राह पाणिग्रहणपूर्वकं॥ कदाचित्स पितुर्गे
हं जामात्रानेजामात्रानयनाय च॥ आजगाम सपरिजनैस्तत्सुत्रागमनोत्सुकः॥ प्रणम्य च पितुः
पादौ त्वरितं चारुहासिनी॥ सत्पुत्री मुक्तयामास जामाता कृतविग्रहः॥ रथमारुह्य हे स्वामि
न्यास्यामी स्वपुरे गृहं॥ तस्मांपिते सुवाचेदं दंपत्योः शुभहेतवे॥ पुत्रि त्वं सुस्थिरा स्त्वा वास
रे कं कुमस्व मे॥ शीतला सप्तमी नाम व्रतं वरसुते शुभे॥ सौभाग्यारोग्यजं जनकं अवैधव्यप्रदं
तथा॥ ॥कंन्योवाच॥ ॥तात तत्र परिज्ञातं यदुक्तं परमयीतिनां॥ पतिव्रतासमो धर्मो नास्ति
ह भुवनत्रये॥ ततस्तां कारयामास शीतलाव्रतमुत्तमं॥ पत्रिकां प्रेषयामास ब्राह्मणे ब्रह्मपा
रगः॥ व्रतोपकरणं पुत्री मार्गे प्राप्ता सरोवरे॥ मार्गे पिप्पानि संगृत्य व्रतोपकरणं शुभं॥ शी
तलापूजनेहेतोर्गत्वा साध्वी सरोवरं॥ तत्र दृष्टं तया मोहात्तडागं विधिसाधनं॥ वस्त्रामसाव

ने भ्रस्पे स्मरंती शीतलाव्रतं॥ अतिश्रांता य यो मोहात् भयेन करुणाबहु॥ स्मरंती शीतलां
वृ भंनारी रूपं ददर्श सा॥ स्ववासरे विजानीहि साध्वी सावरवर्णिनी॥ न विष्पति चिरंजीवि
भर्त्तानि भक्तवत्सले॥ आगच्छ पूजनार्थाय दर्शयामि सरोवरं॥ तया सह गता साध्वी तडागं वि
धिपूर्वकं॥ पूजयामच सावाणि तोषयामास शीतलां॥ पूजयित्वा च तां देवीं स्वपथं गंतु
मुद्यता॥ शीतलायावरं गत्य सह संख्या च प्रस्थिता॥ यथा च ददृशे रण्ये स्वभर्त्तारं किंतु वक्ष्यति
॥ सरोवरे समायातो न्वेषयन्क्रांतविग्रहः॥ ब्राह्मणो निद्रया सुप्तः पूर्वकर्मप्रभावतः॥ दृष्टो
भुजंगरूपेण संयुक्तः पूर्वकर्मणा॥ विषहतं पतिं दृष्ट्वा शीतलायाः पतिव्रता॥ वरं संगत्य शा
नायां रुरोद करुणं बहु॥ तयोः स्तरुणदंपत्योर्योपि सौभाग्यदर्शनात्॥ रुदंती करुणं
बाला शोचयामास सत्क्रतं॥ यावन्न परलोकस्थं जन्मसंगस्तनक्रतो॥ कुशलेन सह ते वात्र अ
नुगच्छामि वह्निना॥ तस्मात्तु साधयिष्यामि पावकं पतिना सह॥ अर्चयिष्ये दिवं रिष्ये अहं

व्रता०
११३

चन्नवांतरं॥ ॥शीतलोवाच॥ ॥वत्से किमिदमित्युक्तं त्वया तं वरवर्णिनि॥ शीतलाव्रतवारिलेपैर्वै
धव्यं नैव जायते॥ स्वयमुत्थाय कल्याणि पतिं सम्यग्हे तदा॥ बोधयास्तु त्वया चीर्णं व्रतं वैधव्यना
शनं॥ इत्युक्त्वा बोधयामास भर्त्तारं सा पतिव्रता॥ भर्त्तापि मुदितो दृष्ट्वा स्वां प्रियां प्रीतिकर्मणा॥ दृ
ष्ट्वा तु महदाश्चर्यं तत्र ग्रामस्थायिनो जनाः॥ सर्वे ते विस्मयं जग्मु ब्राह्मणी पतिरक्षणात्॥ ब्राह्म
णी हर्षिता दृष्ट्वा प्राणेप्सपतिव्रता॥ यान्वेमातर्नन्त्रियो नौ वै धव्यं च वियोगताः॥ अन्यापि शी
तलायास्तु व्रतं नारी करिष्यति॥ अप्रवैधव्यमदारिद्र्यमवियोगसमन्विता॥ इत्युक्त्वांतर्दधे दे
वी शितला कामरूपिणी॥ शीतलाया वरं लब्ध्वा जगामात्मीयवेश्मनि॥ पद्मानिवासं प्रभु
विश्ववंद्य समर्हणा सा धौतविश्वमंगला॥ प्रसादमासाद्य च शीतलायाः निसोत्सवा पार्वति राम
वत्तेहवा॥ ॥इति हेमाद्रौ भविष्ये शीतलाव्रतं॥ ॥अथ भाद्रशुक्लसप्तम्यामुक्ताभरणव्र ११३
तपूजा॥ ॥देवदेव महेशान परमात्मन् जगद्गुरो॥ प्रतिपादितया सोम पूजया पूजयाम्यहं॥ इ

त्यावाहनं॥ अनेकरत्नखचितं सौवर्णमणिसंयुतं॥ मुक्ताचितं महादेव गृहाणासनमु
त्तमं॥ मिसासनं॥ पाद्यं गृहाण देवेश सर्वविद्यापरायण॥ ध्यानगम्य ज्ञातो शंभो सर्वेश्व
र नमोस्तु ते॥ पाद्यं॥ इदमर्घ्यमनर्घ्यं त्व मम गधीश शंकर॥ किंकरीभूतया सोम मया दत्तं
गृहाण वै॥ अर्घ्यं॥ गंगादिसर्वतीर्थेभ्यस्समानीतं सुशीतलं॥ तत्समाचमनीयार्थं गृहाण सोम
यासह॥ आचमनं॥ मध्वाज्यशार्करामिश्रसुधया करिकल्पितं॥ शंकरप्रीतये तेहं मधुपर्कं
निवेदये॥ मधुपर्कः॥ आदौ पंचामृतस्नानं पश्चाच्छुद्धेन वारिणा॥ स्नानं कुरु महादेव निजि
याकांत हायासह॥ स्नानं॥ स्नानदूर्ध्वं महादेव प्रीत्या पापप्रणाशनं॥ वस्त्रयुग्मं मया दत्तम
हं त्वं प्रतिगृह्यतां॥ तं पट्टवस्त्रं॥ उपवीतं सोत्तरीयं नानाभूषणभूषितं॥ गृहाण सोम विम
लं मया दत्तमिदं शुभं॥ तस्माद्यतात्सर्वकृतः यज्ञोपवीतं॥ मलयाचलसंभूतं सुगंधि घनसा
रयुक्॥ चंदनं पंचवक्त्र गृहाण वनितायुत॥ गंधं॥ जातीचंपकपुन्नागबकुलैः पारिजातकैः

व्रता०
११४

शातपत्रैश्चकल्हारैरर्चयेदुमापतिं॥ तस्माद्देवा पुष्पाणि॥ त्रैलोक्यपावनानंत परमात्मन् जगद्गु
रो॥ चंदनागरुकर्पूरं धूपं दास्यामि शंकर॥ धूपं॥ सुज्वर्त्तियुतं सर्पिर्ज्योतितं वह्निनायुतं॥ दी
पमेनेकार्कप्रतिमाकल्पयत्विमं॥ दीपं॥ पायसापूपकृसरंदुग्धं तं सुगुडोदनं॥ दिव्यान्नषड्र
सोपेतं सुधारससमन्वितं॥ समर्पयामि देवेश किंकरः शंकरायते॥ नैवेद्यं॥ पुनराचमनं सु
खं कुरु सोमांबुनामुना॥ मुखशुद्धिकरं शंकर कृपयात्वं गृहाण वै॥ कस्तूरिकासमायुक्तमलं
याचलसंभवं॥ गृहाण चंदनं सोमकरोद्वर्त्तनहेतवे॥ करोद्वर्त्तनं॥ नारिकेलफलं जंबूफलं
नारंगमुत्तमं॥ कूष्मांडं पुरतो भक्त्या कल्पितं प्रतिगृह्यतां॥ फलं॥ पूगीफलं महद्दिव्यमिति तां
बूलं॥ सप्तास्यासन्० हिरण्यगर्भेति दक्षिणा॥ नक्षत्रादीपमिति नीराजनं॥ यज्ञेन यज्ञमिति पुष्पांजलि
॥ यानिकानिचेति प्रदक्षिणा॥ महादेव महाराज प्रीत्या पापप्रणश्यन॥ अस्माकं कुर्वतां पूजां
साधु वासाधु योजितां॥ ज्ञानतोज्ञानतो वापि भवने विहितां च यां॥ संपूर्णयतु विश्वेशो विम

लः कोमलस्तुतां॥ पापोहमिति प्रार्थना॥ देवदेव जगन्नाथ सर्वसौभाग्यदायक॥ गृह्णीयां दोरकरू
पत्वां पुत्रपौत्रप्रवर्द्धनं॥ दोरकग्रहणं॥ सप्तसामोपगीतत्वां धारयामि जगद्गुरो॥ सूत्रग्रंथिस्थि
तं नित्यं धारयामि स्थिरो भव॥ ॥इति दोरकबंधनं॥ त्वत्पापानि सर्वाणि तुष्टिकुरु दयानिधे॥ प्रस
न्नस्त्वमुमाकांत दीर्घायुः पुत्रदो भव॥ इति जीर्णदोरकोत्तारणं॥ अथ वायनं॥ मंडकान्विष्ट
कान्पायसघृतान्दक्षिणयुतान्॥ एकादशसतत्कांतन्ब्राह्मणाय कुटुंबिने॥ वेदशास्त्र
प्रवीणाय दद्यात्सोमस्य तुष्टये॥ शंकरः प्रतिगृह्णाति शंकरो वै ददाति च॥ शंकरस्तारकोस्मा
कं शंकराय नमो नमः॥ ॥इति वायनं॥ ॥एवं यः पूजनं कुर्यात्सोमस्य सुखदस्य च॥ सर्वान्कामा
नवाप्नोति पुत्रपौत्रैश्च मोदते॥ ॥अथ कथा हेमाद्रौ भविष्योत्तरे॥ ॥कृष्ण उवाच॥ ॥मुनी
न्द्रो लोमशो नाम पुरायागतः पुरा॥ सोर्चितो वसुदेवेन देवक्या च युधिष्ठिर॥ उपविष्टः कथाः पुण्याः
कथयित्वा मनोरमां॥ ततः कथयितुं रूपः कथामेतां प्रचक्रमे॥ कंसेन ते हताः पुत्रा जाता जाताः पुनः

राम
११४

व्रता० पुनः॥मृतवत्सादेवकीत्वंपुत्रदुःखेनदुःखिता॥यथाचंद्रमुखीदीनाबभूवनृपप्रिया॥प
११५ श्चाच्चीर्णव्रताचैवबभूवाकृतवत्सका॥त्वमपिदेवकीतथाभविष्यतिनसंशयः॥ ॥देवक्युवा
च॥ ॥कासाचंद्रमुखीब्रह्मन्बभूवनृपप्रिया॥किंचीर्णंहिव्रतंदिव्यंतयासंततिवर्द्धनं॥स
पत्न्यादर्पदमनंसौभाग्यारोग्यदंविभो॥ ॥लोमश उवाच॥ अयोध्यायांपुरराजानहुषोनाम
विश्रुतः॥तस्यासीद्रूपसंपन्नादेवीचंद्रमुखीप्रिया॥तथातत्रैवनगरेविष्णुगुप्तोभवद्द्विजः॥आ
सीद्गुणवतीतस्यपत्नीभद्रमुखीतथा॥तयोरासीदतिप्रीतिस्सहणीयापरस्परं॥अथते
देपिसख्यौवैस्नानार्थंसरयूजले॥प्राप्तेप्राप्ताश्चतत्रैवबाह्याबैनगरांगनाः॥ताःस्नात्वामंडलं
चक्रुस्तन्मध्येव्यक्तरूपिणं॥लेखयित्वाशिवंशांतमुमायासहशंकरं॥गंधपुष्पाक्षतैर्भ राम
क्त्यापूजयित्वायथाविधि॥प्रणम्यगंतुकामास्तेयपृच्छत्तुर्वरस्त्रियः॥ताबुचुःशंकरोस्माभिःपा ११५
र्वत्यासहपूजितः॥बध्वास्सूत्रमयंतंतुशिवस्यात्मानिवेदितः॥धारणीयमिदंतावद्यावत्प्राणविधा

रणं॥तासांतद्वचनंश्रुत्वासख्यौचैतेपिदेवकि॥कृत्वातुसमयंतत्रबध्वादोर्भ्यांसुदोरकं॥ततः
स्ताश्चगृहंजग्मुःस्वसखीभिःसमावृताः॥कालेनमहतातस्यास्तद्व्रतंविस्मृतंशुभे॥चंद्रमुख्या
ःप्रमत्तायाःविस्मृतःसुदोरकः॥भद्रमुख्यातथाबद्धेविस्मृतंसर्वमेवतत्॥मृताकौश्च
दहोरात्रैःसाबभूवप्लवंगमी॥भद्रारव्याकुर्कुटीजाताव्रतत्यागाच्छुभानने॥संत्यक्तपसम
येप्राप्तंचक्रतुःसदा॥कालेनपंचतांप्राप्तेसख्यौभावात्सहैवतु॥अदेवमातृकेदेशेजाते
पिकुलसंयुते॥ब्राह्मणीब्राह्मणीजातायासीच्चंद्रमुखीपुरा॥नाम्नाभद्रमुखीयासीन्नृपभूषण
नामसाभवत्॥अग्निमीळस्यसाद्वत्तापित्रातस्यपुरोधसः॥अतिवल्लभाचासीन्नृपभू
षणप्रिया॥भूषितानृपेणैवरूपेणालंकृतास्वयं॥तस्याबभूवुरष्टौचपुत्राःसर्वगुणान्वि
ताः॥साद्रवरूपसंपन्नापिश्चवद्धर्मशीलिनः॥सख्यौतेतेनतद्व्रतजातेनातिस्मरेकिजः॥पुनर्नि
रंतरप्रीतिस्तयोराज्ञीद्विजयापुरा॥कालेबहुतिथेजातेस्मकासात्प्रयौवना॥मध्येवयसीचपुत्र

मेकमजीजनत्॥ ईश्वरी रोगिणी मूकं प्रग्राहहीनं च विस्वरं॥ तादृशोपि महाभागे मतो नववार्षि
कः॥ ततस्तां भूषणं द्रष्टुमीश्वरी पुत्रदुःखिता॥ सखी भावादतिस्नेहात् पुत्रैः स्वैः परिवारिता
॥ अमुक्ताभरणा भद्रा स्वरूपेणैव भूषिता॥ साहि भद्रद्विजस्यान्नं भ्रर्यान्नृपगणनामिना॥ पुरो
हितस्य कालेनकुक्कुटी बहुपुत्रिणी॥ तां दृष्ट्वा तादृशीं भव्यां प्रजाड्यां तेश्वरी रुषा॥ ततो गृहं प्रे
षयित्वा ब्राह्मणीं तीव्रमत्सरं॥ चिंतयामास सा शीघ्रं तस्याः पुत्रवधं प्रति॥ निश्चित्य चेतसा क्रू
राघातयामास तत्सुतान्॥ हताहताश्च ते पुत्राः पुनर्जीवं सनामयाः॥ तदद्भुततरं दृष्ट्वा सस्विमा
द्रूपभूषणं॥ उपविश्यासने श्रेष्ठे बहुमानपुरःसरं॥ अपृच्छद्विस्मयाविष्टा राज्ञी सानयवद्व
भा॥ ब्रूहि तथ्यं महाभागे किं त्वया सुकृतं कृतं॥ दानं व्रतं तपो वापि सुभूषणमुपोषणं॥ ये
नते निहताः पुत्राः पुनर्जीवं सनामयाः॥ तथाहि बहुपुत्रे च जीवद्वत्साभुजानना॥ अमुक्ताभरणा
नित्यं भर्तुश्चैतस्य वस्थिता॥ अतीव शोभसे भद्रे विद्युद्धर्मांत्यपेयथा॥ ॥भूषणोवाच॥ ॥शृणु

DR BHAU DAJI MEMORIAL

शृणु देवि प्रवक्ष्यामि जन्मांतरविचेष्टितं॥ किंतद्विविस्मृतं सर्वं मयोध्यायां कृतं हि यत्॥ आवा
भ्यां व्रत वैकल्पं भ्रमता मांबराननो॥ येन त्वं भवगीजाती जाताहं कुक्कुटी तथा॥ तथापि व्रत
वैकल्पं त्वया चापल्यता कृतं॥ मया तु सर्वभावेन चेतसा ध्यायशंकरं॥ तिर्यग्योन्यनुसा
रेण मनोवृत्त्या ह्यनुष्ठितं॥ एतद्विकारणं भद्रे नान्यत्किंचित्करोम्यहं॥ ॥लोमश उवाच॥ ॥
इत्याकर्ण्य विसंस्मृत्य पूर्वजन्मनि चेष्टितं॥ ईश्वरी च तयायासार्द्धं पुनः सम्यक्चकार ह॥ व्र
तस्यास्य प्रभावेन पुत्रपौत्रादिसंभवं॥ भुक्त्वा च सौख्यमतुलं मृता शिवपुरंगता॥ तस्मात्त्व
मपि कल्याणि व्रतमेतत्समाचर॥ आरब्धोस्मिन्व्रते दिव्ये जी पुत्रान्नविष्यति॥ ॥देव्युवाच॥ ॥
ब्रह्मन्नागरवा हिमे सम्यक्व्रतमेतत्सुखप्रदं॥ संतानवृद्धिकरणं शिवलोकस्थितिप्रदं॥ ॥लो
मश उवाच॥ ॥ भाद्रे भाद्रपदे मासि सप्तम्यां सलिलाशये॥ स्नात्वा शिवमंडलं केलेखयित्वा सतं
बिके॥ तत्र संस्थाप्य समयं कुर्याद्बध्वा करे गुणं॥ यावज्जीवं मया त्वा तु शिवस्य विनिवेदयेत्॥

व्रता० हस्ते वंसम्यमयं कृत्वा ततः प्रभृति दोरकं।। सौवर्णं राजतं वापि सौत्रं वा धारयेत्करे।। मुद्रिका
११७ न्वेष्टिकान्दद्यान्मासे पक्षे यवाद्विजे।। स्वयं ताश्चैव नोक्तव्या व्रतभंगं तथा छुतं।। प्रतिमासं
तु सप्तम्यां शुक्लपक्षे विशेषतः।। कुर्यादेवं व्रतं त्वडेव षांति पितु देवकी।। कारिता मुद्रिका ब्रह्मो
हैमी रूप्या स्वशक्तितः।। ताम्रपात्रे परिस्थाप्य ब्राह्मणेभ्यो निवेदयेत्।। आचार्याय विशे
षेण सुवर्णस्यांगुलीयकं।। पुष्पकुंकुमसंयुक्तं स्नात्वा स्नानं तत्र केः।। सहार्घैर्दत्तीया।। ए
वं तस्मा रयि त्वा तु व्रतं संततिवर्द्धनं।। सर्वपापविनिर्मुक्ता भुक्त्वा सौख्यमनामयं।। संतानं वर्द्ध
यित्वा तु च शिवलोके महीयते।। एतत्ते सर्वमाख्यातमाख्यानं व्रतमुत्तमं।। कुरु देवकि यत्नेन
यदुक्तं तेन धीमता।। व्रतस्यास्य प्रभावेन देवकी मामजीजनत्।। तस्मात्सार्थं नरैः कार्यं स्त्रि राम
भिः कार्यं विशेषतः।। व्रतं पापप्रशमनं सुखं संततिवर्द्धनं।। एवं यः शृणुयाज्ञ्चायश्चैव तत्प्रति ११७
दयेत।। व्रतमाख्यानसहितं सोपि पापैः प्रमुच्यते।। साख्यानकं व्रतमिदं सुतसौख्यकामा या

स्त्री करिष्यति शिवं हृदये निधाय।। दुःखं विहाय बहुशो हतकल्मषौघा नस्यात्स्त्री व
ता भवति शोभनजीववत्सा।। ।।इति हेमाद्रौ भविष्ये अमुक्ताभरणसप्तमी व्रतं।। ।।अथ
माघशुक्लसप्तम्यां रथसप्तमी व्रतं हेमाद्रौ भविष्ये।। ।।युधिष्ठिर उवाच।। ।।कथं सा क्रियते कृ
त्स्नमनुष्ये रथसप्तमी।। चक्रवर्तित्वफलदा या विख्याता त्वया मम।। ।।कृष्ण उवाच।। आसीत्कां
बोजविषये यशोवर्मा नराधिपः।। वृद्धे वयसि तस्यासीत्सर्वव्याधियुतः सुतः।। तत्कर्मपाकं
सोऽपृच्छत् विनितं द्विजपुंगवः।। सप्राह राजन्वै ह्योयं कृपणः पूर्वजन्मनि।। ददर्श रथसप्तम्याः श्री
यमाणं व्रतं नृप।। व्रतदर्शनमहात्म्याद्उत्पन्नो जवरे तव।। अदाता विभवे तस्मान्नेन च व्या
धितोऽभवत्।। ततः स राजा पप्रच्छ किमेतस्य विधीयतां।। यस्य संदर्शनात्स्वामी लोके भवति के
वलं।। तदेष क्रियतां राजन्नरथसप्तमी संज्ञितं।। व्रतं पापहरं येन चक्रवर्तित्वमाप्यते।। ।।राजोवाच
।। ।।ब्रूहि विप्र व्रतं कृष्णं समविधानं समंत्रकं।। ईश्वराणां दरिद्राणां सर्वसंपत्प्रदायकं।। ।।द्विज उ

व्रता० वाच ॥ शुक्लपक्षे तु माघस्य षष्ठ्यामामंत्रयेद्द्विजं ॥ स्नानं शुक्लतिलैः कार्यं नद्यभावे तु कुत्रचित् ॥ वि
११९ मले सलिले राजन् विधिदृष्टेन धर्मतः ॥ देवादीन्स्तर्पयित्वा सूर्यार्चनं ततः ॥ सूर्यं सम्यक् चंदनसत्कृत
पुष्पधूपादिकैः शुभैः ॥ आगम्य भवनं पश्चात्संचयत्ताश्च निर्वपेत् ॥ संतोष्य तिथि भसांश्च बा
लरत्पाश्रियान्स्वयं ॥ विद्यमाने दिने शौ पात् वाप्यतस्ते नवर्जितं ॥ रात्रौ विप्रं समास्थाय विधि
ज्ञं वेदपारगं ॥ संहत्य नियमं कुर्यात्सूर्यमाधाय चेतसि ॥ सप्तम्यां तु निराहारो भूत्वा क्रोधविवर्जि
तः ॥ नोस्पेष्टम्यां जगन्नाथ विविघ्नं तत्र मे कुरु ॥ इत्युच्चार्य नरः पश्चात्तोयं तोयेषु निक्षिपेत् ॥ ततो
विसृज्य तं विप्रं स्वपेद्भूमौ जितेंद्रियः ॥ ततः प्रातः समुत्थाय कृत्वावश्यं शुचिर्नरः ॥ कारयित्वा
रथं दिव्यं किंकिणीजालमालिनं ॥ सर्वोपस्करसंयुक्तं रत्नैः सर्वांगचित्रितं ॥ कांचनं राजतं वा राम
प्य हयासारथिसंयुतं ॥ ततो मध्याह्नसमये कृतस्नानादिको व्रती ॥ अतीर्यग्वोस्समालप्तस्तुपा ११९
खंडजापवर्जितः ॥ सौरस्तत्रं जपेत्पश्चात् आगच्छेत्स्वमालयं ॥ निर्वर्त्य नित्यकार्यं तु कृत्वा बा

लंणवास्वनं ॥ वस्त्रमंडपिकामध्ये स्थापयेत्तं रथोत्तमं ॥ कुंकुमेन सुगंधेन चर्चयित्वा समंततः ॥ माला
भिः पुष्पदीपानां समंतात्परिवेष्टयेत् ॥ धूपेनागरुमिश्रेण धूपयित्वा तथोपरि ॥ रथस्थं स्था
पयेद्भानुं सर्वसंहरणं किरणं ॥ वित्तानुरूपं हैमं च वित्तशाठ्यविवर्जितः ॥ शाद्यादि जतिवेकस्मं
वे कल्पाब्दिकमं फलं ॥ ततो देवं समभ्यर्च्य सरथं सहसारथिं ॥ पुष्पैर्धूपैस्तथा गंधैर्वस्त्रालंका
रभूषणैः ॥ फलैर्नानाविधैर्भक्ष्यैर्नैवेद्यैर्घृतपाचितैः ॥ पूजयेद्भास्करं भक्त्या मंत्रैरेभिस्त्रिभिः
क्रमात् ॥ भानो दिवाकरादित्य मार्तंड जगतांपते ॥ अपांनिधे जगद्रक्ष भक्त नमाव नमस्कर ॥ प्र
णतार्तिहराचिंत्य विश्वचिंतामणे विभो ॥ विष्णो हंसादिमनंतेशाद्यादिमध्यांतकारक ॥ भक्तिहीनं
क्रियाहीनं मंत्रहीनं जगत्पते ॥ प्रसादात्तव संपूर्णमर्चनं यदिहास्तु मे ॥ एवं संपूज्य देवेशं प्रार्थये
त्तु मनोगतं ॥ ददाति प्रार्थितो भानुर्भक्त्या संतोषितो नरैः ॥ वित्तहीनेऽपि विधिना सर्वमेतत्प्रकल्प
येत् ॥ रथं संसारथिं चाश्ववर्णकैर्निर्निवेदितं ॥ सौवर्णं च तथा भानुं यथा शक्त्या विनिर्मितं ॥ प्रागु

व्रता० केन विधानेन पूजयित्वा सुविस्तरं ॥ जागरं कारयेद्रात्रौ गीतवादित्रनिःस्वनैः ॥ प्रेक्षणीयैर्वि
११९ चित्रैश्च पुण्याख्यानकथादिभिः ॥ रथयात्रां प्रपश्येत नानोपायतनं श्रिया ॥ अनिमीलितनेत्र
स्तु नयेद्रात्रिं जनैर्बुधः ॥ प्रभाते विमले स्नात्वा कृतकृत्यस्ततो द्विजान् ॥ तर्पयेद्विविधैः कामैर्दा
नैर्वासोभिर्भूषणैः ॥ अश्वमेधेन तुल्यं तद्विदं ब्रह्मविदो विदुः ॥ अतो देयानि दानि यथाश
क्त्या विचक्षणैः ॥ रथं तु गुरवे देयं सर्वोपस्करसंयुतं ॥ रक्तवस्त्रं च युग्मं च रक्तधेनुसमन्वितं
॥ एवं चीर्णव्रते राजन् किं न प्राप्नोति जगत्त्रये ॥ तस्मात्सर्वप्रयत्नेन कुरु त्वं रथसप्तमी ॥ येनारो
ग्यो भवेत्पुत्र त्वदीयो नृपसत्तम ॥ व्रतस्यास्य प्रभावेन प्रसादाद्भास्करस्य च ॥ भविष्यति महद्रा
ज्यं महाबलपराक्रमैः ॥ भोगान्स विपुलान्भुक्त्वा भुक्त्वा राज्यमकंटकं ॥ दत्वासौ रथसप्तम्यां राम
मृतेत्वपि महाभुजः ॥ अस्मद्य पुत्रान्पौत्रांश्च सूर्यलोकं स यास्यति ॥ तत्र स्थित्वा कल्पमे ११९
कं च चक्रवर्ती भविष्यति ॥ ॥ कृष्ण उवाच ॥ ॥ इति सर्वं समाख्याय विपरीतो द्विजोत्तमः ॥ यथा

गतं जगामासौ नृप सर्वं चक्रधरहा ॥ यथादिष्टं द्विजेंद्रेण तत्तत्सर्वं बभूव ह ॥ एवं स चक्रवर्तित्वं
प्राप्तवान्रूपनंदन ॥ श्रूयते यस्तु मांधाता पुराणेषु परंतप ॥ यददंश्रएण्याद्भुत्वायो वापि
परिकीर्त्यते ॥ तस्यैव तु ष्यते भानुर्यः श्वसे वा परंसदः ॥ एवं विधं रथवरं रथवाजियुक्तं हेमं
च हेमशतदीधितिभासमेतं ॥ दत्त्वा च माघसितसप्तमिवासरे यः सोसंगच्छ कगतिरेव महा
भुनक्ति ॥ ॥ इति रथसप्तमीव्रतं ॥ ॥ अथास्यामेव स्नानविधिः ॥ तत्रारुदयव्यापिस्या स्नानंका
र्यं ॥ तदुक्तं मदनरत्ने स्मृतिसंग्रहे ॥ सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी ॥ अरुणोद
यवेलायां तस्यां स्नानं महत्फलं ॥ माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ॥ कुर्यात्स्नानार्घ
दानाभ्यामायुरारोग्यसंपद इति ॥ सप्तार्कपर्णानि सप्तबदरीफलानि पत्राणि शिरसि निधा
य कर्तव्यमिति मदनः ॥ तत्र मंत्रः ॥ यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु ॥ तन्मे रोगं च शो
कं च माकरी हंतु सप्तमी ॥ स्नानानंतरमर्घदानं च कर्तव्यं तन्मंत्रश्च ॥ सप्तसप्तिवहप्रीणस

व्रता० १२० स्वलोकप्रदीपन॥ सप्तम्यां सहितो देव गृहाणार्घ्यं दिवाकर इति॥ ततः प्रार्थना॥ जननी सर्वलोका
नां सप्तमी सप्तसप्तिके॥ सप्तव्याहृतिके देवि नमस्ते सूर्यमंडले इति॥ ॥ इति भविष्योत्तरोक्त
ः स्नानादिविधिः॥ ॥अथाचैवाचलासप्तमीव्रतं॥ ॥युधिष्ठिर उवाच॥ ॥कथं स्त्रियः सुले
रूपास्तु सुभगाः सुप्रजास्तथा॥ पुण्याश्च महति श्वात्र सर्वमेतत्सुफलं यतः॥ अल्पाया
सेन सुमहद्येन पुण्यमवाप्यते॥ त्रिनिपाचेमम ब्रूहि स्नानमेकं जगद्गुरो॥ ॥कृष्ण उवा
च॥ ॥श्रूयतां भरतश्रेष्ठ गृहस्थं मुनिभाषितं॥ यन्मया कस्यचिल्लोकमचरं लासप्तमीव्र
तं॥ वेश्याचेंदुमती नाम रूपौदार्यगुणान्विता॥ आसीत्कुरुकुलश्रेष्ठ सगरस्य विलासि
नी॥ सा वसिष्ठाश्रमं पुण्यं जगाम गजगामिनी॥ वसिष्ठमृषिमासीनं प्रणम्यानतकंधरा॥ कृ राम
तांजलिपुटा भूत्वा प्राहेदं जगतो हितं॥ मया न दत्तं न कृतं नोपवासकृतं व्रतं॥ न स्नातं संरजि १२०
तः शंभुः स्वामिन्शार्ङ्गधरो न च॥ सांप्रतं तप्यमानाया व्रतं किंचिद्वदस्व मे॥ येन दुःखा

तुपंकोद्यादुत्तरामि भवार्णवं॥ एतत्तस्यास्तु वक्त्रात् श्रुत्वातिकरुणं वचः॥ कारुण्यात्कथ
यामास वसिष्ठो मुनिपुंगवः॥ माघस्यासितसप्तम्यां सर्वकामफलप्रदं॥ रूपसौभाग्यज
ननं स्नानं कुरु वरानने॥ कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलं॥ रात्र्यंते चालयेद्या
स्त्वं दत्वा शिरसि दीपकं॥ माघस्यासितसप्तम्यां अचलं चलनं चाजितं च यत्॥ जलं मलानां स
र्वेषां स्नाने प्रक्षालनं ततः॥ वसिष्ठवचनं श्रुत्वा तस्मिन्नहनि भारत॥ चकारेंदुमती स्नानं
प्रदानं सम्यक् यथाविधिः॥ स्नानस्यास्य प्रभावेन भुक्त्वा भोगान्यथेप्सितान्॥ इंद्र
लोकेप्सरोमध्ये नायकत्वमवाप सा॥ अचलासप्तमीस्नानं कथितं ते विशांपते॥ सर्वपा
पप्रशमनं सुखसौभाग्यवर्द्धनं॥ ॥युधिष्ठिर उवाच॥ ॥सप्तमीस्नानमाहात्म्यं श्रुतानि
विशेषतः॥ सांप्रतं श्रोतुमिच्छामि विधिं मंत्रसमन्वितं॥ ॥कृष्ण उवाच॥ ॥एकभक्तेन संति
ष्ठेत्षष्ठ्यां संपूज्य भास्करं॥ सप्तम्यां तु व्रती प्रातः सुगंभीरं जलाशयं॥ सरित्सरस्तडागं

व्रता० वादित्रवादनमथापि वा॥ सुखावगाहमत्यंतं दुष्टसत्वैरदूषितं॥ वापीवप्रपहितीर्थे वा जले गो
१२१ मयसंकल्पैः॥ तत्केनैवं चाप्यते यावद्वावत्स्नानमाचरेत्॥ सौवर्णे राजते पात्रे ताम्रे वालाबुम
येपि वा॥ तैजस्यवर्तिर्दीप्ताग्निर्यामहारजनरंजिता॥ महारजनं कुसुंभं॥ समाहितमना स्नात्वा दद्या
च्छिरसि दीपकं॥ भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत्॥ नमस्ते रुद्ररूपाय रसानां पतये न
मः॥ वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते॥ जले परिहरेद्दीपं स्नात्वा संतर्प्य देवताः॥ चंदनेन वि
लिखेत्पद्ममष्टपत्रं सकर्णिकं॥ मध्ये शिवं सपत्नीकं प्रणवेन च संयुतं॥ शक्रे दले रविः पूज्यो भा
नुश्चैवाग्निले तथा॥ याम्ये पूज्यो विवस्वांश्च नैरृते भास्करं ततः॥ पश्चिमे सविता पूज्यः पूज्या
र्कोनिलेदले॥ सौम्ये सहस्रकिरणो रौद्रे सर्वात्मने नमः॥ पूज्या प्रणवशर्वस्तु नमस्कारांत राम
योजिताः॥ पुष्पैः सुगंधधूपैश्च पृथक्त्वेन युधिष्ठिर॥ विसृज्य वस्त्र सर्वाति स्वस्थानं गम्य १२१
तामिति॥ विसर्जितसहस्रांशो स्वमागम्य स्वमालयं॥ ताम्रपात्रे यथाशक्त्या मृन्मये वाथ शक्ति

मन्ना॥ स्थापयेत्तिलपिष्टं च सघृतं सगुडं तथा॥ कांचनं तालकं कृत्वा अशक्तस्तिलपिष्टजं॥
संछाद्य रक्तवस्त्रेण पुष्पैर्धूपैर्यथार्चयेत्॥ ततस्तच्चालयेद्विप्रे दद्यान्मंत्रेण तालकं॥ आ
दित्यस्य प्रसादेन प्रातःस्नानफलेन च॥ दुष्टदौर्भाग्यदुःखघ्नं मया दत्तं तु तालकं॥ तालकं
तालपत्रं॥ स्नापयित्वोपदेष्टारं विधानं सांश्च पूजयेत्॥ ततो दिनं समाप्य च भास्करध्यानत
त्परः॥ ताएवच कथाः शृण्वन्नन्या वा धर्मसंहिताः॥ पाखंडादि निराला पदर्शनस्पर्शना
दिकं॥ वर्जयेत्क्षपयेद्रात्रिं ततो बंधुजनैः सह॥ एतद्वै कथितं पार्थ लिप सौभाग्यकारकं॥
अचला सप्तमी स्नानं सर्वकामफलप्रदं॥ इति पठति य इत्थं यः शृणोति प्रसंगात् कलि
कलुषविनाशं सप्तमीस्नानमेतत्॥ मतिमपि च जनानां यो ददाति प्रयत्नात्सुरसदनग
तोसौ सेव्यते चाप्सरोभिः॥ ॥इत्यचलासप्तमीव्रतं॥ ॥अथ स्नामेव पुत्रसप्तमीव्रतं॥ ॥
॥मदनरत्ने आदित्यपुराणे॥ ॥आदित्य उवाच॥ ॥माघमासे तु शुक्लायां सप्तम्यां सप्तमु

व्रता० १२२ पोषितः॥ यः पूजयेत्तमां नित्यं तस्मात्पुत्रतां व्रजेत्॥ एवं चोन्नयसप्तम्यां मासि मासि सुरोत्त
म॥ यस्तु मां पूजयेद्भक्त्या सुमेकमेकमादरात्॥ सुमेकः संवत्सरः॥ अथ वक्ष्यामि सुतं तस्यात्या
त्मनो व्यंगसंभवं॥ चित्रं यद्यस्तथा पुत्रमारोग्यं परमं सदा॥ माघमासे तु यो ब्रह्मन् शुक्लप
क्षे जितेंद्रियः॥ पारंवद्रानपतितानंतस्मात् मं भजस्व विजितेंद्रियः॥ उपोष्य विधिवत् षष्ठ्यां श्वेत
माल्यविलेपनैः॥ पूजयित्वातु मां भक्त्या निशि नक्तं मोक्ष्यवेद्बुधः॥ पुनरस्यां यसप्तम्यां कृत्वा स्ना
नादिकाः क्रियाः॥ पूजयित्वा तु मां ब्रह्मन् वीरहोमं समाचरेत्॥ प्रीणयित्वा हरिं भक्त्या हविषा प
प्सलोभनं॥ वीरहोमं अग्निहोमं॥ हरिरत्रादित्यः॥ दध्योदनेन पयसा पायसेन द्विजान् त
था॥ तस्यैव कृष्णस्य पक्षस्य षष्ठ्यां सम्यगुपोषितः॥ तस्यैवेति मासस्यार्कोत्पलैः सुगं
धाढ्यैः रक्तपुष्पैश्च पूजयेत्॥ एवं यः पूजयेद्भक्त्या नरो मां विधिवत्सदा॥ अनयोरपि देवेंद्र सप्तु राम
त्रं जनतेवरं॥ ॥इति पुत्रसप्तमीव्रतं॥ ॥इति श्रीमहनीलकंठात्मजजनार्दनशंकरकृतौ व्रतार्के १२२

सप्तमीव्रतानि॥ ॥अथाष्टमीव्रतानि॥ ॥तत्र बुधयुक्तायां शुक्लाष्टम्यां बुधाष्टमीव्रतं॥ ॥अथ व्र
तविधिः॥ ॥ मासपक्षाद्युल्लिख्य मम इह जन्मनि जन्मांतरे वा मारिज्ञार स्वकर्मणा मनसा वाचा
ज्ञानताज्ञानतावा स्वर्णह्यपकृतदोषनिरासार्थं पुत्रपौत्रादिसकलमनोरथप्रीत्यर्थं च श्री
परमेश्वरप्रीत्यर्थं बुधाष्टमीव्रतमहं करिष्ये इति संकल्प्य बुधं षोडशोपचारैः कलशोप
रि पूजयेत्॥ चतुर्बाहुं गदापतिं सुप्रसन्नमुखांबुजं॥ ध्याये हं शंखचक्रासिपाशांहस्तं मिला
प्रियं॥ बुधस्वरूपं॥ पीतमाल्यांबरधरः कर्णिकारसमद्युतिः॥ खड्गचर्मगदापाणिः सिंह
स्थो वरदो बुधः॥ ध्यानं॥ ॥तारासुत नमस्तेस्तु नक्षत्रधीश्वरप्रिय॥ गृहाण पूजां भगवन्समाग
सग्रहेश्वर॥ आवाहनं॥ अधिदेवताप्रत्यधिदेवताश्च सह त्वत्र शेषदेव विष्णुमामावात्वा॥ इला
पते नमस्तेस्तु निःशेषप्रियसुनवे॥ हेमसिंहासनं देव गृहाण प्रीतये मम॥ आसनं॥ शीत
तोयोदकमानीतं सुपुण्यसरिदुद्भवं॥ पाद्यं गृहाण भगवन्मम माद्य परिशुद्धये॥ पाद्यं॥ तारासुतन

व्रता० मस्तेस्तु सततं जगवल्लिपः ।। गृहाणार्घ्यं ग्रहपते नानाफलसमन्वितं ।। अर्घ्यं ।। सुगंधद्रव्यसं
१२३ युक्तैः सुगंधैः स्वादुसरिज्जैः ।। आचम्यतां निशानाथचंदनं प्रितये मम ।। आचमनं ।। पयोद
धिघृतैः क्षौद्रैर्वमधुशर्करैः संयुतैः ।। पंचामृतैस्तथा देवस्नानं तत्स्वीकुरु प्रभो ।। पंचामृतस्नानं
।। वासितं गंधकर्पूरैर्निर्मलं जलमुत्तमं ।। स्नानाय ते मयानक्षादीयते व्रतसिद्धये ।। अतो
देवादिकैः षड्भिः स्नापयित्वा ततो बुधः ।। पौरुषेयेण सूक्तेनो बुधास्त्वे तत्र चैकया ।। स्नानं ।।
।। तदस्त्विति प्रतिष्ठाप्य ।। पीतवस्त्रद्वयं देव राजवंशाकरप्रभो ।। उर्वशीनाथजनक गृहाण
प्रीतये सदा ।। वस्त्रं ।। यज्ञोपवीतकं सूत्रं त्रिगुणं त्रिदशप्रिय ।। नक्षत्रपापते तुभ्यं गृहाण
प्रितये बुध ।। यज्ञोपवी० हरिचंदनकस्तूरीकर्पूरादिसमन्वितं ।। गंधं भगवते तुभ्यमिला ना राम
थ नमोस्तु ते ।। गंधं ।। अक्षताश्च ।। अथांगपूजा ।। बुधाय नमः पादौ ।। सोमपुत्राय० जानु १२३
नी० तारकाय० कटिं ।। राजपुत्राय० उदरं ।। इलाप्रियाय० हृदयं० कुमाराय० वक्षसि० भुज

क० पित्रे० बाहू० सोमसुताय० अंसौ ।। पीतवर्णाय० मुखं ।। ज्ञानाय नेत्रे ।। बुधाय० मूर्धानं ।। या
ः फलिनीति पुष्पं ।। वनस्पतिरसो धूप इति धूपं ।। साज्यं त्रिवर्ति इति दीपं ।। अन्नं चतुर्विधमिति नै
वेद्यं ।। पूगीफलं महद्दिव्यमिति तांबूलं ।। इदं फलमिति फलं ।। हिरण्यगर्भेति दक्षिणा ।। उद्बुध्यमिति
मंत्रेण पुष्पं ।। ततोर्घ्यं ।। उर्वश्याश्च गतिवस्तुषः पुरुवसः पिपीता ।। यो ग्रहाणामधिपतिर्बुधो नः
संप्रसीदतु ।। यानि कानि चेति प्रदक्षिणा ।। नमस्कार प्रार्थना ।। ततो वायनदानं ।। मंत्रः धौतोवापमारस्या
दिलानाथो ग्रहेश्वरः ।। वरांश्च विसुदत्तान् सकलान्वः प्रयच्छतु ।। प्रतिग्रहः ।। अथ कथा ।। कृष्ण उवाच
।। ।। बुधाष्टमीव्रतं रूपवद्यामिस्य पांडव ।। येन चीर्णेन नरकं नरः पश्यति न क्वचित् ।। पुराकृत
युगस्यादौ इलो राजा बभूव ह ।। बहुरत्नसुहृन्मित्रैः मंत्रिभिः परिवारितः ।। जगाम हिमवत्पार्
श्वं महादेवेन पालितं ।। योस्याभविशते ह्यमो सास्त्री भवति निश्चितं ।। स राजा मृगयासक्तः प्रविष्ट
स्तद्रुमावनं ।। एकाकी हयमारूढः कृपणसूत्री त्वं जगाम ह ।। स तत्रापि वने रम्ये पीनोन्नतपयोधरा ।।

व्रता० घाहंतस्य कुतः प्राप्तानया बुध्यत किंचन ॥ तां ददर्श बुधस्तन्वीं रूपौदार्यगुणान्वितां ॥ अष्टम्यां बु
१२४ धवारे एतस्याः सुष्टो बुधग्रहः ॥ स्वदेहं महाश्रमे रम्यं आत्मीयं रूपतोषितः ॥ पुत्रमुत्पादयामास
यो सौ ख्यातपुरूरवाः ॥ चंद्रवंशकरो राजा आद्यः सर्वमहीभृतां ॥ ततः प्रभृति विज्ञेयं साष्टमी बु
धसंयुता ॥ सर्वपापप्रशमनी सर्वोपद्रवनाशिनी ॥ अथात्र मम पितेव च्मि धर्मराजकथान
कं ॥ आसीद्राजा विदेहायां निमिर्नाम सवैरिभिः ॥ संग्रामे निहतो राजा तस्य जाया तितिदुःना ॥ ऊ
र्मिलानाम बभ्राम महीबालकसंयुता ॥ अवंतीविषयं प्राप्य ब्राह्मणस्य निकेतने ॥ चकारो
दरपूर्त्यर्थं निसंकुं जनवेषणं ॥ कृत्वा सा सबगो श्रमात ददौ बालकयोस्तयोः ॥ कारुण्यात्तु
त्रवास्त्वन्यो रूधा संपीद्यमानयोः ॥ कालेन बहुना साध्या पंचत्वमगमत्तदा ॥ पुत्रस्तस्याविदेहा राम
यां गत्वा स्वपितुराश्रमे ॥ उपविष्टस्तस्य योगात् बुधे गामिती कुर्चा ॥ अविष्य धर्मराजेन साक १२४
स्मानिमिवं राजं ॥ रूपामला नाम्न्या वंगो सर्वलक्षणसंयुता ॥ तासुवाच वरारोहा धर्मराजः स्व

कां प्रियां ॥ बत्सत्वं सर्वमापारं रूपामले त्वं गृहे मम कुरुष्व सर्वभर्ता नो दानादि हृं यथान्वते ॥ किं
त्वेते भवरा साकलं केरं तियंत्रितां ॥ कदाचिदपि नो ग्राह्या त्वया वै देहिनं दिनि ॥ एवमस्त्विति
वै भोक्ता निज कर्मं च कार ह ॥ ततोनुस्का बुधस्याग्रे बांधवैः प्रीतिपूर्वकं ॥ तावदेवं हि भोक्तये
याक्सा कथ्यते कथा ॥ कदाचित् घाकुंजिन्त्वा धर्मराजविदेहजा ॥ उत्साटयित्वा प्रवरं दद
र्श जिनती स्वकां ॥ पश्यमानां च रुदती भीषणौ यम किंकरैः ॥ जीलया क्षिप्यते बध्वा तप्ततैलेषु
साधुतः ॥ तथैव तत्लकं बध्वा पिंडिता सा मनस्विनी ॥ द्वितीये प्रवरे तद्वत्तामेव च ददर्श ह ॥
तत्र संपीड्यमाना सा शिलायां लोष्टकेन च ॥ तृतीये वरे तद्वत्तां ददर्श स्वमातरं ॥ कस्के पीः
ड्यमानां तु पंकयुक्तैर्ह कस्मतौ ॥ स्वपिश्च तुर्थे प्रवरे भीषणैर्दारुणाननैः ॥ आजनसांस्क
णाद्धोश्वकं नदंती तां पुनः पुनः ॥ पंचमे प्रवरे स्त्रीमेकं वै पादेन ताडितां ॥ संदंशो घनपातैश्च
छिद्यमानां सहस्रशः ॥ षष्टे तामि रूपं तस्यामस्तके मुद्गराहतां ॥ संपीड्यमानो मनिशं मुर

व्रता० १२५

द्वंदाहरवं ड्वत ।। सप्तमे प्रवरे चैव कृमिरूपैः सुदारुणैः ।। दृष्ट्वा तथागतां तां तु मातरं दुःखक
र्शितां ।। श्यामलाम्लानवदना किं चिन्तो वाच नामिनी ।। अथ गतो यमः प्राह सखे वा श्याम
लामिति ।। किमर्थं म्लानवदना तिष्ठसि त्वमनिंदिते ।। कारणं तत्र मे ब्रूहि किं चिन्तो द्वारितास्म
पा ।। एते प्रवरकाः सम्यक् द्विः षिद्धाये पुरा मया ।। इत्युक्ता श्यामला प्राह जनत्वरिं वितयान्विता ।। कि
न्तु पापं कृतं राजन्मम मात्रा सुदारुणं ।। येनेत्थं विविधैर्घोरैर्बाध्यते बकुलास्त्वया ।। इत्युक्तः
प्रियया प्राह स्तोयमः प्रहसन्निव ।। तव माता पुत्र स्नेहात्तो धर्मा वै कृता किल ।। किं न जानासि त्वं भ
द्रे येन त्वं पृच्छसि मामिह ।। ब्राह्मणस्य गृहे याजकादर सामसभ्रमं कुलं ।। गोधूमा स्तयि मे ज्ञात्वा कृष्णिं
पा सुदारुणाः ।। ये पुरा ब्राह्मण गृहे हृतास्ते त्वत्कृते तया ।। तानाप्येतदहं सर्वे ते ये मात्रा कृतं पु राम
रा ।। ।। श्यामलोवाच ।। ।। तथापि त्वां ममासाद्य देवं जामातरं विभुं ।। मुच्यते तेन पापेन यथा त्व १२५
मधुना कुरु ।। तच्छ्रुत्वा चिंतयाविष्टः चिरध्यात्वा जगाद तां ।। धर्मराजस्तु खासीतं प्रियां प्राणस

हेश्वरी ।। इतस्त्वं सप्तमे तीते जन्मनी ब्राह्मणी शुभा ।। आसीत्त्वमसि त्स्स ससांगना सखीभां च पर्युयोषिः ।। बु
धाष्टमी सुसंपूर्णा यथोक्तफलदायिनी ।। तस्याः पुण्यं दृस्त्व त्वं यदि सस्त्रेम ममाग्रतः ।। तेन मुच्ये
त नरकान्ते माता पाप संचयकृत ।। तच्छ्रुत्वा त्वरितं स्नात्वा ददौ पुण्यं त्रिवाचकं ।। स्वमातुः श्याम
लातुष्टा तेन मोक्षं जगाम सा ।। तामि जारुपसंपन्ना दिव्यदेवा वरांशुका ।। विमानवरमारूढा दि
व्यमाल्यांबरान्विता ।। भर्तुः समीपे स्वर्गस्था हृष्यते द्यापि सा जने ।। बुधस्य पार्श्वे न त्रासिति मिरा
जं समीपगा ।। विस्फुरंति महाराज बुधाष्टम्याः प्रभावतः ।। ।। युधिष्ठिर उवाच ।। ।। यद्येवं प्रवराकृ
ष्ठा तिथि वै तु बुधाष्टमी ।। तस्यामेव विधिं ब्रूहि यदि तुष्टोसि माधव ।। ।। कृष्ण उवाच ।। ।। शृणु
पांडवपत्नेन बुधाष्टम्या विधिं शुभं ।। यदा यदा सिता ष्टम्यां बुधवारो भवेद्यदि ।। तदा तदा हि सा
ग्राह्या एकभक्ता व्रतेन तु ।। स्नात्वा संध्यां तु पर्वणि गत्वी त्वा करकं नवं ।। जलपूर्णं नस ज्वलं कृ
त्वा वस्त्रेसमन्वितं ।। पूजयित्वा गृहं तित्वा बुधमेवं क्रमेण तु ।। माषकेन सुवर्णेन तदर्द्धेन वा

व्र०क
१२६

पुनः॥कारयेद्बुधरूपंतुस्वशक्त्यावाप्रयत्नतः॥अंगुष्ठमात्रंपुरुषंचतुर्बाहुंसुलक्षणं॥प
द्ममध्येव्रणंकुंभंपूरयेत्सिततंडुलैः॥ हेमापात्रेणसंछाद्यपीतवस्त्रयुगेनच॥ वस्त्रो
परिस्थितंदेवंपीतवस्त्राकृतादिभिः॥पंचामृतेनसंस्थाप्यतत्तन्मंत्रैःक्रमेणतु॥नैवेद्यंगु
डयुतंधूपंदद्याद्गेनसुगंधकं॥पापसैर्घृतपूरैश्चमोदकाशोकवर्त्तिकैः॥फलैश्चविविधैश्चै
वद्राक्षाराजिगुडैःशुभैः॥ततःपुष्पाकृतैःपीतैःवस्त्रमाणैश्चनामभिः॥ नमोबुधायपादौतुसौम्
पुत्रायजानुनी॥तारकायकटिंचैवराजपुत्रायचोदरं॥इलाप्रियायहृदयंकुमारायेतिवक्षसि
॥बाहूपुरूरवःपित्रेअंसौसोमसुतायच॥मुखंतुपीतवर्णायज्ञानायनयनद्वयं॥मूर्द्धानंच
बुधायेतिएषुस्थानेषुपूजयेत्॥सौवर्णंराजतंताम्रंपात्रमादायशोभनं॥गंधपुष्पाकृतैःपीते राम
गुडमिश्रांबुपूरितैः॥सौवर्णराजतंताम्रंपात्रमजानुभ्यामवनींगत्वातेनचार्घ्यंनिवेदयेत्॥ज १२६
वद्रूपाश्चगुरुर्यस्तुयःपुरूरवसःपिता॥योग्रहाणामधिपतिर्बुधोनःसंप्रसीदतु॥वराश्चविमुना

दत्तास्तकस्तंनःप्रसीदतु॥मंत्रेणानेनदत्वार्घ्यंजपेन्नाममिमंपुनः॥ प्रथमेमोदकान्दद्याद्द्वितीयेफ
णिकास्तथा॥तृतीयेघृतपूरांश्चचतुर्थेवटपत्रिकान्॥पंचमेशुक्तकारांश्चषष्ठेसोहालिकास्त
था॥अशोकवर्त्तिकाश्चैवसप्तमेकार्यमेवच॥अष्टमेद्राक्षराजिश्चेःखंडवैश्चयुधिष्ठिर॥वि
प्रायवायनंदद्यात्व्रतीभोजनमाचरेत्॥एवंक्रमेणकर्त्तव्यंबुधाष्टम्यांयुधिष्ठिर।बांधवैःस
हमीश्चैश्चभोक्तव्यंप्रीतिपूर्वकं॥सौम्यमाराध्यायतंश्रएवनतनरकेस्मोविमुंचति॥सोमात्मजात्मक
मशेषसुखप्रदंतंसंपूजयेत्मकजनीलयुतंचकुंभं॥पक्वान्नपात्रसहितंसहिरण्यवस्त्रंपद्मस्यसोप
मपुरीनकदाचिदेव॥ ॥इतिश्रीभविष्योत्तरपुराणेकृष्णयुधिष्ठिरसंवादेबुधाष्टमीव्रतं॥॥अ
थोद्यापनं॥ युधिष्ठिरउवाच॥ ॥उद्यापनविधिंब्रूहिकृपयानकवत्सल॥कास्मिन्कालेचकिंद्र
व्यंकथंसफलभाग्भवेत्॥ ॥कृष्णउवाच॥ ॥आरोमध्येतथाचांतेकुर्यादुद्यापनक्रिया॥सप्तम्यां
प्रयतोमर्त्यःकुर्याद्वैदंतधावनं॥आचम्यकुर्यात्संकल्पंदद्याद्विप्रान्निमंत्रयेत्॥अष्टम्यांप्रातरु

Dr BHAU DAJI

व्रता०
१२७

त्यां शुचीर्भूत्वा व्रती ततः॥ गंगाद्यादिमहातीर्थेषु स्नात्वा नित्यकृतक्रियः॥ गृहमध्ये शुचौ देशे
रंगवल्लीविराजिते॥ पुण्याहवाचनं कृत्वा कुर्याद्व्रतविधानकं॥ प्राणानायम्य विधिवत्कृ
त्वा संकल्पनादिकं॥ तिथ्यादिषु च सर्वत्र व्रतनाम प्रकीर्तयेत्॥ मयाकृतं बुधाष्टम्यां व्रतं सां
गफलाप्तये॥ उद्यापनं करिष्येऽहमित्युक्त्वा तत्कृतोदकं॥ सत्काचार्यादिवरणं कुर्याद्वस्त्रादिभि
:फलैः॥ ब्राह्मणं वृणुयात्तत्र वस्त्रतांबूलभूषणैः॥ ततः पूजादिकं कुर्याद्गृहयज्ञपुरःसरं॥ त
तस्त्वष्टदलं कुर्यान्मध्ये कर्णिकया सह॥ पंचवर्णैः समापूर्य दलाग्राणि च केसरान्॥ कर्णि
कायां न्यसेद्धान्यं तस्यं च प्रस्थप्रमाणतः॥ दलेषु वदताग्रेषु यथाशास्त्रं विनिक्षिपेत्॥ तत्रैव स्था
पयेत्कुंभान्मध्ये पूर्वादिदिक्षु च॥ गंगाजलेन संपूर्णान्वस्त्रादिभिरलंकृतान्॥ पंचत्वक्प राम
ल्लवोपेतान्नवकुंभान्यथाविधि॥ तदग्रे गृहासर्वान्मंडलेस्थापयेन्नरः॥ तस्य वै स्थापये १२७
त्कुंभं वारुणं च विशेषतः॥ वस्त्रत्वक्पल्लवफलैः पंचरत्नैः सकांचनैः॥ तत्तन्मंत्रैः प्रतिष्ठाप्य

पूजयेच्च यथाविधि॥ सप्तजन्मार्जितं चौर्यं पातकादि च यत्कृतं॥ तद्दोषपरिहारार्थं बुधाष्टमीव्रतं कृ
तं॥ तस्य सांगफलप्राप्त्यै पूजाहोमकरोम्यहं॥ बुधप्रीत्यर्थं तत्सर्वमिति संकल्प्य पूजयेत्॥ क
र्षमात्रेण राजेंद्र तदर्धार्धेन वा पुनः॥ बुधस्य प्रतिमां कुर्यात्सुवर्णेन विचक्षणः॥ कर्णिकायां म
ध्यकुंभे ताम्रपात्रे बुधं न्यसेत्॥ पंचामृतेन स्नपनं वस्त्रयुग्मेन वेष्टयेत्॥ ध्यायेन्नारायणं देवं
बुधवारस्याकृति॥ चतुर्भुजं शंखचक्रगदाशार्ङ्गधरं यजेत्॥ आत्रेयं पीतवस्त्रं च पीतपुष्पा
क्षतादिभिः॥ उपचारैः षोडशभिः पुरुषसूक्तविधानतः॥ तद्दक्षिणे च विष्णुमिदं विष्णुरित्य
धिदैवतं॥ सहस्रशीर्षा पुरुषं वामे प्रत्यधिदैवतं॥ दलेषु विन्यसेद्देवान्प्रागादिप्रदक्षिणं॥
रविसोमकुजगुरुशुक्रार्कराहुकेतवः॥ अनंतं वामनं विष्णुं शौरिं सत्यजनार्दनौ॥ हंसं नारा
यणं चाष्टौ दलाग्रेषु च पूजयेत्॥ धूपैर्दीपैश्च नैवेद्यैः फलैश्च विविधैर्यजेत्॥ बहिरिंद्रादयः प्र
साद्यादिमालकास्तथा॥ यमं च चित्रगुप्तं च श्यामलां दक्षिणे यजेत्॥ कुपेषु वंशपात्रेषु अष्टवर्षे

व्रता० चलडुकान्॥ यज्ञोपवीतान्सफलान्दक्षिणान्सकलायजेत्॥ पूजयित्वा ततो होमं शाखोक्तवि
१२८ धिना सुधीः॥ मंडलास्याग्निमे भागे स्थंडिलं चतुरस्रकं॥ कृत्वा तुं वस्नेखनादीनि कृत्वाग्निं स्था
पयेत्सुधीः॥ इध्मादर्भैः परिस्तीर्य पात्रासादनमाचरेत्॥ पूर्णपात्रनिधानांते ब्रह्मासनमतःप
रं॥ इध्माधानमुखः प्रांते प्रधानाहुतिवाहनं॥ अपामार्गसमिद्भिश्च यवव्रीहितिलैर्घृतैः॥
गोधूमैः सतिलैर्होमैः प्रत्येकं प्रत्येकं गतंद्रितः॥ उद्बुध्यस्वेति मंत्रेण होममष्टोत्तरं शतं॥ मंत्रे
ण विष्णुं जुहुयात्तथा नारायणं हुनेत्॥ अधिप्रत्यधिदेवौ च मंत्राभ्यां जुहुयात्तयोः॥ ग्रहादिमंत्र
जुहुयात्सायमग्निव्रतादिकं तथा॥ पूर्णाहुतिं च जुहुयात्कुर्याद्ब्रह्मविसर्जनं॥ पूर्णपात्रोद्भासनं च बलि
दानमतः परं॥ वस्रादिसृजनं कृत्वा देवतोद्वासनात्ततः॥ अभिषिच्याथ यतिलकं रक्षाबंधनमेव राम
च॥ आचार्यं च सपत्नीकं पूजयित्वा यथाविधि॥ प्रतिमां वस्त्रकलशान्गोदानं दक्षिणां तथा॥ द १२९
त्वा ब्रह्मादिविप्रेभ्यः कलशांश्च सदक्षिणान्॥ ब्राह्मणान्भोजयेत्पश्चादाशिषो वाचयेत्तथा॥

॥ ॥इति श्रीभविष्योत्तरपुराणे बुधाष्टमीव्रतोद्यापनं॥ ॥ अथ मुक्तादिश्रा। वणकृष्णाष्टम्यां दश
फलव्रतं॥ ॥तत्र पूजाविधिः॥ ॥तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधं॥ श्री
वत्सलक्ष्मं गलशोभिकौस्तुभं पीतांबरं सांद्रपयोधिसौभगं॥ महार्हवैडूर्यकिरीटकुंडलत्वि
षा परिष्वक्तसहस्रकुंडलं॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसुदेव ऐक्षत॥ श्री
गोपालकृष्णाय नमः॥ ध्यायामि॥ वासुदेवाय आवाहयामि॥ शेषशायिने। आसनं०॥ तीर्थपाद
य० पाद्यं॥ गंगाजनकाय० अर्घ्यं॥ यमुनावेगहारिणे० आचमनं॥ विप्रमुक्ताय पंचामृतं॥ कृष्ण
स्रुय० शुद्धोदकस्नानं॥ पीतवाससे० वस्त्रं॥ यज्ञप्रियाय० यज्ञोपवीतं॥ सर्वेश्वराय० गंधं॥ अधोक्षजा
य० अक्षतान्॥ कमलप्रियाय० पुष्पाणि॥ तुलसीदलसमर्पणे कृष्णाय० विष्णवे० हरये० शेषशा
यिने० गोविंदाय० गरुडध्वजाय० दामोदराय० हृषीकेशाय० पद्मनाभाय० उपेंद्राय०॥ संसारा
र्णवमग्नानां नराणां पापकर्मणां॥ इहलोके फलावाप्तिं कुरु त्वं पुरुषोत्तम॥ दोरबंधनं॥ पा

व्रता० रिजातायनमः॥ हरकायनमः॥ वनस्पतिधूपं॥ ज्ञानप्रदायदीपं॥ चक्रिणेनमः नैवेद्यं॥ पद्म
१२९ नाभाय० नीराजनं॥ देवदेवनमस्तेस्तु भक्तप्रिय कृपानिधे॥ गृहाणार्घ्यमियादत्तं देवमास
हितोहरे॥ अर्घ्यं॥ त्रिलोकनाथोदेवेशो सर्वज्ञ तत्दयानिधिः॥ दानेनानेनसुप्रीतो भवत्विह
सदामम॥ वायनं॥ श्रीकृष्णप्रतिगृह्णातिश्रीकृष्णोवैददातिच॥ श्रीकृष्णस्तारको नाभ्यां श्रीकृ
ष्णायनमोनमः॥ ॥इतिपूजा॥ ॥अथकथा॥ ॥सूतउवाच॥ ॥शृणुध्वमृषयः सर्वेनैमिषा
रण्यवासिनः॥ पुराकृतयुगस्यादौ कृष्णदेवेनभाषितं॥ तद्व्रतंवः प्रवक्ष्यामिसांगोपांगंमु
नीश्वराः॥ पुरावैद्वापरस्यांते पांडवाः कौरवास्तथा॥ द्यूतंप्रचक्रिरे सर्वेधनमानेनमो
हिताः॥ निर्जिताः पांडवाः दुःखाद्वनं प्राप्तुर्मुनीश्वराः॥ कुंतीविदुरगेहेतु संस्थितातुमहायशाः राम
॥ तच्छ्रुत्वाकृष्णदेवोपिकृपयापरयायुतः॥ आपयौगरुडारूढो विदुरस्यगृहंप्रति॥ ततापश्य १२९
न्महातेजाकुंतींपरमहर्षितां॥ विदुरेणार्चितः कृष्णः कुंतीचैवाहनक्षितः॥ नत्वाहकुंतींदेवी

अत्रस्थंविडंबयन्॥ त्वत्सुताश्चमहादुःखात्प्रापतुर्गहनंवनं॥ त्वयापिसुमहादुःखंसर्वदात
न्ममाप्रियं॥ कुंत्युवाच॥ हृषीकेशमहाबाहोमहादुःखेनकर्षिता॥ कृपयापरयादेवरक्षि
तावयमिहत्वया॥ ममचैवमहदुःखंत्वयिमारिस्थिते॥ मत्सुतास्तेमहादुःखात्प्रविष्टागहनंवनं
॥ कृपयाविदुरेणत्वं कौरव्यं भक्ष्यसंयुतं॥ ददातिप्रीतितः कृष्णजीवन्मयमहामतिः॥ गृह
स्यपश्चिमेभागेवसामेवंजनार्दन॥ दर्शिताकौरवाणांहिसर्वेषांकुमतिस्तदा॥ इतितस्याव
चः श्रुत्वाधर्मः परमधर्मवित्॥ आहचैनांवासुदेवो भक्तप्रियतमस्तदा॥ व्रतंतेकथयि
ष्यामियेनदुःखात्प्रमुच्यते॥ पुत्रपौत्रैः परिवृतास्वराज्यंप्राप्स्यतेभवान्॥ ददाफलमिति
ख्यातं तद्व्रतंकुरुसुव्रते॥ कुंत्युवाच॥ कस्मिन्कालेनुकर्तव्यं तद्व्रतंकेशवप्रभो॥ वदमांप्रति
हस्तेत्तो जगदाधारवेश्वर॥ श्रावणस्यासितेपक्षे कृष्णाष्टम्यांनिशीथके॥ देवसांवासुदेवश्च
प्राडुर्भवतिकेशवः॥ तदारभ्यदशाशुक्लेतत्रत्रयावधं प्रसज्येत॥ हत्वेवध्वातुतद्व्रतंदशाहंव्रत

व्र.ता०
१३०

माचरेत्॥ संसारार्णवमग्नानां नराणां पापकर्मणां॥ इहामुत्रफलावाप्तिकुरुषपुरुषोत्त
म॥ अनेन दोरकं बध्वा द्वादशवर्षं व्रतं चरेत्॥ देवस्य पुरतो नित्यं दशपद्मानि कारयेत्॥ ततश्च
शृणुयात्तु एणां कथामेतां मुनावहां॥ तुलस्या कृष्णवर्णया दलैर्दशभिरर्चयेत्॥ कृष्णं विष्णु
तथानंतं गोविंदं गरुडध्वजं॥ दामोदरं हृषीकेशं पद्मनाभं हरिं प्रभुं॥ एतैश्च नामभिर्नित्यं कृष्ण
देवं समर्चयेत्॥ नमस्कारं ततः कुर्यात्सर्वदक्षिणासमन्वितं॥ एवं दशादिनं कुर्यात्व्रतानामु
त्तमं व्रतं॥ आदौ मध्ये तथा चांते होमं कुर्याद्विधानतः॥ कृष्णमंत्रेण जुहुयाद्ध्रुवणाष्टोत्तरंश
तं॥ ततो होमांते विधिना आचार्यं पूजयेत्सुधीः॥ सुवर्णताम्रपात्रे वा मृन्मये वेणुपात्रके॥ तुलसी
दलं सुवर्णेन कारयित्वा सुलक्षणं॥ प्रतिमां च तथा कृत्वा अर्चयित्वा विधानतः॥ निधाय प्रतिमां राम
तत्र आचार्याय निवेदयेत्॥ दातव्या गौः सवत्सा च वस्त्रालंकारभूषितां॥ दशाहो मेतु कृष्णाय प १३०
टिका दशवार्पयेत्॥ दापयेत्तु ब्राह्मणाय तत्स्वयं तु कृतां तथैव च॥ उपायनं गृहीष्व त्वं सर्वोपस्करसं

संयुतं॥ संसारार्णवमग्नानां पाहि देवकीनंदन॥ अनेनोपायनं दत्वा नमस्कृत्वा क्षमापयेत्॥ द
क्षिणान्वितो देवी संतर्प्य कृष्णसन्निधौ॥ व्रतांते दशविप्रेभ्यः प्रत्येकं दशपूरिकाः॥ एवं द्वादश
वर्षेषु व्रतं कुर्यान्नरोत्तम॥ एवं व्रतं त्वया देवि कर्तव्यं कृष्णसन्निधौ॥ एवमुक्त्वा तु कृष्णेन कुंती श्रुत्वा
मुदान्विता॥ उवाच कृष्णदेवं तं ममाविघ्नं न विद्यते॥ प्रभुवाच हृषीकेशास्तव विघ्नं न विष्यति॥ एव
मुक्त्वा ययौ कृष्णः कर्णं इक्षु सुरवान्वितः॥ कर्णोपि च महात्मानं कृष्णं दृष्ट्वा प्रहर्षितः॥ सिंहास
ने दत्तो तस्मै पाद्यमर्घ्यं तथैव च॥ कर्णोप्युवाच देवेशं किमर्थं त्वागमः॥ इत्युक्तः कृष्णदेवोथ तव
माता तिदुःखिता॥ त्वुविजयात्वया कृष्णमातरं या म्यहं कथं॥ कथं वा दुःखिता मे सा प्रभुत्ते तव द
स्व मे॥ ॥श्रीकृष्ण उवाच॥ ॥सुवर्णपात्रे संपूर्य पायसं क्षीरसंयुतं॥ प्रसहं दातनिश्चंतु दा
तव्यं वा पुरहस्तके॥ तव माता तथा प्रीता नविष्यति न संशयः॥ एवमुक्त्वा तथा कृष्णो द्वारकां संजगाम
सः॥ कृष्णवाक्यं ततः श्रुत्वा कर्णश्चक्रे महाप्रश्नं॥ पंचमणु समायुक्तं पात्रं स्वर्णेन कारितं॥ तत्र नि

व्रता० कसमायुक्तंवायुहस्तेप्रदापयेत्॥प्रहृष्टमहंवैतथाकुंतीपात्रंदृष्ट्वाथमहर्षिणा॥देवस्यसंनिधौकुं
१३१ तीव्रंचक्रेयथोक्तितः॥कृष्णेनकारितंसर्वमिमंनाम्नापयवैध्रुवं॥कृष्णपूजांततःकृत्वाकथांश्रुत्वा
यथापूर्ववत्॥उपायनंददौयत्रब्राह्मणेभ्योयथाक्रमं॥तुलसीदलसुवर्णेनकारयित्वासुलक्षणं॥प्र
तिमांविष्णुभक्तायस्वर्णपात्रेनिधायच॥गोदानेनसमायुक्तांआचार्यायमहामते॥कुंतीददौप्रहा
देविविष्णुर्नःप्रीयतामिति॥व्रतंदृष्ट्वासुवर्णेषुचकारोद्यापनंततः॥तद्व्रतस्यप्रभावेनतनूजाश्चाग
ताततः॥हत्वाजौन्मधेसर्वान्कृष्णस्यैवप्रसादतः॥त्वमप्येवंव्रतंभद्रेकुरुष्वसुसमाहिता॥
युधिष्ठिरश्चधर्मात्मास्वराज्यंप्राप्नुयात्सुधीः॥प्रोवाचेदंव्रतंकुंतीद्रौपदींचपतिव्रतां॥दशाफ
लमितिख्यातंकृष्णदेवेनभाषितं॥यूयंसर्वेमदुःखान्तिस्तीर्यस्वपुरीगतं॥व्रतस्यास्यप्रभावे
नकृष्णस्यैवप्रसादतः॥त्वमप्येवंव्रतंभद्रेकुरुष्वसुसमाहिता॥पुत्रपौत्रैःपरिवृतासर्वान्कामा राम १३१
नवाप्स्यसि॥आचरस्वचव्रतंतस्मैकुंतीपरमहर्षिणा॥साचचक्रेमहाभागाद्रौपदीव्रतमुत्तमं॥

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक

॥तस्मात्सर्वप्रयत्नेनकर्तव्यंमनुजैःसदा॥सद्भक्त्याकुरुतेनारीव्रतानामुत्तमंव्रतं॥सर्वान्कामानवा
प्नोतिविष्णुलोकेमहीपते॥इदंव्रतंमहापुण्यंव्रतानामुत्तमंव्रतं॥वदतांशृण्वतांचैववविष्णो
र्लोकेमहीपते॥॥इतिश्रीभविष्योत्तरेदशाफलव्रतं॥॥अथकृष्णादिमासेनभाद्रकृष्णाष्ट
म्यांजन्माष्टमीव्रतं॥॥तच्चार्धरात्रिव्यापिन्यांकार्यं॥रोहिणीसहिताकृष्णामासेभाद्रपदेष्टमी॥
अर्धरात्रेतुयोगोयंतारापत्युदयेतथा॥नियतात्माशुचिःसम्यक्पूजांतत्रप्रवर्तयेदिति॥विष्णु
धर्मोत्तरेतस्यकालत्वोक्तेः दिनद्वयेअर्धरात्रव्याप्तावव्याप्तौवापरैव॥प्रातःसंकल्पकालसत्त्वा
द्विवारात्रियोगोवर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीति॥ब्रह्मवैवर्तेसप्तमीयुक्तानिषेधा
च्च॥यदापूर्वेद्युर्निशीथेकेवलाष्टमीपरेद्युर्निशीथस्पर्शिन्यष्टमीरोहिणीयुक्तातदापूर्वै
वग्राह्या॥कर्मकालेसत्त्वात्॥रोहिणीयोगस्तुकेवलंफलातिशयायेतिनवमीबुधादियोगवत्
॥नतुनिर्णयोपयोगी॥इतरथाप्रेतयोनिगतानांतुप्रेतत्वंनाशितंनरैः॥यैःकृताश्रावणेमासि

व्र०र्क १३२ अष्टमी रोहिणीयुता॥ किंपुनर्बुधवारेण सोमेनापि विशेषतः॥ किंपुनर्नवमीयुक्ता कु
लकोट्यास्तु मुक्तिदेति॥ यत्तु वचः सा सरोहिणीमप्यष्टमीं विहाय बुधनवमीयुता कार्या॥ य
द्येतासोमः सोमवार इति केचित्॥ तारापत्युदये विष्णुधर्मोत्तरे कम्लनकल्पनाज्ञ्यवधान्वं प्रोदय
इति तातचरणाः॥ उदये चाष्टमी किंचिन्नवमी सकला यदि॥ नवेत्तु बुधसंयुक्ता प्राजापत्यर्क्ष
संयुता॥ अपि वर्षशतेनापि लभ्यते यदि वा न वेति तत्रोदयः शशाङ्कोदयपरः सूर्योदयपरत्वे
तु यदा पूर्वेद्युर्निशीथे केवलाष्टमी उत्तरेद्युश्च निशीथास्पर्शिन्यष्टमी रोहिणीयुक्ता सति बुध
युक्ता तदैवोत्तरा स्यात्तदन्या बोधायवचनं वाचनिकमिति न्यायात्॥ यदि तु बुधाभावेपि रोहिणी
योगमात्रादेवोत्तरैवेति तदा रोहिणीयोगाभावेपि बुधमात्रसमन्वयादुत्तरा स्यादित्यनया
पेक्षेतद्वचनं प्रवर्तते रंगीकारात्॥ कृत्स्नयोगवचारयोगस्यापि प्रशस्तहेतुश्च प्रतीतेर्वजर राम १३२
तीयं स्यात्॥ किंच यथा पूर्वेद्युर्निशीथे ष्टमीमात्रसत्वे उत्तरेद्युश्च निशीथास्पर्शे कृत्स्नयो

गे बुधसत्वे चैतद्वचनादुत्तरेद्युर्व्रत एवं पूर्वेद्युर्निशीथे सकृत्स्नाष्टमीसत्वे बुधाधिक्यादुत्त
रेद्युर्व्रतापत्तिरिति यत्त्वदिष्टं तु रहस्यो॥ प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमि॥ मुहूर्तम
पि लभ्येत सोपोष्या सा महाफलेत्यत्रापि मुहूर्तपदं निशीथस्थमुहूर्तपदमिति पितामहच
रणाः॥ यत्विदमन्यं तान्भूयुत्तयाप्वेवास्यैवानर्थकप्रसंगात्॥ यदा हि शुद्धाष्टम्यहोरात्रेव
र्तमाना ग्राह्या रोहिणीसहिता सुतरामिति॥ वचनेन महोरात्रे यस्मिन्युक्तं हि लभ्यते॥ अष्ट
म्यां रोहिणीकृत्स्नतास्तुपुण्यामुषावसेदिति विष्णुरहस्य एव स्पष्टे वाराहोरात्रसंबंधि यत्किं
चिन्मुहूर्तप्रतीतिरिति कालतत्वविवेचने तद्विपरीत कृत्स्नयोगस्यस्तावकत्वेन सार्थक्यात्
॥ किंचैतद्वचनद्वयगतापि शब्दस्य स्वार्थेन समर्पणाभावेन कृत्स्नयोगस्तावकत्वेन प्राशस्त्यबो
धकत्वस्यैवोचितत्वादिति॥ यत्तु नत्तत्रोक्तं कर्मकालव्याप्तिशास्त्रादेव प्रधानभूततापाश्च
दम्या एवाहोरात्रसत्वे न प्राशंस्यात्यंत्वं॥ दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला॥ रात्रि

व्र.ता० पुक्तं प्रकुर्वीत विशेषेणेंदुसंयुतामिति वचनेन रोहिणीयोगाभावविषयं क्रियते ॥ एवं
१२२ तस्यार्थः ॥ दिवावच्छेदेन रात्र्यवच्छेदेन वा कलामात्रापि चेद्रोहिणी अष्टम्या नास्ति तदैव चंद्रोदय
संयुतामर्धरात्रव्यापिनीमिति यावत् ॥ दिनद्वये पितादृश्या अभावे बकु रात्रियुतामुत्तरां प्रकु
र्वीतेति तन्नेति तातचरणाः ॥ निदं कर्मकालशास्त्रबाधकमन्यथाप्रसिद्धत्वान्नयायात् ॥ दिनद्वये वै
षम्येण निशीथे स्पर्शे अहोरात्रावच्छेदेन रोहिणीयोगाभावे च विशेषेणाधिकोनेंदुयुता अधिक
निशीथव्यापिनीमपि विहाय परस्य निशीथयोगिनी रोहिणीयुतैव ग्राह्येति अत्र क्रियं
ति केचित् ॥ वैषम्येण निशीथस्य शास्त्रार्थस्य तत्वाभावान्तर्गतत्वकल्पनमुचितं ॥ नापि
रात्रियुक्तां प्रकुर्वीतेति तृतीयपादवैयर्थ्यं च स्वीकर्तुमुचितं ॥ रोहिणीयोगानुरोधेनाधिकनि राम
शीथव्यापिनीं विहाय स्वल्पनिशीथगाहायामपरेण कर्मशास्त्रस्य परस्य बाधावश्यंभावेन वच
न सरसामञ्जस्यीयमानसर्वदैवाबाधः स्वीकर्तुमुचित इति सर्वथैव नेदं वाक्यं कर्मकालशास्त्र १३३

बाधमन्तरेणान्यथासिद्धं ॥ उदये वाष्टमीत्यत्रोदयपदस्य चंद्रोदयपरत्वे सकलानवमीस
स्यान्वयापत्तेः न हि निशीथोत्तरप्रवृत्तां नवमीं केचिदपि सकलत्वेन व्यवहरेयुः ॥ बुधवारस्य तु
न रोहिणीतुल्यत्वं रोहिणीप्रापकदिवावेत्यादिवाक्य बुधप्रापकानन्यथासिद्धवचनाभावात्
॥ वह्निपुराणविष्णुरहस्यवचनयोर्मुहूर्तपदस्य तद्वर्तिकलापरत्वे च वचनयोरानर्थक्यं मुहूर्तमपि
त्यपि शास्त्रान्वयश्चतुरवकालस्य तत्र संबंधे हि समुचितकाल्योगाभावाद्योतकोपि शास्त्रे
ऽसंगतः ॥ दिनद्वये निशीथव्याप्तावव्याप्तौ वा ॥ एतद्वचनद्वयस्य सावकाशत्वे मुहूर्तपदस्य
स्वोक्तनिशीथपरत्वस्य प्रसंगः एकदिने न रोहिणी परदिने न रोहिणी परदिने च बुध
स्तदा निर्णयाभावे एकापाद्येतस्मात्षष्टिदंडामपि केवलाष्टमीं विहाय परतिकादिमात्रापि रोहि
णीसहिता परैव स्याद् ॥ त्र विशेषपदस्याधिकार्थकस्येंदुशब्दापर्याय इनपदार्थेऽन्वये
न वैषम्यस्य शास्त्रार्थत्वात् ॥ तृतीयपादस्यानुवादकत्वमेवमनुविशेषपदस्य रात्रिपदे

व्रता० नान्वयं कत्वारोहिण्योगन्नावेधिकाराल्त्रिव्याप्तिनीग्राह्येतिसार्थक्यमुक्तंतद्दिनद्वयेनिशी
१२५ थव्याप्तौपूर्वेद्युः अर्धरात्रिव्याप्तिसत्वेनपूर्वेद्युर्व्रतापत्तेर्मध्यवादिसर्वतिबधकारणा
मनिष्टत्वाद्युक्तंतेनानुवादकत्वसमाधानंननिस्तारः यच्चमध्यनिशीथाग्रहणेक
र्मकालशास्त्रबोधोस्येतितन्नबाधोत्पन्नगतिकागतियावताबाधंविनाशास्त्रमनन्यग
तिकंभवतित्तावन्नैवबाधस्यांगीकर्तुमुचितत्वात्।।नहिव्रीहिशास्त्रेणयवशास्त्रस्यसाव
स्पसार्वत्रिकोबाधोभ्युपगतेतेनवातस्येति।।यत्तुबुधपर्स्पदेचंद्रोदयपरत्वेसकले
स्मान्वयइति।।तन्न।।नवम्यंतेतिमुख्यसाकल्यस्यासंभवेनाष्टमीप्रतियोगिताधिकरु
पस्यैवसमाग्रहणेचिसाता।।तथाचउदयेचाष्टमीकिंचिदितिवचनंतातच्चरणव्यारव्या राम
तंदिवावेसादितिहिनद्वयेवैषम्येणनिशीथस्पर्शएवयोमंउदयेचंद्रोदयेनिशीथव्याप्तमुक्त १२५
त्वेतियावत्।।किंचित्।।स्वल्पातदुत्तरंनवमीसकलानिशीयतउत्तस्कालव्याप्ताकिंचित्सर्व

दसकलपदयोरर्थवत्वायदिनद्वयेवैषम्येणनिशीथस्पर्शेलभ्यते।।तथाचस्वल्पनिशीथ
युक्ताप्यष्टमीबुधरोहिणीयुक्ताग्राह्यानत्वधिकनिशीथव्यापनीतद्रहितेति।।उदयपद
स्यसूर्योदयपरत्वेतुउदयव्यापिनीग्राह्येसेवावस्त।।ननुकिंचिन्नवमीसकलेति।।नवन
वमीदिनएवास्यनिशीथस्पर्शःकिंचित्सदसकलपदयोरर्थवत्वेनदिनद्वयेवैषम्येणस्पर्शेल
क्वचनप्रवृत्तिकथमितिवाच्यंतथात्वेकर्मकालशास्त्रादेवपराप्राप्तेरिवर्द्धतच्चनवैयर्थ्यापत्ते
।।तस्माद्दिवंशाष्टएवैतद्वचनस्यविषयोवाच्यइति।।केचित्तद्वचनोपात्तसकलत्वंउर्वचनं
।।तथाहिषष्टिघटिकाव्यापित्वतत।।उताष्टमुत्तरमासूर्योदयव्यापित्वं।।उतोक्तपक्षान्यत
मत्वं।।नाद्यःसूर्योदयेकिंचिदष्टमीसत्वेतादृशांनवमास्तदहोरात्रेसंभवात।।द्वितीयस्मा
दापषष्टिदंडायासत्वेपितत्रसकलव्यवहारात।।उदयमात्रव्याप्तितीयोदयव्यापितिथ्या
देवसकलव्यवहारात।।तस्मात्सकलत्वमष्टमीप्रतियोगिकाधिववरूपंपारिभाषिकमे

व्रता० ववाच्यं तत्र सूर्योदये चंद्रोदये वा किंचिदष्टमीसत्वे संभवत्येवेति॥ यत्तु बुधवारप्रायाकवचनं
१३५ तरविरहान्नरोहिणीनुस्यतेत्युक्तं॥ तत्र न हि सर्ववचनांतरप्राप्तस्यैव रोहिणीनुस्यतैतिनिय
मः॥ वेधवर्जिते नवमीयोगस्यैतद्वचनमात्रोपात्तोपात्तस्यापि निर्णायकत्वस्यासकृदुक्त
त्वात्॥ यत्तूक्तं एकदिने रोहिणी परदिने बुधस्तदा निर्णयानावएवापतेतदपि न॥ अहोरा
त्रसंबंधस्य नवमीयोगस्य च निर्णायकत्वात्॥ अन्ने वं वक्तव्यं यदि दिवा वा मुहूर्त्तमप्य
होरात्रे प्राजापत्यर्क्षसंयुते सादिनांन निशीथारव्यकर्मकालबाधकत्वे यथा पूर्वेद्युरोहिणी
रहिताष्टमिदं ज्ञानमप्यष्टमीसत्कादंगादिमात्रावसिष्टयारोहिणीयुतायामुत्तरेव व्रतमित्यु
च्यते एवं दिनद्वये निशीथव्यापिन्यां पूर्वेद्युरेव निशीथात्पूर्वं रोहिणीयुक्तायां तथा पूर्वेद्युरे
वसूर्योदयमारभ्य प्रवृत्तरोहिणीयुता निशीथोत्तरप्रवृत्ता पाउत्तरेद्यु रोहिणीरहितां निशीथ राम
गामप्यष्टमीसत्कां कथं न पूर्वेद्युर्व्रतानुष्ठानमिति सुधिय एव विवेचयंतिय त्वन्योक्तं॥ संक १३५

ल्पात्मकव्रतस्य प्रधानत्वेन प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकमिति प्रातःकालस्य प्रधान
कालत्वेन व्यापिन्येव ग्राह्येति तन्न युक्तं॥ रोहिणीसहितनिशीथगाया अपि त्यागापत्तेः मुख्य
कालः स विज्ञेय इत्यादेस्तदपवादकत्वेनुदिवा वेत्यादिना अर्द्धरात्रव्यापिन्या बाध इव प्रातःका
लस्य सामान्यशास्त्रार्थत्वेन बाधापत्तिर्दुर्वारैवेति॥ एतेन मुहूर्त्तकलापदयोरर्द्धरात्रवर्तिकला
परत्वे वचनानर्थक्यापादनमपि त्राह्यानतयापत्तिश्चेत्यपास्तं॥ ननु निशीथोत्तरप्रवृत्ताष्टमीरि
तपूर्वरोहिणीयोगे न परेद्युरित्युदाहरणस्यासंभवान्न पूर्वेद्युर्व्रतानुष्ठानाय मुहूर्त्तार्द्धं भवे
द्यदीति वचने यदि मुहूर्त्तार्द्धं भवेदिति मुहूर्त्तार्द्धसंभावनया कदाचित्संभवापत्तिरितिचेच्चैवं॥ स
प्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तमाः॥ प्राजापत्या द्वितीयेह्नि मुहूर्त्तार्द्धं भवेद्यदीति वचनेय
दि मुहूर्त्तार्द्धं भवेदिति मुहूर्त्तार्द्धसंभावनया कदाचित्तद्भावस्यापि संभवेनोदाहरणसंभवा
न्पारणा तिथिभांते कार्या नदा नगुः जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च॥ पूर्वविद्धैव क

व्रता० द्वयातिथिभांतेचपारणनिषेधोपिब्रह्मवैवर्ते॥ अष्टम्यामथरोहिण्यांनकुर्यात्पारणंक्वचि
१२६ त्॥ हन्यात्पुराकृतंकर्मउपवासार्जितंफलं॥ तिथिरष्टगुणंहंतिनक्षत्रंचचतुर्गुणं॥ तस्मा
त्प्रयत्नतःकुर्यात्तिथिभांतेचपारणमितिमुख्यःपक्षएकतरांतस्त्वनुकल्पः॥ यदातुतिथिन
क्षत्रयोरन्यतरस्यैवदिनेनक्तदारात्रौपारणनिषेधादन्यतरांतेपारणंस्यान्नुज्ञानादिवैवान
तरांतेकार्यं॥ अतएवव्रह्निपुराणे॥ भांतेकुर्यात्तिथेर्वापिशस्तंभारतपारणमिति॥ ॥ अथज
न्माष्टमीव्रतप्रयोगः॥ ॥तत्रपूर्वदिनेदंतधावनंकृत्वोपवासदिनेप्रातःसूर्यःसोमोस्त्रयसोमोप
यमोकालसंधेभूतान्यहःक्षपापवनोदिक्पतिर्भूमिराकाशंखचरामराः॥ ब्राह्मंशासनमास्थाय
कल्पध्वमिहसन्निधिमित्युक्त्वासफलपुष्पाक्षतजलपूर्णताम्रपात्रमादायमासाद्युल्लिख्या राम
मुकफलकामोपापक्षयकामोवाकृष्णप्रीतयेकृष्णजन्माष्टमीव्रतंकरिष्ये॥ वासुदेवंसमु १२६
द्दिश्यसर्वपापप्रशांतये॥ उपवासंकरिष्यामिकृष्णाष्टम्यांनभस्यहं॥ अद्यकृष्णाष्टमीदि

DR BHAU DAJI

वीनमभ्यर्च्यनरोहिणी॥ अर्चयित्वोपवासेनभोक्ष्येहंपरमेहनि॥ एनसोमोक्षकामोस्मिय
ग्नोविंदतियोजितं॥ तन्मेमुंचतुमांत्राहिपतितंशोकसागरे॥ आजन्ममरणंयावद्यन्मयादु
ष्कृतंकृतं॥ तत्प्रणाशयगोविंदप्रसीदपुरुषोत्तमेत्युक्त्वापात्रस्थंजलंक्षिपेत्॥ ततःकदली
स्तंभनवासोभिराम्रपल्लवयुतसजलजघटकलशोद्दीपैःपुष्पमालाभिर्युतमगरुधूपितंअ
ग्निखड्गकृष्णछागरक्षामणिवारंत्यस्त्रमुसलादियुतंमंगलोपेतंकृत्वादेव्याधिष्ठितंदेवक्याः
सूतिकागृहंविधायतन्मध्येभित्तिषुसकुसुमांजलिनदेवदानवगंधर्वादितद्बाणखड्गचर्मधर
वसुदेवदेवकीनंदयशोदागर्गगोपीगोपालकंसनियुक्तानगोधेनुकुंजगयमुनांतन्मध्येका
लीयफणिनंचतत्कालीनंगोकुलचरितंयथासंभवंलिखित्वासूतिकागृहमध्येप्रच्छदपटा
वृतामंबुकंस्यापयित्वामध्याह्नेनद्यांजलेतिलैःस्नात्वार्धरात्रेसपरिवारकृष्णपूजांकरिष्य
इतिसंकल्प्यकांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा॥ वार्क्षीमणिमयीचैववर्णकैर्लिखिता

व्रता० थवेत्युक्त्वास्तमेन प्रतिमां विधायाग्न्युत्तारणं कृत्वा प्रतिमाकपोलौ स्पृष्ट्वा तद्देवानामग्रतः
१२७ मंत्रैः प्रणवादिचतुर्थ्यंतं नामवा अस्मै देवं त्वं संख्यायै स्वाहेति च मंत्रं पठेत्॥ प्राणप्रतिष्ठां
कुर्यात्॥ अस्मादित्यस्थाने तत्तद्देवतानामग्राह्या गायद्भिः किन्नराद्यैः सततपरिगतावेणु
वीणानिनादैः भृंगारादर्शकुंभप्रचुरतरकरैः किंनरैः सेव्यमाना॥ पर्यंके स्वास्तृते यामुदि
ततरसुखी पुत्रिणी सम्यगास्ते सा देवमाता जयति सुवदना देवकी दिव्यरूपा॥ इति देवकी
मांच बालकं स्तनं पर्यंके स्तनपायिनं॥ श्रीवत्सवक्षसं शांतं नीलोत्पलदलच्छविमिति श्रीकृ
ष्णं ध्यात्वा ॐ नमो देव्यै श्रियै इति श्रियं॥ देवकीसहितं वसुदेवं यशोदासहितं नंदं॥ श्री
कृष्णसहितं बलदेवं॥ चंडिकां च॥ नमोंतेन नाममंत्रैः पूजयेत्॥ तत्र मंत्राः॥ योगेश्वराय दे राम
वाय योगानां पतये विष्णो॥ योगोद्भवाय निसाय गोविंदाय नमो नमः॥ स्नानं॥ यज्ञेश्वराय यज्ञाय १२७
यज्ञोद्भवाय च॥ योगानां पतये नाथ गोविंदाय नमो नमः॥ धूपादि॥ विश्वेश्वराय देवा

यतये विश्वोद्भवाय च॥ विश्वस्य पतये तुभ्यं गोविंदाय नमो नमः॥ नैवेद्यं॥ गारुडे॥ यज्ञाय
यज्ञेश्वराय यज्ञपतये यज्ञसंभवाय गोविंदाय नमो नमः इत्येवं सर्वेषां यज्ञपदस्थाने योगपदा
मुक्त्वा यमेव मंत्रः॥ स्नाने विश्वेश्वरायेत्युक्त्वा नैवेद्ये धर्माय धर्मेश्वरायेत्यादिः॥ स्वाहां
तस्विजहोमे विश्वाय विश्वेश्वरायेति शयने॥ सोमाय सोमेश्वरायेत्यादिश्चंद्रपूजायामिति मं
त्राः उक्ताः ततो गव्यघृतेनाग्नौ वसोर्धाराः कृत्वि गुडघृतेनेति॥ ततो जातकर्म नालच्छेद षष्ठि
जातनामकर्माणि॥ ततश्चंद्रोदये रोहिणीयुतं चंद्रं स्थंडिले प्रमायं वा मंत्रैः संपूज्य शंखतोयं
समस्यपत्रपुष्पकुशचंदनं जानुभ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत्॥ क्षीरोदार्णवसं
भूत अत्रिगोत्रसमुद्भव॥ गृहाणार्घ्यं शशांकेमं रोहिण्यासहितो मम इति॥ ततो योगेश्वरायप
तये तुभ्यं योगिनां पतये नमः॥ नमस्ते रोहिणीकांत वसुधावान मोस्तु ते॥ नमो मंडलदीपाय
शिरोरत्नाय धूर्जटेः॥ कलाभिर्वर्द्धमानाय करवग इति प्रणमेत्॥ ततः अनघं वामतं

व्रता० १३८ रिवैकुंठं पुरुषोत्तमं॥ वासुदेवं हृषिकेशं माधवं मधुसूदनं॥ वाराहं पुंडरीकाक्षं नृसिंहं दे
त्यसूदनं॥ दामोदरं पद्मनाभं केशवं गरुडध्वजं॥ गोविंदमच्युतं कृष्णं अनंतमपराजितं॥
अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारणं॥ अनादिनिधनं विष्णुं लोकेशं च त्रिविक्रमं॥ नारायणं
चतुर्बाहुं शंखचक्रगदाधरं॥ पीतांबरधरं नित्यं वनमालाविभूषितं॥ श्रीवत्सांकं जगत्सेतुं
श्रीकृष्णं श्रीधरं हरिं॥ शरणं त्वं प्रपद्येहं सर्वकामार्थसिद्धये॥ प्रणमामि सदा देवं वासुदेवं
जगत्पतिमिति मंत्रैः प्रणम्य॥ त्राहि मां सर्वगश्रीशहरे संसारसागरात्॥ त्राहि मां सर्वपाप
घ्नदुःखशोकार्णवात्प्रभो॥ सर्वलोकेश्वर त्राहि पतितं मां जनार्दन॥ देवकीनंदन श्रीश हरे सं
सारसागरात्॥ त्राहि मां सर्वरोगघ्न शोकार्णवाद्धरे॥ दुर्गतांस्त्रायसे विष्णो ये स्मरंति सकृत्सकृ
त्॥ सोहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात्॥ पुष्कराक्ष निमग्नोहं मायाविज्ञानसागरात् राम १३८
॥ त्राहि मां देववरदेवेशात्वन्नो नान्योस्ति रक्षिता॥ यद्बाल्ये यच्च कौमारे यौवने यच्च वार्धके॥ तत्पुण्य

वृद्धिमाप्नोति पापं हर हलायुधेति मंत्रैः प्रार्थयेत्॥ ततः स्तोत्रपठनपुराणश्रवणादिना जागरणं
कृत्वा द्वितीयेह्नि प्रातःकालीनं नित्यं कृत्वा पूर्ववद्देवं पूजयित्वा ब्राह्मणान्भोजयित्वा तेभ्य
ः सुवर्णधेनुवस्त्रादि कृष्णो मे प्रीयतामिति दत्वा यं देवं देवकी देवं वसुदेवादजीजनत्॥
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः॥ सुजन्मवासुदेवाय गोब्राह्मणहिताय च॥ शांति
रस्तु शिवं चास्त्वित्युक्त्वा प्रतिमामुद्वास्य तां ब्राह्मणाय दत्वा पारणं कृत्वा व्रतं समापयेत्॥ सर्वा
य सर्वपतये सर्वसंभवाय गोविंदाय नमो नमः इति पारणमंत्रः॥ भूताय भूतपतये इत्यादि समा
पनपरमंत्रैः॥ इति जन्माष्टमीव्रतपद्धतिः॥ ॥ अथ जन्माष्टमीव्रतपूजा॥ ॥ देशकालौ स्मृत्वा॥
मम सकुटुंबस्य आयुरारोग्यऐश्वर्याभिवृद्ध्यर्थं वांछितफलप्राप्त्यर्थं देवक्यादिसकलगो
कुलकृष्णप्रीत्यर्थं जन्माष्टमीव्रतमहं करिष्ये इति संकल्प्य॥ अथोपवाससंकल्पः॥ अद्य स्थि
त्वा निराहारः श्वोभुक्षे परमेश्वर॥ तवानुज्ञां ग्रहीष्यामि अस्मिन् जन्माष्टमीव्रते॥१॥ आगतम्

व्रता० गवन्विष्णो स्थाने चात्र स्थिरो भव॥ यावद्व्रतं समाप्येत तावत्त्वं सन्निधो भव॥ आवाहनं॥ गो
१३९ विंदं चिंतयेद्देवं तेजोराशिं जगत्पतिं॥ पीतांबरधरं देवं शंखचक्रगदाधरं॥ ध्यानं॥ सिं
हासनं स्वर्णपीठं नानारत्नैः समन्वितं॥ पूजार्थमासनं दिव्यं गोविंदाय नमो नमः॥ आसनं
॥ पावनानि सुतीर्थानि सरितां सिंधुगामिनां॥ पाद्यार्थमुपहृतानि पाद्यं मे प्रतिगृह्यतां
॥ पाद्यं॥ गंगाभागीरथीरेवां जलं फलाक्षतसंयुतं॥ अर्घ्यं ते मया दत्तं गृहाण परमेश्वर॥ अ
र्घ्यं॥ गंगाजलसमानीतं सुवर्णकलशे स्थितं॥ आचम्यतां हृषीकेश गृहाण परमेश्वर॥ आ
चमनं॥ पंचामृतं परं स्वादु पयो दधि घृतं मधु॥ शर्करया गुणसंयुक्तं श्रीहरे प्रतिगृह्यतां॥
पंचामृतं॥ गंगा च गौतमी रेवा यमुना च सरस्वती॥ नदी नदसहस्रो यः स्नानार्थं प्रतिगृह्यतां॥ राम
स्नानं॥ नारायण नमस्तेस्तु नरकार्णवतारण॥ वस्त्राणि ते गृहीतानि दिव्यानि प्रतिगृह्यतां॥ वस्त्र १३९
णि॥ दामोदर नमस्तेस्तु त्राहि मां भवसागरात्॥ ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम॥ उपवी

तं॥ मलयाचल॥ गंधं॥ कें अक्षताश्च॥ माल्यादीनि पुष्पं॥ वनस्पति॥ धूपं॥ आज्यं॰ दीपं॥ अन्नं च
तुर्विधं स्वादुरसैः षड्भिः समन्वितं॥ मया नीतं च नैवेद्यं गृहाण पुरुषोत्तम॥ नैवेद्यं॥ इदं फलं॰॥ फ
लं॥ पूगीफलं॰ तांबूलं॰ हिरण्यगर्भ॰ दक्षिणा॥ यानि कानि च पापानि जन्मांतरकृतानि च॥
तानि तानि प्रदक्षिण॥ अथ नामपूजा॥ मत्स्य॰ कूर्म॰ वराह॰ नरसिंह॰ वामन॰ परशुराम॰
राम॰ कृष्ण॰ बुद्ध॰ कल्कि॰ अथ प्रार्थना॥ मंत्रहीनं॰॥ अदितिर्देवमातस्त्वं सर्वपापप्र
णाशनी॥ अतस्त्वां पूजयिष्यामि भीतोहं भवतो भयात्॥ त्वया पुत्रं हरिं लब्ध्वा प्राप्यते निर्वृतिः
परा॥ तामेव निर्वृतिं देहि स्वपुत्रं दर्शयस्व मे॥ गायद्भिः किन्नराद्यैः सततपरिवृतो वेणुवी
णाविनोदैः भृंगारादर्शकुंभप्रवरकृतकरैः किन्नरैः सेव्यमानं॥ पर्यंके स्वास्तृते वा मुदितमुदि
तसुमुखी पुत्रिणी सम्यगास्ते सा देवी देवमाता जयति सुतनया देवकी कांतिरूपा॥ इति देवसे
अर्घ्यं॥ अथ कृष्णार्घ्यं जातः कंसवधार्थाय भूभारोत्तारणाय च॥ पांडवानां हितार्थाय धर्मसं

स्थापनाय च कौरवाणां विनाशाय वसुदेवकुलोद्भव॥ गृहाणार्घ्यमिमं पार तं देव कमलासहि
तो हरे॥ अथ चन्द्रार्घ्यं॥ ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषांपते॥ नमस्ते रोहिणीकांत अ
र्घ्यं नो प्रतिगृह्यतां॥ अथ कृष्णप्रार्थना॥ अवतारसहस्राणि करोषि मधुसूदन॥ न ते संख्या
वताराणां कश्चिज्जानाति भुवि॥ देवा ब्रह्मादयो वापि स्वरूपं न विदुस्तव॥ अतस्त्वां पूजयिष्या
मि मातुरुत्संगमास्थितं॥ वांछितं कुरु मे देव दुष्कृतं च विनाशय॥ कुरुष्व मे दयां देव संसारा
र्त्तिभयापह॥ यं देवी देवकी देवी वसुदेवादजीजनत्॥ भौमस्य ब्रह्मणो गुप्त्यै तस्मै ज्ञानात्मने नमः
॥ सुजन्म वासुदेवस्य गोब्राह्मणहिताय च॥ शांतिरस्तु शिवं चास्तु इत्युक्त्वा वै तं विसर्जये
त्॥ ॥ इति पूजनं॥ अथ जन्माष्टमीव्रतं॥ ॥ युधिष्ठिर उवाच॥ ॥ जन्माष्टमीव्रतं ब्रूहि विस्तरेण म
माच्युत॥ कस्मिन्काले समुत्पन्नं किं पुण्यं को विधिः स्मृतः॥ श्रीकृष्ण उवाच॥ मत्ते यु
द्धे पुरा वृत्ते समीते कुकुरांधके॥ स्वजनैर्बंधुभिः स्निग्धैः समं मित्रैः समावृते॥ हते कंसासु

रे दुष्टे मथुरायां युधिष्ठिर॥ देवकी मां परिष्वज्य कृत्वोत्संगे रुरोद ह॥ वसुदेवोपि तत्रैव
वात्सल्यात्स रुरोद ह॥ समालिंग्याश्रुवदनः पुत्र पुत्रेत्युवाच ह॥ सगद्गदस्वरो दीनो बा
ष्पपर्याकुलेक्षणः॥ बलदेवं च मां चैव परिष्वज्य मुदा युतः॥ अद्य मे सफलं जन्म जीवितं
च सुजीवितं॥ यन्मया मद्य पुत्राभ्यां समुद्भूतं समागमः॥ एवं हर्षेण दंपसंहृष्टपुष्टं तवात्य
द्भुतं॥ प्रणिपत्य जनाः सर्वे बभूवुस्ते प्रहर्षिताः॥ एवं महोत्सवं दृष्ट्वा समाजं मधुसूदनः॥ प्रसा
दं क्रियतामस्य लोकस्यार्त्तस्य दुःखतः॥ यस्मिन्दिने प्रसूतेयं देवकी त्वां जनार्दन॥ तद्दिनं
देहि वैकुंठ कुर्मस्तत्र महोत्सवं॥ एवं स्तुतो जनौघेन वसुदेवमपेक्षितः॥ विलोक्य बलदेवं
च मां च हृष्टतनूरुहः॥ उवाच स ममादेशाल्लोकान् जन्माष्टमीव्रतं॥ मथुरायां ततः पश्चा
त्तथा वा संप्रकाशितं॥ कुर्वंतु ब्राह्मणाः सर्वे व्रतं जन्माष्टमीदिने॥ क्षत्रिया वैश्यजातीया शूद्रा
येन्येपि धर्मिणः॥ ॥ युधिष्ठिर उवाच॥ ॥ कीदृशं तद्व्रतं देव देवैः सर्वैरनुष्ठितं॥ जन्माष्टमीति

व्रता०
१४१

संख्यंचपवित्रंपापनाशनं॥येनत्वंतुष्टिमायासिकृष्णेनप्रभवाव्यय॥एतन्मेतत्त्वतोब्रूहिसवि
धानंसविस्तरं॥ ॥कृष्णउवाच॥ ॥मासिभाद्रपदेऽष्टम्यांनिशीथेकृष्णपक्षके॥शशांकेवृषरा
शिस्थेऋक्षेरोहिणीसंज्ञिते॥योगेस्मिन्वसुदेवाद्धिदेवकीमामजीजनत्॥भगवत्याश्चतत्रै
वक्रियतेसुमहोत्सवः॥योगेस्मिन्कथितेष्टम्यांसिंहराशिगतेरवौ॥सप्तम्यांलघुभुक्कुर्याद्दं
तधावनपूर्वकं॥उपवासस्यनियमंरात्रौस्वप्याज्जितेंद्रियः॥केवलेनोपवासेनतस्मिन्जन्म
दिनेमम॥सप्तजन्मकृतात्पापान्मुच्यतेनात्रसंशयः॥उपावृत्तस्यपापेभ्योयस्तुवासोगुणै
:सह॥उपवासःसविज्ञेयःसर्वभोगविवर्जितः॥ततोष्टम्यांतिलैःस्नातोनद्यादौविमलेजले॥सु
देशेशोभनंकुर्याद्देवक्याःसूतिकागृहं॥सितपीतैःस्तथारक्तैःकर्बुरैर्हरितैरपि॥वासोभि
र्तितंकृत्वासमंतात्कलशैर्नवैः॥पुष्पैःफलैरनेकैश्चदीपालिभिरितस्ततः॥पुष्पमालावि
चित्रंचचंदनागरुभूषितं॥अतिरम्यमनोयम्परक्कामणिविभूषितं॥हरिवंशस्यचरितंगो राम
१४१

DR. BHAU DAJI

कुलंविलेखयेत्॥ततोवादित्रनिनदैर्वीणावेणुरवाकुलं॥नृत्यगीतक्रमोपेतंमंगलैश्च
समंततः॥वेष्टकारिलोहदंडंकृत्वाद्वारंचयेत्ततः॥द्वारेविन्यस्यमुसलंरक्षितंक्षपालकैः
॥षष्ठ्यारेव्याधिष्ठितंचतन्नहस्तेचोक्षवैस्तथा॥एवंविभवसारेणकृत्वासूतिकागृहं॥तन्मध्ये
प्रतिमास्थाप्यासावाप्यष्टविधास्मृता॥कांचनीराजतीताम्रीपैत्तलीमृन्मयीतथा॥वार्क्षीमणि
मयीचैववर्णकैर्लिखितातथा॥सर्वलक्षणसंपूर्णापर्यंकेचाष्टशल्यके॥प्रतप्तकांचना
भासंमहार्हांसुतपस्विनीं॥प्रसूतांचप्रसुप्तांचस्थापयेन्मंचकोपरि॥मांतत्रबालकंसुप्तं
पर्यंकेस्तनपायिनं॥श्रीवत्सवक्षसंशांतंनीलोत्पलदलच्छविं॥यशोदांतत्रचैकस्मिन्प्र
देशेसूतिकागृहे॥तद्वच्चकल्पयेत्पार्थप्रसूतांवरकन्यकां॥तथैवममपार्श्वस्थान्कृतां
जलिपुटान्नृप॥देवाग्रहांस्तथानागान्यक्षविद्याधरामराः॥प्रणताःपुष्पमालाग्रव्यग्रह
स्ताःसुरासुराः॥संचरंतंवाकाशेमहारेरुदितोदितैः॥वसुदेवोपितत्रैवखड्गचर्मधरस्ति

व्र.ता. तः॥ कश्यपो वसुदेवोयमदितिश्चैव देवकी॥ शेषोवै बलदेवोयं यशोदादितिरन्वभूत्॥ तं
१४२ दप्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः॥ गोप्यश्चाप्सरसः सर्वा गोपाश्चापि दिवौकसः॥ एषोवसा
रे राजेंद्र कंसोयं कालनेमिनः॥ तत्र कंसनियुक्ताश्च मोहितायोगनिद्रया॥ गोधेनुकुंजरश्चैव दा
नवाः शस्त्रपाणयः॥ नृत्यंतश्चाप्सरोभिस्तु गंधर्वा गीततत्पराः॥ लेखनीयश्च तत्रैव कालियो यमु
नाह्रदे॥ तस्मिंस्त्वेवमादि यत्किंचिल्लिख्यते चरितं मम॥ लेखयित्वा प्रयत्नेन पूजयेद्भक्तितत्परः
॥ रम्भां नेबीजपूरैश्च लकुचैस्त्रपुसैस्तथा॥ कालदेशोद्भवैः पुष्पैः फलैश्चापि युधिष्ठिर॥ पा
द्यार्घ्यैः पूजयेद्भक्त्या गंधपुष्पाक्षतैः फलैः॥ मंत्रेणानेन कौंतेय देवकीं पूजयेन्नरः॥ गायद्भि
ः किंनरगणैः सततपरिगतां वेणुवीणानिनादैर्भृंगारादर्शकुंभप्रवरकृतकरैः किंनरैः सेव्य राम
माना॥ पर्यंके स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते सा देवी दिव्यमाता जयति सु १४२
तहसुता देवकी कांतरूपा॥ रानमम्लजयंती श्रीदेव्याश्चरणांतिके॥ निषण्णा पंकजे पूज्या

दिव्यगंधानुलेपनैः॥ पंकजैः पूजये देवीं नमो देव्यै श्रियै इति॥ देवक्यै नमस्तेस्तु कृष्णोत्पाद॥
नतत्परा॥ पापक्षयकरी देवि तुष्टियांतु मम वाव्रिता॥ प्रणवादि नमोंतं च पृथक् नामानुकीर्त
न॥ कुर्यात्पूजाविधिज्ञश्च सर्वपापापनुत्तये॥ देवक्यै वासुदेवाय वसुदेवाय चैव हि॥ बलदे
वाय नंदाय यशोदायै पृथक्पृथक्॥ क्षीरादिस्नपनं कृत्वा चंदनानुविलेपयेत्॥ विष्णुं तत्स
पिंतुतिके विदत्रैव स्मरयः॥ चंद्रोदये शशांकाय अर्घ्यं दद्याद्धरिं स्मरन्॥ अनघं वामनं शौरिं
वैकुंठं पुरुषोत्तमं॥ वासुदेवं हृषीकेशं शशांकाय अमाधवं मधुसूदनं॥ वाराहं पुंडरीकाक्षं न
सिंहं ब्राह्मणप्रियं॥ गोविंदं पुंडरीकाक्षं सर्गस्थित्यंतकारिणं॥ अनादिनिधनं विष्णुं त्रैलोक्ये
शं त्रिविक्रमं॥ नारायणं चतुर्बाहुं शंखचक्रगदाधरं॥ पीतांबरधरं नित्यं वनमालाविभूषितं
॥ श्रीवत्सांकं जगत्सेतुं श्रीपतिं श्रीधरं हरिं॥ स्मरन्नर्घ्यं दद्यादिति पूर्वेणान्वयः॥ योगेश्वराय देवा
य योगानां पतये नमः॥ विश्वेश्वराय विश्वाय तथा विश्वं नराय च॥ विश्वेश्वराय देवाय तथाज

व्रता० १४२ न्नाथाय च यज्ञानां पतये नाथ गोविंदाय नमो नमः॥ पूजामंत्रः॥ जगन्नाथ नमस्तुभ्यं संसारभय
नाशन॥ जगदीशाय देवाय भूतानां पतये नमः॥ इति नैवेद्यं॥ धर्मेश्वराय धर्माय संभवाय य
ज्ञपतये॥ धर्मज्ञाय च यज्ञाय गोविंदाय नमो नम इति शयनमंत्रेण तेन नैवेद्यं दद्याच्चंद्रमसे
नरः॥ तथैवार्घ्यं च मंत्रेण अनेनैव तु दापयेत्॥ क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव॥ गृहा
णार्घ्यं शशांकेदं रोहिण्या सहितो मम॥ ज्योत्स्नापते नमस्तुभ्यं ज्योतिषां पतये नमः॥ नमस्ते रोहि
णीकांत अर्घ्यं नि प्रतिगृह्यतां॥ स्थापयेद्देवदेवेशं शशांकं रोहिणीयुतं॥ देवकीं वसुदेवं
च नंदं तं वै यशोदया॥ बलदेवं मया सार्द्धं नेदया परयान्वप॥ संश्रुत्य विधिवद्देही किन्न प्रा
प्नोति दुर्लभं॥ एकादशीनां विंशत्यः कोट्यो याः प्रकीर्त्तिताः॥ तानि कृष्णाष्टमी तुल्या ततोऽनंत राम
चतुर्दशी॥ अर्द्धरात्रे वसोर्धारां पातयेद्घृतसर्पिषा॥ ततो वर्द्धापयेन्नालं षष्ठीनामादिकं त १४२
था॥ कर्त्तव्यं तत्क्षणं रात्रौ प्रभाते नवमीदिने॥ यथा मम तथा कार्यं भगवत्या महोत्सवं॥ ब्राह्म

णान्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणां॥ हिरण्यं मेदिनीं गावो वासांसि कुसुमानि च॥
यद्यदिष्टतमं तत्तत्कृष्णो मे प्रीयतामिति॥ यं देवं देवकी देवं वसुदेवादजीजनत्॥ भौमस्य ब्रह्मणो
गुप्त्यै तस्मै ब्रह्मात्मने नमः॥ नमस्ते वासुदेवाय गोब्राह्मणहिताय च॥ शांतिरस्तु शिवं चास्तु
इत्युक्त्वा मां विसर्जयेत्॥ ततो बुधजनौघं च दीनानां भोजनं बहु॥ भोजयित्वास्तु शीतायास्वयं
भुंजीत वाग्यतः॥ एवं यः कुरुते देवा देवक्याः सुमहोत्सवं॥ प्रतिवर्षं विधानेन मद्भक्तो धर्मनंदन
॥ नरो वा यदि वा नारी यथोक्तं लभते फलं॥ पुत्रसंतानमारोग्यं सौभाग्यमतुलं भवेत्॥ इह धर्मरति
र्भूत्वा मृतो वैकुंठमाप्नुयात्॥ तत्र देवविधानेन वर्षलक्षं युधिष्ठिर॥ भोगान्नानाविधान्भुक्त्वा पुण्य
शेषादिहागतः॥ सर्वकामसमृद्धे तु सर्वाशुभनिवर्जिते॥ कुले नृपतिशीलानां जायते रूपो
पमः॥ यस्मिन्देशे देवदेवेशो तु लिखितं तु पटार्पितं॥ मम जन्मदिनं यत्र सर्वालंकारभूषितं॥ पूज्यते स्म
इव श्रेष्ठ मन्ते उत्सवसंयुतैः॥ परचक्रभयं तत्र न कदाचिद्भवेत्सुतः॥ पर्जन्यः कामवर्षी स्यात्

व्रता० तिस्रोनन्नयंनवेत॥गृहेवायत्रपूज्यतेयस्मिन्देवश्चावरितंमम॥तत्रसर्वंसमृद्धंस्यान्नोपसर्गादि
१४४ कंभवेत्॥पशुतोनकुलाद्व्यालात्पापरोगाश्चपातकात्॥राजतश्चौरतोवापिनकदाचिद्भयं
भवेत्॥संसर्गेणापियोभक्त्याव्रतंपश्येदनाकुलं॥सोपिपापविनिर्मुक्तःप्रयातिहरिमंदिरं॥ज
न्माष्टमीजनयतोनयनाभिरामापापापहासुगतिनंविदधातिगोपं॥योदेवकीसुतसुतंश्चभवेद्वि
तंस्मात्सुत्रानवाप्यसमुपैतिपदंविष्णोः॥॥इतिहेमाद्रौभविष्योत्तरेजन्माष्टमीव्रतं॥ ॥अथत्रिःस्प
चारप्रामाकथा॥॥व्यासउवाच॥ ॥निवृत्तेभारतेयुद्धेकृतशौचोयुधिष्ठिरः॥उवाचवासं
धर्मात्माकृष्णंदेवकीनंदनं॥ ॥युधिष्ठिरउवाच॥ ॥त्वत्प्रसादेनगोविंदनिहताःशात्रवोर
णे॥कर्णभीष्मादितःसोन्येत्वत्प्रसादात्किरीटिना॥जेताकोयुधिभीष्मस्ययस्यमृत्युर्नविद्यते॥अ राम
जेयोपिजितःसोपित्वत्प्रसादात्किरीटिनाम्जेताकोयुधिधीरजनार्दनः॥प्राप्तंनिःकंटकंराज्यं १४४
कृत्वाकर्मसुदुःकरं॥आचारोदंडनीतिश्चराज्यधर्मक्रियान्विताः॥अधुनाश्रोतुमिच्छामि

व्रतंजन्माष्टमीव्रतं॥जन्माष्टमीव्रतंब्रूहिविस्तरेणममाच्युत॥कुतःकालेसमुत्पन्नंकिंपुण्यं
कोविधिःस्मृतः॥ ॥श्रीकृष्णउवाच॥ ॥शृणुराजन्नवक्ष्यामिव्रतानामुत्तमंव्रतं॥यतःप्रभृति
विख्यातंपकलेनविधिनान्वितं॥राजवंशासमुत्पन्नैर्दैत्यैःकश्चित्सुपीडिता॥धराभारस
माक्रांताब्रह्माणंशरणंययौ॥ज्ञात्वातदाचतुर्ब्रह्माभूमेर्नरिंसमाहितः॥श्वेतद्वीपेसमा
गत्यसद्देवसमन्वितः॥समाहितामतिब्रह्मामांतुष्टावविंशांपते॥स्तुत्यातयाहंसंप्रीतस्ते
षांदृग्गोचरोभवं॥दृष्ट्वायांप्रणिपत्यामुग्रक्तिभावसमन्वितः॥ब्रह्मणमग्रतःकृत्वातुष्टाःसर्वे
दिवौकसः॥विज्ञितास्तुर्महाभूमिस्तस्यभारापनुत्तये॥उपधार्यतदातेषांवचनंत्वात्वचिंतयं
॥केनोपायेनहंतव्यादानवाःक्षत्रियोद्भवाः॥स्वधर्मनिरताःसर्वेमहाबलपराक्रमाः॥ ततोमि
श्चित्यमनसाब्रह्माणंमहमब्रुवं॥वसुदेवोदेवकीचकश्यपाकांमीपुरानघ॥भक्त्यामांप्रजमानौ
तौतप्यंतौमहत्तपः॥तयोःप्रसन्नःसुप्रीतोयाचतंवरमुत्तमं॥अब्रूवंतावपिनतौवरयामा

व्रता० सन्तुः किल॥ यदि देव प्रसन्नोस्मि त्वाहं ज्ञौनौ नवे स्तुतः॥ तथेति च मया तात्मामुक्तं प्रीतेन सेव
१४५ याघास तुः किल॥ यदि देव प्रसन्नोस्मि त्वाहं ज्ञौनौ नवे स्तुतः॥ तथेति च मयाता सामुक्तं प्रीते
न सेव यास तत्क्षु॥ तत्काम प्ररणार्थाय संजनिष्याम्यहं तयोः दिवौकसोपि त्वांशेन सज्जाष्यंतु सुर
स्त्रियः॥ योगमाया च नंदस्य यशोदायां जनिष्यति॥ देवकी जठरे गर्भमनंतं धाम मामकं॥ स निःका
ष्य ततस्तूर्णं रोहिण्या जठरे कुरु॥ इति संदिश्य भगवांस्तत्रैवांतर्हितो भवं॥ ततो देवैः समं ब्रह्मा तां दि
शं प्रणिपत्य च॥ आश्वास्य च महीदेवी वरधा त्रिजगाद ह॥ ततो हं देवकीगर्भमविशं स्वेन तेजसा॥ हते
षु षट्सु बालेषु देवक्या औग्रसेनिना॥ कारागृह स्थितायां च वसुदेवेन वै सह॥ गते र्द्धरात्रसम
ये सुप्ते सर्वजने निशि॥ नाद्रे मासस्य सिते पक्षे ऽष्टम्या ब्रह्मर्क्ष संयुजि॥ सर्वग्रहशुभे काले प्र
सन्न हृदयाशये॥ आविरासन्निजे नैव रूपेण वावनीयते॥ वसुदेवोपि मां दृष्ट्वा हर्षशोकपरि राम
प्लुतः॥ अस्तुत मिद्रूपं दुर्दर्शं योगिनामपि॥ तत्तेजसारिगृहम नवस्तप्रकाशितं॥ जहि १४५

जेजगिवन्कंसो घोमे बालानघातयत॥ उपसंहर तस्मात्त्वमेतद्रूपमलौकिकं॥ शंखचक्र
गदापद्म जसत्कौस्तुभमालिनं॥ किरीटहारमुकुटकेयूरवलयांकित॥ तडित्वस्त्र संवीतं
कणत्कांचनमेखलं॥ स्फुरद्राजीवताम्राक्षं स्निग्धांजनचयप्रभं॥ महामरकतस्वच्छं कोटिसूर्यसम
प्रभं॥ ॥ श्रीकृष्ण उवाच॥ ॥ एवं शापितो राजा सुदेवेन वै तदा॥ तेनैव निजरूपेण त्यक्त्वाहं प्राकृतः शि
शुः॥ नय मां गोकुलमिति वसुदेवमचोदयं॥ समादाय मां सोपि नंद गोकुलमं जसा॥ द्वाराण्युद्घा
क्तान्यासन् स्वप्रभावत स्वयं विन्नो॥ ददौ मार्गं च कालिंदी जलकल्लोलमालिनी॥ ततो यशो
दाशयने न्यस्य वानकदुंदुभिः॥ तत्पर्यंकस्थितां गत्वा दारिकामगमत्सुतः॥ द्वाराणि पिहितान्
न्यासन्सर्ववल्लिगडं ततः॥ विन्यस्य पादयो राज्ञे शयने न्यस्य दारिकां॥ ततो रुरोद महता स्वने
नापूर्वं सा दिशः॥ तस्या रुदितशब्देन उत्थिताया मिकाः गृहात्॥ कंसायागत्य चाचख्युः प्रसू
ता देवकी त्विति॥ सोपि तस्या समुत्थाय तन्नयेनाति वविकलः॥ जगाम सूतिकागेहं देवकी स्व

व्रता०
१४६

लेप्यपि॥ दारिकां शयनात्प्रत्य रुदंत्या श्चैव सस्वसुः॥ अपोथयच्छिलापृष्ठे सापि तस्य करात्च्युता॥ आ
चकंसमाख्याय देवी ह्याकाशगा सती॥ किं मया हतया मंद जातः कुत्रापि ते रिपुः॥ इत्युक्तः सोप्य
ह्लकंसः परमोद्विग्नमानसः॥ आज्ञापयामास ततो बालानां कदनाय वै॥ दानवा अपि बाला
नां कदनं च कुलद्युताः॥ वनेषूपवने चैव पुरग्रामव्रजेष्वपि॥ अहं च गोकुले स्थित्वा पूतना
चाघघातिनी॥ स्तनं दात्सुप्रवृत्तां च प्राणैश्चाममशोषयत्॥ तृणावर्त्तं बकं रिष्टं धेनुकं केशिनं त
था॥ अन्यानपि खलान्हत्वा स्वप्रभावमदर्शयत्॥ ततश्च मथुरां गत्वा हत्वा कंसं आदिदान
वान्॥ ज्ञातीनां परमं हर्षं कृतवानस्मि सादरं॥ देवकी वसुदेवं च परिघममुदाममं॥ आ
नंदजैरश्रुभिः सिंचयामास तुर्नृप॥ तस्मिन्नंगने मल्लान्हत्वा चाणूरमुष्टिकान्॥ गजं कुव राम
लयापीडं कंसभ्राणन्नमेकशः॥ एवं हते सुरे कंसे सर्वलोकैककंटके॥ अस्मेषु उत्सवेषु १४६
सुसर्वलोकमहोत्सवैः॥ लोका समुत्सुकाः सर्वे मां स्वमेत्योचुरादृताः॥ कृष्ण कृष्ण महायोगि

Dr. BHAU DAJI MEMORIAL

न्कृष्णानामन्नयप्रद॥ अनयात्पाहि नो देव शरणागतवत्सल॥ अनाथनाथ सर्वज्ञ सर्वभूतहि
तेरत॥ किंचिद्विज्ञापहे देव त्वल्लोकवक्तुं त्वमर्हसि॥ तव जन्मदिनं लोके न ज्ञातं केनचित्क्वचित॥
ज्ञात्वा च तद्दिनं सर्वे कुर्मो विष्णपिनोत्सवं॥ तेषां हृष्ट्वानुसानन्नक्तिं श्रद्धां च मपि सौहृदं॥ मया ज
न्मदिने तेभ्यः रव्यातं निर्मलचेतसां॥ श्रुत्वा तेपि तथा चक्रुर्विधिनापेन तत्क्षणं॥ प्रार्थंते दिव
सेद्य प्राप्तेदं तत्पावनं पूर्वकं॥ स्नात्वा प्रातः शुभे जले सुदेवा स्मर्सी परिधाय च॥ तिर्वस्योनिस्मकं कार्यं
व्रतसंकल्प मारभेत॥ अद्य स्थित्वा निराहारं श्वो भूते तु परे हनि॥ भोक्ष्यामि पुंडरीकाक्ष शरणं
मे भवाच्युत॥ गृहीत्वा नियमं चैव सम्यगार्चनसाधनं॥ मंडपं शोभनं कृत्वा फलपुष्पादिसंयु
तं॥ तस्मिन्मंडपजयेद्भक्त्या गंधपुष्पादिभिः पृथक्॥ उपचारैः षोडशाभिर्द्वादशाक्षरविद्यया॥
सद्यः प्रसूतां जननीं वसुदेवं च मारिषं॥ बलदेवसमायुक्तं रोहिणी गुणमोहिनी॥ नंदं य
शोदां गोपी च गोपान्गाश्चैव सर्वशः॥ गोकुलं यमुनां चैव योगमायां च दारिकां॥ यशोदा

व्रता० वायनेसुमासद्योजन्मांवरप्रदं॥ एवंसंपूजयेत्सम्यक्नाममंत्रैःपृथक्पृथक्॥ सुव
१४७ र्णरूप्यताम्रारमञ्जादिभिरलंकृता॥ प्रतिमाकृतिधाप्रोक्तास्तासुचान्यतरांयजेत्॥ रात्रौ
जागरणंकुर्याद्गीतवाद्यादिभिःसह॥ पुराणैस्तोत्रपाठैश्चजातानामादिषूत्सवैः॥ श्वोभूते
पारणंकुर्यात्द्विजान्संभोजयेत्ततः॥ एवंकृतेमहाराजव्रतानामुत्तमोत्तमं॥ सर्वान्कामा
नवाप्नोतिस्वर्गलोकेमहीयते॥ मोहान्नकुरुतेयस्तुयातिसंसारगह्वरे॥ तस्मात्कुर्वन्प्रयत्ने
नन्निःपापोजायतेनरः॥ अत्रैवोदाहरंतीममितिहासंपुरातनं॥ अंगदेशोद्भवोराजाभिश्रुति
न्नामतःक्रमात्॥ तस्यपुत्रोमहासेनासत्यजित्सत्पथेस्थितः॥ पालयामासधर्मज्ञोविद्व
द्वन्रंजयन्प्रजाः॥ तस्यैवंवर्त्तमानस्यकदाचिद्दैवयोगतः॥ पाखंडैःसहसंवासोबभूवब राम
हुवासरं॥ तत्संसर्गान्नृपतिरधर्मनिरतोऽभवेत्॥ वेदशास्त्रपुराणानिविनिंद्यबहुशोनृ १४७
प॥ ब्राह्मणेषुतथाधर्मेविद्वेषंपरंगतः॥ एवंबहुतिथेकालेगतेनरसत्तम॥ कालेननि

धनंप्राप्तोयमदूतवशंगतः॥ बध्वापाशैर्नीयमानोयमदूतैर्यमांतिकं॥ पीडितस्तास्तावो
सौदुःखसंगवशागतः॥ नरकेपतितःपापांपत्तनंबहुवत्सरं॥ भुक्त्वापापस्यदोषेणपै
शाच्योयोनिमास्थितः॥ तृष्णाक्षुधासमाक्रांतोभ्रमन्समरुधन्वसु॥ कस्यचित्त्वथवैश्यस्य
देहमाविश्यचास्थितः॥ सहतेनैवसंयातोमथुरांपुण्यदांपुरीं॥ सीमायैरक्षकैःसोऽथतस्माद्दे
हान्वहिःकृतः॥ बभ्रामविपिनेसोपिऋषीणामाश्रमेषुच॥ कदाचिद्दैवयोगेनममजन्माष्ट
मीदिने॥ क्रियमाणंमहाभक्त्याप्रीतिव्रतोऽमुनिभिर्द्विजैः॥ रात्रौजागरणंचैवनामसंकीर्तना
दिभिः॥ ददर्शसर्वंविधिवच्छुश्रावचहरेःकथां॥ निःपापदर्शनादेवस्पृष्टंनिर्मलमानसः॥ प्रेत
देहंसमुत्सृज्यविष्णुलोकंमानगः॥ ममदूतैःसमानीतोदिव्यभोगसमन्वितः॥ ममसान्निध्यमा
प्तोऽभूत्तस्यास्यप्रभावतः॥ नित्यमेवव्रतंचैतत्पुराणेसर्वकालिकं॥ पीपेतविधिवद्राजक्
मुनिभिस्तत्त्वदर्शिभिः॥ सर्वकामिकमेवैतत्कृत्वाकस्मात्नवाप्नुयात्॥ एतत्तेसर्वमाख्यातंव्र

व्र॰ता॰ १४८ तानामुत्तमंव्रतं॥ममसान्निध्यकद्राजन्किंनृपःश्रोतुमिच्छसि॥अत्रैवोदाहरंतीममितिहास
पुरातनं॥अरुणेनतुयत्पृष्टोभास्करोलोकपूजितः॥तत्तेहंसंप्रवक्ष्यामिशृणुष्वयत्नतः
॥ ॥अरुणउवाच॥ ॥यदनंतफलंलोकेपरत्रचमहाफलं॥यत्कृत्वानपुनर्भावितन्मेकथय
भास्कर॥१॥ ॥भास्करउवाच॥ ॥सर्वजिन्नामःपुरात्यासीद्धरिश्चंद्रोमहीपतिः॥तस्यतुष्टोददौ
ब्रह्माविमानंकामदंशुभं॥२॥सरत्नाभरणंदिव्यंबालार्कसदृशप्रभं॥तत्रस्थितंमही
पालंदेवगंधर्वपन्नगाः॥३॥उपासंतेमहात्मानंहरिश्चंद्रंमहाद्युतिं॥तत्रस्थितोम
हीपालःसप्तद्वीपांवसुंधरां॥४॥पालयामासधर्मेणपितापुत्रानिवौरसान्॥प्रसन्नध
नधान्याढ्यैरत्नकोशसमन्वितः॥५॥पालयन्सकलंराज्यंपरंविस्मयमागतः॥नैतादृशं राम
हियस्सर्वंराज्यंकस्मिन्नकर्हिचित्॥६॥नाधर्मिष्ठाःप्रजाःकाश्चिन्नदरिद्रोनरोगवान्॥न १४८
चेदृशंभुवितरैर्विमानमधिरुह्यते॥७॥कस्येयंधर्मणोवृद्धिर्येनाहंसुराजतः॥प्रजस्मा

नंपार्थिवैश्वचक्रवर्तित्वमुत्तमं॥८॥करोतिकर्मणायेनतद्भयोपिवृणोम्यहं॥एवंसंचिं
तयन्राजाविमानंवरमास्थितः॥९॥ददर्शपर्वतंमेरुवरंदेवालयंशुभं॥तत्रस्थितंमहा
त्मानंद्वितीयमिवभास्करं॥१०॥आसीनंपर्वतवरेकैलासशिखरेशुभे॥सनत्कुमारंब्र
ह्मर्षिंब्रह्मज्ञानपरायणं॥११॥दृष्ट्वोत्पपातरथाद्राजाप्रष्टुकामःसविस्मितः॥ववंदेचरणौ
तस्यतेनापिप्रतिपूजितः॥१२॥सुखोपविष्टःसनृपःपप्रच्छमुनिपुंगवं॥किंनुतदुर्लभालो
केभगवन्यादृशीमम॥१३॥कर्मणानेकसंजाताकस्याहंसर्वजन्मनि॥एतत्कथयमेसर्व
मनुग्राह्योस्मितेयदि॥१४॥ ॥सनत्कुमारउवाच॥ ॥यत्त्वयोक्तंमहीपालतेनत्वयानतदन्यथा
॥दुर्लभानितरांलोकेविभूतिर्यादृशीतव॥१५॥कथयामिनृपश्रेष्ठसनवानुग्रहकारणं
त॥त्वमन्यजन्मनित्वासीर्वैश्यःसुकृतवान्शुचिः॥१६॥स्वकर्मणःपरिसक्तःस्वकर्मसंस
र्वबांधवैः॥वित्तेनचपरिक्षीणोभार्ययानुगतस्सदा॥१७॥दिगंतःस्वजनेस्सक्तःपरप्रेषणलिप्स

व्रता० या॥ तच्च प्रेषणं दोत्यासीत्काले दुर्भिक्षपीडिते॥१८॥ ततः कदाचिद्गहने सरस्युत्फुल्लपंकजे॥
१४९ दृष्ट्वा त्वया कृतो भावो गृह्णीयादिति पंकजं॥१९॥ एतावदुक्त्वा पुष्पाणि गृहीतानि त्वयानघ॥
प्रस्थितो नगरीं रम्यां नाम्ना वाराणसीं प्रति॥२०॥ तत्र विक्रीणतस्तानि न च गृह्णाति कश्चन
॥ ततः खेदं समापन्नः कस्मिन् गत्वा गृहान्तरे॥२१॥ तत्रस्थश्च त्वया श्रोषी दिव्यवादित्रनिस्वनः
॥ कस्मिन्संश्रूयते त्वत्र दिव्यवादित्रनिस्वनः॥२२॥ इति पृष्टाः त्वया संस्तु ये तत्रावस्थिता ज
नाः॥ काशीराजा तु विख्यातं इन्द्रद्युम्नश्च पार्थिवः॥२३॥ तस्येहं दुहिता ख्याता नाम्ना चंद्रप्रदे
न्नेति वै॥ उपोषिता महाभागा कृष्णजन्माष्टमी शुभा॥२४॥ तत्र गच्छन्ति मा मालां मा गृह्णीष्व
ति पंकजान्॥ एतावदुक्त्वा तत्र त्वं गतस्तामाशु पार्थिव॥२५॥ तत्र स्थितस्त्वया दृष्टो महान्वैता
निको विधिः॥ देवक्या सहितो यत्र पूज्यते भगवान्हरिः॥२६॥ गोकुलं नंदगोपाश्च वसुदेवश्च राम
रोहिणी॥ यशोदा बलभद्रश्च गोपीजनसमन्वितं॥२७॥ तत्र त्वया तु यत्नेन तैः पुष्पैरर्चनं कृ १४९

तं॥ शेषैस्तु प्रकरस्तत्र चतुर्दिक्षु कृतस्तदा॥२८॥ तं दृष्ट्वा विस्मिता सा तु केनेहाप्यर्चनं कृतं॥ इ
ति पृष्टास्त्वया सर्वे तामाचख्युर्जनास्त्वरं॥२९॥ तुष्टा तु सा तदा सा तु ददौ वित्तं यथाविधि॥ न
गृहीतं त्वया वित्तं भोजनेन तु मंत्रितः॥३०॥ न कृतं भोजनं तत्र न तु वित्तं गृहीतवान्॥ त्वया च वि
धियुक्तेन पूजितोसौ हरिर्निशि॥३१॥ ततः प्रभाते त्वं तत्र रक्षैश्चक्षुश्रिणं त्वया नरं॥ विश्रंभयि
त्वा तां देवीं निर्गतोसि यथेच्छया॥३२॥ त्वया मज्जन्मनि त्वेतत्प्रसंगात्तु कृतं कृतं॥ तस्य पुण्यप्रभा
वेन राज्यं प्राप्तं त्वया शुभं॥३३॥ ॥हरिश्चंद्र उवाच॥ ॥केन नाम विधानेन कस्मिन्मासि च का ति
थिः॥ कर्त्तव्यं तन्ममाचक्ष्व त्वत्प्रसादोस्मि ते यदि॥३४॥ ॥सनत्कुमार उवाच॥ ॥शृणु राज
न्प्रवक्ष्यामि व्रतं स्वामिव्रतानामुत्तमं व्रतं॥ श्रावणस्य तु मासस्य कृष्णाष्टम्यां नराधिप॥३५॥ रो
हिणी यदि लभ्येत जयंती नाम सा तिथिः॥ कार्या तु सप्तमीविद्धा रोहिणीसहिता यदि॥३६॥ अ
र्द्धरात्रे तु रोहिण्यां सुपोष्यास्तु महत्फलं॥ विधानं तस्य वक्ष्यामि यत्कृत्वा न पुनर्भवः॥३७॥ उपो

 षितस्तु नत्राक्लिस्तात्वा कृष्ण तिलैः शुभैः॥ स्थापयेद्व्रणं कुंभं पंचरत्नसमन्वितं॥ ३८॥
 सर्वौषधिसमायुक्तं वस्त्रयुग्मेन वेष्टितं॥ तस्योपरि न्यसेत्पात्रं सौवर्णं च सुलेहणं॥ ३९॥
गोकुलं च ततो लेख्यं देवकीकृष्णसंयुतं॥ दर्शमानं सा पुत्रं स्तनं विस्मितमानसा॥ ४०॥ पि
बंतं च स्तनं मातुरपरं पाणिनास्पृशत॥ सौवर्णं कारयेदेवं यावच्छक्ति सुविद्यते॥ ४१॥ तद्वद्
रोहिणी कार्या सौवर्णी वाथ राजसी॥ एवं कृत्वानु गोविंदं मात्रा सह जगत्पतिं॥ ४२॥ पूजयेद्वि
धिवज्ज्ञात्मा मंत्रैरागमसंभवैः॥ य इदं कुरुते राजन् श्रृणुते वा समाहितः॥ ४३॥ सम्यक्फल
मवाप्नोति जयंतसमुपोषणात॥ स्मरणात्कीर्तिनात्पापं सप्तजन्मार्जितं च यत॥ ४४॥ जयंतिर्दह
तीन्दणं किमन्यद्वोपवासितं॥ कृष्णजन्माष्टमी लोके प्रसि पापनाशिनी॥ ४५॥ क्रतुको
टिसमा ह्येषा तीर्थायुतशतैरपि॥ कपिलागोसहस्राणि यो ददाति दिने दिने॥ ४६॥ तत्तुल्यंस
मवाप्नोति जयंत्यां समुपोषणात॥ हेमभारसहस्राणि कुरुक्षेत्रे प्रयच्छति॥ ४७॥ रत्नकोटिसह

स्राणि तिलकोटिशतानि॥ तत्फलं स०॥ ४८॥ ससागरां धरां चैव दत्वा यत्फलमश्नुते॥ अधि
कं फलमाप्नोति जयंत्यां स०॥ ४९॥ कृष्णाजिनसहस्राणि यो ददाति द्विजोत्तमे॥ तत्फलं सम
वा०॥ ५०॥ कन्याकोटिप्रदानेन यत्फलं कविभिः स्मृतं॥ तत्फलं समवा०॥ ५१॥ वापीकूपतडा
गानि देवतायतनानि च॥ कृत्वा यत्फलमाप्नोति जयंत्यां०॥ ५२॥ मातापित्रोर्गुरूणां च भक्तिशु
श्रूषतां नृणां॥ तत्फलं स०॥ ५३॥ वनाश्रमेषु वसतां तापसानां च यत्फलं॥ तत्फलं समवाप्नोति
०॥ ५४॥ गवार्थे ब्राह्मणार्थे वा स्वाम्यर्थे संत्यजेत्तनुं॥ तत्फलं०॥ ५५॥ वस्तु वर्षशतं यश्चाग्नि
होत्रमुपासते॥ तत्फलं०॥ ५६॥ यत्फलं श्राद्धदानेन पितॄणां पिंडसंकृते॥ तत्फलं कोटि
गुणितं कृष्णजन्माष्टमीव्रते॥ ५७॥ स्वज्ञानेन तु पसा पंचाब्दं नक्तभोजनं॥ तत्फलं जीयते पुं
सां जयंत्यां भोजने कृते॥ ५८॥ गृध्रं मांसं खरं काकं श्वानं चाराजसत्तम॥ मांसं च विपरान्नु
कें कृष्णजन्माष्टमीव्रते॥ ५९॥ कृष्णाष्टमीदिने प्राप्ते यो भुंक्ते हि द्विजोत्तमः॥ त्रैलोक्यसंभवं

व्र.ता.० पापचतुष्कं तेन संज्ञायः॥६०॥ कोटिजन्मार्जितं पापं जानताज्ञानता कृतं॥ प्रसादाद्देवकी
१५२ सूनोर्यमार्ष्टं न विलीयते॥६१॥ तुष्ट्यर्थं देवकीसूनोर्जयंतिसमुपोषिता॥ कृत्वारामे महीं
तुष्टा प्राप्त कीर्तिं च शाश्वतीं॥६२॥ जयंत्यामुपवासेन विष्णुदेहे लयं व्रजेत्॥ तस्मात्सर्वप्र
यत्नेन कुरुष्व नृपसत्तम॥६३॥ एतत्ते सर्वमाख्यातं यत्पृष्टोहं त्वयानघ॥ अस्याः श्रवणमात्रे
ण सर्वपापैः प्रमुच्यते॥६४॥ ॥इति श्रीभविष्योत्तरपुराणे जन्माष्टमीव्रतकथा समाप्ता॥ ॥यु
धिष्ठिर उवाच॥ ॥अथ पूजनविधिं ब्रूहि देव देव दयानिधे॥ येन संपूर्णतां याति व्रतमेतदनुत्त
मं॥ कृष्ण उवाच॥ ॥ प्रयाति तिथि मनुप्राप्य वित्तविद्यादिसंयुतः॥ सर्वैर्युक्तः कृतकार्यः स्वये
न्मां संस्मरन्हृदि॥ प्रातरुत्थाय संस्मर संपुण्यश्लोकान्समाहितः॥ निर्वर्त्यावश्यकर्म ब्राह्मणान्
स्वस्ति वाचयेत्॥ गुरुमानीय धर्मज्ञं वेदवेदांगपारगं॥ वृणुयादृत्विजश्रेष्ठं वस्त्रालंकरणादि राम १५२
भिः॥ पलेन वा तदर्धेन तदर्धार्धेन वा पुनः॥ रम्या वा कारयेत्तु वित्तशाठ्यविवर्जितः॥ सौ

DR BHAU DAJI

वर्णीं प्रतिमां कृष्णस्य पाद्यार्घ्याचमनीयकं॥ पत्रीं संपाद्य विधिवत्सर्वोपकरणं तथा॥ गो
चर्ममात्रं संलिप्य मध्ये मंडलमाचरेत्॥ ब्रह्माद्या देवतास्तत्र स्थापयित्वा प्रपूजयेत्॥ मं
डपं रचयेत्तत्र कदलीस्तंभमंडितं॥ चतुर्द्वारसमोपेतं फलपुष्पादिसंयुतं॥ वितानं तत्र बध्नी
याद्विचित्रं चैव शोभितं॥ मंडपे स्थापयेत्कुंभं ताम्रं वा मृन्मयं शुचिः॥ तस्योपरि न्यसेत्पात्रं राजं
वैणवं तु वा॥ वाससाच्छाद्य कौंतेय पूजयेत्प्रतिमां बुधः॥ उपचारैः षोडशभिर्मंत्रैरेभिः समा
हितः॥ ध्यात्वा बाल्यामती कृष्णसागरादि निरादरान्॥ ध्यात्वा चतुर्भुजं देवं शंखचक्रगदाध
रं॥ पीतांबरयुगोपेतं लक्ष्मीयुक्तं विभूषितं॥ श्रीवत्सकौस्तुभशोभाढ्यं मेघश्यामं सुलोचनं॥
॥ ॥ध्यानं॥ ॥ आगच्छ देववरदेव जगद्योने रमापते॥ युक्तेत्यस्मिन्नधिष्ठाने सन्निधेहि कृपां कुरु॥
आवाहनं॥ स्वदेव जगन्नाथ गृहाणासनमेनमं स्थितः॥ गृहाणासनं दिव्यं जगत्तात नमोस्तुते॥
आसनं॥ नानातीर्थाहृतं शुद्धं निर्मलं पुष्पमिश्रितं॥ पाद्यं गृहाण देवेश विश्वरूप नमोस्तुते॥ पा

व्रत० द्यं॥ गंगादिसर्वतीर्थेभ्यो मयानीतं शुचीतलं॥ गृहाणाचमनं कृष्ण विश्वकाय नमोस्तु ते॥ आ
१५२ चमनीयं॥ गंधपुष्पाक्षतोपेतं फलेन च समन्वितं॥ अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः॥
अर्घ्यं॥ दधिक्षौद्रघृतं शुद्धं कपिलायास्तु गंधियत्॥ सुस्वादं मधुरं शौरे मधुपर्कं गृहाण मे॥ मधु
पर्कं॥ पुनराचमनं॥ पंचामृतेन स्नपनं करिष्यामि सुरोत्तम॥ क्षीरोदधिनिवासाय लक्ष्मीकां
तायते नमः॥ पंचामृतं स्नानं॥ मंदाकिनी गौतमी च यमुना च सरस्वती॥ ताभ्यः स्नानार्थमा
नीतं गृहाण त्रिरंजनं॥ स्नानं॥ पुनराचमनं॥ शुद्धजांबूनदप्रख्यं तडिद्भासुरोचिषी॥ म
योपपादिते कृष्ण वाससी प्रतिगृह्यतां॥ वस्त्रं॥ पुनराचमनीयं॥ यज्ञोपवीतं॥ किरीटकुंडला
दीनि कांचीवलययुग्मकं॥ कौस्तुभं वनमालां च भूषणानि भज स्वभो॥ भूषणानि॥ मलयाच राम
लसंभूतं गंधसारं मनोहरं॥ हृदयानंदनं चारु श्रीखंडं प्रतिगृह्यतां॥ चंदनं॥ मालतीचंपका १५२
दीनि यूथिकाबकुलानि च॥ तुलसीपत्रमिश्राणि गृहाणास्तु रत्नम॥ पुष्पाणि॥ अथप

रिवारदेवतापूजा॥ देवकीवसुदेवं च रोहिणीं सबलां तथा॥ सात्यकिश्चोद्धवाक्रूरातुग्रसेना
दियादवान्॥ नंदयशोदा तत्काले व्रजस्ता गोपगोपिका॥ कालिंदी कालिंश्चैव पूजयेन्नाममंत्रतः
॥ वनस्पतिरसोद्भूतकालागरुसमन्वितं॥ धूपं गृहाण गोविंद गुणसागर गोपते॥ धूपं॥ आ
ज्यं च वर्तिसंयुक्तं॥ दीपं॥ नैवेद्यं गृह्यतां देव नैवेद्यं॥ शाल्योदनं पायसं चलिताघृतवि
मिश्रितं॥ नानापक्वान्नसंयुक्तं नैवेद्यं प्रतिगृह्यतां॥ नैवेद्यं॥ पुनराचमनीयं॥ पूगीफलं
महद्दिव्यं नागवल्लीदलैर्युतं॥ कर्पूरादिसमायुक्तं तांबूलं प्रतिगृह्यतां॥ तांबूलं॥ इदं फलमि
ति फलं॥ हिरण्यगर्भगर्भस्थमिति दक्षिणां॥ नीराजयेन्नमो नक्षामगजसमुद्रापेत॥ जयमं
गलनिर्घोषादिव हे वं समर्चयेत्॥ दत्वा पुष्पांजलिं त्वद्य दक्षिणां च पुरःसरं॥ प्रणम्य देवदेव
स्नेहो भक्तिप्रकः पुनः पुनः॥ कृत्वा नानाविधैः स्तोत्रैः प्रार्थयितव्यो सति॥ नमस्तुभ्यं जगन्ना
थदेवकीतनयप्रभो॥ वसुदेवात्मजानंत यशोदानंदवर्धन॥ गोविंद गोकुलाधार गोपीकांत न

व्रता॰ १५४

मोस्तु ते॥ ततस्तस्मै प्रदद्यादर्घ्यं इंदोरुदयतः शुचिः॥ कृष्णाय प्रथमं दद्याद्देवकीसहिताय
च॥ नारिकेलेन शुभ्रेण दद्यादर्घ्यं विचक्षणः॥ कृष्णाय परया भक्त्या शंखे कृत्वा विधानतः
॥जातः कंसवधार्थाय भूभारोत्तारणाय च॥ गृहाणार्घ्यं मया दत्तं देवकीसहितो हरे॥ कृष्णा
र्घ्यमंत्रः॥ तारवे कृत्वा ततः तोयं सपुष्पफलचंदनं॥ जानुभ्यामवनीं गत्वा चंद्रायार्घ्यं नि
वेदयेत्॥ क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव॥ गृहाणार्घ्यं मया दत्तं रोहिणीसहितः शशा
ङ्क॥ ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषांपते॥ नमस्ते रोहिणीकांत गृहाणार्घ्यं नमोस्तु ते॥
चंद्रार्घः॥ इत्यर्घं प्रदाय देवेभ्यो रात्रौ जागरणं चरेत्॥ गीतवाद्यादिना चैव पुराणश्रवणादिभिः॥
प्रत्यूषे विमले स्नात्वा नंदं सज्जप्य गोकुले॥ पायसेन तिलाज्येन [illegible] मंत्रेण नतिस्त॥ अ राम
ष्टोत्तरशतं कृत्वा ततः पुरुषसूक्ततः॥ इदं विष्णुरिति प्रोक्ता जुहुया[illegible]द्यताकृतिः॥ होमशे १५३
षं समाप्याथ स्वर्णं दत्वा पुरःसरं॥ आचार्यं पूजयेत्तत्र भूषणाच्छादनादिभिः॥ गामेकां क

पिलां दद्याद्वृतं शक्तितो नवो॥ पयस्विनीं सुशीलां च सवत्सां सगुणां तथा॥ स्वर्णशृंगीं रौप्यखु
रां कांस्यदोहनिकायुतां॥ रत्नपुच्छां ताम्रपृष्ठां स्वर्णघंटासमन्वितां॥ व[illegible]स्त्रच्छन्नां दक्षिणाया
मेवं संपूर्णतां यजेत्॥ कपिलायाश्च भावे वि गौर्देया प्रदीयते॥ ततो दद्याच्च केति प्रोक्तः स
न्यश्च यथार्हतः॥ ब्राह्मणान्भोजयेत्पश्चाद्दापयेत्तेभ्यश्च दक्षिणां॥ कलशान्नत्र संपूर्णान्दद्या
द्देवसमाहितः॥ प्राप्यानुज्ञां तथा तेभ्यो भुंजीत सह बंधुभिः॥ एवं कृते महाराज व्रतोद्यापनक
र्मणि॥ निःपापस्तत्क्षणाद्देवं जायते विबुधोत्तमः॥ पुत्रपौत्रसमायुक्तो धनधान्यसमन्वितः॥ भु
क्त्वा भोगान्चिरं काले अंते मम पुरं व्रजेत्॥ ॥इति श्रीभविष्योत्तरपुराणे कृष्णसंवादे युधिष्ठि
रसंवादे सोद्यापनं जन्माष्टमीव्रतं॥ ॥अथ श्रुत कृष्ण [illegible] ॥ इदं च मे हायोग
वशेन पूर्वविद्धायां परविद्धायां वा कार्यं॥ दिनद्वयेन योगे परैव पूर्वे द्युत्रौ तद्योगे तु पूर्वे
वा॥ जेष्ठा हजनं लैंगे॥ कंसादाककृष्णमीशुक्लार्धेन्दुर्भवेद् महती स्मृता॥ अजसीपरिहागय

ज्येष्ठां नैव प्रपूजयेत्॥ कन्यार्कयोगो तत्र केवलं स्नावकथ एव॥ मासस्तु॥ भाद्रपदश्चांद्र एव ग्रा
ह्यः॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते॥ इत्युक्ति यस्मिन् दिने कुर्यात्॥ ज्येष्ठायाः परित्य
जनमिति माधवीये स्कांदोक्तेः॥ अस्यापवादः॥ तत्रैव॥ यस्मिन् दिने भवेज्ज्येष्ठा मध्याह्ना
दूर्ध्वमप्यणु॥ तस्मिन्नेव विधं पूजा च न स्नानादेत्सर्वकामदेति॥ विपरीतं प्रत्यादिना तत्र र्व
दिने नुराधायामावाहनं उत्तरदिने मूले च विसर्जनं॥ तथा च स्कांदे॥ मैत्रेणावाहयेद्दे
वि ज्येष्ठायां तु प्रपूजयेत्॥ मूले विसर्जयेद्देवीं ज्येष्ठायां तु प्रपूजयेत्॥ मूले विसर्जयेद्देवीं त्रि
दिनं व्रतमुत्तममिति हेमाद्रौ भविष्ये॥ ॥युधिष्ठिर उवाच॥ ॥मृतवंध्या तु या नारी काकवं
ध्या तथापरा॥ गर्भस्रावा तु या च ना नारी दोषैः प्रदूषिता॥ निर्धनाश्च नरा ये च दारिद्र्येण महता
न्विताः॥ कर्मणा केन मुच्यंते तन्मे ब्रूहि जनार्दन॥ ॥श्रीकृष्ण उवाच॥ ॥मासि भाद्रपदे शुक्ले
ज्येष्ठर्क्षे यदा भवेत्॥ रात्रौ जागरणं कुर्यात् गीतवादित्रनिस्वनैः॥ एवं विधविधानेन निर्मं

ज्येष्ठां प्रपूजयेत्॥ एह्येहि त्वं महाभागे सुरासुरनमस्कृते॥ ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भव॥ आ
वाहनं॥ श्वेतसिंहासनस्था तु श्वेतवस्त्रैरलंकृता॥ वरदं पुस्तकं पाशं बिभ्रती ते नमो
नमः॥ आसनं॥ ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनी॥ क्षीराब्धौ तु समुद्भूते अर्घ्यं ज्येष्ठे न
मोऽस्तु ते॥ अर्घ्यं॥ शार्ङ्गबाणं खड्गं च प्रासतोमरदर्पणैः॥ अग्रे रम्यायुधैर्युक्ता ज्येष्ठे त्वामर्च
याम्यहं॥ सुरासुरनरैर्वंद्ये यक्षकिन्नरपूजिता॥ पूजितासि मया देवि ज्येष्ठे त्वामर्चयाम्यहं॥ पूजा
मंत्रः॥ त्वं लक्ष्मीस्त्वमुमा देवि त्वं ज्येष्ठे सर्वचामरैः॥ पूजितासि मया देवि वरदा भव मे सदा॥ प्रार्थना॥
पुत्रदारविहीनार्थं लक्ष्मीश्चैव विलक्षये॥ अलक्ष्म्याश्च विनाशाय सर्वकालं द्विजोत्तम॥ गुरुसंपूज
येद्भक्त्या वस्त्रैराभरणादिभिः॥ बाद्रौ वनु वर्षाणि पूजनीया प्रयत्नतः॥ यावज्जन्म तथा सर्वं वि
धिना नेनमानवैः॥ ददाति वित्तं पुत्रांश्च अर्चनीया सदा स्त्रिया॥ अनेन विधिना पुत्रो यो हि पूज
यते नरः॥ नारी वा भक्त येत्से तां तस्यान लक्ष्मी विवर्द्धते॥ वंध्या तु जनते पुत्रान् द्भगास्तु भगा भवेत्॥

मृतवत्साजीवपुत्रिकाकवंध्याप्रजावती॥ दुःखितो हि नरः कश्चित्सर्वदा स सुखी भवेत्॥ एवंविध
विधाने तु ज्येष्ठायास्त्वर्चयेन्नरः॥ विद्यालक्ष्मीप्रगल्भंति यया सुलक्षणं तया॥ यथाप्राप्तं कुलश्रेष्ठ
ज्येष्ठायाज्ञेनैनं व्रतं॥ नीराजने कृते चैव दीपो ग्राह्यः सुभक्तितः॥ नैवेद्यसहितं प्राश्य व्रती त्व
ग्रे युधिष्ठिर॥ गुरुहस्तात्सदा ग्राह्यो दीपः प्रज्वलितो महान्॥ व्रतस्थो भक्तियुक्तस्तु शुचिः प्रा
यतमानसः॥ अनेन विधिना चैव व्रतं प्राप्य युधिष्ठिर॥ ज्येष्ठा नाम परा देवी भुक्तिमुक्तिफलप्रदा॥
यस्तु पूजयते राजन् तस्मै स्वर्गं प्रयच्छति॥ तत्रैव स्कांदे॥ मार्गशिरे पदेस्य शुक्ले पक्षे ज्येष्ठर्क्षसंयुते॥
यस्मिन् कस्मिन् दिने कुर्यात् ज्येष्ठापापरिपूजनं॥ तत्राष्टम्यां प्रदावारो भानोर्ज्येष्ठर्क्षमेव च॥ नी
लज्येष्ठेति मासोक्ता दुर्लभा बहु कारिका॥ कृतःस्नानो नरः कुर्यात्स्नानमंत्रवादिने॥ भक्तियु
क्तः शुचिः कुर्याज्ज्येष्ठादेव्यास्तु पूजनं॥ ध्यात्वा सर्वे युगलकमलिकताः शुभदे ज्ञाना॥ देवि रू
पं तु नैवेद्यकत्वात्तु ब्राह्मणैः सह॥ मंडले तां तु संस्थाप्य देवी हेममयी ततः॥ स्थापयेत् ज्ञातीता

म्री लेख्या वा पटे कुड्य योः॥ आवाहयेत्ततो देवीमयवा उत्तकेपि वा॥ त्रिलोचनां शुक्लदंतीं
बिभ्रतीं राजतीं तनुं अविरक्तां रक्तनयनां ज्येष्ठामावाहयाम्यहं॥ इति मंत्रेण तां देवीमावाह्य सुभ
क्तव्रती॥ स्नानं तथा स पापाद्यं ---पादयोर्द्विज॥ श्रीखंडकर्पूरयुक्तं दद्यात्तु॥ अर्घ्यं तथा चर्मि
नी॥ नत्वा मया प्रयत्नेन यत्तं रियते तव॥ नमस्ते सुरेशानि ज्येष्ठे श्रेष्ठे नमो नमः॥ इत्युच्चार्य
सुवर्णादि पात्रेणं जलिना पि वा॥ अर्घ्यं दद्यात्ततो देवी गंधपुष्पैस्तथार्चयेत्॥ गोधूममयकासा
दितवत्सैस्तुपारयेत्॥ ततः प्रसमात्रैस्तु शर्करकोटी निमर्पिषा॥ निवेदयेत्तु तैरेव दद्यांद
वै प्रयत्नतः॥ ततस्तु त्वां महादेवी सर्वकामफलप्रदां॥ ज्येष्ठायै ते नमस्तु संश्रेष्ठायै ते नमो नमः
॥ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मीष्ठे सत्यवादिनी॥ एह्येहि त्वं महामाये अर्घ्यं गृह्ण सरस्वती॥ अ
र्घ्यस्तुत्वोक्तास्तोत्र संपत्सांगीतानिपुरस्ततः॥ सौवीरैः श्वेवसंयुक्तं दद्याद्धूपं सम्यक् च॥ सुवा
सिनीः सन्ध्यान्नाह्यातवे सुकृतं व्रती॥ ततो देवीमनुज्ञाप्य ततो भुंजीत वाग्यतः॥ नरूपित्वा

तदाचम्य देवीं नत्वा पुनः पुनः॥ गायत्री तद्ब्रह्मचर्येण कुर्यात्प्रातर्विसर्जनं॥ एवमेव प्रकुर्याद्धि व्र
तं तु प्रति वत्सरं॥ विसर्जनांते तु ततः त्रिकत्तावारि निक्षिपेत्॥ अष्टपवरकान्दद्याद्ब्राह्मणेभ्य
स्ततो द्विजः॥ कुर्यादेवं प्रयत्नेन सायं वाय विसर्जयेत्॥ विद्यार्थी प्राप्नुयाद्विद्यां स्त्रीकामः स्त्रियमे
व च॥ शिवस्मरणकारि तु देव्यै दद्यात्सौभाग्ये॥ सौवर्णं राजतं ताम्रं कृतं कृत्स्नं नवेत्तदा॥ व्रतं
स्वयं च कृतवान्सिद्धं वाप्य कृतार्हणः॥ देव्या मतत्वं कथितं तवेदं विधिश्च मंत्रास्तु स्तनन्ते
युतस्तथा॥ मंत्रोऽपि सायुज्यकरो व्रतस्य तस्या मया ते कथितं सदेवे॥ अथ ध्यानमाह॥ ॐ ज्येष्ठायै
नमः॥ श्रेष्ठायै० यस्याः सिंहो रथे युक्तो व्याघ्रश्चापि महाबलः॥ ज्येष्ठां महामीमां देवीं प्रपद्ये
त्वा शरणं शुभां॥ नामाग्निवर्णां तपसा ज्वलंतीमिति॥ आवाह्यापोहिष्ठेति तिसृभिर्हिरण्यवर्णे राम
ति च सप्तभिरभिषिंचेत्॥ नाम्ना यद्विष्ठरं दत्वा पाद्यमर्घ्यमथासनं॥ स्नानमाचमनं चैव मधु १५६
पर्कोपवीतकं॥ गंधं पुष्पं तथा धूपं दीपं नैवेद्यमेव च॥ पुनराचमनं चैव कारयित्वा वि

DR BHAU DAJI MEMORIAL

सर्जयेत्॥ ज्येष्ठायै० सत्यायै० कांतिप्रियायै० विद्यायै० विनायकायै० ताप्यै० श्रियै० कृष्णायै०
एभिर्नामभिस्तर्पणं होमं दधिमधुक्षीरघृतैः कुर्यात्सुसंयतः॥ हविष्यं स्वयमश्नीयाद्ब्राह्मणांस्ते
न भोजयेत्॥ अनेन विधिना यस्तु ब्राह्मणानां चतुष्टयं॥ व्रतांते प्रतिमां कुर्यात्सौवर्णीं पञ्चसंमि
तां॥ कृष्णवस्त्रेण संयुक्तां नाचार्याय निवेदयेत्॥ वस्त्राभरणमाल्यानुलेपनैः प्रजितं द्विजं॥ प्र
णिपत्य ततः पश्चात्तस्मै सर्वं निवेदयेत्॥ ब्राह्मणाश्चकृतं वंतस्ते प्रकुर्युः स्वस्तिवाचनं॥ एवं कृते
व्रते सम्यक् सर्वशांतिः प्रजायते॥ धनधान्यसमृद्धिश्च आरोग्यं च प्रजायते॥ ॥इति भविष्यो
त्तरे ज्येष्ठाव्रतं॥ ॥अथैव दूर्वाष्टमीव्रतं॥ ॥इदं दूर्वाविद्धायां कार्यं॥ श्रावणी दुर्गनवमी दूर्वा वि
वहुताशिनी॥ पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति वृहद्यमवचनात्॥ शुक्लाष्टमी
तिथिर्या तु मासे भाद्रपदे भवेत्॥ दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयत इति हेमाद्रिमदनरत्न
धृतसमुच्चयवचनात् मुहूर्ते गेहिणे ष्टम्यां दूर्वा वायदि वापरा॥ दूर्वाष्टमी तु सा कार्या ज्येष्ठा मूल

व्रता० १५७ चविवर्जयेदिति परेप्युक्तं॥ तत्सर्वत्र ज्येष्ठामूलयोगे कर्मकालव्याप्त्यभावे चंद्रव्याप्त्यभावे च ज्ञेय
ष्टव्यं दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलेन संयुता॥ तथा प्राप्ते भाद्रपदे मासि शुक्लाष्टम्यां व्रता
रत॥ दूर्वामभ्यर्चयेत्तत्र ज्येष्ठामूलं च वर्जयेत्॥ ऐंद्रर्क्षेऽर्चिता दूर्वा हंति पापानि नान्यथा॥ भ
र्तुरायुर्हरा मूले तस्मात्तां परिवर्जयेदिति मदनरत्ने स्कांदे॥ शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्ट
मी॥ सिंहार्क एव कर्तव्या न कन्यार्के कदाचन॥ सिंहस्थ सोत्तमा सूर्येनुदिते मुनिसत्तम॥ तत्रै
व॥ अगस्त्य उदिते तात पूजयेदमृतोद्भवां॥ वैधव्यं पुत्रशोकं च दद्याज्जन्मनि पंच चेति॥ यदा
तु भाद्रशुक्लाष्टम्यामगस्त्योदयस्तदा तत्पूर्वं कन्याष्टम्यां कार्या॥ शुक्लपक्षज्ञानेपि पूर्णिमांत
मानेन भाद्रपदमासत्वाभावेन॥ यदा तु भाद्रपदोधिकस्तदा सिंहार्क एवेति इत्युदाहृतमत्र ना राम
धिमासे तु संप्राप्ते न स्यादुदये मुनेः॥ दूर्वागिव्रतं कार्यं परतो न कुत्रचिदिति निर्णयदी १५७
पे स्कांदे च॥ इदं स्त्रीणां नित्यं॥ यो न पूजयेत्ते दूर्वां मोहादिह यथाविधि॥ त्रीणि जन्मानि वैध

व्यं तस्येनात्र संशयः॥ तस्मात्संपूजनीया सा प्रतिवर्षं वधूजनैरिति पुराणसमुच्चयात्॥ यदा तु
ज्येष्ठादिकं विना सर्वथाष्टमी न लभ्यते॥ कदाचित्तस्मिन्नेकस्मिन्केन ज्येष्ठामूलं न यदा न वेत्॥ दूर्वा
मर्चयित्वा नवं धान्यं दिवसे नयेदिति॥ भविष्योत्तरादनुकल्पेनानुष्ठानेन सर्वथा व्रतादिलोपः॥
॥॥ अथ व्रतं हेमाद्रौ भविष्ये॥ ॥ ब्रह्मन्भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः॥ पूजयेच्छंकरं भ
क्त्वा यो नरः श्रद्धयान्वितः॥ स याति परमं स्थानं यत्र देवस्त्रिलोचनः॥ गणेशं पूजयेद्यस्तु दूर्वया
सहितं मुने॥ गणेशः शिवः फलानां कलशैर्दिव्यैर्गंधपुष्पैर्विलेपनैः॥ दूर्वां पूजयते ज्ञानं मुच्य
ते सर्वपातकैः॥ शुचौ देशे प्रजातायां दूर्वायां ब्राह्मणोत्तम॥ स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः स
मर्चयेत्॥ खर्जूरैर्नारिकेलैश्च मातुलिंगफलैस्तथा॥ पूजयेच्छंकरं भक्त्या दूर्वायां विधिवद्द्विज॥
दध्यक्षतैर्द्विजश्रेष्ठ एवं संपूज्य त्रिलोचनं॥ दूर्वा समीप्या संस्मरन्मानवः श्रद्धयान्वितः॥ सर्वैः सु
कृतजन्मप्राप्यं सर्वदेवैः स्तुवंदिनः॥ विद्यां प्राप्नोति विद्यार्थी पुत्रार्थी पुत्रमाप्नुयात्॥ धर्मार्थी

व्रता० धर्ममाप्नोति कं स्वार्थी लभते च वतां ॥ धनसायद्यदिच्छेत तत्तदवाप्नोति मानवः ॥ य एवं पूजयेद्दूर्वां
१५८ भूते शं मानवः फलैः ॥ त्वं दूर्वे ऽमृतजन्मासि वंदितासि सुरासुरैः ॥ सौभाग्यं संततिं देहि सर्वान्
कामांश्च देहि मे ॥ यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले ॥ तथा विस्तृतसंतानं देहि त्व
मजरामरे ॥ दूर्वामंत्रः ॥ तल्लिंगमंत्रैरीशानमर्चयेत्प्रयतः शुचिः ॥ ततः संपूजयेद्विप्रान्फलै
र्नानाविधैर्द्विजैः ॥ अनग्निपक्वमश्नीयाद्दध्यन्नं दधिफलं तथा ॥ अक्षारलवणं ब्रह्मन्नश्नी
यान्मधुरान्वितं ॥ दद्यात्सुलानि विप्रेषु फलाहारः स्वयं भवेत् ॥ प्रणम्य शिरसा दूर्वां शिवं शि
वमुपाश्नुते ॥ य एवं कुरुते भक्त्या महादेवस्य पूजनं ॥ गणत्वं याति सौ ब्रह्मन्मुच्यते ब्रह्महत्यया
॥ एवं पुण्या पापहरा अष्टमी दूर्वसंज्ञिता ॥ चतुर्णामपि वर्णानां स्त्रीजनानां विशेषतः ॥ आदित्यपु राम
राणे तु श्रीपूजनमुक्तं ॥ शुक्लाष्टम्यां तु संप्राप्ते मासि भाद्रपदे तथा ॥ दूर्वां प्रतानसु श्वेतमुत्त १५८
रशाखिगामिनीं ॥ पूजयेद्गृहमानीय गंधमाल्यानुलेपनैः ॥ फलमूलैस्तथा चैव ह्रीपधूपैर्विसर्ज

येत् ॥ अग्निपक्वं तथा सर्वं तत्र निवेदयेत् कथंचन ॥ भोक्तव्यं च तथा ब्रह्मन्नग्निपक्वविवर्जितं ॥ दूर्वा
कुरस्पर्शसंस्पर्शविधिना यो वनेऽश्रियं ॥ यौवनं स्थिरमाप्नोति यत्र यत्राभिजायते ॥ तत्र विष्णोत्तरे तु वि
शेषः ॥ अष्टम्यां फलपुष्पैश्च खर्जूरैर्नारिकेरकैः ॥ द्राक्षामोदकपिष्टैश्च बदरैर्लकुचै
स्तथा ॥ नारंगैर्जंबिकैराम्रैर्बीजपूरैश्च दाडिमैः ॥ दध्यक्षतैः स्रजोभिश्च धूपनैवेद्यदीपकैः
॥ मंत्रेणानेन राजेंद्र सर्वेषु धावहितो मम ॥ त्वं दूर्वे ऽमृतनामासि इत्यादि मंत्रः ॥ ब्राह्मणः ॥ दत्वा पिष्टनि वि
प्रेभ्यः फलं च विविधं प्रभो ॥ तिलपिष्टकगोधूममाषा पिंडानि पांडव ॥ भोजयित्वा सुहृन्मि
त्रसंबंधी स्वजनांस्तथा ॥ ततो भुंजीत तच्छेषं स्वयं श्रद्धासमन्वितः ॥ कर्तव्या चैकभक्तेनाष्टा
मलेयरा भवेत् ॥ दूर्वामभ्यर्च्य यत्नेन ज्ञानवं ध्यं दिवसं नयेत् ॥ पक्षे भाद्रपदस्यैवं शुक्लाष्टम्यां यु
धिष्ठिर ॥ दूर्वाष्टमीव्रतं पुण्यं यः करोति हि मानवः ॥ स तत्सर्वमाप्नोति संतानं सप्तपौरुषं ॥ नं
दते वर्द्धते नित्यं यथा दूर्वा तथा कुलं ॥ इति दूर्वाष्टमी ॥ ॥ भाद्रशुक्लाष्टमीमारभ्य षोडशदिनपर्यंतं

व्रता० १५८

महालक्ष्मीव्रतं॥ तच्चार्धरात्रिकमवर्तिन्यां मष्टम्यां कार्यं॥ तदुक्तं चंद्रप्रकाशे स्मृत्यंतरे॥ अर्ध
रात्रमतिक्रम्य वर्त्तते यो तरा तिथिः॥ तदा तस्यां नरैः कार्यं महालक्ष्मीव्रतं सदेति प्रारंभस्तु स्यां
ज्येष्ठायुतायां कार्यः॥ तथा च स्कांदे॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठायुताष्टमि॥ प्रारभेत व्रतं
तत्र महालक्ष्मीयतात्मनिरिति॥ तच्चाभावे केवलायामपि॥ समापनं तु पश्चात्कृष्णाष्टम्यां तच्चंद्रो
दयव्याप्त्वेवा कृष्णपक्षेऽष्टमी चैवेत्यादिव्याप्यिन्यां कार्यं॥ चंद्रोदयस्य व्रते चैव तिथिस्तात्कालिकी स्मृते मुक्ते
॥ दिनद्वये चंद्रोदयव्याप्त्वेवा कृष्णपक्षेऽष्टमी चैवेमादिवाकास्त्वर्वदिने वा परदिने चंद्रोदये तु रात्रे
मुहूर्त्तं चेत्परैव तदुक्तं मदनरत्ने पुराणसमुच्चये॥ सर्वापरविद्धा वा ग्राह्या चंद्रोदये सदा॥ त्रिमुहू
र्त्तापि सा ग्राह्या परतश्चोर्ध्वगामिनीति॥ ॥अथ व्रतविधिः॥ ॥हेमाद्रौ स्कांदे मदनरत्ने॥ ॥स्कंद उवाच॥ राम १५९
सौभाग्यजननं स्त्रीणां दौर्भाग्यपरिकृंतनं॥ परमैश्वर्यजननं तद्व्रतं ब्रूहि शंकर॥ ॥ईश्वर उवाच॥ ॥
साधु साधु महाबाहो यत्पृष्टोहं त्वयानघ॥ ततोहं संप्रवक्ष्यामि व्रतानामुत्तमं व्रतं॥ येन चीर्णेन न

नरो दुर्गतिं याति कर्हिचित्॥ सुभगा दुर्भगा वापि स्त्रियो न विधवा गृहे॥ अस्ति देव्या व्रतं पुण्यं महा
लक्ष्म्याः षडानन॥ नारीणां च नराणां च सर्वदुःखापहं तथा॥ ॥स्कंद उवाच॥ ॥ देवासुरमभूद्युद्धं
पूर्णमब्दशतं पुरा॥ यत्ते सुराणामधिपे देवानां च पुरंदरे॥ तत्र देवैर्महावीर्यैर्नारायणबलाश्रया
त्॥ असुरा निर्जिताः सर्वे पातालं तु न मायायुः॥ केचिच्च स्वर्गं गताः केचित्प्रतिष्ठातरूणाश्रयेयु॥
॥ गिरिदुर्गमथाश्रित्य केचित्तस्थुर्महाबलाः॥ तत्र कोलासुरो नाम महावीर्यो महाबलः॥ गोम
तं दुर्गमं दुर्गं गिरिमाश्रित्य निर्भयः॥ या राज्ञः कन्यका लोके रूपवत्यो मनोगुणाः॥ आनीय गिरि
दुर्गस्था रमयामास सर्वशः॥ रमयित्वा क्षिपत्यत्र कामरूपी विहंगमः॥ एतस्मिन्नेव काले तु
आगतो मुनिसत्तमो॥ श्रवसुतावसंपन्नो पुलस्त्यो गौतमः सह॥ तीर्थयात्राप्रसंगेन श्रुत्वा वा
क्यं जनस्य तं॥ कोलासुरेण जनितं कंपात्तेनौः शिखिध्वजः॥ तावूचतुर्जनं सर्वं मा गमः सोऽस्ति महा
मुनिः॥ येन तोयनिधिः पीतो वं धान्द्रिश्च निवारितः॥ वातापी ल्वजनामानो दैत्यो येन निवारितौ॥ त

व्रता० १६० गच्छामोवयंसर्वेकोलासुरवधायवै॥ इत्यामंत्र्यततः सर्वेगत्वातमभिवाद्यच॥ ऊचुःसर्वेप्
यावृत्तंकोलासुरविचेष्टितं॥ तच्छ्रुत्वाभगवानाहमैत्रावरुणिरग्रधीः॥ सृष्टिस्थितिविनाशानां
कारणंभक्तवत्सलः॥ तमस्माद्देवपश्यंति ब्रह्मविष्णुमहेश्वराः॥ विप्राः संध्यामूर्त्तिमत्यस्तेषां
शुश्रूषणेरताः॥ प्रविश्यताम्महालक्ष्मीशक्तिरूपेणसंस्थिताः॥ सर्वशक्तियुतादेवी लोकानां
हितकाम्यया॥ इत्युक्त्वात्वरितंगत्वाकोलासुरस्यवासये॥ निवेद्यनिखिलंतेस्मः तस्थुःप्रांजल
योजनाः॥ तच्छ्रुत्वानिखिलंतेभ्योब्रह्मविष्णुमहेश्वराः॥ संध्यात्रयंसमाहूयवाचंप्रोचुर्ज
नेश्वराः॥ वंशरुत्सुरवंदेंदुमौलिमालिकामंडलाः॥ हनिष्यतिमहालक्ष्मीर्युद्धेकोलासुरंरिपुं॥
भगवत्योमूर्त्तिमत्योदंडभृल्लारिनिर्वरैः॥ आयुधैर्विविधैःकृत्वाजयमाप्स्यथसंयुगे॥ यु राम
ष्माकंचमहायोसौपुष्पक्रोधसमुद्भवः॥ भरतनाथोभरतमस्मुर्वः सहायोभविष्यति॥ इत्युक्त्वा १६०
त्वरितंगत्वारुरुधुःकोलासुरंस॥ निरुध्यवपुरंदेव्योजगर्जुर्जलदस्वनाः॥ निर्ययौ[illegible]

श्वनक्रुधा॥ कोलासुरोपितच्छ्रुत्वाशोत्पपातमहासनात्॥ रोषेणःक्रोधताम्राक्षोमेरोरिवमहांतकः
॥ हस्त्यश्वरथपादातचतुरंगबलान्वितः॥ निर्ययौयोद्धुं कालिकायाइवाशनिः॥ सकुंडल
शिरस्त्राणःकवचीधृतबाणधीः॥ बद्धगोधांगुलीत्राणःक्रुद्धोवनरश्वापरः॥ ततोराक्षसैसैमंत
भरतनाथेनसंगतं॥ देवनारिमिनोस्त्रासियुद्धंचक्रेअतिभीषणं॥ महारवैर्भीमघोषैर्बाणक्रेंकारनि
स्वनैः॥ निस्वाननिनदैश्चैवलोकत्राश्मयोभवत्॥ जयंभीधिविवर्द्धतांधावताम्भिरेतरं॥ वद्द
धेसमरंघोरंमुष्टिमुष्टिकचाकची॥ उद्धतेराक्षसबलेभरतनाथेमहाबलः॥ ममर्द्दराक्षसा
नीकंशाबरैरपिदारुणैः॥ हतंदृष्ट्वासुरबलंक्रुद्धःकोलासुरोरणे॥ अभिद्रुत्यगदापाणिस्ताड
यामासभैरवं॥ ययौमूर्च्छांमहावीर्यस्तेनाभिरहनमस्तकः॥ ततोदेव्योतिवेगेनत्द्यभिद्रुद्रु
वुरुद्धये॥ त्रिशूलैरसिभिःघुस्तंपट्टिशौश्चप्रहारयन्॥ मुष्टिभिस्ताडयामासुर्नखरैश्च व्यदारय
यन्॥ पादाघातैःसमाजघ्नुःसिंहःकरिवरंयथा॥ सकुंडलशिरस्त्राणेदृष्टेरक्तलोचनः॥ कृतत्र

श्र०ता ६९

गुरिवक्रो सौराकृर्मसा मुकुर्मुकुः॥ गदया ताडयामास शिरःकंगमकुक्षिषु॥ बन्नंतु स्तागदां
तां नुसहंसः संमदाकुलाः॥ ततो धनुर्धरो त्वा बालजालमिवा किरन्॥ तासां शरीरमर्माणि
भिदन् शापुरो गमैः॥ ननाद बहु वैमौ हृदयं चाभितन्नु रैः॥ ततः क्रुद्धतरास्तास्तुसं पादे जग्रक्रु
र्दृशं॥ आकाशेत्रामपित्वा तं चिक्षेपुर्गगनेक्रुधा॥ कोलासुरोपि पतितो यावद्भुव्यानुमिह्नति॥
तावन्निर्गत्य लक्ष्मी सा पादाभ्यां प्रसपीडयत॥ तस्याः प्रपीडितं रक्तो विहस्तनयनेन तं॥ सुक्कंठ
स्वतं कृत्वा ततो मोहमुपेयिवान्॥ ततो देवाः सगंधर्वा मनुष्या ऋषयोस्तुवन्॥ देवकन्याश्च दे
वयस्य नन्नृतुः समंदाकुलाः॥ देवदुंदुभयो नेदुः पुष्पवृष्टिः पपात ह॥ दिशः प्रसेदुः मरुतो ववुर्मंद
र वंजयत॥ सुरासुरशिरोरत्नवंद्यपादांबुजास्ततः॥ देव्योरिष्येनयानेन यांति कोलासुरंप्रति॥ श्र
यांतीप सजो बीस मुक्त पादाप्रभ्रं खलाः॥ तुष्टा वपरया भक्त्या राजकंन्या गुणेः मुदा॥ ॥ राजकं
माऊचुः॥ ॥ वंदारुवीरसुरहं दारुवीर सुरवृंदकिरीटकोटिरोचिर्घटानि करकस्नितरत्न राम ६९

…BHAU DAJI

दीपं॥ देवी त्वदीय चरणं शरणं जनानां सेवामहे सकलमंगलवर्द्धना॥ उत्फुल्ल कैरवदलाय
तलोचनाये गंडोल्लसन्न्वदुल कुंडलमंडिताये॥ राकाशशिप्रतिम दानन कोमलाये तस्मै
नमः सकललोचनलक्ष्मनाये॥ सद्रत्न कल्पतैलतिकां हरि कंठलग्नां केयूरहेमकनकोज्वल
कंकणां कां॥ संसारसागरमुखं पततो ममाघ देहि त्वदीय कर यष्टि मनंगमाना॥ हष्ट्वा देवि
जनाजयायविविधाप्रसाधि पत्स्यं॥ ताविष्णोर्वक्षसि याच कारतरला जीलाज्वमालाश्रमं॥
केशाग्रप्रहित्वं त्वदीयचरणं वंद्याज्वसेवारतं कारुण्यामृतसारपूरित दृशा मामद्य पश्ये
श्वरि॥ मल्लिविकुलकुसुमोज्वलमध्यमाग धम्मिल्लभारजिततारकचित्रवप्रा॥ श्रंस
रेमल्लिकधोवलकाय कांतीलसी स्वयं प्रणमतां श्रियमातनोतु॥ इति स्तुत्वा महाराजसी
नकान्नामि प्रदायिनी॥ योगिम्यो ह्यनविष्य श्वमितिता सां वरं ददौ॥ दृष्ट्वा तास्तु मुदा देवी सा
रूप्यं च प्रदापये ता॥ मानिनिभिविता देवी वरवर्यं ददौ मुदा॥ राजकंन्यास्ततः सर्वा स्तुत्वा स्तु

रमायपुः॥ ततः प्रवृत्ति लोकेषु ह्यस्याः सर्वकामदाः॥ नाः श्चतुः षष्टियोगिन्यो महालक्ष्मीप
रिग्रहाता॥ नसंतिनिवहैः स्तत्र गीतवादित्रनिस्वनैः॥ पुरोदेयामहालक्ष्म्याः करहाटपुरे निश्चि॥ ए
वंप्रभावासा देवी विख्याता समाषडानन॥ व्रतस्यास्य विधानं च शृणुष्व मत्तो विधानतः॥ मासि भा
द्रपदे शुक्लपक्षे मे ह्याष्टमी युता॥ प्रारब्धव्यं व्रतं तत्र महालक्ष्म्याः यतात्मभिः॥ करिष्यामि व्रतं दे
वि त्वदर्चनस्त्वत्परायणः॥ तदविघ्नेन मे यातु समाप्तिं त्वत्प्रसादतः॥ इत्युच्चार्य ततो बध्वा दोरकं
दक्षिणे करे॥ षोडशग्रंथिसहितं गुणैः षोडशभिर्युतं॥ ततोन्वहं महालक्ष्मीं पूजयेन्नियतात्म
वान्॥ गंधैः पुष्पैः सनैवेद्यैः यावत्कृष्णाष्टमीदिनं॥ तस्मिन्दिने तु संप्राप्ते कुर्याद्द्यापनं व्रपं
ती॥ वस्त्रमंडपिकां कृत्वा मालस्परलो पशोभितां॥ त्रिरत्निकां च सप्तमृण्मयाः नानादीपैश्च शोभिसं
न्ति तां च तस्यः प्रतिमां कृत्वा सौवर्णीं स्वस्वरूपिणीं॥ स्नपनं कारयेत्तासां पंचामृतविधावि
ततः॥ षोडशैरुपचारैश्च धूपदीपादिभिस्तथा॥ जागरं तत्र कर्तव्यं गीतवादित्रनिस्वनैः॥

ततो निशीथे संप्राप्ते सुदिते न तदीधितौ॥ कृत्वा तु स्वंडिले पद्मं सषडंगं प्रपूजयेत्॥ दद्यादं
र्घं विरोगेण व्रती तस्मै समाहितः॥ क्षीरोदार्णव संभूतश्चंद्र लक्ष्मीसहोदर॥ पीयूषधामरो
हिण्या सहितो र्घ्यं गृहाणमे॥ क्षीरोदार्णव संभूते कमले कमलालये॥ पुत्रान्देहि सौख्यं सौभा
ग्यमेव च॥ कालिकालि महाकालि विकरालि नमोस्तु ते॥ त्रैलोक्यजननि त्राहि वरदे भक्तवत्स
ले॥ एकतोथ जगन्नाथे जमदग्निप्रियेव्यये॥ रेणुकेत्राहि मां देवि रामामातः शिवं कुरु॥ कुरु
श्रियं महालक्ष्मी त्र्यंश्रियं त्वास्तु नाम्नापा मंत्रैरेतैर्महालक्ष्मीः प्रार्थ्य श्रोत्रियपयोषितां॥ श्री
सूक्तेन तथा वह्नौ पद्मानि जुहुयात्सुधीः॥ पायसं चैव बलिं चान्निरजानेन याचतं॥ ग्रहेस्मिन्सदै
व होतव्यं समिद्वघृत लादिकं॥ चंदनं तारपत्रं च पुष्पमालादिकं तथा॥ नवेद्यपेयं न्ससाण
त्स्वावक्त विधानितु॥ प्रत्येकं षोडशैतानि हृगपत्रीन्त्विवहि॥ तान्प्रस्थेन समाख्याद्य व्रती
दद्यात्समंडनैकं॥ क्षीरोदार्णव संभूता लक्ष्मीश्चंद्र सहोदरा॥ व्रतेनानेन संतुष्टा प्रियतां वि

व्र॰ ता॰ ष्णुवर्द्धनना॥ इंदिरा प्रतिगृह्णाति इंदिरा वै ददाति च॥ इंदिरा तारिके ताभ्यां इंदिरायै नमो नमः॥
१६२ दत्वा येविायतारिश्च श्रोत्रियाणां च योषितां॥ चतस्रः प्रतिमास्तास्तु ब्राह्मणाय निवेदयेत्॥
॥एवं कृत्वा तु निर्वर्त्य व्रती भोजनमाचरेत्॥ ॥स्कंद उवाच॥ ॥केनेदं स्वीकृतं पूर्वं कथं यस्मि
न् प्रकाशितं॥ ब्रूहि मे तत्वतो देव पृच्छेहं तव वल्लभा॥ ॥शंकर उवाच॥ ॥आसीद्राजा सार्व
भौमो मंगलारण्य इति श्रुतः॥ कुंडिने नगरे रम्ये तस्य पद्मावती प्रिया॥ तमागतः कश्चिदेकः
सेवको ब्राह्मणोत्तमः॥ अज्ञातनामतस्यासौ नाम चक्रे नृपस्तदा॥ तवच्छत्रक इति ख्यातो ब
भूव द्विजसत्तमः॥ कदाचिन्मृगयासक्तो नृपालो वनमाविशत्॥ तत्र विष्णु वराहाद्यान्मृ
गान् हत्वा सहस्रशः॥ क्षुत्तृट्परिगतश्रांतो वृक्षमूलमुपाश्रितः॥ उदकान्वेषणे चारान् प्रेष
यामास सर्वशः॥ वने जलं न तु ना पश्यन् क्वचिद्गत्वा प्राययत ततः॥ ते गत्वा नृपतिं प्रोचुर्नात्रांत्र राम
इति दुःखिताः॥ तवच्छत्रकोपि बभ्राम विपिनं तदनंदितः॥ भ्रममाणस्तदा पश्यत् कस्मिंश्चि १६२

द्वनगह्वरे॥ रम्यं सरोवरं दिव्यं कुमुदोत्पलमंडितं॥ तत्रापश्यत् परे कन्या दिव्यरूपा मनोरमाः॥ च
र्वंगी चारुनयनीः पीनोन्नतपयोधराः॥ हारकंकणकेयूरनूपुरालंकृताः शुभाः॥ पूजयं
ति महालक्ष्मी व्रतरूपेण सादरात्॥ तवच्छत्रकोपि पप्रच्छ किमिदं कुरुथ तामिति॥ ॥स्त्रि
य ऊचुः॥ ॥महालक्ष्मीव्रतमिदं सर्वकामफलप्रदं॥ क्रियतेस्माभिरेकाग्रमनोभिस्त्वत्र
भक्तितः॥ तवच्छत्रकोपि श्रुत्वा व्रतं जग्राह भक्तिमान्॥ तदनुज्ञां गृहीत्वा सपद्मजलमादाय सत्व
रः॥ आगत्य गम्यजलं तस्मै दत्वा प्रांजलिना सह॥ जलं पीत्वा नृपस्तस्य दृष्ट्वा दोरकं करे॥ किमि
दं दोरकं बद्ध किं व्रतं कृतवानसि॥ राज्ञा पृष्टस्तवच्छत्रकोपि कथयामास तत्कृतं॥ तच्छ्रुत्वा राजग्रा
हलो व्रतं जग्राह भक्तिमान्॥ तवच्छत्रकेन सहितो राजा स्वपुरमाययौ॥ पद्मावती गृहं गत्वा तया
रेमेनुगतः सह॥ रममाणस्य सा देवी तेन राज्ञा प्रियेण वै॥ तं दृष्ट्वा दोरकं हस्ते कुपिता सत्कोप
ना॥ कथा त्वं वंचितो ब्रूहि कया बद्धं सुदोरकं॥ मा वदीरन्यथा त्वेतत् लक्ष्मीव्रतमनुत्तमं॥ इ

व्रता० १६४

मुक्तात्वप्रियेणासौ हस्तेचिच्छेददारकं॥ त्वा गमा नाकुलेवल्गो कृमिवस्य तिकोपिता॥ हाहा
कष्टमिदं पापं कृतं मृदतया त्वया॥ इति निर्भर्त्स्य तां राजा तस्याजवनगह्वरे॥ साच हानिर्ययौ प
न्नपः॥ महालक्ष्म्यपचारेण साराण्येन जलवर्जिते॥ भ्रममाणा वने कस्मिन्न कश्चिज्जतिमानुष
त॥ विचरंती वने तत्र ऋषेः कस्यचिदाश्रमं॥ ददर्श मणसंकीर्णं शांतं कृष्णमृगान्वितं॥ तत्राप
श्यद्वने रम्ये वसिष्ठं मुनिपुंगवं॥ ववंदे चरणौ तस्य विसंज्ञा दुःखकर्शिता॥ चिरं ध्यात्वा मुनि
स्तस्या ज्ञातवान्दुःखकारणं॥ महालक्ष्म्यपचारेण ज्ञातं विज्ञातचक्षुषा॥ तत्प्रतं कारयामास त
स्या दुःखोपशांतये॥ तद्दुःखं तत्क्षणादेव विनष्टं मनवन्नदा॥ पुनश्च मृगयासक्तो नृपालो वन
माविशत्॥ कंचिन्मृगं समाविध्य बाणेनैकेन बाहुमान्॥ अन्वगच्छन्मृगपदं तस्यानुविदधाण राम
मः॥ अन्वगच्छन्मृगपदं तस्यानुविद्यागमः॥ वरमुनिं ददर्शाग्रे वसिष्ठं वीतकल्मषं॥ कृताति १६४
थ्यक्रियो दृष्ट्वा चरंतिं बहिरंतिकांता॥ हा वनागं वविनासा मेहरंति हरिणेक्षणां॥ महान्निर्गतिसंतप

तिः प्रोवाच मधुरं वचः॥ वामोरु कासि कल्याणि किमर्थं चरसे वने॥ किन्नरी मानुषी वा त्वय
क्षिणी चारुहासिनी॥ किमत्र बहुनोक्तेन नजमानं नजस्व मां॥ नृपेणतेन मत्तो क्ता विस्मिता
वासमब्रवीत्॥ पुनर्न जानामि चाहं त्वामवैहि महिषी तव॥ महालक्ष्म्यपचारेण त्वया हीनावरसा
म्यहं॥ मुनी वस्याश्रमे रम्ये तरुगुल्मोपशोभिते॥ ममोपरि कृपाविष्टो महालक्ष्मीव्रतोत्तमं॥ कार
यामास विधिवत्सर्वविघ्नोपशांतये॥ तयोक्तं वचनं श्रुत्वा सच्चो सुखाविजोभ्वनः॥ कृपेस्तु ज्ञा
मात्म्यप्रियमाराप सत्वरः॥ हृष्टपुष्टजनैर्जुष्टं पताकाध्वजशोभितं॥ प्रविवेशतया सार्द्धं स्वपौरैरभि
वंदितः॥ महालक्ष्मीव्रतं नृपस्तया सह चकार ह॥ भुक्त्वेह भोगान्विपुलान् पुत्रपौत्रैः समावृतः
॥ नृपालः सार्वभौमोऽभूत्तत्र वत्सोमास्य तांपयो॥ महालक्ष्मीप्रसादेन सन्निधिः सर्वसंपदां॥ एवं व्र
तावप्रसादे वी नराणामिष्टदायिनी॥ सर्वपापाहरा देवी सर्वदुःखापहारिणी॥ एवं षोडशवर्ष
तु कर्तव्यं व्रतमुत्तमं॥ पाकरिष्यति तां नन्न स्वयं सिद्धिमुपासते॥ लोकपालाश्च पुष्यंति देशाद्स

व्रता० १६५

नोत्पातः॥ नारी वा पुरुषः करिष्यति मुदा भक्त्या व्रतं यत्नतः॥ सेवां ते हरिरूपप्रज्ञसुरापुष्पंति
तस्य प्रियं॥ तस्या दौपरि रंजयंति मनुजा मोजि प्रनामंडलैः तस्मि॥ न्नैव कुटुंबिनि वसति सा ल
क्ष्मीः स्वयं विष्णुना॥ सद्भक्त्या वा प भक्त्या वा कुर्वन्तमेव्रतमुत्तमं॥ अंतकाले स्वयं विष्णुः संसा
रात्सरित्स्कृतिः॥ यइदं शृणुयान्नित्यं श्रावयेद्वा समाहितः॥ न संस्पृशति तं लक्ष्मीर लक्ष्मी नैव का
रयेत्॥ सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते॥॥ इति स्कांदोक्तं महालक्ष्मीव्रतं॥ ॥अथा
चारप्राप्तकथा॥ ॥युधिष्ठिर उवाच॥ ॥स्वस्थान लाभपुत्रायुः सर्वैश्वर्यसुखप्रदं॥ व्रतमेकं
समाचक्ष्व विचार्य पुरुषोत्तम॥ ॥श्रीकृष्ण उवाच॥ ॥दुर्वारेव त्रिदैत्येंद्रे परित्यक्ते त्रिविष्टपे॥ ए
तदेव कृत्स्नं पौरे वेंद्रः प्राह नारदं॥ तस्य श्रुत्वा ततो वाक्यं स मुनिः प्रत्यभाषत॥ ॥नारद उवाच॥॥ राम
पुरंदर हर्सर्वं पत्स्यामी श्रुणो नने॥ रत्नगर्भनिबद्धभूमिर्यत्न रत्नाद्रिकंधरैः॥ पत्रांगनाजना १६५
पांगनगालोचनसायके॥ त्रैलोक्यं स्ववशं चक्रे देवः कुसुमसायकः॥ चतुर्वर्गजनिर्यत्र यत्र

चित्रविचित्रपत्तनं॥ विश्वकर्मा पियद्वीक्ष्य कंपयत्यनिशं शिरः॥ यत्रासीत्महीपालो मंगलो मंगला
लयः॥ चिल्लदेवी प्रियातस्य दुर्जनैका वल्लभः॥ तस्यानुवालदेवी या महिषी सा यशस्विनी॥ क
दाचिन्मंगलो राजासो लदेवी सहायवान्॥ प्रासाद शिखरारूढः स्थलीमेकामपश्यत॥ तामा
लोक्य महीपालः स्मरस्मेरमुखांबुजः॥ चोलदेवी प्रति प्राह दंतद्योतित दिङ्मुखः॥ चंचलाक्षि
तवोद्यानं कितिनिंदितनंदनं॥ कारयामि तवो हि ष्टं तन्नोद्यापनकारयत॥ संपन्नं च ततं तदुद्या
नं नाना द्रुमलतान्वितं॥ नानारत्न कसंयुक्तं नाना कृतिसमाकुलं॥ अथा गमन्महाकोल
तनुस्सन मस्तलः॥ पंकमाहरत् घनद्रुमाम्ब्रसुरारिमर्च्चंचलः॥ दंष्ट्रावर ष्वच चंद्रार्कः प्रल
यांभोधरद्युतिः॥ न द्रुतक्रीतिविद्रोपसमेत्सोद्यानपालकः॥ सनयात्तस्य दंतांते मुद्गरेणन्नपवे
: पुरः॥ तदाकर्ण्य ततो राजा क्रोधाकुलितलोचनः॥ वधाय प्रेषिता सस्य मंदिरे दूरविलंब
नं॥ भतस्य चात्म पालस्त्रि गंड गलि तैर्गजैः॥ श्वा श्रावयन्महीसर्व वाजिहं दव तो बरां॥ स्वान

व्र॰मा॰ १६६ न्तर्विमानस्थो जानन्स्वं दनौ घन्महद्रवैः ॥ पत्रिवातमहाध्वानैः पूरयन्नखिला दिशः ॥ ततो
गारं समवृत्य तदुद्यापनं नरेश्वरः ॥ उवाचोच्चैरिति ध्वानैर्दिशो मुखरयन्नदः ॥ पथिपस्य व
राहोयं भयात्तु पवनांतिकं ॥ तस्यावज्रंपशिरः छेदं विरधामि रिपोरिव ॥ तस्यस्तूरूपस्य तथास्य
समाकर्ण्य सुरस्कर ॥ जगामास्येव मार्गेण प्राप्ति नश्चेष्टितं यथा ॥ ततः क्रुद्धो धराशाक्रोकशापा
स्थं भनाग्रच ॥ व्रीडाकलंकितस्यैं दुःमार्गे तस्यैव शो नगमत्सु ॥ तत्राप्य विपिनं घोरं सिंहशार्दू
लसंकुलं ॥ समाप्त नात्नहिंतां जातां नाकुंनसमाहृतं ॥ डिस्रीहंकारसंनारवाम्याजितदिगंत
रं ॥ तत्रैकं चेतसं पश्यन्नबकुबन्नाम नृपतिः ॥ को नोवे नामवा प्राप्य सोनवराजसन्मुखं ॥ म
स्त्रेन सोवधीक्रौंचवज्रेणांङ्घियप्राणवान् ॥ अथ सोभिविमानस्थः स्मरसुंदरविग्रहः ॥ क्रोडरू
पं परित्यज्य सोब्रवीन्मंगलं नृपं ॥ ॥गंधर्व उवाच ॥ ॥स्वस्तिनेस्तु महीपाल त्वयामुक्तिः कृता मम राम १६६
॥ तत्वा कर्णय यत्तातं येनाहं जातदुहृशः ॥ एकदा देवतावृंदैः संवृतः कमलासनः ॥ वंक्त्रस्तु सारिणि

Dr BHAU DAJI

स्तालैः रवत्रयैः समस्तैः स्वरैः ॥ षड्जादि भिस्त्रिनिर्मानैः गीयमानं मया नृप ॥ नानास्थान गुणोपेतस्व
श्रोषधीभि तमुत्तमं ॥ गीयमानं श्रुतः स्थानात्ततोहं कर्मणामुना ॥ शप्तश्चित्ररथस्तेन ब्रह्मणा
स्पृष्टिकर्मणा ॥ ब्रह्मोवाच ॥ कालेन वेति मेदिस्यां मुक्तिस्ते तु यदा भवेत् ॥ निर्जित्यारिकुलं नृपा
लो मंगलस्त्वां हनिष्यति ॥ तदद्य घटितं सर्वं त्वत्प्रसादान्महीपते ॥ तस्मात्त्वं वरं नृपदेव
स्यापिसुदुर्लभं ॥ महालक्ष्मीव्रतं दिव्यं चतुर्वर्गफलप्रदं ॥ लभस्व सार्वभौमत्वं गच्छ राज्यं विजं
गरं ॥ ॥नारद उवाच ॥ ॥ चित्ररथोयं गंधर्व उक्त्वेदं नृपतिं प्रति ॥ अंतर्धानं गतस्तु एः शरत्का
न्तर्वां बुसः ॥ अथ मंगल भूपालः पार्श्वस्थं द्विजमाकुलं ॥ विलोक्य बटुकं कंचित्कन्पानिकि
मंत्रां वचं ॥ उवाच मधुरं वाचं स्मितनप्रवं भ्रुविस्मितं ॥ देवस्त्वं दानवस्त्वं वा गंधर्वो वा परागसः
॥ सत्यं वद बटो कस्मात्किमर्थं त्वमिहागतः ॥ श्रुत्वेत्याशिष्यतं विप्रः प्राहत्वद्देशसंभवः ॥ अह
सार्द्धत्वया यास्ये तत्स्त्वदादि शायथोचितं ॥ राजायतमुवाचेदं त्वं बटो नुतनाकृपः ॥ अपत्मारेण वि

व्र॰ना॰ धायाश्वं तरंगितोयं च पायं ॥ अथ विप्रस्य नृपालं बटुको वरपादपे ॥ तथाकृतस्तरंगं च समा
१६५ रुह्य महामतिः ॥ जगाम पक्षिघोषेण यत्रास्ते सुंदरं सरः ॥ कमलैनैकविलासेन रथगा नरगो
त्तमा ॥ वनमालालपत्वेन रथन्नारायणीतनुं ॥ अगत्वा वायुसुतो वेगमहारं विषवर्जितं ॥ नाश्रिता
गस्तकृत्स्नान्निर्मिमसन्नं सागराधिकं ॥ पंकमग्नोपतत्राश्वः दृष्ट्वा तु तीर्थ तस्य सः ॥ चतुर्दशीं निरी
क्ष्य तस्यैव सरयस्तटे ॥ दिव्यवस्त्रपरिधानं द्विजानं रत्नभूषितं ॥ कथयंतं कथां दिव्यां स्त्रीणां
प्रार्थमत्रापन ॥ उपसृत्याथ तं सार्थं तद्वृत्तांतं विवेद्य चाकृतांजलिरिति प्राह बटुर्मधुरया गिरा ॥
बटुरुवाच ॥ ॥ एतत्किं क्रियते सार्थ त्वया भक्तिपरेण वै ॥ को विधिः किं फलं चास्य ब्रूहि तन्मेय
थातथं ॥ श्रुत्वाथ तमुवाचेदं सार्थः करुणया गिरा ॥ ॥ सार्थ उवाच ॥ ॥ शृणु विप्रैकचित्तेन स्म राम
श्रद्धाभक्तिसमान्वितं ॥ यास्या प्रकृतिः शक्तिस्त्रैलोक्ये घटिभीयते ॥ व्रतमेतन्महालक्ष्म्यास्तस्याः सर्व १६५
क्षस्य मासे प्रोष्ठपदे शुचिः॥ स्नात्वा जलाशये स्वच्छे पितृदेवादितर्पणं॥ कृत्वा कुरु
कुलश्रेष्ठ गृहमागत्य मानवः॥ गृहीयाद्धान्यकणिस्य स्वहस्तप्रसृतित्रयं॥ क्रमेण या राम
चयेत्तं तु पुंसंज्ञं घृतसंयुतं॥ वर्षे वर्षे दिने तस्मिन्नेवं वर्षाणि वै दश॥ प्रथमे पूप १९५
कान्वर्षे द्वितीये घृतपूपकान्॥ सप्तमे कोककरसान् कर्पुष्पांस्तथाष्टमे॥ नवमे क

एविशांश्च दशमे मंडकांस्तु नान्ना दशात्मने दद्यात्तेर्दश विप्राय दापयेत्॥ क्रमेण रु
येदत्त्वा यथोक्तं विधिना नृप॥ अर्घ्यं च विप्रवेयमर्घ्यं दिव्यद्विजातये॥ ततो परार्ध्य मिश्रीपा
त्वा रम्ये जलाशये॥ दशावतारमनसं पुष्पधूपविलेपनैः॥ मंत्रेणानेन मेधावी हरिमस्तु
स्यवारिणा॥ मत्स्यं कूर्मं वाराहं च नरसिंहं त्रिविक्रमं॥ रामं रामं कृष्णं च बौद्धं चैव सका
ल्किनं॥ गतोस्मि शरणं देवं हरिं नारायणं विभुं॥ प्रणतोस्मि जगन्नाथं स मे विष्णुः प्रसी
दतु॥ छिन्नत्तु वैष्णवीमायां भक्त्या प्रीतो जनार्दनः॥ श्वेतद्वीपं नयत्वस्मान्मयात्मा संनिवे
दितः॥ अत्र हैमी मत्स्यादिदशमूर्तीर्धरणीव्रतमत्कृत्वा तत्स्याः य एवं कुरुते भक्त्या वि
धिनानेन सुव्रतं॥ दशावतारनामाद्यं तस्य पुण्यफलं शृणु॥ अपर्यंते यास्ति सा लोके पुरुषाणां
दशादशातः छिनत्ति न संदेहश्चक्रप्रहरणो विभुः॥ संसारसागरात्घोरात्समुद्धरज्ज ग
त्पति॥ श्वेतद्वीपं नयत्याशु व्रतेनानेन तोषितः॥ किं तस्य न भवेल्लोके यस्य तुष्टो जनार्दनः॥ प

व्रता० तद्दुर्गमं पदं प्राप्यमनसो यन्नगोचरं॥ तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः॥ सोहं सनार्द
१९६ नं साक्षात्कालरूपधरोच्युतः॥ मर्त्यलोके स्वयं पार्थ त्वमाराधनकारणात्॥ यास्त्विव्रतमि
दं पार्थ चरिष्यति मयोदितं॥ सा तस्यायुक्तबलया पुत्रैश्चैव समन्विता॥ मर्त्यलोके चिरं
स्थित्वा विष्णुलोके महीयते॥ ये प्रजपंति पुरुषोत्तमस्य मत्स्यादिकांस्तुदशमीदशा
वतारान्॥ अन्येद्युरास्वपि दशस्वसुखं विहृत्य ते यांति यानमधिरुह्य सुरवारि लो
कं॥ इति विष्णुदशावतारव्रतं॥ ॥ अथाश्विनशुक्लदशमी॥ विजयदशमाख्या॥
॥ ॥ सा चतारकोदयव्यापिनी ग्राह्या॥ तदुक्तं चिंतामणौ॥ आश्विनस्य सिते पक्षे दश
म्यां तारकोदये॥ स कालो विजयो नाम सर्वकार्यार्थसाधकः॥ रत्नकोशेपि॥ ईषत्संध्याम
तिक्रांतः किंचिदुद्भिन्नतारकः॥ विजयो नाम कालोयं सर्वकार्यार्थसाधक इति॥ दिनद्व
येतद्व्याप्तावव्याप्तौ वा अपराजितपूजायां पूर्वैव॥ तदुक्तं हेमाद्रौ स्कांदे॥ दशम्यां तु नरैः स

राम १९६

DR BHAU DAJI MEMORIAL

म्यक्पूजनीयापराजिता॥ ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः॥ या पूर्णा नवमीयुक्ता तस्यां पू
ज्यापराजिता॥ क्षेमार्थं विजयार्थं च पूर्वोक्तविधिना नरैः॥ नवमीशेषसंयुक्तायां सम्यक्पूजनीया
पराजिता॥ ऐशानीं दिशमाश्रित्य या दशम्यामपराजिता॥ ददाति विजयं देवी पूजिता जयवर्द्धि
नी॥ तथा॥ आश्विने शुक्लपक्षे तु दशम्यां पूजितो नरः॥ एकादश्यां न कुर्वीत पूजनं चापरा
जितामिति॥ यात्रा त्वेकादश्यामुक्ता नैव कार्या॥ तथा च रत्नकोशे॥ आश्विनस्य सिते पक्षे दशम्यां
सर्वराशिषु॥ सायंकाले शुभा यात्रा दिवा वा विजयक्षणे॥ एकादश्यां तु नो यायाद्विजयस्य प्र
कीर्तितः॥ तस्मिन्सर्वैर्विधातव्या यात्रा विजयकांक्षिभिरिति॥ दिनद्वये एकादशीस्पर्शे
व्याप्त्यव्याप्तौ वा श्रवणयुता ग्राह्या तथा च हेमाद्रौ मदनरत्ने च कश्यपः॥ उदये दशमी
किंचित्संपूर्णैकादशी यदि॥ श्रवणर्क्षे यदा काले सा तिथिर्विजयाभिधा॥ श्रवणर्क्षे तु
पूर्णायां काकुत्स्थः प्रस्थितो यतः॥ उल्लंघयेयुः सीमांतं तद्दिनर्क्षे ततो नरा इति॥ अत्र केचित्

व्रता० षे॥ समिसलरूपेणेताइ शाना शाप्रतिष्टिता॥ संप्रार्थ्यतांतंतद्दिनर्देततेनराइति॥ अत्र
१९७ वसंपूअपत्वी शानी सन्मुखो भवेत्॥ मंत्रः॥ शमी शमयते पापं समी लोहितकंटका॥ धा
रयत्यर्जुनास्त्राणि रामसंवाद्दायिनी॥ करिष्यमाणयात्रायां यथाकालं सुखं मया॥ तत्र नि
र्विघ्नकर्त्री त्वं भव श्रीरामपूजिते॥ गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदं॥ गीतवादित्र
निर्घोषैः रानयेत् स्वगृहं प्रति॥ ततो भूषणवस्त्रादि धारयेत् स्वजनैः सहेति॥ अथापराजि
तदशम्यां पूर्वोक्ते विजयाख्ये मुहूर्ते तत्कं प्रास्थानिकमिसुपक्रमः॥ तदप्येते श्लोकाः॥ अलं
कृतो भूषितनरसमवर्गः परिष्कृतो तुरंगतुरंगनामगः॥ वादित्रनादप्रतिनादिताशाः सुमं
गलाचारपरायणः॥ राजा निर्गत्य भवनात् पुरोहितपुरोगमः॥ प्रास्थानिकविधिं कृत्वा प्रति राम
ष्ठेत् पूर्वतो दिशि॥ गत्वा नगरसीमांते वास्तुपूजां समाचरेत्॥ संपूज्य वास्पादिकान् लानश्च १९७
येत् पितृदेवताः॥ मंत्रैर्वैदिकपौराणैः पूजयेच्च शमीतरुं॥ अमंगलानां शमनीं शमनीं दु

कृतस्य च॥ दुःस्वप्नशमनीं धन्यां प्रपद्येहं शमीं शुभां॥ ततः कृताञ्जलिः पूर्वस्यां दिशि विष्णु
क्रमाक्रमेत्॥ अरियोः प्रतिकृतिं कृत्वा ध्यात्वा वा मनसा पथ तं॥ शरेण स्वर्णपुंखेन विध्येद् हृदय
मर्मणि॥ दिशाविजयमंत्रांश्च पठितव्याः पुरोधसा॥ एवमेव विधिं कृत्वा दक्षिणादिदिशास्व
पि॥ पूजमानद्विजांश्च संपूज्य सांवत्सरपुरोहितौ गजवाजिपदातीनां प्रेक्षकौतुकमाचरेत्॥
जयमंगलशब्देन ततः स्वनगरं विशेत्॥ नीराज्यमानः पुण्यस्त्रीगणिकाभिः समंगलं॥ य एवं कु
रुते राजा वर्षे वर्षे समंगलं॥ आपुरारोग्यमैश्वर्यं विजयं च गच्छति॥ नाधयो व्याधयश्चैव
भवन्ति पराजयः॥ श्रियं पुण्यमवाप्नोति विजयं च सदाश्नुवीति॥ उक्तं प्रस्थानं प्रारम्भाश्च
मो जनने पुंगमिष्यसु पार्थिववानरस्य डुडुभयो वीणाश्चोपवादयेरनरुष्टास्त्वलंकृताश्च
रूवदंत उदगयने पूर्वपक्षे पुण्ये नक्षत्रे केशश्मश्रुरोमनखानि वापयित्वा संज्ञाप्य भुप्यक
ल्पयित्वामे अमूल्कृते ग्निमुपसमाधाय शांति प्रतिसरं कारयित्वा वोटारं तेना निषिं चरे

व्रता० त॥ योषाः कौतुकैश्च प्रचरंति॥ परतस्त्रीकृतास्तिथ्या तादितियथोक्तमंगलास्नांज
१९८ नानुलेपनं कारयित्वा वासोगंधान्स्रजश्चावध्यपुष्कन्नरिंस्नापयित्वा कर्त्ता चास्थो
जुहोसन्नयैरपराजितैरापुष्पैः स्वस्त्ययनैः॥ शर्मवर्मेतिर्मंत्रेनावेदनैश्च कृत्वा पार्थिव
स्पेति मां प्रगायेति च कृत्वा आगन्नतात्तस्मेति इस्मासी स्थालीपाकेनेष्ट्वा आतिष्ठजि
ष्णुतु त अनन्नसाभजवश्तिपंथानमास्थाययजेदिमोयात्तैपतइन्द्रातारमिंद्रम
नोविन्दस्वन्नयंसामोवृहस्पतिर्नः परियातुपश्चादितिवीनविष्णुक्रमाक्रांत्वाविवातंका
रयेत्न्न हूतास्मतिष्ठेत्तरात्रिंपरिवत्संय एवं कुर्यादिति॥ इतिमदनरत्ने गोपथब्राह्मणोक्त
यादशमीविधिः॥ ॥इति श्रीमन्नीलकंठात्मजशंकरकृतौ व्रतार्के दशमीव्रतानि राम
॥ ॥अथैकादशीव्रतानि॥ ॥तत्रादावेकादशीनिर्णयः॥ ॥सा च द्विविधा शुद्धा द १९८
शमीविद्धा॥ वेधोपि द्विविधः॥ अरुणोदये दशमीसंबंधस्सूर्योदये वा तस्यां वेधद्वैः

साज्ञः॥ तथा च भविष्ये॥ अरुणोदयकाले तु दशमी यदि दृश्यते॥ सा विद्धैकादशी
तत्र पापमूलमुपोषणं॥ तथा॥ दशमीशेषसंयुक्तो यदि स्यादरुणोदयः॥ नैवोपोष्यं
वैष्णवेन तद्दिनैकादशीव्रतं॥ अरुणोदयस्वरूपं तु हेमाद्रौ स्मृत्यंतरे दर्शितं॥ निशिप्रांते
तु यामार्द्धे देववादित्रवादने॥ सारस्वतास्वध्ययने अरुणोदय उच्यते॥ यामार्द्धमुद
र्कोदयलक्षणं॥ अत एव सौरधर्मेषु॥ आदित्योदयवेलायां प्राङ्मुहूर्तद्वयान्विता॥ सैका
दशी तु संपूर्णा विद्धान्या परिकीर्तितेति॥ तत्र माधवीये स्कांदे॥ उदयात्प्राक् चतस्रस्तु घ
टिका अरुणोदयः॥ तदपि त्रिंशत्घटिकात्मकत्रियामानपक्षे मुहूर्त्तद्वयस्यतावत्परिमाणस्य
दुक्तमिति हेमाद्रौ निर्णयेपि तामसचरणः॥ येपि ब्रह्मवैवर्त्ते चतस्रो घटिकाः प्रातररुणोद
यनिश्चयः॥ चतुष्टयविभागोऽत्र वेधादीनां किलोदितः॥ अरुणोदयवेधः स्यात्सार्द्धं तु
घटिकात्रयं॥ अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः॥ महावेधोपि तत्रैव दृश्यते के

व्र.ता० नवेद्धृयते॥ तुरीयस्तत्र विहितो योगः सूर्योदये सती स्याद्यो वेधास्ते यथा किंचिद्दीपातिशा
१८८ याथास्तितातच्चरणः॥ वैष्णवत्वं तु स्कांदे॥ परमापदमापन्ने हर्षे वा समुपस्थि
ते॥ नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी॥ समात्मा सर्वजीवेषु निजाचारादविच्यु
तः॥ विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते॥ इति॥ गारुडे वैखानसाद्यागमोक्त
दीक्षांशा ये हि वैष्णवाः॥ तथा विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते॥ न विष्ठे
॥ यथा शुक्ला तथा कृष्णा यथा कृष्णा तथोत्तरा॥ तुल्येते मन्यते यस्तु स हि वैष्णव उच्य
ते॥ इति॥ अतिवेधादयः सर्वे ये वेधास्तिथिषु स्मृताः॥ सर्वेष्वपि वेधा विज्ञेया वेधः सूर्यो
दये स्मृत इति मदनरत्नधृतस्मृत्युक्तः सूर्योदयवेधः परिशेषादेतत्स्वरूपं रहितस्मा
त्रैपर एव॥ तत्र वैष्णवानामेकादशी निर्णीयते॥ तत्र शुद्धा विद्धा च चतुर्धा॥ एकाद राम १८९
शी मात्राधिका द्वादशी मात्राधिका॥ उभयाधिका॥ अनुभयाधिका चेति तत्राद्यापरे

व॥ तथा च नारदः॥ संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी॥ द्वादश्यां लंघनं कार्यं त्रयोद
श्यां तु पारणमिति॥ संपूर्णा चात्रोदयास्तगामितिथि परिभाषिता॥ द्वितीयापि परैव तथा च हे
माद्रिमदनरत्नादिधृतं नागवतादितंत्रे॥ संपूर्णैकादशी या स्यात्परतो द्वादशी यदि॥ उपोष्या
द्वादशी शुद्धा द्वादश्यामेव पारणं॥ न गर्भे विशते जंतुरित्याह भगवान्हरिरिति॥ भविष्यपुरा
णेपि॥ उपोष्य द्वादशी शुद्धा द्वादश्यामेव पारणं॥ निर्गतायां त्रयोदश्यां कलावा द्विकलापि वा
॥ द्विकलायां तु द्वादश्यां पारणं यः करोति हि॥ नासु पोष्य महीपाल न गर्भे विशते नरः॥
इदमपि पूर्वैकवाक्यतया शुद्धान्यूनाधिकद्वादशीकायामेवोत्तरत्रोपवासविधाय
कं न तु विद्धान्यूनाधिकद्वादशीकायां॥ अत एव पृथ्वीचंद्रोदये बृहन्नारदीये उक्तं॥ संपूर्णै
कादशी शुद्धा द्वादश्यां नैव किंचन॥ द्वादशी च त्रयोदश्यां नास्ति तत्र कथं भवेत्॥ पूर्वा गृह
स्थैः कार्यस्या इत्तरा यतिभिस्तथेति हेमाद्र्यादिधृत भागवतंत्र समानार्थकस्यास्य वच

व्रता० २००

सोरेहस्याल्लिखनमात्रेणानाकरत्वोक्तिस्तु न आनामनाकरे वेति॥ यत्तु माधवाचार्येण
श्रेष्ठकालतत्त्वविवेचने एकादशी यदा तु सा परतो द्वादशी न वेत्तत्॥ उपोष्या द्वादशी त
त्र यदीच्छेत्परमां गतिमिति व्यासवचनात् शुद्धायां द्वादशीमात्राधिक्ये परेत्युक्तं॥ तन्नेति
तातचरणाः॥ नोपपदस्य सूर्योदयारभ्य एवमेव प्रसिद्धास्सूर्योदयगतदशमीविद्धायामे
तद्वचनप्रवृत्तेः॥ अतो नेदं शुद्धन्यूनाधिकद्वादशीकायां तु नरदिनउपवासविधाय
कमिति॥ न च लोपोत्र द्वितीयसूर्योदयमात्रास्पर्शित्वरूपोत्रिमतो माधवाचार्येण
मिति वाच्यं॥ तैरेव पतोनुपक्रमेव स्मार्ततीर्णये पुनरिदं लिखित्वा व्याख्यातं॥ शुद्धा राम
आदौ दशमीमिश्रितत्वात् सत्तो द्वादशीनावाह्नरूपं गतेति यावत्तन्नव्यैरपि स्मार्ते निर्णयेऽ २००
स्य वचनसमार्थकत्वमेव वर्तमुख्यवचनमुदयविद्ध द्वादशीमात्राधिकायामेव प्रयोज्य
तमिति॥ एतेन एकादशी यदा तु तत्सकारश्लोकपेन व्याख्यानमपास्तं पूर्वापरविरोधा

न्मातानावाह्नेतिदिक्॥ उभयोराधिक्ये केमुनिकल्पायेनैव प्राप्त परत्रोपवासानुवादोऽयमु
नारदास्पामुक्तः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ तत्रोपोष्या द्वितीया तु परतो द्वाद
शीयदिति॥ अनुभयाधिकानु पूर्वेवेसमंदेहएव॥ अत्राधिवामात्राधिक्ये सूर्योदयानंतरा
नुवृत्त्यगनुवत्रिरूपेव ध्येनतुषष्टिघटिकोत्तरत्वतदभावरूपो॥ इति वैष्णवानप्रत्ये
कादशीनिर्णीता॥ अस्मार्तत्वेन प्रसिद्धनामेकादशी निर्णीयते॥ सा च द्विविधा शुद्धा सू
र्योदये दशमीसत्त्वे॥ विद्धा वा तत्र शुद्धा चतुर्धा॥ एकादशीमात्राधिका द्वादशीमात्राधिका॥
उभयाधिका॥ अनुभयाधिका चेति॥ तत्रैकादशीमात्राधिक्ये पूर्वैकरूपवास उक्तं
स्कांदे॥ प्रथमेहनि संपूर्णा व्यापाहोरात्रसंयुता॥ द्वादश्यां तु तथा तातदृश्यते पुनरेव
च॥ पूर्वकार्यागृहस्थैश्च यतिभिश्चोत्तरा विभो॥ इति॥ अत्र गृहस्थयतिपदे सकामनि
ष्कामपरे॥ तथा च मार्कंडेयः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वांमुपवसेत्कामी

व्रता० निष्कामस्तूत्तरां वसेदिति॥ निष्कामस्तस्य स्यात्तरेव॥ निःकामस्तु गृही कुर्यादुत्तरैकादशीं
२०१ सदा॥ प्रातर्भवतु वामा वा प्रादेशी च द्विजोत्तमा इति स्कांदात्॥ इदं शैवविषये विष्णुप्री
तिकामेस्तु दिनद्वयेप्युपवासः कार्यः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ तत्रोप
ष्या द्वादशी मिस्मांल्लुपवासकथं भवेत्॥ उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति
ह्वयमि ष्योक्तेः॥ तात्त्वरणास्तु॥ विष्णुतत्परपदात् वैष्णवानामेवेदमिति इदं चोपवास
द्वयं नैकाधिकारिणं प्रीतिविधीयते॥ एकनिमित्तकोपवासस्यावृत्तेरयुक्तत्वात् किं तु त
मार्कंडेयवचनात्सकामतिः कामा सांतत्र सकामेन पूर्वं निष्कामेनोत्तरेति केचित्॥ तद्
समानार्थकेनतिथिद्वस्मैकविशेषेणेतरयोगस्यप्रतीते विष्णुप्रीतिमुक्ताधिकार्यं राम
तरश्रवणद्वैकेनाधिकारिणेतरेतरयुक्तं तिथिद्वियमुपोष्यं श्रावृत्तिश्रवाचनीकीर्ति २०१
परो॥ शुद्धायां द्वादशी मात्राधिकेपि पूर्वद्युपवासश्च कः स्कांदे॥ शुद्धा पूर्वा समानासमा

DR BHAU DAJI MEMORIAL

हीनाधिकेन तत्राण्येकादशीमुपवसेन्न शुद्धां वैष्णवीमपि ति॥ शुद्धैकादशी पूर्वा समानास्तन
वाभवति॥ उत्तरा द्वादशी समानान्यूनाऽधिका वा भवतु न द्वैकादशीमुपवसेन्न तु वैष्णवीं द्वा
दशीमित्यर्थः॥ एवं च तत्रैवैकादशी विष्णोर्द्वादशी परतः स्थिता॥ उपोष्यैकादशी तत्र यदीच्छे
त्परमं पदमिति नारदवचनमप्येतदेकवाक्यतया एतद्विषयमेवास्तु यदीच्छेदित्यर्थवादमा
त्रेण तु मुमुक्षूणां पूर्वोपवासविधायकं॥ तेषामुत्तरस्योपवासस्यैव सर्वत्र विधाने न तदत्तौ
चित्यसिद्धिः कालतत्त्वविवेचनेन स्थाः॥ तच्चिंत्यं॥ मुमुक्षूणां विदुषामनधिकार्यामेव परत्रोपवास
स्य दिनद्वयेन शुद्धे च द्वादशीमोक्षकांक्षिभिः॥ उपोष्या द्वादशी विद्वानोपोष्यैकादशी सदा
॥ मुमुक्षुनिर्दिष्ट विद्वानोपोष्यैकादशीति पितृमादिवचनैर्विधानात् तेन यदीच्छेदित्य
स्यार्थवादत्वेप्युक्तोदाहरणे तेषां वैष्णवातिरिक्तानां स्मार्तानां मुमुक्षूणामपि तेषां पूर्वो
पवासविधानमेव युक्तं शुद्धायामुत्तराधिके तु परेद्युरेवोपवासः॥ पूर्णैकादशी सा

उभावर्द्धतेद्वादशीति यद्यदिति स्कांदात् संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरेवोत्तरा का
र्या परतो द्वादशी यदीति नारदीयाच्च॥ यत्तु॥ विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चे
त्॥ अविद्धापि च विद्धा स्यात्परतो द्वादशी यदिति पद्मवचनं तत्सर्वं वैष्णवविषयं वक्तुमश
क्यं॥ तेषां विद्धाया निषेधात्॥ नापि स्मार्तविषयं॥ शुद्धापदासमाहीनेत्यादिवचनविरोधा
त्॥ किं तु पूर्वार्द्धस्य स्मार्तान्प्रति ग्रहणे तो बाधकाभावेन तदेकवाक्यतया च वर्द्धते द्वि
तीयं पदिति पूर्वोक्तिवचनैकवाक्यतया तान्प्रत्येवोत्तरपक्षो ज्ञेयः॥ शुद्धायाश्च त्यना
धिक्ये तूत्तरा॥ प्रापकप्रमाणाभावेन संदेहाभावात्सर्वैर्वैष्णवैर्व्रतिभिः शुद्धानिर्णयः॥ अथ विद्धा
पि पूर्ववैदेव चतुर्धा तत्र विद्धैकादशीमात्राधिक्ये विद्धायामेवोपवासः तथा च मत्स्ये॥
एकादशी विद्धदा चेद्युक्ते कस्मै विशेषतः॥ उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृहीति द
दं चाविशेषात्॥ शुद्धाविद्धा तु स्मृतिमाधवः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ उ

त्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही सा च नेकवाक्यैकवाक्यतया प्रवेतो वचनं शुद्धाविषयमे
वेति कालतत्त्वविवेचनकारे माधवमतं दूषयित्वा स्वमतं तत्र हेमाद्रितत्वानुसार्यैर्व्रतिनि
र्णयिकृतः॥ सच द्वादशीमिश्रिता कार्या सर्वत्रैकादशी तिथिः॥ द्वादशी च त्रयोदश्यां विद्य
ते यदि वा न वा॥ तथा॥ सर्वत्रैकादशी ग्राह्या द्वादशीमिश्रिता नरैः॥ प्रातर्भवतु वा मा वा यते
नित्यमुपोषणं॥ उपोषणस्य प्राधान्यादंत्यकलावच्छिन्नैकादशी तत्र मुख्या पारणं त्वगत
त्र द्वादश्यप्राप्तिश्चेत्तस्मिन्नेव नो चेत्त्रयोदश्यामेव तत्कार्यमित्यर्थः॥ द्वादश्येकादशी यत्र संप्राप्ता
त्रिदशाधिप॥ तामुपोष्य ततः कार्यं त्रयोदश्यां तु पारणं॥ परैः तु एवं एकादशीकलापत्र
परतो द्वादशी भवेत्॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं॥ परतः एकादशी कलोत्तरं
॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी॥ उत्तरार्द्धं तदेव इत्यादि पाद्मनारदस्कांदकौ
र्मादिवचनैर्विद्धाधिकानधिकद्वादशीकायामुत्तरस्मिन्नेवोपवास इत्येवंरूप इत्युक्तं॥ यद्वि

व्रता० सं॥ एतानि च सर्वाणि यतः संपूर्णैकादशीयत्र द्वादशीं वृद्धिगामिनी॥ द्वादश्यां लंघनं
२०३ कार्यं त्रयोदश्यां तु पारणं॥ एकादशी कलाप्यस्ति येन द्वादश्युपोषिता तुल्यं क्रतुशतस्यो
क्तं त्रयोदश्यां तु पारणं॥ एकादशी कलाप्येका द्वादशी सकलं दिनं॥ त्रयोदशी उषःकाले वृ
त्रिवं तद्दिनत्रयं॥ सर्वपापहरं प्रोक्तं तदुपोष्यमिति स्मृतिरित्यादीनि एकादशीमात्राधिक्ये
वैष्णवविषयत्वेन स्वयं माधवादिभिर्लिखितानि तद्वैकवाक्यतया द्वादशीमिश्रितैकादश्यु
क्तानि सर्वाणि शुद्धाविषयाण्येवेति कथं विद्धाधिकायां स्मार्त्तपरतया योजयितुं शक्यानि
यदि त्वेतानि विद्धाधिकायां स्मार्त्तानां शुद्धाधिकायां वैष्णवानामित्यधिकारिभेदेनापि
प्रवर्त्तेते तत्र्येकाधिकारिणं स्मार्त्तं प्रति शुद्धसाम्येन माधवोक्तं प्रचेतोवाक्यं किमिति शुद्ध
विषयमेव व्याख्यातमिति विद्वद्भिरालोचनीयमिति॥ तस्मात्प्रचेतोवचनात्सर्वे तिमाध राम
वोक्तिः पाद्मादिवचनैरुक्तरीत्या नन्तनकमदनरत्नव्योक्तिः श्रद्धायुक्तेति विद्धैकादशीमा २०३

त्राधिक्ये किंचिदुच्यते॥ सर्वत्रैकादशी कार्या दशमीमिश्रिता नरैः॥ प्रातर्भवतु वा मा वा यस्मि
न्नित्यमुपोषणं मिति कालादर्शमदनरत्नयोः स्कांदवचनं प्रातर्द्वादशीदिने एका
दशी न वस्तु मविस्मार्थकं विशेष्यासविधानं विना नर्थकं॥ कालादर्शे वायुपुराणेपि॥
एकादशी यदा विद्धा द्वादशी च क्षयं गता॥ दशमीमिश्रिता तत्र उपोष्या मुनिसत्तमेति
यत्तु दिनक्षयस्तत्रैवेति नोपोष्या दशमीयुता॥ सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशी
सत्वं तेन हृते माध्यन्दिध तपुराणां तरप्रपुराणवचनं दिनक्षयातिरिक्त दशमीविद्धायामु
पवासनिवृत्तिविनाऽनर्थकमिति द्वयोर्विरोधप्रसक्तौ व्यवस्थैवं कार्या दशमीविधायकं वचनं
पुत्रवज्जितगृहस्थानां॥ नोपोष्या दशमीयुतेति निवर्त्तकं पुत्रवद्गृहस्थानां वा॥ दशम्य
न्वगता यत्र तिथिरेकादशी भवेत्॥ तत्रापत्यविनाशः स्यात्परेत्य नरकं व्रजेत्॥ तथा उदयो
परि विद्धा तु दशम्येकादशी यदि॥ दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनः॥ दशमीशेषसंयु

व्रता० कार्गं धार्यसिमुपोषिता॥ तस्याः पुत्रश्च तं न दृष्टं तस्मात्तां परिवर्जयेत्॥ ये कारयंति कुर्वंति द
२०४ शम्यैकादशीयुतां॥ आलोकनन्मरवं ब्रह्म सूर्यदर्शनमाचरेदिति॥ तथा॥ एकादशी द
शुण्विद्धापरत्वोपि न वर्द्धते॥ यतिनिर्णिता निश्चैव सैवोपोष्या कृयेति घिरिसाद्यनेकवाक्यै
कवाक्यत्वात्॥ अत्र दिनक्षयः सूर्योदयात्मक एव दिनत्रयमन्ते देवीतिमाधवाद्युक्त
पावात्॥ यद्यपि दिनत्रयमतेपि पर्युदासस्य साम्येप्राप्तास्तथापि अविद्धानिषिद्धैश्चैव नस्मै
ते दिनानि तु॥ मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिरिति कृयप्रसंगेण साम्येपि विद्धा
ह्यताया उक्तत्वात्॥ मुहूर्तपंचकं चारुणोदयमारभ्य ज्ञेयं सूर्योदयमारभ्य ग्रहणे तु त्रिमु
हूर्ताधिकक्षयाभावाद्द्वितीयदिने एकादश्यावरं भावेनाविद्धः … संभव॥ एवं चोर्ध्व राम
कत्रिमुहूर्तदशम्युत्तरं प्रवृत्तायाएकादश्या त्रिमुहूर्तक्षीणायाः सूर्योदयसाम्यमेव भवति॥ २०४
तेन मुहूर्तपंचकनियमोपि सार्थको न्यथा वैयर्थ्यं स्यात्॥ नन्वेकादशी दिनक्षये उपवासं

करोति यः॥ तस्य पुत्रा विनश्यंति मघायां पिंडदो यथेति पिंडदस्य॥ आरंभात्प्रभृत्येकवचने ग्रा तेभ्य
तोरिन्नाकारत्तो पश्यति मदन॥ कश्चित्तु पिंडतो यथेति पाठः॥ दिनक्षयेतु संप्राप्ते नोपोष्या दशमीयु
ता॥ यदीच्छेत्सुव्रतं प्राज्ञ … पदमात्मन इत्यादिषु उपवास दिने दैवनिषेधात् सैवोपोष्येति
विधानाद्विहितप्रतिषिद्धत्वाद्विकल्पापत्तिरिति चेन्न॥ एकादशीप्रकरणे नासमानानिषेधा
म्नायः पर्युदासाएवेति तदापस्तम्बविरहात्॥ तत्र ये पुरशामी विद्धनिषेधेषु अज्ञानाद्यदि वासो
हात् कुर्यात्सैकादशीं नरः दशमीदोषसंयुक्तां प्रायश्चित्तमितीश्वरे इत्यादि प्रायश्चित्ताम्नानं तेनैपुनः फ
लतो निषेधास्तत्रतः पर्युदासा एव पेतु दिनक्षयनिषेधास्ते पर्युदासा एव॥ उपवासनिषेधे तु न
स्यं किंचित्प्रकल्पयेत्॥ नन्यस्तुपवासे न उपवासफलं लभ्येदिति वा पर्वीये नसामाम्प तन्नया
अविद्धानामलाने तु पयो दधि फलानि तु॥ महादेवाख्यमत्स्यपाद उपवासस्त्वसौ भवेदिक्षुप्रसं
गवचनेन विशेषतश्च साम्यन्तनत्वरूपदिनक्षयेनस्या नियमकरणं च यानि तु एकादश्यांय

शावश्च दिनक्षयतिथिर्भवेत्॥ अत्रोपोष्या द्वादशी स्यात्त्रयोदश्यां तु पारणं॥ तथा॥ एकादश्यां य
दा भवेन्न दिनक्षयतिथिर्भवेत्॥ तदा त्वेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्॥ तथा॥ दिनक्ष
ये तु संप्राप्ते नोपोष्या दशमीयुता॥ उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणमित्यादीनि पिता
महगोभिलत्र विष्णुपुराणवचनानि तानि दिनक्षये तु शुद्धैव द्वादशी मोक्षकांक्षिभिः॥ उपो
ष्या दशमीविद्धा नोपोष्यैकादशी सदेति शुद्धं तु समाव्रतवचनैकवाक्यतया मुमुक्षुपरा
णि॥ एतेन पुत्रवद्गृहस्थपरत्वमेतेषां क्षयपक्षाश्रमत्वनत्वरूपं॥ साम्प्रतं तु पुत्रवतामपि पूर्वदिन
एवोपवासः॥ निषेधाभावात् सापेक्षस्य द्वादश्युपवासविधेरप्रवृत्तेः॥ अत एव च विष्णुपु
राणे॥ एकादशी क्षयापेक्षा परतो न च विद्यते॥ गृहिभिः पुत्रवद्भिश्च पूर्वैवोपोष्या तदा तिथिरिति न राम
यो भिक्षुः परा स्मृता॥ सकलशिष्टाचारविरोधाच्चास्मिन् पूर्वविद्धा येऽपरेऽस्य तत्तो विस्पष्टं॥ यत्तु पाद्मे॥ ए २०५
कादशी परविद्धा परतो न च वर्द्धते॥ यतिभिर्गृहिभिश्चैव पूर्वैवोपोष्या क्षयेति तिथिरिति पुत्रवद्गृ

हस्थानां यतीनां चोपवासविधेः क्षये पूर्वविद्धोपवासे उपोष्य फलकमेवेति एवं च यानि विद्धाप्र
तिषेधविज्ञेया परतो द्वादशी न चेत्॥ त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन॥ उपोष्यैकाद
शी तत्र दशमीमिश्रितापि चेति॥ स्कन्दे तत्पाद्म स्कान्दादि विद्धानुग्रहवचनानि तानि पुत्र
वद्गृहस्थानामेव पूर्वविद्धोपवासे उपोषफलकानीति सर्वेषामविरोधः तस्माद्विद्धैकादशी मात्रा
धिके पुत्रवद्भिन्नगृहस्थानां पूर्वा पुत्रवतां तेषां यतीनां च परेति सिद्धं॥ विद्धायां द्वादशी स्मृ
त्राधिके तु सर्वेषां परेषां परे द्युरेवोपवासः॥ उपवासद्दिनं विद्धं यदा भवति सर्वथा॥ द्वि
तीयेऽह्नि यदा न स्याच्छुद्धा साप्येकादशी तिथिः॥ तत्रोपवासो विहितः कथं तद्वदस्व तत्॥ ॥
सूत उवाच॥ ॥ यदा न प्राप्यते विप्राः प्राप्यते विप्र द्वादशी पूर्ववासरः॥ रविचन्द्रार्द्ध मात्रोपि स्यो
पोष्यं परं दिनं॥ उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारयेत्॥ निर्गता चेत्त्रयोदश्यां कलावापि विष्णु
नाप्नुवेतिहि हेमाद्रौ नारदीयात्॥ एकादशी यदा लुप्ता परतो द्वादशी भवेत्॥ उपोष्या द्वादशी तत्र

यदीच्छेत्परमां गतिमिति तत्रैव तत्रैवायासवचनाच्च लुप्ता दिनद्वये ऽस्तमयोदयास्पर्शेन रूपं ता
तत्र त्रयोदश्यां यदीच्छेत्स्वर्थवादमात्रमिति हेमाद्र्यादयो बहवः॥ मदनरत्ने तु परमां गतिं शु क्लि
मिति व्याख्यायैतानि वचनानि मुमुक्षुविषयाण्येवेत्युक्त्वा कामकृते ऽप्यविद्धानि निषिद्धे श्वे
ल्ले भ्रमंते दिनानि तु मुहूर्तैः पंचभिर्विद्धा ग्राह्या चैकादशी तिथिः॥ मुहूर्तैः पंचकमरुणोदय
मारभ्य ज्ञेयं॥ सूर्योदयमारभ्य ग्रहणे ऽत्र तु नरदिने एकादशाभावकथनं नोपपद्यते तथा सर्वत्रैका
दशी कार्या दशमी मिश्रिता नरैः॥ प्रातर्भवतु वा मा वा यतो नित्यमुपोषणमिति शृंगवच
नात्स्मार्तैर्वैष्णवैर्वोपवासः॥ प्रातस्त्रयोदश्यां द्वादशीभवमावेन्यर्थ इत्याहतदयुक्तं॥ एका
दशी यदा विद्धा द्वादश्यां न प्रतिपद्यते॥ द्वादश्यां च त्रयोदश्यामस्ति तत्र कथं भवेत्॥ उपोष्या
द्वादशी शुद्धा सर्वैरेव न संशय इति बृहन्नारदीये सर्वेषां शुद्धद्वादश्यामुपवासवि
धानात्स्वर्थ विद्धानि निषिद्धे श्वेति नु विद्धसमस्तद्वादशी कार्यां सावकाशं मन्दर्तभं

DR BHAU DAJI

कनियमोऽपि साम्य एव सार्थकोऽन्यथा यत्तु तेनैव सर्वत्रैकादशीति वचनं प्रातस्त्रयो
दश्यां द्वादशीभवतु मा वेत्येवं व्याख्यायैतस्य यापोक्तं तदप्ययुक्तं दशमीमिश्रित्वैकादश्या
मुक्ते तद्व्यवहितोत्तरप्रातःशब्दात्प्रतीतेः॥ एतेन दशमीवेधे प्रातः संकल्पकाले एकादशी
भवतु मा वा मा वा उपोष्यं एव स्यान्नित्यत्वान्नैवोपवासं कार्यमिति पिकस्य विद्याख्यानमपा
स्तं विद्धोपवासे सकलं दिनं सत्कासमाहितः रात्रौ संस्पृजये विष्णुसंकल्पं च तदाचरेदि
ति नारदीये विद्धोपवासे रात्रौ संकल्पस्योक्तत्वे प्रातः कालेसंकल्पासंभवच्च॥ यत्तु काल
तत्त्वविवेचनेन च्छेरिदमेव वचनं कृष्णशृंगनामानुक्ते व पत्तु समयद्योत इत्येव लिखितं
उक्त प्रकारेनैवतदियत्रारंभे चैकादशीमभ्यधिके विद्धायामुपवासस्यात्र च वक्तु
वचन विरुद्धमिति हेमाद्र्यादिसकलनिबंधेषु दृष्टः सर्वत्रैकादशीकार्या द्वादशीमिश्रिता
नरैः॥ निःसेव रूपमेवतद्वचनमिति दशमीमिश्रिते तिपाके पलापितं तदयुक्तं प्रमाणैकतर

व्रता०
२०७

कालात्तत्त्रमिदं नरत्वादि निकृष्यप्रसंगनाम्नाजिरवि तस्यापत्तापयितुमशक्तत्वात्॥ गति
स्तकस्सर्वमुक्तेके वेति दिक विद्धायामनुनयाधिकेपि सर्वैः परैव कार्या॥ सूर्योदयवेधनि
षेधस्यस्मार्त्तान्प्रवृत्तेः॥ शुद्धायामनुनयाधिक्ये परायाउक्तत्वाद्विद्धायां तादृश्यां केमुनिक
मापन्नविद्धायामनुनयाधिके तु विद्धैवोपोष्या॥ यदि दैवात्तु संसिध्येदेकादश्यां ति
थित्रयं॥ तत्र क्रतुशतं पुण्यं पारणे द्वादशी न वेदिति नारदवचनात्॥ द्विस्पृगेकादशी
यत्र तत्र संनिहितो हरिः॥ तामेवोपवसेत्काममकामो विष्णुतत्पर इति कौर्मश्च॥ विद्ध
द्वादशी तथा च द्वादशी त्रयोदशीं विद्धामुपवसेदिति फलितं एकादशी द्वादशी व
क्ष्येयदि दिनत्रयं॥ तद्द्वादशी परैव वक्तव्या दशमीयुतेति हेमाद्र्यादिधृतबौधायनव
चनेकंटकवेधेऽनयानाधिक्य एव दशमीयुताया विधानात्॥ परे परदिवसे॥ त्रयोदशामि
तियावत्दिनत्रयमतेदेवितोपोष्या दशमीयुता॥ सैवोपोष्या सदा पुत्रा परतश्चेत्त्रयो

राम
२०७

दशीति सर्वनिबंधधृतस्मृत्यर्थसंग्रहवचनाच्च॥ अत्र दशम्येकादशी द्वादशीष्वेव दिनत्रयं न त्वे
कादश्यां द्वादश्यां एवं रूपयदि दैवात्त्विसादि वचनैकवाक्यत्वात्॥ सैवेति तच्छब्देन सावे
क्ष्यदेविद्धस्तुतापविशिष्टपरामृश्यवदिनत्रयपयुतदशमविद्धाया एव परामर्शो न तु दश
मीविद्धामात्रस्य परतश्चेत्त्रयोदशी स्येनेन द्वादश्यभावः कथितः॥ तथा च विद्धानुनया
नधिक्ये विद्धैवोपोष्येति फलितोऽर्थः॥ अत्रैवं कृत्वा देयमिति वक्ष्यैवोपोष्येस्यमेव च वि
धिनोपोष्या दशमीयुतेत्यनुवादो न गिरागिरेति ब्रूयादिवत्॥ तच्च तु त्रिंशारिति ब्रूयात्
।षड्विंशतिरित्येव ब्रूयादित्यत्र एवकारेण विधिशक्तिप्रबंधात्त षड्विंशतिरिति विधि
ःकिंतु न त्रिंशारिति निषेधः॥ एवमत्रापि सैवोपोष्येत्यनुवादो नोपोष्या दशमीयुते
ति निषेध इति वाच्यं॥ तथा सति परतश्चेत्त्रयोदशीत्यस्य व्यवहितान्वयापत्तेः॥ मम
तु सैवोपोष्येत्यनेनैवान्वयः॥ इति दिक्॥ अथ पंचोपवासः॥ संयोगपृथक्त्वन्यायानिसः

व्रता० २०८ काम्यश्च॥ तत्राव माह सनत्कुमारः॥ न करोति हि यो मूढ एकादश्यामुपोषणं॥ स नरो
२०८ नरकं याति रौरवं तमसावृतमिति॥ गारुडे॥ उपोष्यैकादशी नित्यं पक्षयोरुभयोरपी
ति॥ काम्यस्तु स्कांदे॥ यदिच्छेद्विपुलान्भोगान्मुक्तिं तां संततिं दुर्लभां॥ एकादशीमुपवसे
त्पक्षयोरुभयोरपिति कौर्मेपि॥ यदिच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः॥ एकादश्यां
न भुंजीत पक्षयोरुभयोरपीति॥ अयं चोभयोः पक्षयोर्नित्यो गृहस्थातिरिक्तस्य तस्य तु
शुक्लायामेव॥ तथा च कौर्मे॥ एकादश्यां न भुंजीत पक्षयोरपि॥ वनस्थयतिधर्मोयं शुक्ला
मेव सदा गृही इति॥ न विष्णौ तु ब्रह्मचारि च नारी चेति तृतीयः पाद उक्तः॥ ब्रह्मचारिसा
हचर्यान्नारी विधवा॥ सधवायास्तु भर्त्रनुज्ञयाधिकारः परिभाषायां॥ प्रतिपादितः राम
॥ शयनीबोधन्यंतर्गतासु कृष्णापि गृहिणा उपोष्या॥ तदुक्तं मदनरत्ने स्मृत्यंतरे २०८
॥ शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत्॥ सैवोपोष्या गृहस्थेन नान्या कृ

ष्णा कदाचनेति॥ नान्या कृष्णेति निषेधः प्राप्त्यभावात्॥ किंतु नांतरीयकेन देवीत्यादिव
दनुवाद एवेति॥ एतच्च पुत्रगृहीविषयं पुत्रवतस्तु कृष्णनिषेधः॥ संक्रांत्यामुपवा
सं चैव कृष्णैकादशीवासरे॥ चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही इति नारदोक्तेः॥ आ
दित्येहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः॥ पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही॥ तत्स
युक्तोपवासस्य निषेधो यस्तु दाहृतः॥ प्रयुक्तं तत्प्रयुक्तस्य न विधिर्न निषेधनमिति जैमि
निस्मृतेश्चेति॥ अथात्राधिकार्युक्तः कात्यायनेन॥ अष्टवर्षाधिकेमर्त्योऽह्यशीतिन्यूनव
त्सरः॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपीति॥ अष्टवर्षाधिक इत्युपनयनोत्तरं तस्यो
पलक्षणं॥ अशीतिवर्षे तु स्पष्टा उपायेन प्रवर्तेरन्निति षष्ठ्यापि न वारितिना त्वरणः॥ अ
यं चोपवासः प्रातः संकल्प्य कार्यः॥ तथा च देवलः॥ अनुस्काशनत्वाहरं स्नात्वाचम्य स
माहितः॥ सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत्॥ एवम्यारब्धानं परिभाषायां द्रष्टव्यतया

व्रत० २०९ एकादश्यां निराहारो भुत्वाहमपरेहनि॥ भोक्ष्यामि पुंडरीकाक्ष गतिस्त्वं मम माच्युत॥ स एव
॥ दशम्यामेकभक्तस्तु मांसं मैथुनवर्जितं॥ एकादश्यामुपवसेत्पक्षयोरुभयोर
पीति॥ एतैश्चैकभक्तादिनियमाः काम्यैकादशीपरा॥ सायमाद्यंतयोरह्नोः सायंप्रातश्च
श्च मध्यमे उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयं॥ अथ नित्योपवासी चेत्सोपि प्रातर्भुक्तक्रि
यां॥ वर्जयेन्मतिमान्विप्रः संप्राप्ते हरिवासरे॥ इति विष्णुक्तेः॥ ब्रह्मवैवर्तेपि॥ इति विज्ञाय कुर्वी
तावश्यमेकादशीव्रतं॥ विशेषनियमाद्युक्तो होरात्रं तु विवर्जितइति॥ कात्यायनोपि॥ शक्ति
मांस्तु पुनः कुर्यान्नियमं सविशेषणमिति ब्रह्मवैवर्ते॥ प्राप्ते हरिदिने सम्यक् विधाय नियमं नि
शि॥ दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतं॥ देवलः॥ गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुख राम
ः॥ उपवासं तु गृह्णीयाद्यथासंकल्पयेद्बुधः॥ औदुंबरं ताम्रमयं॥ यथासंकल्पयेद्यथाकामं २०९
फलमुद्दिश्येदित्यर्थः॥ वाराहे॥ इत्युच्चार्य ततो विद्वान् पुष्पांजलिमथार्चयेदिति इत्युच्चार्यसं

कल्पेत्यर्थः॥ कात्यायनः॥ अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितं॥ उपवासफलं प्रेप्सुः पि
बेत्पात्रगतं जलं॥ कपालवेधे तु विशेषो नारदीये॥ दशम्यां संगदोषेण अर्धरात्रात्परेऽतु वा॥ वर्ज
येच्चतुरो यामान्संकल्प्यार्चनयोस्तथा॥ विद्धोपवासे नक्तं तु दिनं तत्र समाहितः॥ नानापुष्पैर्मु
निश्रेष्ठ विविधं मंडपं शुभं॥ कृत्वेति शेषः॥ स्नात्वा सम्यग्विधानेन सोपवासो जितेंद्रियः॥ संप्र
पूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः॥ पुष्पैर्गंधैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः॥ उपचारै
र्बहुविधैर्जपहोमैः प्रदक्षिणैः॥ स्तोत्रैर्नानाविधैर्दिव्यैर्गीतिवाद्यमनोहरैः॥ दंडवत्प्रणिपा
तैश्च जयशब्दैस्तथोत्तमैः॥ एवं संपूज्य विधिवद्रात्रौ कृत्वा प्रजागरं॥ याति विष्णोः परं स्थानं
नरो नास्त्यत्र संशय इति विशेषो हेमाद्रिनारदीये॥ पंचामृतेन संस्नाप्य एकादश्यां जनार्दनं॥ द्वा
दश्यां पयसा स्नाप्य हरिसारूप्यमश्नुत इति स्मृतिकारेणैव वाराहे॥ सूतके नरः स्नात्वा प्रणम्य मन
सो हरिं॥ एकादश्यां न भुंजीत व्रतमेवं न लुप्यते॥ मृतकेपि न भुंजीत एकादश्यां सदा नरः॥ सू

व्रता०
२१०

स्त्रीणां रजोदर्शने त्वाह माधवीये कृष्णशृंगः॥ संक्रांतेपि रजस्वित्याऽस्पं द्वादशीव्रतमिति
॥एकादश्यां श्राद्धप्राप्तौ त्वाह माधवीये स एव उपवासो यदा नित्यः॥ श्राद्धं नैमित्तिकं यदा॥
उपवासं तदा कुर्यादाघ्राय पितृसेवितमिति॥ उपवासासामर्थ्ये त्वाह॥ तत्रैव मार्कंडेयः॥ ए
कभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन दानेन न निर्द्वादशिको भवेत्॥ हेमाद्रौ पुराणे
॥उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत्॥ तावद्धनादि वा दद्याद्युक्तं श्रेष्ठं द्विगुणं तथा॥ स
हस्रसंमितां देवीं जपेद्वा प्राणसंयमान्॥ कुर्याद्द्वादशसंख्याकान्यथाशक्त्या तु यो नर इ
ति व्रताकरणे प्रायश्चित्तं स्मृत्यंतरे॥ अर्कपर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा॥ एकादश्या
महोरात्रं भुक्त्वा चांद्रायणं चरेत्॥ ॥इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृतौ राम
व्रतार्के एकादशीनिर्णयः॥ ॥अथैकादशीव्रतोद्यापनं॥ ॥अर्जुन उवाच॥ ॥कीदृक्व्र २१०
तविसर्गोत्र विधानं चात्र कीदृशं॥ संपूर्णं हि भवेद्येन तन्मे वद कृपानिधे॥ ॥कृष्ण उवाच॥ ॥

शृणु पांडव यत्नेन प्रवक्ष्यामि तवाव्ययं॥ शक्तः स्वर्णसहस्रं तु अशक्तः काकिनीमपि॥ दाशति
श्रद्धया पार्थ समं स्यादुभयोरपि॥ शक्तश्चेद्द्विगुणं दद्याद्यथोक्तो मध्यमो विधिः॥ उक्तार्धमप्य
शक्तस्य दानं स्वर्णफलप्रदं॥ तद्व्रयविधिमप्यस्य कथयामि तवानघ॥ यानि कष्टेन चीर्
णानि व्रतानि कुरुसत्तम॥ विफलान्येव सर्वाणि उद्यापनविधिं विना॥ प्रबोधसमये प्रा
प्ते कुर्यादुद्यापनक्रियां॥ मार्गशीर्षे विशेषेण माघे भीमतिथावपि॥ दशम्यां दिनशेषेण
रात्रौ गुरुगृहं व्रजेत्॥ एकादशीदिने प्राप्ते गुरुमभ्यर्च्य शक्तितः॥ गृहीत्वा चरणौ मूर्ध्ना प्रार्थयी
त विचक्षणः॥ पुण्यदेशोद्भवं विप्रं शांतं सर्वगुणान्वितं॥ सदाचाररतं पार्थ वेदवेदांगपारगं
॥गुरुः प्रार्थना॥ अस्मदीयं व्रतं विप्र विष्णुवासरसंभवं॥ संपूर्णं तु भवेद्येन तत्कुरुष्व द्विजो
त्तम॥ तस्याग्रे नियमः कार्यो दंतधावनपूर्वकं॥ एकादश्यां निराहारः स्थित्वा चैव परेहनि॥
भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत॥ एवं प्रभातसमये शुचिर्भूत्वा समाहितः॥ पा

व्रता० २११

स्वेच्छालापंचसर्वेषां पतितानां च संगमं॥ कामंक्रोधंरंपार्षदरतः परिवर्जयेत्॥ स्नानंकृत्वा मं
त्रपूर्वंनद्यादौ विमलेजले॥ तर्पयित्वा पितॄन्देवान्पूजयेन्मधुसूदनं॥ उपालिप्यशुचौदेशेगो
कीटकेशास्थिवर्जिते॥ वर्णैश्चसर्वतोभद्रं नीलपीतसितासितैः॥ मंडलंचोपरिद्रव्यसर्वक
र्मसुपूजितं॥ अथवा तंडुलानांच अष्टपत्रांबुजंचरेत्॥ वारिपूर्णंघटंताम्रपात्रंरौप्यस
मुद्भवं॥ जातरूपमयंदेवं न्यस्यायुक्तंजनार्दनं॥ सास्कंतंसोपवीतंच सहिरण्यंसवाससं
॥ श्रद्रूमालासमायुक्तं शंखचक्रगदाधरं॥ गंधाक्षसुवर्णपुष्पैश्च पूजनंपुष्टिवर्द्धनं॥
अन्यैश्चतद्भवैः पुष्पैः र्चयेद्विधिवन्नरः॥ नैवेद्यानिचतुर्विंशत्संख्यान्यनुक्रमात्॥
नत्वाचतुर्विंशतिपुतिथिष्वपि परंतप॥ इच्छयावातदादद्यात् यद्यद्वोद्यापनंभवेत्॥ मो
दकान्गुडकांश्चूर्णानि घृतपूरकमंडकान्॥ सोहालिकादिकासारः सेवास्तक्ष्वणवचाव
टकंस्यात्संडग्धंशालिदधोदनंतथा॥ इंडिकान्पूरिकापायसअपूपान्गुडमोदकान्॥ ति

राम २११

लपिष्टंखंडपिष्टंशालिपिष्टंसशर्करं॥ रंभाफलंचसघृतंमुद्गचूर्णंगुडोदनं॥ एवंक्रमेणनैवे
द्यंह्यपरस्वाचरमेहनि॥ अपघ्नजान्मामानिरामोदरायपादौतुजानुनीमाधवायच॥ गुह्यं
वैकामपतयेकट्यांवामनमूर्त्तये॥ कृस्पंगज्ञानगम्यायकंठंश्रीकंठंवसंगिने॥ जलारस्वलगा
येतिनामांनाकसुरेश्वरं॥ श्रवणौश्रवणेशायशिरापंसर्वकामद॥ सहस्रशीर्षायेशिरः
सर्वांगंसर्वरूपेणे॥ ॥इतिपूजा॥ ॥शुनेम्नालिकेलेनबीजरूपेणवापुनः॥ कृदिध्यात्वा
जगन्नाथंदद्यादर्घ्यंविधानतः॥ साक्षतंचसपुष्पंचसजलंचंदनान्वितं॥ पूर्वोक्तेनैवमंत्रे
णव्रतकर्त्तातिकिरःसुधीः॥ रात्रौजागरणंकुर्यातगीतशास्त्रविनोदितः॥ इष्टंदत्तंधरादानंपि
तृभ्योदत्तंगयाशिरे॥ कृतंदानंकुरुक्षेत्रेयैःकृतंजागरंहरेः॥ नृत्यंगीतंप्रकुर्वंतिवीणावाद्यंत
थैवच॥ येपठंतिपुराणानितेनराःकृष्णवल्लभाः॥ शास्त्रैर्वण्यपवाजन्तमासुचिर्वापप्पू
वाशुचिः॥ कृत्वाजागरणंविष्णोर्मुच्यतेपापकोटिभिः॥ मुक्तोवापद्मवामुक्तोजागरंस्यात्पवि

DR BHAU DAJI

व्रता० तः॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥ यावत्पदानि स्वगृहात्केशवायतनं प्रति॥ अ
२१२ श्वमेधसमानि स्युर्जागरार्थं प्रगच्छतः॥ पादयोः पांसुकणिका धरण्यां निपतन्ति याः॥ ताव
द्वर्षसहस्राणि जागरी वसते दिवि॥ बहून्यपि च पापानि कृतं जागरणं हरेः॥ निर्दहेन्मेरु
तुल्यानि युगकोटिकृतान्यपि॥ मनसा संस्मरेद्देवं तां रात्रिमतिवाह्य च॥ प्रभाते विमले
स्नात्वा विप्राणां कारयेत्कवितः॥ चतुर्विंशतिसंख्याकान्विप्रानागमदर्शिनः॥ सर्वं कुर्या
द्विधानेन जपहोमार्चनादिकं॥ शतमष्टोत्तरं होमः सर्वत्रापि प्रशस्यते॥ इदं विष्णुर्द्विजा
तीनां होममंत्रः प्रकीर्त्तितः॥ शूद्राणां चैव सर्वेषां मंत्रमष्टाक्षरं विदुः॥ विविधैरपि वस्त्रैश्च
भाजनैः रसनैः शयनैः सह॥ पादत्राणं नवं गाश्च दद्यात्सार्धं पृथक्पृथक्॥ द्वादशी वा पद राम
त्राणतो वस्त्रालंकारभूषणैः॥ पूजया पुष्पमालाभिः सपत्नीकान्द्विजोत्तमान्॥ कुंभा २१२
न्द्वादश दातव्याः पक्वान्नजलपूरिताः॥ भोजयित्वा ततो विप्रान्भक्तितो विचरेद्बुधः॥ एका

दशीकपिलानादेया सर्वकामफलप्रदा॥ यथा स्वर्गश्च मोक्षश्च इह संपूर्णता व्रते॥ सपत्नी
को गुरुः पूज्यो मंडले हरिसन्निधौ॥ भूषणाच्छादनैर्भोज्यैः प्रणमेः परितोषयेत्॥ नम
स्ते कपिले देवि संसारार्णवतारिणी॥ मयाद्य त्वा द्विजेंद्राय प्रियतां मे जनार्दनः॥ समाप्य
वै तत्वं श्राद्धं दद्यात्सर्वं धनंजय॥ इत्थं चामद्यपापात्मा वित्तशाठ्यविवर्जितः॥ जलदानं
विशेषेण स्वर्णदानमतः परं॥ प्रार्थयेत्पुरुषाधीशं ततो नत्वा कृतांजलिः॥ मयानस्मि
न्व्रते देवपदस्त्वं कृतं विभो॥ सर्वं भवतु संपूर्णं त्वत्प्रसादाद्रमापते॥ प्रदक्षिणां ततः
कृत्वा दंडवत्प्रपतेद्भुवि॥ मंडलं मूर्तिसंयुक्तं सोपहारं सदक्षिणं॥ प्रियतां विष्णुरित्यु
क्त्वा आचार्याय निवेदयेत्॥ सर्वं विसर्जयेत्पश्चात्स्वामं भोज्य परितोषयन्॥ तदा जयति तत्कु
यस्मारणं बंधुभिः सह॥ एकादशीविधिं चैव यथाविधि कृतं पुरा॥ यौवनाश्वेन भूपेन
कथितं पुरस्तव॥ धनंजय तथैव मां भक्त्यानुग्रहकारणात्॥ यः करोति नरो भक्त्या व्रतमेनं

व्रता २१२ यापहा॥ संप्राप्तिर्वैष्णवं स्थानं दाहप्रलयवर्जितं॥ उक्तमुद्यापनं चैव मुनयो कुलसत्तमः
॥ किमन्यैर्बहुभिर्वाक्यैः प्रशंसा परमैर्नृप॥ एकादश्याः परतरं त्रैलोक्ये न हि विद्यते॥ अ
श्वदानं तु गोदानं अन्नमिदानं मथापि वा॥ गोहेमबीजरत्नानां समसंख्या युगानि हि॥ दा
तारो विष्णुभवनमेकादश्यां व्रजंति हि॥ ये पि शृण्वंति सततं कथ्यमानां कथामिमां॥ ते
पि पापविनिर्मुक्ताः स्वर्गं यांति न संशयः॥ इत्याकर्णितो वाक्यं कृष्णस्य परमाद्भुत
॥ आनंदपरमं प्राप्य सोर्जुनश्चापि निरंतरं॥ ॥अथ कथा॥ ॥सूत उवाच॥ ॥एवं प्रोक्ता
पुरा विप्राः श्रीकृष्णेन परं व्रतं॥ महात्म्यविधिसंयुक्तमुपदिष्टं विशेषतः॥ उत्पत्तिं यः प्र
णोत्येवमेकादश्या द्विजोत्तमा॥ भुक्त्वा भोगाननेकांश्च विष्णुलोकं प्रयाति सः॥ ॥अ राम २१२
र्जुन उवाच॥ ॥उपवासस्य नक्तस्य एकभक्तस्य किं फलं॥ किं पुण्यं किं विधानं हि ब्रूहि
सर्वं जनार्दन॥ ॥श्री भगवानुवाच॥ ॥हेमंते चैव संप्राप्ते मासि मार्गशिरे शुभे॥ शुक्लप

क्षे तथा पार्थ समुपोष्या च द्वादशी॥ दशम्यां चैव नक्तं तु पत्किंचित्सुदृढव्रतं॥ नक्तं च त
द्दिने कृत्वा दशम्यां दंतधावनं॥ दिवसस्याष्टमे भागे मंदीभूते दिवाकरे॥ तत्र नक्तं
विजानीयान्न नक्तं निशिभोजनं॥ ततः प्रभातसमये संकल्पं नियतश्चरेत्॥ मध्याह्ने च तथा पा
र्थ शुचिः स्नातः समाहितः॥ नद्यां वाप्यां तथा कूपे उत्तमं मध्यमं त्वधः॥ क्रमात् ज्ञेयं तडागे
तु तदभावे प्रशस्यते॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे॥ मृत्तिके हर मे पापं
यन्मया दुष्कृतं संचितं॥ त्वया हतेन पापेन सर्वपापैः प्रमुच्यते॥ अनेन मृत्तिकास्नानं विद
ध्यात्तु व्रती नरः॥ नालपेत् पतितैश्चौरैस्तथा पाखंडिभिः सह॥ मिथ्यावादिनो देववेदब्राह्मण
निंदकान्॥ अन्यांश्चैव दुराचारान् अगम्यागामिनस्तथा॥ परद्रव्यापहारकान् न संभाषेत् तद्व
ह्यपि नास्तं तमवलोकयेत्॥ ततो गोविंदमभ्यर्च्य नैवेद्यादिनिरादरात्॥ दीपं दद्यात् गृहे त
त्र नक्तियुक्तेन चेतसा॥ तद्दिने वर्जयेत् सार्थ निद्रां मैथुनमेव च॥ गीतनृत्यविनोदेन दिवा

व्रता० रात्रौ नयेद्व्रती॥ रात्रौ जागरणं कुर्यान्नक्तियुक्तेन चेतसा॥ विप्रेभ्यो दक्षिणां दत्वा प्रणिपत्य
२१४ क्षमापयेत्॥ यथा शुक्ला तथा कृष्णा समता वै धर्मतत्परैः॥ एकादश्युपोष्या यो राजन्न विभिन्ने
दनेव कारयेत्॥ एवं हि कुरुते यस्तु शृणु तस्यापि यत्फलं॥ शंखोद्धारे नरः स्नात्वा
दृष्ट्वा देवं गदाधरं॥ एकादश्युपवासस्य कलां नार्हति षोडशीं॥ वैधृत्यस्य च दानस्य
जन्मैव फलं स्मृतं॥ संक्रांतिषु चतुर्लक्षं यो ददाति धनंजय॥ कुरुक्षेत्रे च यत्पुण्यं ग्र
हणे चंद्रसूर्ययोः॥ तत्सर्वं जन्यते यस्तु एकादश्यामुपोषितः॥ अश्वमेधस्य यज्ञस्य क
रणे फलमुज्जायेत्॥ ततः शतगुणं पुण्यमेकादश्युपवासतः॥ तपस्विनो गृहे नित्यं ल
क्षं यस्य च भुंजते॥ षष्टिवर्षसहस्राणि तस्य पुण्यं च यद्भवेत्॥ एकादश्युपवासस्य कलां रा०म
नार्हति षोडशीं॥ गोसहस्रस्य यत्पुण्यं दत्वा वेदांगपारगे॥ एतस्मात्पुण्यं दशगुणमेकाद २१४
श्युपवासिनां॥ नित्यं च भुंजते यस्य दश चैव द्विजोत्तमाः॥ नैवेद्यैर्दशगुणं ब्रह्मचारि

णि भोजने॥ तत्सहस्रगुणं दाने कन्यादाने ततः स्मृतं॥ तस्माद्दशगुणं प्रोक्तं विद्यादाने ततोपि
च॥ विद्याद्दशगुणं चान्नं यो ददाति बुभुक्षिते॥ अन्नदानसमं दानं न भूतं न भविष्यति॥ तृ
प्तिमायांति कौंतेय स्वर्गस्थाः पितृदेवताः॥ एकादश्याश्च तस्यापि पुण्यसंख्या न विद्यते॥ एत
त्पुण्यप्रभावं यत्सुरैरपि सुदुर्लभं॥ नक्तस्यार्द्धं भवेत्तस्य एकभक्तस्य कारकैः॥ एकभक्तं च
नक्तं च उपवासस्तथैव च॥ तावद्गर्जंति तीर्थानि दाननियमयमाः॥ एकादशी न सं
प्राप्ता यावत्तावन्मखा अपि॥ नरं परं त्वेन पिबोत्वायं नद्यन्यानि तत्यात्मरक्षस्य करो॥ एकाद
श्यां नक्तं भीतयत्रं त्वं प्रच्छसेर्जुन॥ एतत्ते कथितं सर्वं व्रतानामुत्तमं व्रतं॥ एकादशीसमं ना
स्ति कृत्वा यज्ञसहस्रकं॥ ॥अर्जुन उवाच॥ ॥उत्कृष्टा त्वया त्वया कथ्यं देव पुण्येयं सर्वतः स्थिथि
ः॥ सर्वेभ्योपि पवित्रेयमुक्ता वैकादशीतिथिः॥ ॥श्रीकृष्ण उवाच॥ ॥पुरा कृतयुगे पार्थ मुरु
नामाहिदानवः॥ अत्यद्भुतो महारौद्रः सर्वदेवभयंकरः॥ इंद्रोपि च जितस्तेन अन्ये एव पुरंदरः॥ आदि

व्रता० २१५

सावसवो ब्रह्मावायुरग्निस्तथैवच॥ देवतानिर्जितास्तेनमुरेणचपांडु॥ इंद्रेणाकथितः
सर्वेहितांतःशंकरायवै॥ स्वर्गलोकपरिभ्रष्टाविचरामोमहीतले॥ उपायान्ब्रूहिमेदेव
अमराणांतुकागतिः॥ ईश्वरउवाच॥ देवराजसुरश्रेष्ठयत्रास्तिगरुडध्वजः॥ तत्रगच्छस्वत्वंशी
घ्रंदेवराजोमहामनाः॥ शरणंजगन्नाथःपरित्राणपरायणः॥ तत्रगच्छामहेसर्वेसनःकार्यंवि
धास्यति॥ इत्यस्यवचनंश्रुत्वादेवराजोमहामनाः॥ पुरस्कृत्यमहादेवंसगणंसमरुद्गणं॥ य
त्रदेवोजगन्नाथःप्रसुप्तोहिजनार्दनः॥ जलमध्येप्रसुप्तंतुदृष्ट्वादेवंजगत्पतिं॥ कृतांजलिपुरोगत्
त्वारुद्रःस्तोत्रमुदीरयेत्॥ ॐनमोदेवदेवायदेवदेवैःसुवंदितं॥ दैत्यारीपुंडरीकाक्षत्राहिमां
मधुसूदन॥ दैत्यभीताइमेदेवाभयात्सहसमागताः॥ शरणंत्वंजगन्नाथत्राह्यस्मान्भयविक्
लान्॥ त्वंगतिस्त्वंमतिर्देवत्वंकर्त्तात्वंचहारकः॥ त्वंमातासर्वलोकानांत्वमेवजगतःपिता॥ त्वं
स्थितिस्त्वंतपोसत्तिस्त्वंचसंहारकारकः॥ सहायस्त्वंचदेवानांत्वंचशांतिकरापने॥ त्वंधराच

राम २१५

त्वमाकाशःसर्वविश्वोपकारकः॥ भवस्त्वंचस्वयंब्रह्मात्रैलोक्यस्यचपालकः॥ त्वंरविःत्वंशी
शांकश्चत्वंचदेवोहुताशनः॥ हव्यंहोमोहुताशश्चमंत्रतंत्रर्त्विजोजपः॥ यजमानश्चयज्ञ
श्चफलंभोक्तात्वमीश्वरः॥ नत्वयारहितंकिंचित्त्रैलोक्येसचराचरे॥ भगवान्देवदेवेशशरणं
गतवत्सल॥ त्राहित्राहिमयोगित्स्वभीतानांशरणंभव॥ दानवैर्निर्जितादेवाःस्वर्गभ्रष्टाःकृतावि
भो॥ स्वर्गभ्रष्टाजगन्नाथविचरंतिमहीतले॥ रुद्रस्यवचनंश्रुत्वाविष्णुर्वचनमब्रवीत्॥ कोसौ
दैत्योमहामायोयोदेवायेनविनिर्जिताः॥ किंस्थानंतस्यकिंवासौकिंबलंकस्तदाश्रयः॥ एत
त्सर्वंसमाचक्ष्वमघवन्निर्भयोभव॥ ॥इंद्रउवाच॥ ॥भगवन्देवदेवेशभक्तानुग्रहकारक॥
दैत्योऽभवत्पूर्वंमहानासीन्नाडीजंघइतिस्मृतः॥ ब्रह्मवंशसमुद्भूतोमहोग्रःसुरसूदनः॥ त
स्यपुत्रेतिविख्यातःमुरुर्नामामहासुरः॥ तस्यचंद्रवतीनामानगरीचातियसी॥ तस्याव
सत्युग्रात्माविश्वंनिर्जित्यवीर्यवान्॥ सुरान्सर्वशमानीत्यनिराकृत्यत्रिविष्टपात्॥ इंद्रामि

व्रता०
२१६

यमवायवीशासोमनिर्ऋतिपाशिनां॥ पंकेषुस्वयमेवासीत्सूर्योभूत्वातपत्यति॥ पर्जन्यःस्वय
मेवासीदजेयःसर्वदेवतैः॥ जहितंदानवंविष्णोसुराणांजयमावह॥ तस्मात्तद्वचनंश्रुत्वा
कोपाविष्टोजनार्दनः॥ उवाचशक्रंदेवेंद्रंहनिष्येतंमहाबलं॥ प्रयांतुसहितासर्वेचंद्रवतींमहा
बलाः॥ इत्युक्ताःप्रययुःसर्वेपुरस्कृत्यहरिंसुराः॥ दृष्टोदेवैस्तुदैत्येंद्रोगर्जमानस्तुदानवः॥ अ
संख्यातसहस्रैस्तुदिव्यप्रहरणायुधैः॥ हन्यमानास्तदादेवाअसुरैर्बहुशालिभिः॥ तेसं
ग्रामंसमुत्सृज्यपलायंतेदशोदिशः॥ ततोदृष्ट्वाहृषीकेशःसंग्रामसमुपस्थितं॥ अन्वधावन्
स्तिक्रुद्धाविविधायुधपाणयः॥ अथतान्द्रुतान्दृष्ट्वाशंखचक्रगदाधरः॥ विव्याधसर्वगा
त्रेषुबाणैराशीविषोपमैः॥ तेनच्छिन्नास्तुशतशोदानवानिधनंगताः॥ एकांगेदानवास्थिता
युध्यमानोमुहुर्मुहुः॥ तस्योपरिहृषीकेशोयद्यदायुधमुत्सृजेत॥ पुष्पवत्तत्समभ्येतिकुंठि
ततस्यतेजसा॥ शस्त्रास्त्रैर्वध्यमानोपियदाजेतुंनशक्यते॥ युधायोधयदात्तदाक्रुद्धोबा

राम
२१६

DR BHAU DAJI MEMORIAL

हुभिःपरिघोपमैः॥ बाहुयुद्धंकृतंतेनदेवैर्वर्षसहस्रकं॥ तेनश्रांतःसभगवान्गतोबदरिकाश्र
मं॥ तत्रवैहैमवतीनामगुहापरमशोभना॥ तांप्रविश्यमहायोगीसुष्वापजगतांपतिः॥ योजन
द्वादशायामाएकद्वाराधनंजय॥ अहंतत्रप्रसुप्तोस्मिन्नयनीतोनसंशयः॥ महायुद्धेनतेनै
वश्रांतोहंपांडुनंदन॥ दानवःपृष्ठतोलग्नःप्रविवेशतांगुहां॥ प्रसुप्तंमांतदादृष्ट्वाचिंत
यद्दानवोहृदि॥ हरिमेनंहनिष्यामिदानवानांभयावहं॥ एवंसुदुर्मतेस्तस्यव्यवसायंअव
स्यच॥ समुद्भूताममांगेभ्यःकन्यकैकामहाप्रभा॥ दिव्यप्रहरणादेवीयुद्धायसमुपस्थिता॥
॥इतितादानवेंद्रेणमुरुणापांडुवर्धन॥ युद्धंसमीहितंतेनस्त्रियातत्रप्रयाचितं॥ साकन्या
युध्यतेनित्यंतांदृष्ट्वाविस्मयंगतः॥ केनेयंनिर्मितारौद्राअसुग्राशनिपातिनी॥ इत्युक्त्वादान
वेंद्रोपियुयुधेकन्ययातया॥ ततस्तयामहादेव्यात्वरयादानवोबली॥ छित्वासर्वाणिशा
स्त्राणिक्षणेनविरथीकृतः॥ बाहुप्रहरणोपेतोधावमानोमहाबलः॥ नसेनाहतस्रुदये

व्रता० २१७
तयादेव्यानिपातितः॥ ततस्तज्ज्ञानयोगेयेप्रमुखाप्सुरमर्दनि॥ तदाणोकृत्तशिरसोजग्मु
र्वैवस्वतक्षयं॥ शेषाश्चयाहितारीनाःपातालंविविशुर्द्विषः॥ ततःसमुत्थितोदेवःसुरो
दृष्ट्वाद्रनंमुखं॥ कस्मांपुरस्थितांबालिकांजदिपुरागतां॥ विस्मयोत्फुल्लनयनःप्रोवाच
जगतांपतिः॥ केनापंनिहितःसंख्येदानवोदुष्टमानसः॥ येनदेवाःसगंधर्वाःसेंद्राःसमहो
रगक्षणाः॥ सनागाःसमरेलोकेशालीजयैवविनिर्जिताः॥ येनाहंनिर्जितोभीतःश्रांतःसु
प्तोगुहामिमां॥ मयाविनिहितोदैत्यस्त्वदंशोद्भूतयाप्रभो॥ दृष्ट्वासुप्तंहरेत्वांतुदेत्याहंतु
समुद्यतः॥ त्रैलोक्यकंटकस्येत्थंव्यवसायंप्रबुध्यच॥ हतोमयादुरात्मासौदेवतानिर्भयाःकृ
ताः॥ तवैवाहंमहाशक्तिःसर्वशत्रुक्षयंकरी॥ त्रैलोक्यरक्षणार्थायहतोलोकभयंकरः॥ निह राम
दानवंदृष्ट्वाकिमाश्चर्यंवदप्रभो॥ ॥श्रीभगवानुवाच॥ ॥निहतेदानवेंद्रेस्मिन्संतुष्टोहंतवान २१७
घे॥ हृष्टपुष्टाश्चवैदेवाआनंदःसमजायत॥ आनंदःत्रिषुलोकेषुमुनीनामपियत्कृतः॥ प्र

सन्नोस्मिनघेतुभ्यंवरंवरयसुव्रते॥ ददामितेनसंदेहोयःसुरैरपिदुर्लभः॥ एकादश्युवाच
॥ यदितुष्टोसिमेदेवायदिदेयोवरोमम॥ याचेहंवरदात्वत्तःप्रसन्नोवरदर्षभः॥ उपवासस
यस्तुएषतस्यार्धनक्तभोजने॥ तदर्धंचनवेत्तस्यएकभक्तंकरोतियः॥ तस्यधर्मंचवित्तंचमो
क्षंदेहिजनार्दनः॥ यःकरोतिव्रतंभक्त्यादिनेममयतेंद्रियः॥ सगत्वावैस्त्रवंस्थानंकल्पकोटि
शतानिच॥ भुंजानोविविधान्भोगानतुपसर्गविवर्जितः॥ भगवंस्त्वत्प्रसादेनभवत्वेष
वरोमम॥ उपवासंचनक्तंचएकभक्तंकरोतियः॥ तस्यधर्मंचवित्तंचमोक्षंदेहिजनार्दन॥ ॥श्रीभ
गवानुवाच॥ ॥यत्त्वंवदसिकल्याणितत्सर्वंचभविष्यति॥ ममभक्ताश्चयेलोकेतवभक्ता
श्चयेनराः॥ त्रिषुलोकेषुविख्याताप्राप्स्यंतिममसन्निधिं॥ एकादश्यासमुत्पन्नांममभक्तिःप
रायणः॥ अतएकादशीसेवतवनाम्नाभविष्यति॥ सर्वासांचतिथीनांचमुत्तमापिभविष्य
सि॥ उपोष्येकादशीयोवैममस्थानंभविष्यति॥ दग्ध्वापापानिचस्वस्त्वंदास्यामिपदमव्ययं॥

तृतीया चाष्टमी चैव नवमी च चतुर्दशी॥ एकादशी विशेषेण तिथयो मे मनःप्रियाः॥
सर्वतीर्थाधिकं पुण्यं सर्वदानाधिकं परं॥ सर्वव्रताधिकं चैव सत्यं सत्यं वरानने॥ एवं द
त्वा वरं तस्यास्तत्रैवांतरधीयत॥ ततो हृष्टा तु संजाता तत्रैवैकादशी तिथिः॥ तस्यामेकादशी
पार्थ करिष्यंति नरास्तु ये॥ शत्रूंस्तेषां हनिष्यामि यास्यंति परमां गतिं॥ अन्ये येपि करिष्यं
ति एकादश्या महाव्रतं॥ हरामि तेषां विघ्नानि सर्वसिद्धिं ददामि च॥ एवमुक्त्वा समुत्प
न्नैमेकादश्याः पृथासुत॥ इयमेकादशी नित्या सर्वपापक्षयंकरी॥ एकैव च महापुण्या स
र्वपापनिवर्हिणी॥ ख्याता सर्वलोकेषु सर्वसिद्धिकरा तिथिः॥ शुक्लां वाप्यथवा कृष्णामृ
ति भेदं न कारयेत्॥ कर्तव्ये तु उभे पार्थ न तु त्याज्या द्वादशी तिथिः॥ अंतरं नैव कर्तव्यं समस्तैः
व्रतकारिभिः॥ तिथिरेका भवेत्सर्वा पक्षयोरुभयोरपि॥ एकादशी तु संपूर्णा प्रभाते घटिका
यदि॥ सा तिथिः परिहर्तव्या उपोष्या द्वादशी तथा॥ एवंविधा मया प्रोक्ता पक्षयोरुभयोरपि॥

उपवासं प्रकुर्वंति एकादश्यां नराश्च ये॥ तेषां ति परमं स्थानं यत्रास्ते गरुडध्वजः॥ धन्या
स्ते मानवा लोके विष्णुभक्तिपरायणाः॥ एकादश्यास्तु माहात्म्यं सर्वलोकेषु यः पठेत्॥
अश्वमेधस्य यत्पुण्यं तद्राप्नोति न संशयः॥ यः शृणोति दिवा रात्रौ नरो विष्णुपरायणः॥ ब्र
ह्महत्यादिकं पापं नश्यते नात्र संशयः॥ विष्णुधर्मसमं नास्ति गीतार्थस्य धनंजयः॥ एका द
शीसमं नास्ति व्रतं नाम मनो नाम सनातनं॥ ॥इति मार्गस्य एकादशीव्रतकथा॥ ॥अथ ज्येष्ठशुक्ले
एकादश्यां निर्जलैकादशीव्रतं न विधिः स्कांदे॥ ज्येष्ठे मासि निरपेक्षे यया शुक्लैकादशी भवेत
॥ निर्जलं समुपोष्यात्र जलं कुंभान्सशर्करान्॥ प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधा
विति॥ अथ कथा॥ पाम्न नारतयोः॥ युधिष्ठिर उवाच॥ श्रुतो मे मानवा धर्मा वै दिकाश्च
मया श्रुताः॥ द्वैपायन यथोद्दिष्टं वै त्वं वा त्वं तुमर्हति॥ व्यास उवाच॥ श्रुता मे मानवा धर्मा वैदि
काश्च श्रुतास्त्वया॥ कलौ युगे न शक्यंते ते वै कर्तुं नराधिप॥ सुखोपायमल्पधनमल्पक्लेशं म

व्रता०
२१९

ह्लाफलं पुराणानां च सर्वेषां सान्ततां वदामि ते ॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि ॥
एकादश्यां न भुंक्ते यो न याति नरकं तु सः ॥ व्यासस्य वचनं श्रुत्वा कंपितोऽश्वत्थपत्रवत् ॥ भीम
सेनो महाबाहुर्भीतो वाक्यमभाषत ॥ ॥ भीमसेन उवाच ॥ ॥ पितामह न शक्तोऽहमुपवासे करो
मि किं ॥ अतो बहुफलं ब्रूहि व्रतमेकमपि प्रभो ॥ व्यास उवाच ॥ ॥ वृषस्थे मिथुनस्थे वा शु
क्लात्वेकादशी भवेत् ॥ ज्येष्ठे मासि प्रयत्नेन सोपोष्या जलवर्जिता ॥ स्नाने वाचमने चैव वर्ज्जयि
त्वोदकं बुधः ॥ उपभुंजीत नैवान्यद्व्रतभंगोऽन्यथा भवेत् ॥ उदयादुदयं यावद्वर्जयित्वा च वर्ज
यित्वा जलं बुधः ॥ अप्रयत्नादवाप्नोति द्वादशद्वादशीर्नृप ॥ ततः प्रभाते विमले द्वादश्यां
स्नानमाचरेत् ॥ जलं सुवर्णं दत्वा च द्विजातिभ्यो यथाविधि ॥ भुंजीत कृतकृत्यस्तु ब्राह्मणै राम
ः सहितो वशी ॥ एवं कृते तु यत्पुण्यं भीमसेन शृणुष्व तत् ॥ संवत्सरस्य या मध्ये एकादश्यो २१९
भवंतु न ॥ तासां फलमवाप्नोति अत्र मे नास्ति संशयः ॥ इति मां केशवः प्राह शंखचक्रगदा

धरः ॥ तस्य व्रतस्य यत्पुण्यं तन्मे प्राह जनार्दनः ॥ एकादश्यां सिते पक्षे ज्येष्ठस्योदकवर्जितं ॥ उपो
ष्य फलमाप्नोति यत्पुण्यं वृकोदर तत् ॥ सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं ॥ सर्वहोमेषु
यत्पुण्यं तदस्याः समुपोषणात् ॥ संवत्सरे च याः सन्तु शुक्लाः कृष्णा वृकोदर ॥ उपोषि
तास्तु सर्वाः स्युरेकादश्यो न संशयः ॥ धनधान्यवहाः पुण्याः पुत्रारोग्यप्रदास्तथा ॥ उपोषि
ता नरव्याघ्र इति सत्यं ब्रवीमि ते ॥ यमदूता महाकायाः करालाः कृष्णरूपिणः ॥ दंडपाश
धरा रौद्रा मरणे दृष्टिगोचराः ॥ न प्रयांति नरव्याघ्र एकादश्याः समुपोषणात् ॥ पीतांबरधरा
सौम्याश्चक्रहस्ता मनोजवाः ॥ अंतकाले नयंत्येनं वैष्णवं वैष्णवीं पुरीं ॥ तस्मात्सर्वप्रयत्नेन
उपोष्या जलवर्जिता ॥ जलधेनुं तथा दत्वा सर्वपापैः प्रमुच्यते ॥ स्कंदपुराणे ॥ तस्यात्रार्कराज
न्दानमुक्तं ॥ ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी शुभा ॥ निर्जलं समुपोष्यात्र जलकुंभान्सशर्करा
न् ॥ प्रदाय विप्रमुख्येभ्यस्तापत्रयविवर्जिताः ॥ विष्णुलोकमवाप्येह मोदते विष्णुसन्निधौ ॥ ॥ र

व्रता० २२०

तिनिर्जलैकादशीव्रतं॥ अथाषाढशुक्लैकादश्यां शयन्येकादशीव्रतं॥ तत्र ब्रह्मपुराणे॥ एका
दश्यां तु शुक्लायामाषाढे भगवान् हरिः॥ भुजंगशयने शेते यदा क्षीरार्णवे सदा॥ तदास्य प्र
तिमा कार्या सर्वलक्षणसंयुता॥ सुप्तां तु शेषपर्यंके शैलमृद्भिस्तु चाकृतिः॥ ताम्रारकूटरजतैः
तथा चित्रपटेषु वा॥ लक्ष्म्या उत्संगहस्तेन विमृष्टचरणांबुजा॥ उत्संगे हस्ते चोत्संगस्थिते
हस्ते — — — नानाविधोपकरणैः पूजा च विधिपूर्वकं॥ उपवासश्च कर्तव्यो रात्रौ जाग
रणं तथा॥ तस्यां रात्र्यां व्यतीतायां द्वादश्यां पूजयेत्तथा॥ त्रयोदश्यां ततो गीतं नृत्यं वाद्यं निवे
दयेत्॥ इति भविष्योत्तरे॥ आषाढस्य सिते पक्षे एकादश्यामुपोषितः॥ स्थापयेत्प्रतिमां विष्णो
ः शंखचक्रगदाधरां॥ कांचनीं राजतीं ताम्रमयीं पत्रिलिकिं तथा॥ पीतांबरधरां सौम्यां पर्यं
के स्वास्तृते शुभे॥ शुक्लवस्त्रसमाच्छन्ने सोपधाने युधिष्ठिर॥ इतिहासपुराणज्ञो विष्णुभक्तोथ
वा पुमान्॥ स्नापयित्वा दधिक्षीरघृतक्षौद्रजलैस्तथा॥ तामभ्यर्च्य शुभैर्गंधैर्धूपैर्दीपैरलंकृतां॥ राम २२०

कुसुमैः — — — शुक्लैर्मंत्रेणानेन पांडव॥ सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदं॥ वि
बुद्धे त्वयि बुध्येत जगत्सर्वं चराचरमिति भारत॥ आषाढे तु सिते पक्षे एकादश्यामुपोषि
तः॥ चातुर्मास्यं व्रतं कुर्याद्यत्किंचिन्नियतो नरः॥ सनत्कुमारस्तु चातुर्मास्यव्रतारंभस्य का
लांतरमाह॥ एकादश्यां तु गृह्णीयात्संक्रांतौ कर्कटस्य च॥ आषाढ्यां वा नरो भक्त्या चातुर्मास्यो
दितं व्रतमिति सिंकल्पमंत्रश्च व्रते नैवोक्तः॥ इदं व्रतं मया देव गृहीतं पुरतस्तव॥ निर्विघ्नां सिद्धिमा
यातु प्रसन्ने त्वयि केशव॥ गृहीतेस्मिन्व्रते देव पंचत्वं यदि मे भवेत्॥ तन्मे भवतु संपूर्णं त्वत्प्रसा
दाज्जनार्दनेति॥ अयं च व्रतप्रारंभो मुख्यकल्पमया द्वावपि कार्यः ह्यष्टगतिः॥ तत्रैव त्वं नमो द्यं
व शुक्रगुरुर्न वा तिथेः॥ एवं त्वं चिंतयेद्वादौ चातुर्मास्यविधौ नरः इति॥ ॥ नैमित्तिचातुर्मास्यव्रता
नि भविष्योत्तरे॥ चतुर्वार्षिकान्मासान्देवस्योत्थापनावधि॥ स्त्री वा नरोऽपि वा भक्त्या धर्मार्थं सुदृढ
व्रतः॥ गृह्णीयान्नियमानेतान्दंतधावनपूर्वकं॥ तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक्पृथक्

व्रता० मधुरस्वरो भवेन्नित्यं नरो गुडविसर्जनात्॥ तैलस्य वर्जनात्पार्थ सुंदरांगः प्रजायते॥ कटुतैल
२२१ परित्यागाच्छत्रुनाशः प्रजायते॥ योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात्॥ तांबूल
वर्जयेद्भोगी रक्तकंठः प्रयत्नेजायते॥ घृतस्य त्यागात्सुलावण्यं सर्वस्निग्धं वपुर्भवेत्॥ फलत्
यागाच्च मतिमान्बहुपुत्रः प्रजायते॥ शाकपत्राशनत्यागी पक्वान्नादो भवेन्नरः॥ अभ्य
ङ्गस्य परित्यागाद्वपुः सौरभ्यमवाप्नुयात्॥ दधिदुग्धतक्रनियमाच्छक्रलोकं लभते नरः॥ अन्न
ते संततिर्दीर्घा स्थालीपाकमभक्ष्यात्॥ भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत्॥ भू
मौ भुंक्ते यस्तु नरः सदापि भूपतिर्भवेत्॥ सदा मुनिः सदा योगी मधुमांसविसर्जनात्॥
निर्व्याधिर्निर्जरोजस्वी विष्णुभक्तः प्रजायते॥ एकांतरोपवासेन विष्णुलोकमवाप्नुयात्॥ धा राम
रणाच्च भवेत्तस्य गंगास्नानं दिने दिने॥ मौनव्रती भवेद्यस्तु तस्याज्ञास्खलिता भवेत्॥ नमो ना २२१
रायणायेति जप्त्वानशनजं फलं॥ विष्णुपादांबुजस्पर्शात्कृतकृत्यो भवेन्नरः॥ विष्णोर्देवाल

येकुर्याद्विलेपनमार्जनं॥ कल्पस्थायी भवेद्राजन्नरो नात्र संशयः॥ प्रदक्षिणशतं यस्तु क
रोति स्तुतिपाठकः॥ हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत्॥ कृत्वा प्रेक्षणकं दिव्यं स्था
नमप्सरसां लभेत्॥ एकभक्ताशनान्नित्यमग्निहोत्रफलं लभेत्॥ अयाचितेन प्राप्नोति वा
पीकूपप्रपाफलं॥ द्विजेभ्यश्चान्नदानेन स्थापी वर्गो निरोगी भवेत्॥ पत्रेषु यो नरो भुंक्ते कुरुक्षेत्र
फलं लभेत्॥ शिलायां भोजने नित्यं प्रयागस्नानजं फलं॥ एवमादिव्रतैः पार्थ तुष्टिमायाति केशवः
॥ इति शयनैकादशीव्रतं॥ आषाढस्य शुक्लैकादश्यादिगोपद्मव्रतं॥ तत्र पूजा॥ चतुर्भुजं महाकायं
जांबूनदसमप्रभं॥ शंखचक्रगदापद्मरमागरुडशोभितं॥ सेवितं मुनिभिर्देवैर्यक्षगंधर्व
किंनरैः॥ एवंविधं हरिं ध्यात्वा ततो यज्ञं समारभेत्॥ ध्यानं॥ आवाहयामि देवेशं भक्तानामभयप्र
दं॥ सुस्निग्धं वरदं शांतं मनसावाहयेद्धरिं॥ आवाहनं॥ सुवर्णमणिभिर्दिव्यैः खचिते रैव
निर्मिते॥ दिव्यसिंहासने स्निग्धे प्रविश त्वं सुरालये॥ आसनं॥ पादोदकं सुरश्रेष्ठ सुवर्णकल

व्रता० ग्गोल्खितं॥ गंधपुष्पाक्षतैर्युक्तं गृहाणारमयासह॥ पाद्यं॥ अष्टगंधसमायुक्तं स्वर्णपात्रस्थि
२२२ तंजलं॥ अर्घ्यं गृहाण नो देव नक्तानाम भयंकर॥ अर्घ्यं॥ देवदेव नमस्तुभ्यं पुराण पुरुषो
त्तम॥ मयानीतमिदं तोयं गृहीत्वाचमनं कुरु॥ आचमनं॥ पंचामृतैस्तत स्नायां मंत्रैर्वैदि
ज्ञवैरपि॥ मध्ये मध्ये प्रकुर्यात् आचमधूपर्कपुरःसरं॥ पंचामृतं॥ नदीनां चैव सर्वासां मयानीतं ज
लमुत्तमं॥ अनेन स्नानमंत्रेण मंत्रैर्वरुणसंभवैः॥ स्नानं॥ वस्त्रयुग्मं समानीतं पट्टसूत्रेण नि
र्मितं॥ वस्त्रं कार्पासिनं तन्तोसुवर्णेन विराजितं॥ वस्त्रं॥ नारायण नमस्तेस्तु त्राहि मां भवसा
गरात्॥ ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम॥ यज्ञोपवीतं॥ केयूरमुकुटैश्चैव नूपुरैरं
गुलीयकैः॥ पूजितोसि प्रयत्नेन रत्नैराभरणैर्विभो॥ आभरणानि॥ चंदनं कमलोद्भूतं राम
कस्तूरीगिरसंयुतं॥ कर्पूरेण च संमिश्रं श्रीकृष्णानुलेपनं॥ चंदनं॥ शतपत्रैः कर्णिका २२२
रैश्चंपकैर्मल्लिकादिभिः॥ पुष्पैर्नानाविधैश्चैव पूजितं पुरुषोत्तमं॥ पुष्पं॥ दशांगं गुग्गुलं धूपं

सुगंधं च मनोहरं॥ गृहाण देवदेवेश धूपोयं प्रतिगृह्यतां॥ धूपं॥ एकार्तिकासुरश्रेष्ठ गोघृतेन सु
वर्तिना॥ संयुक्ता तेजसा कृष्ण गृहाण दिव्यदीपितं॥ दीपं॥ अन्नं च पायसं नव्यं सिताघृतसमन्वि
तं॥ दधिक्षीरघृतैर्युक्तं गृहाण सुरपूजितं॥ नैवेद्यं॥ नागवल्लीदलं रम्यं पूगीफलसमन्वितं
॥ कर्पूरखदिरैर्युक्तं तांबूलं प्रतिगृह्यतां॥ तांबूलं॥ नीराजनं गृहाणेश पंचवर्तिनिरीक्षितं॥
कैतेजोराशे मयादत्तं लोकानंदकरप्रभो॥ नीराजनं॥ नंदस्यभस्तैश्वतपाकल्पद्रुमस्य च॥ सु
रहस्तच्युतैरीश गृहाण कुसुमांजलिं॥ पुष्पांजलिं॥ नमस्ते देवदेवेश नमस्ते गरुडध्वज॥ न
मस्ते विष्णवे तुभ्यं व्रतस्य फलदायक॥ नमस्कारः॥ ततः वायनं दद्यात्॥ मंत्रहीनं क्रियाहीनं भक्ति
हीनं सुरेश्वर॥ व्रतेनानेन सुप्रीतः संपूर्णफलदो भव॥ इति पूजा॥ अथ कथा॥ व्यासं वसिष्ठन
प्तारं शक्तेः पौत्रमकल्मषं॥ पराशरात्मजं वंदे शुकतातं तपोनिधिं॥ ॥सूत उवाच॥ ॥द्वाप
रे द्वारवत्यां वै नारदः कृष्णदर्शनात्॥ उग्राहेनाप्यमात्र नंदर्शेतु यदुनंदनं॥ पूजितश्चैव कृष्णेन

विष्टरादिभिरादरात्॥ ततः प्रोवाच चरितं यद्विशेषं वदस्व मे॥ नाम्नाच्छ विष्णुर्नारदं लोकपूजितं॥ कृ
ष्ण उवाच॥ शृणु लोककृद्देवर्षे भुवने विचरन् सदा॥ लोकांतरेषु चरितं यद्विशेषं वदस्व मे॥ नारद
उवाच॥ भगवन्देवदेवेश न कास्मि तव सांतिकं॥ तत्राश्चर्यमिदं वच्मि धर्मस्य सदसि स्थितं॥ तत्र सर्वैः
समानीता सुराइंद्राश्चतुर्दश॥ आकृष्य काहवा रुद्रा आदित्या द्वादशस्मृताः॥ वसवोष्टौ तथा नागाः पर
राक्षसपन्नगाः॥ ते सर्वे यममाकृष्य स्थितः सिंहासने शुभे॥ मानुषंडुर्नेश्चर्मल्लादनार्थं वदस्वताः॥ य
म उवाच॥ चातुर्मास्यव्रतं चैकसंक्रांतिव्रतमेव च॥ न कुर्वंति च या नार्यस्तासां माद्यादरं त्वचा॥ कु
र्वंतु दुर्नेश्चास्य विचरध्वं महाभटाः॥ ते तस्य वचनं श्रुत्वा भटाः प्रविविशुर्भुवं॥ स्वामिन्निदं म
हाश्चर्यमतस्त्वां प्रवदामि च॥ तच्छ्रुत्वा त्वरितः कृष्णः प्राह लोकसुरः स्थितान्॥ तथा कु राम
र्वंतु लोकाश्च नार्यः पुर्यां निसंति हि॥ तच्छ्रुत्वा त्वरितः कृष्णः पत्नेषु नगरेषु च॥ कृष्णाज्ञया
कृष्णदूताः प्रोचुस्ते सर्वयोषितः॥ पुरः सरा प्रश्न एवं तु एतस्यां पुरीयोषितं॥ अन्यत्र यत्र कु २२३

त्रापि उच्चस्तायदुनंदनं॥ त्वसोदरी विना स्वामी नान्या नायेत्र सन्निहि॥ तच्छ्रुत्वा नपसत्र स्तंसो
दरां प्रसन्नाभाषत॥ कृष्ण उवाच॥ सुभद्रे किं करोषीह आगता यमसेवकाः॥ व्रतं वा न कृतं
भद्रे सत्यं वद सहोदरि॥ ॥सुभद्रा उवाच॥ सर्वव्रतान्यतं कृष्ण कार्यमात्र न संशयः॥ नेच्छोन्न
वसहोदर्यं स्यान्नवाकुनियोषितः पुत्रान्निमत्तुः स्यान्नो चेत्कयस्वसहोदरः॥ कृष्ण उ०॥ तथापि
भगिनी त्वं हि करोषी व्रतमुत्तमं॥ गोपद्ममिति विख्यातं व्रतं लोकेषु विश्रुतं॥ सूतेन कथितं पूर्वं ऋषी
णां हितकाम्यया॥ नैमिषे हिमवत्पार्श्वे सिद्धाश्रममनुत्तमं॥ तत्र सूतं समासीनं सर्वज्ञानविदांव
रं॥ तं दृष्ट्वा मुनयः सर्वे पादयोस्तेन ता मुनेः॥ स्वागतास्ते न मुनिनार्घ्यपाद्यादिर्निर्यथाविधि॥ अप्य
र्थितं मुनिविप्रा ऊचुस्ते प्रश्नपूर्वकं॥ ॥ऋषय ऊचुः॥ ॥भवान् लोकस्य धर्मज्ञ भक्तस्य ज्ञानसा
धनं॥ सम्यसर्वसुखार्थं सर्वसौभाग्यकारकं॥ कृपया मुनिशार्दूल कथयस्वोत्तमं व्रतं॥ ॥सूत
उवाच॥ ॥शृणुध्वमृषयः सर्वे व्रतानामुत्तमं व्रतं॥ गोपद्ममिति विख्यातं सर्वपापहरं परं॥ सर्वदु

व्रता० रवोपशमनं सर्वसंपत्प्रदायकं॥ यमस्य खंडनं यस्मादुरीकृतमनुत्तमं॥ सुवासिनीत्वं नागपा
२२४ वि पुत्रपौत्रप्रवर्धनं॥ ॥कृष्णपक्ष ऊचुः॥ ॥कस्मिन्मासि कथं कृत्वा किं फलं कस्य पूजनं॥ केन ची
र्णं पुरा विप्र तत्सर्वं कथयस्व नः॥ ॥सूत उवाच॥ ॥आषाढ्याः शुक्लपक्षस्य एकादश्यां विशे
षतः॥ तदारभ्य च कार्तिक्यां द्वादश्यां तं व्रतं चरेत्॥ गोष्ठे च शुद्धगोस्थाने गोमयेनोपलिप्य च॥ पं
त्रयस्त्रिंशच्च पद्मानि गंधपुष्पैः प्रपूजयेत्॥ तत्संख्यया च कर्तव्या नमस्कारप्रदक्षिणाः॥ तत्सं
ख्यया त्वपूपांश्च ब्राह्मणाय निवेदयेत्॥ प्रथमे वत्सरे चैव द्वितीये चैवमेव हि॥ वायनस्य तथा चै
व पायसं सेव निर्मितं॥ तृतीये मंडकान्दद्याच्चतुर्थे पूर्णमिश्रितान्॥ पंचमे द्याय तत्संख्याकान्
र्णो विस्तरं पंचमे॥ उद्यापनं प्रकुर्वीत आदौ चांते च मध्यमे॥ एकादश्यामुपवसेद्दंतधावनपूर्वकं राम
॥ अभ्यंगं तु प्रकुर्वीत स्वान्विते ब्राह्मणैः सह॥ पुण्याहं वाचयित्वा तु प्रतिमायां यजेद्धरिं॥ कर्षमात्रसु २२४
वर्णेन तदर्धार्धेन वा पुनः॥ पुनर्द्वादशनाम्नापि सतिलाज्यसमिधतैः॥ पायसं च सनं चाष्टो कृत्वा

पूर्णं कुर्वीत विचरेत्॥ पुंवत्ससहितां धेनुमाचार्याय समर्पयेत्॥ ब्राह्मणान्पंचषोडशभिर्भोजये
त्स्वरूपैः सह॥ भुंजीत बंधुभिः सार्धमेकाप्रकृतमानसा॥ अप्रमाने पि यथाशास्त्रात् ब्राह्मणान
पिन्नो जपेत्॥ इदं व्रतं महापुण्यं --- तु मुनिपुंगवाः॥ इदमुक्तानुविपुलान्सर्वान्कामानमनो
रमान्॥ अंते स्वर्गपदं गच्छेत्सर्वपापविवर्जिता॥ कृष्णस्य वचनं श्रुत्वा सुतज्ञातत्स्य याकरो
त्॥ पंचाब्दं व्रतमेतस्मात्ततो यामचतुष्टये॥ तत्सर्वं त्वरितं कृत्वा प्रातः कृत्वा कृतांजलिः॥ एव
कृते व्रते तस्मिन्काले यमनरा विज्ञात्॥ यमभटा ऊचुः॥ सुतज्ञ तव देहस्य च मूर्धि संगता
वयं॥ लोकेस्मिंस्तु व्रतं येन न कृतं नक्रिप्रवर्वतः॥ तद्धर्मेणापि न वध्यो नरदेहो मे यमशासना
त्॥ सुतज्ञोवाच॥ नराः परमपतमे चीर्णं गोपद्मव्रतमुत्तमं॥ सत्तां पुंवत्ससहितां धेनुर्विप्राय
दक्षिणा॥ गोष्ठे पद्मानि संपश्य सर्वे पिशन्तु हे नराः॥ अन्योन्यचारसमये विष्णुदूतास्तदागता
ः॥ तान्दृष्ट्वा ताडयामासु व्रतस्यास्य प्रभावतः॥ पलायितं महाग्नी तास्मरंतो यमशासनं॥ तान्

व्रता० दृष्ट्वा रक्तं दग्धांगां च गोमयसमन्वितं ॥ कस्येदं कृत्यमिति च ज्ञात्वा तां त्रियदर्शनात् ॥ ब्रा
२२५ चक्रुस्ताः स एवं तु यत्र संपूज्यते हरिः ॥ नवज्रिस्तन्नगंतव्यं हरेरद्भुतकर्मणः ॥ तस्य व्रतमिदं
तत्र पद्यतो हितवाद्रतं ॥ प्राप्तवंतो देवलोकात् किं कुर्मः प्रभुं रंतुगां ॥ इत्युक्त्वा धर्मराजो सेशान्तो
पांतं विवेशाह ॥ तेन ऋषिणमत्यं कथितं व्रतमीदृशं ॥ इमयं सा च पांचाल्यो राज्यवंशात्कृतं
व्रतं ॥ व्रतस्यास्य प्रभावेन राज्यसौभाग्यसंपदः ॥ पुत्रपौत्रादि सौख्यं तु भुक्त्वा मोक्षमवाप्नुयात् ॥ ऋ
षय ऊचुः ॥ त्वत्प्रसादात्कृतार्थाः स्मो गच्छाम स्वाश्रमं वयं ॥ प्रणम्य मुनिभिः सा कं तत्रैवांतरधीय
त ॥ मुनिभिः सर्वलोकेषु कथितं व्रतमुत्तमं ॥ नातः परतरं पुण्यं त्रिषु लोकेषु विश्रुतं ॥ ॥ इति श्री
भविष्योत्तरपुराणे गोपद्मव्रतं ॥ ॥ अथ कार्तिकशुक्लैकादश्यां प्रबोधनविधिः हेमाद्रौ ब्राह्मे
॥ एकादश्यां च शुक्लायां कार्तिके मासि केशवं ॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥ राम
नृत्यैर्गीतैस्तथा वाद्यैर्ऋग्यजुःसाममंगलैः ॥ वीणाश्रवणवाद्यैश्च पुराणश्रवणेन च ॥ वासुदेवकथा २२५

भिश्च स्तोत्रैरन्यैश्च वैष्णवैः ॥ स्मृताष्टितैरिंद्रजालैर्हरिशोभाभिरेव च ॥ पुष्पैर्धूपैश्च नैवेद्यैर्दीपे
र्दुग्धैः स्तुगोऽर्ननैः ॥ होमैरन्यैरपूपैश्च फलैः शार्करपायसैः ॥ इक्षोर्विकारैर्द्राक्षैश्च —— ह्नुदैः सदा
डिमैः ॥ कूटेरकस्य मंजर्या मालत्या करपत्रेन च ॥ कुटेरकः — पर्णाशः कृष्णतुलसीति केचित् ॥ कृ
ताभ्यां श्वेतरक्ताभ्यां चंदनाभ्यां च सर्वदा ॥ कुंकुमालक्तकाभ्यां च रक्तसूत्रैः सकंकणैः ॥ तथा
नानाविधैः पुष्पैः कृष्णैर्वीरकपाङ्गतैः ॥ विक्रेत्रा प्रथमतो निहितं म्हात्म्यं दत्वा क्रियमाणक्रेयो
वीरक्रयः तस्मात् शस्त्रां स्वतीतायां द्वादश्यां मलशोरर्ये ॥ आदौ घृतेन तैलेन वेणां मधुनास्नापयेत्त
तः ॥ दध्ना क्षीरेण च ततः पंचगव्येन शास्त्रवत् ॥ उद्वर्तनं माषचूर्णं मसूराम्लकानि च ॥ सर्षपांश्च
प्रियंगुश्च मातुलिंगरसैस्तथा ॥ सर्वौषधैः सर्वगंधाः सर्वबीजानि कांचनं ॥ मंगलानि यथाकामं
रत्नानि च कुशोदकं ॥ एवं चोद्धृत्य देवेशं दद्याद्गोरोचनां शुभां ॥ ततस्तु कलशान्देयाद्यथाप्राप्तान्स
वेष्टिताः ॥ जातीपल्लवसंयुक्तान्सफलान्सकांचनान् ॥ पुण्याहवेदघोषेण वीणावेणुरवेण च ॥

व्रता० २२६

एवंसंस्नाप्यगोविंदंस्वनुलिप्तंस्वलंकृतं।।सवाससंतुसंछन्नंसुमनोभिःसुकुंकुमैः।।दीपैर्धू
पैर्मनोज्ञैश्चपायसेनचभूरिणा।।हविष्यैश्चान्नदानैश्चहोमैःपुष्पैःसदक्षिणैः।।वासोभिर्भू
षणैरम्यैर्गोभिर्बालिरश्वैर्मनोजवैः।।ब्राह्मणान्पूजनीयाश्चविसर्जेयाश्चभक्तितः।।यत्तुशिष्टा
मतंपश्चाद्भोक्तव्यंबान्धवैःसहेति।।भविष्योत्तरे।।कार्तिकेशुक्लपक्षेतुएकादश्यांप्रयत्नतः।।
मंत्रेणानेनराजेंद्रदेवमुत्थापयेद्द्विजः।।मंत्रश्च।।ब्रह्मेंद्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदि
तवंदितीय।।बुध्यस्वदेवेशजगन्निवासमंत्रप्रभावेनसुखेनदेव।।इयंचद्वादशीदेवप्रबो
धायसुनिर्मिता।।त्वयैवसर्वलोकानांहितार्थंशेषशायिना।।उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांज
गत्पते।।त्वयिसुप्तेजगन्नाथजगत्सुप्तंभवेदिदं।।उत्थितेचेष्टतेसर्वमुत्तिष्ठोत्तिष्ठमाधव।।ततःपु राम
ष्पांजलिंदद्यात्।।तत्रमंत्रः।।गतामेघावियच्चैवनिर्मलंनिर्मलादिशः।।शारदानिचपुष्पाणि २२६
गृहाणममकेशव।।इदंविष्णुरितिप्रोक्तोमंत्रउत्थापनेहरेः।।समुत्थितेततोविष्णौक्रियाःसर्वाः

D. BHAU DAJI MEMORIAL

व्रता० २२७

सेफलरसैस्तथा।।सुगंधामलकेनापलेपयेद्गंधचंदनैः।।पुष्पाधिवासितैश्चैवतथागंधा
धिवासितैः।।स्नाप्यमानंतुगोविंदंयेपश्यंतिमुदान्विताः।।कल्पयेसुदृढंपापंतेषामाजन्मसंचि
तं।।कुंकुमागुरुकस्तूरीकर्पूरैश्चंदनार्चितैः।।ततोवैमालतीमालांचंद्रचूर्णयुतांददेत्।।महोप
चारैःसंपूज्यविष्णुंनीराजयेत्ततः।।कृतांजलिपुरोभूत्वाप्रार्थयेत्पुरुषोत्तमं।।चराचरमिदंसर्वंत्व
देकशरणंविभो।।अनुग्रहात्मतेलोकेराज्यापरस्वजगद्गुरो।।नृत्यगीतैःप्रेक्षणकैःरात्रिशे
षंनयेद्व्रती।।शयनादुत्थितंदेवंयेपश्यंतिगदाधरं।।अशेषान्सर्वकामानवाप्नुवंतिअश्वमेधंल
भंतीति।।इत्युत्थापनमहोत्सवविधिः।। ।।अथकार्तिकशुक्लैकादश्यादिभीष्मपंचकं।।हेमाद्रौनार
दीये।।नारदउवाच।।यदेतद्व्रतंपुण्यंव्रतानांपरमंव्रतं।।कर्तव्यंकार्तिकेमासिप्रयत्नाद्भीष्मपं राम
चकं।।विधानंतस्यविस्पष्टंफलंचापिततोवद।।कथयस्वप्रसादेनमुनीनांहितकाम्यया।। २२७
।।ब्रह्मोवाच।।प्रवक्ष्यामिमहापुण्यंव्रतंव्रतवतांवर।।भीष्मेणैवयत्संप्राप्तंव्रतंपंचदिनात्मकं।।

प्रवर्त्तयेत्॥महालक्ष्म्यारवौरात्रौन्नामयेस्मिन्दिनेस्थिते॥उत्थितेदेवदेवेशेनगरेपार्थिवःस्वयं॥
रात्रौप्रजागरंकार्यद्विकादश्यांसुरालये॥प्रभातेविमलेस्नात्वाद्वादश्यांविष्णुमर्चयेत्॥होम
येद्धव्यवाहवैहोमद्रव्यैर्घृतादिभिः॥ततोविप्रान्स्वपत्नीश्चभोजयेद्दत्वावित्तैः॥घृतक्षीर
दधिक्षौद्रकासारगुडमोदकैः॥ब्राह्मस्कान्दयोःपुरुषोत्तममाहात्म्ये॥अतःपरंप्रवक्ष्येउत्तवे
उत्थापनमहोत्सवं॥प्रजयित्वाजगन्नाथंकौमुदाख्येमहोत्सवे॥आश्विन्यांमासिक्रीडादिभिस्तु
ष्पवस्त्रमाल्यानुलेपनैः॥ततःप्रभातेसंकल्प्यकार्त्तिकव्रतमुत्तमं॥व्रतेनतेनैवनयेद्यावदेकाद
शीसितातस्यामुत्थापयेद्देवंसंपूज्यजगदीश्वरं॥उत्थितेदेवदेवेशेतेजोराशौजगत्पतौ॥वीक्ष्येतस्मै
कलंविश्वंप्रसुप्तंतवमायया॥प्रफुल्लपुंडरीकश्रीलोचनोन्मीलनेनत्वै॥त्वयादृष्टंजगदीदंपवि
त्रंपरमेश्वरति॥इत्युक्त्वाप्यजगन्नाथंवेणुवीणादिनिस्वनैः॥शंखकाहलमुरजवाद्यैर्नृत्यगीतिकैः॥
प्रयत्नात्स्थाप्यतेनपिन्स्वमंडपं॥सुगंधतैलेनाभ्यज्यस्नापयेत्पुरुषोत्तमं॥पंचामृतेनालिकेरेर

सकाशाद्वासुदेवस्यतेनोक्तंभीष्मपंचकं॥व्रतस्यास्यगुणान्वक्तुंकःशक्तःकेशवादृते॥व्रतं
चैतन्महापुण्यंमहापातकनाशनं॥अतोवरंप्रयत्नेनकर्त्तव्यंभीष्मपंचकं॥कार्त्तिकस्याम
लेपक्षेस्नात्वासम्यग्यतव्रतः॥एकादश्यांतुगृह्णीयाद्व्रतंपंचदिनात्मकं॥ततःस्नात्वाविधा
नेनमध्याह्नेचयथाविधि॥नद्यांवाविस्तुगर्तेवासमालभ्यचगोमयं॥यवव्रीहितिलैःसम्यक्पि
तॄन्संतर्पयेत्क्रमात्॥स्नात्वामौनंततःकृत्वाधौतवासाद्दृढव्रतः॥ततःसंपूजयेद्देवंसर्वपापह
रंहरिं॥स्नापयेत्सरयानत्वामधुक्षीरघृतेनवा॥तीर्थैश्चपंचगव्येनगंधचंदनवारिणा॥चंदने
नसुगंधेनकुंकुमेनाथकेशवं॥कर्पूरोशीरमिश्रेणलेपयेद्गरुडध्वजं॥अर्चयेदुचितैःपु
ष्पैःगंधधूपसमन्वितैः॥गुग्गुलंघृतसंयुक्तंदहेद्देवायभक्तिमान्॥दीपकंतुदिवारात्रौदद्या
त्पंचदिवादिषु॥नैवेद्यंदेवदेवस्यपरमान्नंनिवेदयेत्॥घृताक्तंजुहुयात्पश्चात्तदेवाष्टोत्तरंशतं॥जु
हुयात्तुघृताभ्यक्तंतिलंव्रीहियवंव्रती॥षडक्षरेणहोमस्तुस्वाहाकारान्वितेनच॥ॐनमोविष्णवे

तिषडक्षरो मंत्रः॥ उपास्य पश्चिमां संध्यां प्रणम्य गरुडध्वजं॥ जपित्वा पूर्ववन्मंत्रं क्षीतिशा
यीनवेत्तत्र॥ सर्वमेतद्विधानं तु कार्यं पंचतिथिष्वपि॥ विशेषो के व्रते चास्मिन्यद्भवेत्तं शृणुष्व
तत्र प्रथमेऽह्नि हरेः पादौ प्रपूजयेत्कमलैर्द्विज॥ द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत्॥
पूजयेच्च तृतीयेऽह्नि नाभिं भृंगारकेन तु॥ बाणबिल्वजपाभिश्च ततः स्कंधौ समर्चयेत्॥ ततो
नु पूजयेच्छीर्षं मालत्या चक्रपाणिनः॥ कार्त्तिक्यां देवदेवस्य भक्त्यान्नमयमानसः॥ पूजयेत्क
पमंत्रेण गंधपुष्पं निवेदयेत्॥ अर्चयित्वा हृषीकेशं एकादश्यां विशेषतः॥ त्रिः प्राश्य पंचगो
मयं सम्यक् एकादश्यामुपावसेत्॥ गोमूत्रं मंत्रवद्भूयो द्वादश्यां पूजयेद्व्रती॥ क्षीरं चैव त्रयो
दश्यां चतुर्दश्यां तथा दधि॥ संप्राश्य कायशुद्ध्यर्थं लंघनीयं चतुर्दिनं॥ प्राशनं होममंत्रेणेति
हैमाद्रौ॥ पंचमे तु दिने स्नात्वा विधिवत्केशवं॥ भोजयेद्ब्राह्मणान्नत्वा तेभ्यो दद्याद्य
थावद्दक्षिणां॥ व्रतोपदेष्टारमपि पूजयेद्वस्त्रभूषणैः॥ ततो नक्तं समश्नीयात्पंचगव्यं पुरःस

रं॥ एवं सम्यक् समाप्यं स्याद्यथोक्तं व्रतमुत्तमं॥ सर्वपापहरं पुण्यं प्रख्यातं भीष्मपंचकं
॥ जन्मप्रभृति यत्पापं स्त्रिया पुरुषमवाप्नुयात्॥ तत्फलं समवाप्नोति सम्यक्स्नात्वा भीष्मपंच
कं॥ महापापो यस्य जन्मद्यं जन्मतो मरणांतिकं॥ तद्भीष्मपंचके स्नात्वा संप्राप्नोत्यधिकं फ
लं॥ न विष्णोश्च परो॥ कार्त्तिके शुक्लपक्षस्य शृणु धर्म्यं पुरातनं॥ एकादश्यां समारभ्य विज्ञेयं भी
ष्मपंचकं॥ ऊकारं सत्वहीनानां मद्यमांसवान्वेतसां॥ पपधी परिहर्तव्या ब्रह्मचर्येण नि
त्यया॥ शाकाहारेण मुन्यन्नैः कृत्वार्चनपरो नरः॥ स्त्रीभिर्विकितकर्तव्यं स्वयस्तु पुण्यवर्द्धनं
॥ विधवाभिस्तु कर्त्तव्यं पुत्राणां सुखलब्धये॥ सर्वकामसमध्यर्थं कर्त्तव्यं चैव पांडव॥ निसं
स्नानेन दानेन कीर्तिकी यावदेव तु॥ वैश्वदेवश्च कर्त्तव्यो विष्णुध्यानपरायणैः॥ वैश्वदेवः
सर्वदेवस्य प्राप्तिहोमो वा कार्यः॥ पापस्य प्रतिमा कार्या रौद्रवक्त्रातिभीषणा॥ खड्गहस्ताति
विकृता घोरा हीनदंष्ट्रा करालिनी॥ तिलप्रस्थोपरिस्थाप्या धर्मराजस्य नाममंत्रिः॥ यमाय धर्मराजा

यथस्साद्ये॥ इममुच्चारयेन्मंत्रं गृहीतकुसुमांजलिः॥ यस्मजन्मविकृतं मिहजन्मनिवा
पुनः॥ पापंप्रशममायातु तव पादप्रसादतः॥ एवं संपूज्य विधिवत्प्रतिमां च सकांच
नं॥ ब्राह्मणाय ददाम्यद्य तस्मा धर्मो मे प्रीयतामिति॥ तद्व्रदेवदेवस्य कृष्णस्याक्लिष्टकारि
णः॥ प्रतिमादेपेस्मनुषंगः॥ कृत्वान्नजायथाशक्त्या विप्राणां वेदवादिनां॥ दद्याद्दक्षिणां गां चै
व कृष्णो मे प्रीयतामिति॥ अन्येषामपि दातव्यं सत्कृतस्य सुवांछितं॥ कृतकृत्यस्थिरो भूत्वा
विरक्तः संयतो भवेत्॥ नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः॥ अष्टपादेकनयनः शंकुक
र्णो महास्वनः॥ जटी द्विजिह्वास्ताम्रास्यो मृगराजस्तनुच्छदः॥ चिंतनीयो महादेवो यस्य
रूपं न विद्यते॥ व्रतदेव विष्णोरिदं रूपं इदं भीष्मेण कथितं शरतल्पगतेन मे॥ ब्रह्मचारी
गृहस्थो वा वानप्रस्थोथ वा यतिः॥ प्राप्नोति वैष्णवं स्थानं तत्कृत्वा भीष्मपंचकं॥ ब्रह्महा
मद्यपस्तेयी गुरुगामी सदा नरः॥ मुच्यते सर्वपातकान्मर्त्यः कृत्वेदं भीष्मपंचकं॥ मुच्यते

पातकाद्भुत्वा पावको विष्णुलोकभाक्॥ धर्म्यं पुण्यं पापहरं युधिष्ठिर महाव्रतं॥ यद्वी व्रीब्र
ह्महा गोघ्नः सर्वपापैः प्रमुच्यते॥ यद्भीष्मपंचकमिदं ह्यपितं पृथिव्यामेकादशी प्रभृतिपंच
दशी निबद्धं॥ मुत्पन्नजोजनपरस्य जनस्य तस्मिन्निष्टंफलं दिशति पांडववंशकेतुः धन्वा॥
पाम्ते॥ पंचाहं पंचगव्याशी भीष्मायार्घं तु पंचसु॥ अहस्वपितथा दद्यामंत्रेणानेन पांडव
॥ वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च॥ अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे॥ वसु
नामवताराय शंतनोरात्मजाय च॥ अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे॥ ॥इति हेमा
द्रौ भीष्मपंचकं॥ ॥ मार्गकृष्णैकादश्यां वैतरणीव्रतं॥ ॥हेमाद्रौ भविष्ये॥ ॥कृष्ण उवाच
॥॥ शृणुष्व तस्य गर्तं भीष्मं पर्यन्तः च युधिष्ठिरः॥ व्रतेनानेन पुण्येन यमलोको न दृश्यते॥ नारी
वा पुरुषो वापि लोकं चैव न पश्यति॥ तस्मात्त्वं धर्मरूपीतां महाकृपां कुरु॥ ॥भीष्म
उवाच॥ एकादशी वैतरणी तां कृत्वा तु सुखी भवेत्॥ यमलोकं न पश्येद्वै कं चैव तन्निः

इति॥ ॥युधिष्ठिर उवाच॥ ॥केन व्रतविधानेन कर्त्तव्या सा महाफला॥ पितामह समाख्याहि
तद्विधानं मम प्रभो॥ ॥भीष्म उवाच॥ ॥एकादशी तिथिः कृष्णा मार्गशीर्षगतानघ। नाम्ना सा
द्य नरः सम्यग्गृहीत्वा ह्रीयान्नियमं शुचिं॥ एकादशी तिथिः कृष्णा नाम्ना वैतरणी शुभा॥ सा
व्रतेन मया कार्या विषनक्तोपवासिना॥ मध्याह्ने तु नरः स्नात्वा नित्यं निवर्त्तितक्रियः॥ रात्रौ सुर
भिमानीय कृष्णामर्चेद्यथाविधि॥ पूर्वामुखा विधातव्या कृष्णा गोः किनन्ततले॥ अग्रपा
दात्समारभ्य पश्चासादृक्यावधि॥ गोपुच्छं तु समासाद्य कुर्याद्वा पितृतर्पणं॥ ततः पूजा प्रकर्त्त
व्या शास्त्रदृष्टिविधानतः॥ गां चैव वस्त्रयुग्मयुक्तं चंदनेनानुलेपयेत्॥ गंधतोयेन चरणौ शृंगौ
प्रक्षाल्य स्वशक्तितः॥ ततोनु पूजयेद्भक्त्या पुष्पैर्गंधादिवासितैः॥ मंत्रैः पुराणसंप्रोक्तैः यथाह्वाने
यथाविधि॥ अथ पूजा॥ गो पादाभ्यां नमः॥ गोः आस्याय नमः॥ गोः शृंगाय नमः॥ गोः स्कंध
भ्यां नमः॥ गो पुच्छाय० गोः पार्श्वाभ्यां० गोः सर्वांगेभ्यो नमः॥ स्थाने स्थाने तु शुभं धान्यं प्रक्षिपेत्कुंकुमा

न्वितः॥ पश्चाद्वापयेद्धूपं गोर्धूपः प्रतिगृह्यतां॥ धूप॥ असिपत्रादिकं घोरं नदी वैतरणी तथा
॥प्रसादात्तेतरीष्यामि गोमातस्तेन मो नमः॥ सुखेन तीर्यते यस्मान्नदी वैतरणी ध्रुवं॥ तस्मा
देकादशी कृत्वा नाम्ना वैतरणी भवेत्॥ आनंदकृत्सर्वलोके देवानां च सदा प्रियः॥ गौस्त्वं
पाहि भ्रान्ताघोरे दीपोयं प्रतिगृह्यतां॥ दीपः॥ अन्नाहारं गवे दद्यां सम्यक् स्वादुं सुनिर्मलं॥ सुर
भिवत्सदानेन प्रीयतां परमेश्वरी॥ वस्त्रं॥ मार्गशीर्षादिके नक्तं यावन्मासचतुष्टयं॥ अन्नम
स्वक्तं तु षष्ठं तु यावकाशनमेव वा॥ श्रावणादिषु मासेषु चतुर्थाद्यास्त्रपायसं॥ तदन्नस्पत्रयो
भागा गोग्रासस्वार्थमेव च॥ नैवेद्यं हि मया दत्तं सुरभिः प्रीयतां मिति॥ द्वितीयं गुरवे दद्यात्तृती
यं गुरमेव च॥ मासान्मासं प्रकुर्वीत मासद्वादशकं व्रतं॥ उद्यापनं ततः कुर्यात्सर्वलेसंवत्सरे त
दा॥ शय्यां शाल्मलिकां कार्या दंपत्योः परिधानकं॥ सवत्सां कृष्णवर्णां तु धेनुः कार्या पयस्विनी॥ सौवर्णं
सुरभिं कृत्वा स्थापयेत्तूलिकोपरि॥ सुरभिं पूजयेन्मंत्रैः पूर्वोक्तैर्भक्तिसंयुतः॥ ततस्तु गुरवे दद्याच्छ

व्रता० २३१

वैतत्रसमापयेत्॥ नारीवापुरुषोवापिव्रतस्यास्यप्रभावतः॥ राज्यंबहुधनंभुक्त्वास्वर्गलोके
महीपते॥ नारीलोहस्यदातव्यः कार्पासेनसंयुतः॥ वैतरण्यांसमाप्यर्थंब्राह्मणायकृतंवि
ने॥ ॥इतिवैतरणीव्रतं॥ गुर्जरेषुप्रसिद्धं॥ ॥अथोद्यापनं॥ ॥शुक्लैकादशीव्रतं॥ हेमाद्रौभवि
ष्योत्तरे॥ ॥युधिष्ठिरउवाच॥ ॥श्रुतातः कृष्णमेशुक्लांद्वादशींपरमांवद॥ पुरागमयांवरीषाय
व्रतास्सर्वेमनोरथाः॥ द्वादशपत्रैकादशीतिहेमाद्रिः॥ कृष्णउवाच॥ ॥यस्छेत्सफलंजन्मजीवि
तंचसुजीवितं॥ विनाशंपापानांमः कुर्याद्वादशीमिमां॥ युधिष्ठिरकिमिष्टेनविशिष्टैरन्यैरनु
ष्ठितैः॥ ॥दुष्टानितरदुर्गाणितोषयस्वचकेशवं॥ मार्गशीर्षसितेपक्षेद्वादशीमारभेदिमां॥
यदावाभक्तिरुत्पन्नादेवदेवंजगन्नाईनं॥ एकादश्यामनाहारोमासिमास्यर्चयेद्धरिं॥ द्वादश्यां
द्वादशैतानिनामानिपरिकीर्तयेत्॥ केशवंमार्गशीर्षेचपुष्येनारायणंविदुः॥ माधवंमा
घमासेतुगोविंदंमप्यफाल्गुनेचैत्रेविष्णुंतथाविद्यात्वैशाखेमधुसूदनं॥ त्रिविक्रमंतथाज्ये

राम २३१

ष्ठेआषाढेवामनंविदुः॥ श्रावणेश्रीधरंविद्धिहृषीकेशंतुभाद्रके॥ पद्मनाभंचाश्वयुजिपश्चा
द्दामोदरंविदुः॥ एवंद्वादशभिर्मासैर्व्रतंपारंगमिष्यति॥ व्रतांतेब्राह्मणान्शांतान्मासंसंख्या
न्निमंत्रयेत्॥ मासनाम्नातथादेवंपाद्यार्घादिभिरर्चयेत्॥ द्वादशात्रघटाश्चैवतिलपात्रजलैर्यु
ताः॥ देयास्ततोनिसंद्वर्णलेस्याद्वादशनामभिः॥ ततोदेवस्यपुरतोगोष्टेवाहोममारभेत्॥ मंत्रे
णेदंविष्णुरितिसमिदाज्यघृतौदनैः॥ तैरेवचयजेत्पश्चान्मंत्रैर्हरिशनामभिः॥ धेनुःश्वेतातुदात
व्याकपिलावासकांचना॥ माघस्नानस्ययत्पुण्यंगंगासागरसंगमे॥ तत्पुण्यंसमवाप्नोतिशुक्लेद्वा
दशीव्रतं॥ योद्वादशीव्रतमिदंविदधातिमर्त्यः सुश्वेतधेनुवरदक्षिणमष्टमेकं॥ तस्याशुजन्मस
फलमाशुविनाशमेतिश्रीपद्मनाभपदपंकजपूजकस्य॥ ॥इतिशुक्लद्वादशीव्रतं॥ ॥अथकृ
ष्णैकादशीव्रतं॥ ॥हेमाद्रौवाराहे॥ ॥धरण्युवाच॥ ॥ब्रह्महाहेमहृत्पोघ्नः सुरापोगुरुतल्प
गः॥ कृतघ्नोगरदःस्त्रीघ्नोमित्रघ्नोविश्वस्तमित्रहा॥ विश्वासघातकरूनित्यंवेदवृत्तिहरोधमः॥ प

गृहेताग्निहीनो विघ्नः परस्त्रीनिरतोधमः॥ हत्यादिपापोपहतपितुर्वर्गोस्तिमस्यय॥ पतितोनरकेघो
रे प्रेतत्वमागतः॥ निर्वत्तिनियतेपुंसां यथातक्षहिमं धरः॥ वराहः॥ समस्तपातकहरं स्वर्ग
सुखमोक्षदं॥ नसमं कृष्णद्वादश्या किंचिदस्मपरं भुवि॥ मार्गशीर्षकृष्णपक्षे द्वादश्यामेकभु
क् नरः॥ एकादश्यामुपवसेत्कृष्णस्याचैवसमर्चयेत्॥ सौवर्णीराजती ताम्री कृष्णमूर्तीश्चतुर्भु
जां॥ अहतेषु च समकलशं तत्र कृष्णं प्रपूजयेत्॥ स्नात्वा च कृष्णस्तुतिभिः प्रभाते दद्याच्च सम्यक्ति
लपात्रयुक्तं॥ नमोस्तु कृष्णाय पितुश्च मातुर्हत्वा त्वघं प्रापय तु स्वर्गमस्यै॥ अर्घं दत्वा ततः सम्य
क् कृष्णसंप्रपूजयेद्बुधः॥ अश्वीयात्माति मास्येवं कुर्यात्संवत्सरं व्रती॥ नामानि देवदेवस्य केश
वस्य पृथक् पृथक्॥ कृष्णानंतश्च्युतश्चक्री वैकुंठोपजनार्दनः॥ उपेंद्रोयज्ञपुरुषो वासुदेव
स्तथा हरिः॥ योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात्॥ एतानि प्रातरुत्थाय यः स्मरेत्पुरुषः स
दा॥ अपि दुर्गतिगास्तस्य पितरः स्वर्गमाप्नुयुः॥ तिलपात्रं द्वादशाकं योदद्यात्सततं द्विजे॥ गाव

श्च कपिला दद्यात्कपेन्नामानि तैः समं॥ मासोपवासिनां पुण्यं यज्ञानां तीर्थयायिनां॥ स्या
त्कृष्णदेवस्य प्रत्यहं मासनाममितिः॥ प्रतिमासं स्वनाम्नैव पूजादानादिकं हरेः॥ स्वनाम्ना स्वो
क्तं तत्तन्मासनाम्नैत्यर्थः॥ कृत्वांते च ततो होमः कार्यस्तद्देवतापदैः॥ अंतोव्रतांते अग्निप्रण
यनात् पूर्वं द्वादशैतान्ननुस्मरे॥ दूर्वाग्रास्वस्थपत्रेषु —— ये छुक्तंडुलैः॥ तस्मै नमः॥ आयातु
इत्यावाहयेत्पृथक्॥ संस्थाप्याग्निं ततः प्राच्यां ध्यायेन्नानात्मसंमुखान्॥ आसनं पाद्यमर्घं च गं
ध पुष्पार्चनानि च॥ धूपदीपांश्च वासांसि होमशेषं समापयेत्॥ दत्वा वाचमनं पश्चात् होमशेषं
निवेदयेत्॥ अष्टाष्ट समिधो ह्यग्ने हुत्वाष्टाष्ट घृताहुतिः॥ पंचस्याहुतिरेकैकां अष्टाष्टौ च ति
लाहुतिः॥ अग्निप्रतिष्ठितं होमं देवेभ्यश्च निवेदयेत्॥ पूर्णाहुतिं ततो भवेन्मंत्रः तद्विष्णोः परमं प
दं॥ एवं कृते तु होमांते कृष्णद्वादश्यावाष्टावाथ द्वचतस्रो वधैया एका वापि पयस्विनी॥ हेमशृंगी
रौप्यखुरा सघंटा नरणांबरं॥ कांस्यपृष्ठिं तथा दोग्ध्री सुवर्णेन दक्षिणं॥ सवत्सा शक्तिसुत्थाप हज

व्रता० पित्वासमर्चयेत्॥ कृष्णजन्मायशांतायविधीशायमहात्मने॥ तेभ्यो यतामितिप्रोक्तादेवान्द्वादश
२३२ मासिकान्॥ मार्गेवमुकुरस्वेतिगवांवाच्यः प्रतिग्रह॥ मासिमासिनिवेद्येषु तिलपात्रेषु तं घटैः॥
सहार्घैर्दत्तीयाप्रतिमायुक्तं तिलपात्रदानेप्ययंमंत्रस्तमर्थः॥ तस्मिन्काले प्रदातव्यास्तेघ
टामासनामभिः॥ समाप्तेतुव्रतंपुण्यंतस्मादर्घ्यंप्रदापयेत्॥ स्वयपितिशेषः॥ समाप्तेस्मि
न्व्रतेन्रूपयदन्निष्टंतदाप्यते॥ महारौरवघोरेभ्योनरकेभ्योपितारयेत्॥ स्वपितॄंस्तुपतिर्यप्रंस
चकल्मशातैरपि॥ ब्रह्महत्यादिपापानांअश्वमेधैर्नवेतरूपः॥ अश्वमेधात्क्रयावाव्रतमेतद्वि
शिष्यते॥ पितॄणामात्मनश्चैवतारकंसर्वकामदं॥ नरकस्यास्तुपेकेविनिर्व्वासेरणेऽचये॥ येचा
प्यमरणायेचहृतप्रेतत्वमागताः॥ तेक्षंतिसंततिपेचमुच्यंतेतेचकिल्बिषैः॥ उत्तारयेपितॄणां राम
चत्वारिपूर्वान्दशापरान्॥ आत्मानमेकविंशंचकृष्णद्वादश्युपोषणात्॥ ॥इतिवाराहेकृष्णैका २३२
दशीव्रतं॥ ॥अथोन्नयेकादशीव्रतं॥ हेमाद्रौनविष्णोत्तरे॥ युधिष्ठिरउवाच॥ कृष्णकृष्ण

मेरव्याताद्वादशीकेनहेतु॥ किंसातेनप्रियादेवकिंवाख्यातंयुनक्षते॥ ॥कृष्णउवाच॥ ॥
नकस्यचिन्मयाख्यातंगुह्यमेतदनुत्तमं॥ महापुण्यप्रदंपार्थमहापातकनाशनं॥ वांछितार्थप्र
दंनृणांकृतंपापापहारकं॥ श्रेष्ठंव्रतानांसर्वेषांशुक्लदंद्वादशीव्रतं॥ तत्तेहंसंप्रवक्ष्यामिसमा
हितमनाःशृणु॥ ततोपराह्णेसंतर्प्यकृतसंध्यादिकःशुचिः॥ प्राप्याशंवेदविदुषःपुराणज्ञान्
जितेंद्रियात्॥ संपूज्यदेवदेवेशंदंतधावनपूर्वकं॥ कुर्याद्विनियमंपार्थगुरुदेवाग्निसंनिधौ॥ ए
कादश्यांनिराहारःस्थित्वाहमपरेहनि॥ भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत॥ इत्युक्त्वाथगु
रुंनत्वापूजयित्वाजनार्दनं॥ भूमौस्वपेज्जितक्रोधःपंचगव्यपुरःसरं॥ शब्दादिविषयेजितः॥ त
तःप्रभातेविमलेकेशवार्पितमानसः॥ केशवेतितदावाक्यंक्षुतप्रस्खलितादिषु॥ पाखंडादि
निरालापंदर्शनंस्पर्शनंस्पर्शनंतथा॥ सजेद्दिनत्रयंपार्थव्रतवैककालकं॥ ततोमध्याह्नस
मयेनद्यादौविमलेजले॥ स्नानंकुर्याज्जितक्रोधःपंचगव्यपुरःसरं॥ आदिमायनमस्कृत्यके

व्रता० २३४

शावंदूरएं व्रजेत्॥ स्ववर्णाश्चारविधिनाकृतकृत्योगृहंव्रजेत्॥ पूजयेत्तत्रगोविंदंकेशवेतिजपन्बु
धः॥ पुष्परूपैस्तथादीपैर्नैवेद्यैर्विविधैरपि॥ गीतवाद्यैः कथाभिश्चजागरंकारयेन्निशि॥ कुंभं
संस्थापयित्वातुरत्नगर्भंसकांचनं॥ छादितंवस्त्रयुग्मेनसितचंदनचर्चितं॥ गंधमाल्यसमायु
क्तंदीपैर्दिक्षुसमलंकृतं॥ कुंकुमागुरुकामगंदेशोभितचंदनचर्चितं॥ प्रतिमांदेवदेवस्यशंखच
क्रगदाधरां॥ कृत्वासर्वंयथान्यायंप्रभातेविमलेसति॥ द्वादश्यांकृतकृत्यस्तुसमभ्यर्च्यजग
द्गुरुं॥ विप्रायदद्यात्कलशंदक्षिणापावकान्वितं॥ पावकंसुवर्णं॥ संभोज्यविप्रमुख्यायदद्या
द्वस्त्रादक्षिणं॥ तस्मात्संभोजयित्वातुदत्वागोभूम्यादिकं॥ पंचगव्यंतुसंप्राश्यस्वयंभुंजीत
वाग्यतः॥ अनेनविधिनामासितस्मिन्कृष्णमुपोषयेत्॥ द्वादशीपुरुषव्याघ्रध्यायन्संकर्षणंवि
भुं॥ प्राग्वत्सर्वंततःकृत्वाब्राह्मणायनिवेदयेत्॥ भोजयित्वाद्विजश्रेष्ठंदद्यात्तस्मैचदक्षिणं॥
भुंजीतवाग्यतःपश्चात्पंचगव्यकृताशनः॥ एवंपौषेतुसंकल्प्यद्वादश्यांशुक्लपक्षतः॥ ना

रम २३४

रायणंजपेत्प्राज्ञः सर्वंप्राग्विधिमाचरेत्॥ स्नानप्राशनदानाग्निभोजनंतद्वदाचरेत्॥ ब्राह्मणेभ्य
स्तथादद्याद्दक्षिणांपांडुनंदन॥ नारायणःप्रीयतांमेऽस्मात्सर्वंक्षमापयेत्॥ अस्यैवपुष्यमासो
मस्यद्वादश्यांकृष्णपक्षतः॥ वासुदेवेतिसंजप्यप्रागुक्तविधिनानृप॥ वासुदेवंजगन्नाथंसर्व
कारणकारणं॥ ततोदद्याद्द्विजातिभ्योदक्षिणांश्रद्धयान्वितः॥ भोजनंसर्वंवकुर्याद्ध्यानपूजादि
कंततः॥ शुक्लायांमाघमासस्यद्वादश्यांतुविशांपते॥ माधवेतिजपन्नामपूजयेत्सर्वकृद्धरिं॥
रात्रौजागरणंकुर्यान्नृत्यधूपप्रदीपकैः॥ पूजयित्वाद्विजश्रेष्ठान्माधवःप्रीयतामिति॥ प्राशना
दिकमेवात्रपूर्वोक्तविधिनास्मृतं॥ अस्यैवमाघमासस्यद्वादश्यांकृष्णपक्षतः॥ प्रद्युम्नेतिज
पन्प्राज्ञःसर्वंप्राग्विधिनाचरेत्॥ चैत्रमासस्यपक्षेतुद्वादश्यांपांडुनंदन॥ पंचगव्यजलैस्ना
त्वाविष्णुनामानुकीर्तयेत्॥ उपस्थापनंतुकुर्वीतभास्करस्यविचक्षणः॥ यएवभास्करोदेवः
सएवविष्णुःप्रकीर्तितः॥ विष्णुर्भक्त्यातुप्रीतोदेवदेवःसनातनः॥ भुक्तिमुक्तिप्रदातायनवद्

व्रता० त्रीयमांजलिः॥ इत्युच्चार्य जितेन्द्रियस्त्वा गंधपुष्पाक्षतैर्युतं॥ सर्वं च देवमभ्यर्च्य दानं दद्यात्स्वशक्ति
२२५ तः॥ विष्णुर्मे प्रीयतां देवो जगद्योनिः सनातनः॥ अस्मिन्मासि तथा कृष्णद्वादशी विधिनान्विपे
त॥ स्नाने भोजनकाले तु जपस्त्वे पुरुषोत्तमं॥ वैशाखे वामले पक्षे पूजयेन्मधुसूदनं॥ दक्षिणां
गुरवे दद्यात्प्रीयतां मधुसूदनं॥ मासेस्मिन्कृष्णपक्षे तु जपेद्देवमधोक्षजं॥ ज्येष्ठमासामले
पक्षे द्वादश्यां पूर्ववन्नृप॥ स्नात्वादि सर्वं निर्वर्त्य पूजयेत्तु त्रिविक्रमं॥ द्विजे भोज्य दक्षिणां दद्यात्प्री
यतां मे त्रिविक्रमः॥ इत्युच्चार्य नरः आघस्वयं भुंजीत पूर्ववत्॥ ज्येष्ठरूपे वहिः कृष्णायां द्वादश्यां तु
विशांपते॥ स्नात्वा प्राग्विधिना नक्तान्नसिंहं पूजयेद्विभुं॥ पुष्पैर्धूपैस्तथा दीपैर्गंधनैवेद्य
केरपि॥ आषाढस्यैव शुक्लायां द्वादश्यां च नृपोत्तम॥ वामनं पूजयेद्देवं दद्याद्विप्राय दक्षि राम
णां॥ वामनः प्रीयतां देवो मम नित्यं सनातनः॥ आषाढस्यैव कृष्णैकादश्यां द्वादश्यां प्रयतः शु २२५
चिः॥ पूजयेदच्युतं देवं तेनैव विधिना नृप॥ विप्राय दक्षिणां दद्यादच्युतः प्रीयतामिति॥ श्रा

वणस्य तु मासस्य तु मासस्य द्वादश्यां पूर्वपक्षतः॥ तत्र पूर्वविधानेन श्रीधरेति जयन्बुधः॥
पूजयेद्देवदेवेशं शंखचक्रगदाधरं॥ विशेषेण वनीतं तु तत्र देवं द्विजातये॥ श्रीधरः प्री
यतां मे ह्यश्रियं पुष्णात्वनुत्तमां॥ इत्युच्चार्य कुरुश्रेष्ठ ततो विप्रान्विसर्जयेत्॥ श्रावणस्यै
व कृष्णायां द्वादश्यां कुरुनंदन॥ जनार्दनेति संपूज्य प्रतिमां चक्रपाणिनः॥ ततो विप्रेषु
दातव्यं भोजनं सदक्षिणं॥ जनार्दनः प्रीयतां मे वाक्यमेतदुदीरयेत्॥ मासि भाद्रपदे न
न्द्वादश्यां शुक्लपक्षतः॥ हृषीकेशेति संचिंत्य संस्तुत्य मस्तवलितादिषु॥ विशेषेणात्र देयं च
क्षीरं विप्रेषु दापयेत्॥ हृषीकेशः प्रीयतां मे वाक्यमेतदुदीरयेत्॥ कृष्णपक्षे हि कर्तव्या
मासि भाद्रपदे नृप॥ उपेंद्रेति च संपूज्य प्रतिमां शार्ङ्गधन्वनः॥ आश्वयुक्शुक्लपक्षे तु द्वा
दश्यां नियतः शुचिः॥ पद्मनाभेति नाम्नावै पूजयेत्प्रतिमां हरेः॥ विप्रान्संभोजयित्वा च तेभ्यो
हेमस्वशक्तितः॥ प्रीयतां पद्मनाभो मे इति वाक्यमुदीरयेत्॥ आश्वयुक्कृष्णपक्षे तु द्वादश्यां

व्रता० भक्तिमान्नरः॥ उपोष्यविधिनानेनहरिमिष्ट्वाप्रपूजयेत्॥ हरिर्मेप्रीयतांदेवोमंत्रमेतदुदीर
२३६ येत्॥ कार्तिकस्यतुमासस्यद्वादश्यांशुक्लपक्षतः॥ अनेनविधिनासर्वंस्नानादिविनिवर्त
च॥ दामोदरेविसंसर्जनमूर्तिर्देवस्यचक्रिणः॥ कृष्णेकृतेतुनिर्वर्त्यद्वादशीकार्तिकेतदा॥ कृष्णे
तिनाम्नासंस्मरेद्देवदेवस्यचक्रिणः॥ प्रागुक्तोस्यविधिःपार्थविशेषान्नुविधीयते॥ अनंतदे
यानिषोडशैवविदुर्बुधाः॥ गोसहस्रंगोसहस्रंवागोशतंद्वादशैववा॥ तुलापुरुषदानानि
मुख्यानिविधिवन्नरः॥ देयानिविप्रमुख्येभ्योव्रतांतेसमुपस्थिते॥ चंद्रसूर्योपरागेतुकुरुक्षे
त्रेकुरूत्तम॥ हेमभारशतंदत्वातत्फलंतद्दिनेभवेत्॥ उन्मयद्वादशीयोगाच्छुद्धध्यानोत्तपो
त्तम॥ कृत्वात्वब्दमसंदेहंविष्णोःसायुज्यतांव्रजेत्॥ एतदुद्देशतःप्रोक्तमुन्मयद्वादशीफलं॥ एतत्सु राम
रम्यंपवित्रंचव्रतानामुत्तमंपरं॥ नाशिष्यायप्रदातव्यंनानताशुश्रूषवेक्वचित्॥ इदंतुयःपार्थन २३६
रोमहात्माशृणोतियोभक्तियुतःपठेद्वा॥ विमुक्तपापःसहिनिर्मलःखंप्रयातिसान्निध्यमनंतमूर्तेः

D. B. BHAU DAJI

॥॥ इतिभविष्योत्तरोक्तमुन्मयैकादशीव्रतं॥ इयमेवाजयेत्युच्यतेगुर्जरैः॥ ॥ इतिश्रीमीमांसक
भट्टनीलकंठात्मजशंकरभट्टकृतौव्रतार्केएकादशीव्रतानि॥ ॥ अथद्वादशीव्रतानि॥ ॥ तत्रभा
द्रशुक्लद्वादश्यांश्रवणद्वादशीव्रतं॥ तच्चैकादश्यायुक्तद्वादश्यांश्रवणयोगेकार्यं॥ तथाचमा
त्स्ये॥ द्वादश्यांश्रवणस्पृष्टास्पृष्टैकादशीयदि॥ सएषवैष्णवोयोगोविष्णुशृंखलसंज्ञितः॥ तस्मि
न्नुपोष्यविधिवन्नरःसंक्षीणकल्मषः॥ प्राप्नोत्यनुत्तमांसिद्धिंपुनरावृत्तिदुर्लभां॥ विष्णुधर्मेपि
॥ एकादशीद्वादशीचवैष्णव्यमपितत्रचेत्॥ तद्विष्णुशृंखलंनामविष्णुसायुज्यकृद्भवेत्
॥ तदातंत्रेणैकादशीद्वादश्योरुपवासःकार्यः॥ यदाश्रवणमेकादश्यांसंस्पृश्यद्वादश्यांस्यात्तदा
दा॥ महास्तेनुक्तंनारदीये॥ संस्पृश्यैकादशींराजन्द्वादशींयदिसंस्पृशेत्॥ श्रवणंज्योतिषांश्रेष्ठं
ब्रह्महत्यांव्यपोहति॥ इतियत्तुद्वयव्यापिनीग्राह्याश्रवणद्वादशीव्रतेइतिबृहन्नारदीयवचनंतत्सर्वे
षुश्रवणयोगाभावेदिनद्वयेश्रवणयोगेउदयकालेचपरदिनएवतद्योगस्तदासावकाशमतो

व्रता० नतद्योगउपवासविधायकंश्रवणन्नावेनारदीये॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित्॥
२२७ ॥एकादशीं तदोपोष्य पापघ्नि श्रवणान्विता॥ उपवासद्वयसामर्थ्ये तूपवासद्वयं कार्यं॥ तदुक्तं
भविष्ये॥ एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्॥ न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः॥
विधिलोपश्चैकादशीपारणस्याकरणकृतः उपवासद्वयासमर्थः कृतैकादशीव्रतसंकल्पस्य श्र
वणद्वादश्युपवासफलप्रेप्सोः श्रवणकाम्यं नित्यस्य बाधकमिति न्यायेन प्राप्तस्य श्रवणद्वा
दश्युपवासस्य बाधो मा भूत्॥ द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि॥ उपोष्यैकादशीं रा
जन्द्वादश्यां पूजयेद्धरिमिति तादृशद्वादश्यां कृतैकादश्युपवासव्रतसंकल्पस्य काम्यं नित्यस्य बाध
कमिति न्यायात्प्राप्तश्रवण॥ द्वादश्यामेवोपवासस्यानुवादो नारदीये॥ उपोष्य द्वादशीं शु राम
ण्यां वैष्णवर्क्षेण संयुतां॥ एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयमिति॥ एतद्व्रतपारणं २२७
तु पारणाह॥ अन्यथानुवृत्तावुभयांतमुख्यः कल्पः तथा च स्कांदे॥ तिथिनक्षत्रनियमे तिथि

नांते च पारणं॥ अतोन्यथा पारणायां व्रतभंगमवाप्नुयात्॥ असमर्थानां त्वनुकल्पः यत्तु ति
थिनक्षत्रसंयोगे उपवासो यदा भवेत्॥ पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः॥ ततः पारण
कं कुर्याद्विंदेवं विदो हरेरिति नारदीयात् सामर्थ्य तत्तस्यसंयोगीकेव्रतेउ—यां तत्तुल्यत्वमुक्तं
तच्छ्रवणरोहिणी व्रतपारणनिरिक्तपरं याकाश्चित्तिथयः प्रोक्ताः पुण्यनक्षत्रयोगतः॥ ऋक्षां
ते पारणं कुर्याद्विना श्रवणरोहिणीमिति मदनरत्नधृतवचने श्रवणरोहिण्योः पर्युदासोक्तेः।
अयं च श्रवणपर्युदासः श्रवणयोगनिमित्तव्रतपारणयां मुन्नयांत पक्षस्यत्येतकत्वेकांत
मात्रे पारणविधायकः पारणाहे श्रवणतो द्वादश्याधिके श्रवणं विहाय यत्र द्वादशीमध्य एव पा
रणं कार्यं॥ तामपेक्ष्य श्रवणाधिके श्रवणं विहाय यत्र योदशीमध्ये तदुक्तं॥ वह्निपुराणे॥ पारणं
तिथिवृद्धौ तु द्वादश्यामुडुसंक्षयात्॥ उडुवृद्धौ त्रयोदश्यां तत्र दोषो न विद्यते इति॥ एतेन यदा
तिथ्यपेक्षया नक्षत्राधिक्यं च पारणदिने भवति तदैकादशी पारणं या द्वादश्यालंघने दोषाद्व

व्रता० वणद्वादशीव्रतपारणायास्तु भयं ते न्यतरं ते वा कर्तव्यत्वाद्विरोधप्रसक्तिः ॥ तस्यां च सत्यामेका
२३८ दशीव्रतप्रकरणे हेमाद्र्युदाहृते दशम्यामेकभक्तं क्षौमांसमैथुनवर्जितं इत्यादिवचनेन ए
कादशीव्रतस्य त्रिदिनसाध्यत्वावगत्या पूर्वेद्युः कृतद्वादशीव्रतं पुरोडाशवत्प्रसंगीति तंत्रिप्रसंगिनो
विरोधे तंत्रिणो बलवत्त्वेन द्वादशीव्रतपारणमेव पारणं कृतमिति समपास्तं ॥ ॥ अथ कथा ॥ ॥ अग्निपुराणे ॥
मैत्रेय उवाच ॥ ॥ विधानं श्रवणे राजेंद्र यथाह हंसमनीषिणः ॥ यथोक्तं नियमं कुर्यादेकादश्या
मुपोषितः ॥ दंतकाष्ठं प्रगृह्याथ वाग्यतो नियतेंद्रियः ॥ श्रवणद्वादशीयोगे समुपोष्य जनार्दनं
॥ अर्चयेत्तु विधानेन त्रयोदश्यां परेहनि ॥ नदीनां संगमे स्नाया दर्चयेद्वामनं ॥ सौवर्णं व
स्त्रसंयुक्तं द्वादशांगुलमुच्छ्रितं ॥ पीतवस्त्रैः शुभैर्वेष्ट्य अंगारं निर्व्रणं नवं ॥ हिरण्मयेन पात्रेण राम
अर्घ्यपात्रं प्रकल्पयेत् ॥ दध्यक्षतफलैश्चैव तमहिरण्यं सचंदनं ॥ स्त्रजा प्राग्वत् ॥ नमस्ते पद्मना २३८
भाय नमस्ते जलशायिने ॥ तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे ॥ नमः कमलकिंजल्कपीतनि

ग र्मलवाससे ॥ महाहवरिपुस्कंधघृष्टचक्राय चक्रिणे ॥ नमः शार्ङ्गशरपाणये वामनाय च यज्ञभु
क्फलदात्रे च वामनाय नमो नमः ॥ देवेश्वराय देवाय देवसंसृतिकारिणे ॥ प्रभवे सर्वदेवानां
वामनाय नमो नमः ॥ मत्स्यकूर्मवराहाय नरसिंहस्वरूपिणे ॥ रामरामाय नामाय वामनाय
नमो नमः ॥ श्रीधराय नमस्तेस्तु नमस्ते धरणीधर ॥ एवं संप्रेष्य विधिवत्तत्र प्रस्कंधद नाम
भिः ॥ रात्रौ जागरणं कुर्यात्पुरतो जलशायिनः ॥ ध्यात्वा जलमयं रूपं देवदेवस्य चक्रिणः ॥ ब्रह्मांड
मुदरे यस्य मतं ज्ञानैरधिष्ठितं ॥ मायावी वामनः श्रीशः स्तौत्रायातु जगत्पतिः ॥ एवं संप्रजपित्वा
तु द्वादश्यामुदये रवेः ॥ अंगारसहितं तं तु ब्राह्मणाय निवेदयेत् ॥ जलधेनुं तथा दद्याच्छत्रं चै
व तु पादुके सहिरण्यानि वस्त्राणि वृषधेनुं तथान्यपा ॥ वामनः प्रतिगृह्णाति वामनोहं ददामि
ते ॥ वामनः सर्वतोभद्रं द्विजाय प्रतिपादयेत् ॥ उपविष्टे किंचिद्दीयते तत्र तरुणं सापकल्पते श्रव
णद्वादशीयोगे संप्राप्य गरुडध्वजं ॥ दत्वान्नं द्विजातिभ्यो वियोगे पारणं ततः ॥ सिंहस्थिते

व्रता० तुमार्त्तंडे श्रवणस्थे निशाकरे॥ विष्णुधर्मोत्तरे॥ ॥राम उवाच॥ ॥उपवासासमर्थानां किंस्या
२३९ देकमुपोषितं॥ महाफलं महादेव तन्ममाचक्ष्व पृच्छतः॥ ॥पुष्कर उवाच॥ ॥या राम श्रवणो
पेता द्वादशी महती तु सा॥ तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनं॥ प्राप्नोत्ययत्नाद्धर्मज्ञ द्वा
दशद्वादशीफलं॥ दध्योदनयुतं तस्यां जलपूर्णं द्विजे घटं॥ वस्त्रसंवेष्टितं दद्याच्छत्रोपानह
मेव च॥ न दुर्गतिमवाप्नोति गतिमग्र्यां च विंदति॥ अग्र्यं स्थानमवाप्नोति नात्र कार्या विचार
णा॥ श्रवणद्वादशीयोगे बुधवारो न वेद्यदा॥ अत्यंतमहती नाम द्वादशी सा प्रकीर्त्तिता॥
स्नानं जपं तथा दानं होमश्राद्धं सुरार्चनं॥ सर्वमक्षयमाप्नोति तस्यां रघुकुलोद्वह॥ तस्मिन्दिने
तथा स्नातो यत्र क्वचन संगमे॥ स गंगास्नानजं नाम फलं प्राप्नोत्यसंशयं॥ श्रवणे संगमाः राम
सर्वे पितृतुष्टिप्रदाः सदा॥ विशेषाद्द्वादशीयुक्ते बुधयुक्ते विशेषतः॥ तथैव द्वादशी प्रोक्ता बु २३९
धश्रवणसंयुता॥ तृतीया च तथा प्रोक्ता सर्वकामफलप्रदा॥ तथा चतुर्थी या धर्मज्ञ तथायं च द

शी श्रुता॥ ब्रह्मवैवर्ते॥ नभस्ये फाल्गुने मासि यदि वा द्वादशी भवेत्॥ शुक्ला श्रवणसंयुक्ता
संगमे विजया स्मृता॥ वारिधानी प्रदातव्या मिद्ध्योदनसमायुता॥ प्रेतयोनौ न जायेत पूज
यित्वा त्रिवामनं॥ वंशाः समुद्धृतास्तेन मुक्तः पितृऋणाद्सौ॥ नभस्ये संगमे स्नात्वा वामनो येन पू
जितः॥ भविष्योत्तरे॥ युधिष्ठिर उवाच॥ ॥उपवासासमर्थानां सदैव पुरुषोत्तम॥ एकां या द्वाद
शीं पुण्यां तां वदस्व ममानघ॥ कृष्ण उवाच॥ मासि भाद्रपदे कृष्णा द्वादशी श्रवणान्विता॥ सर्व
कामप्रदा पुण्या उपवासे महाफला॥ संगमे सरितां स्नात्वा द्वादशीं समुपोषितः॥ समग्रं समवा
प्नोति द्वादशद्वादशीफलं॥ सा धेनुर्द्वादशी ज्ञेया तस्यां भाद्रपदाह्वते॥ दशम्येकादशी यत्र सा
नोपोष्या भवेन्नृप॥ श्रवणेन तु संयुक्ता सा शुक्ला सर्वकामदा॥ पारणं तिथिपर्यंते तु शस्तं श्र
मुक्तमं कृयात्र॥ वधौ कुर्यात्त्रयोदश्यां तत्र दोषो न विद्यते॥ इत्येषा कथिता राजन्द्वादशी पापश्रव
णे मया॥ कर्तव्या सा प्रयत्नेन इहामुत्रफलप्रदा॥ ॥इति हेमाद्रौ श्रवणद्वादशीव्रतं॥ ॥विष्णुरहस्ये॥

व्रता० द्वादश्यामुपवासोऽत्र त्रयोदश्यां तु पारणं॥ निषिद्धमपि कर्त्तव्यमित्याज्ञा परमेश्वरी॥ तथा॥ बु
२४० धश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत्॥ अतीव महती तस्यां सर्वं कृतमिहाक्षयं॥ द्वाद
शी श्रवणोपेता यदा भवति भारत॥ संगमे सरितां स्नात्वा गंगादिस्नानजं फलं॥ सोपवासः समा
प्नोति नात्र कार्या विचारणा॥ जलपूर्णं तदा कुंभं स्थापयित्वा विचक्षणः॥ पंचरत्नसमोपेतं
सोपवीतं सुचर्चितं॥ तस्योत्स्कंधे तु घटितं स्थापयित्वा जनार्दनं॥ यथाशक्त्या स्वर्णमयं
शंखशार्ङ्गविभूषितं॥ स्नापयित्वा विधानेन सितचंदनचर्चितं॥ सितवस्त्रयुगच्छत्रो-
-पानद्युगान्वितं॥ ॐ नमो वासुदेवाय शिरः संपूजयेत्ततः॥ श्रीधराय मुखं तद्वत्कंठं वा
यद्रूपिणे नमः॥ नमः श्रीपतये वक्षो भुजौ सर्वास्त्रधारिणे॥ व्यापकाय नमः कुक्षिं केशवायोदरं रम
नमः॥ त्रैलोक्यजनकायेति मेढ्रं संपूजयेद्धरेः॥ सर्वाधिपतये जंघे पादौ सर्वात्मने नमः॥ अ २४०
नेन विधिना राजन् पुष्पधूपैः समर्चयेत्॥ ततस्तस्याग्रतो देयं नैवेद्यं घृतपाचितं॥ मोद

कांश्चनवान्कुंभान् शक्त्या दद्याद्विचक्षणः॥ एवं संपूज्य गोविंदं जागरं तत्र कारयेत्॥ प्रभा
ते विमले स्नात्वा संपूज्य गरुडध्वजं॥ पुष्पधूपादिनैवेद्यैः फलैर्वस्त्रैः सुशोभनैः॥ पु
ष्पांजलिं ततो दत्वा मंत्रमेतमुदीरयेत्॥ नमो नमस्ते गोविंद बुधश्रवणसंज्ञक॥ अघौ
घसंक्षयं कृत्वा सर्वतीर्थप्रदो भव॥ अनंतरं ब्राह्मणेभ्यो वेदवेदांगपारगे॥ पुराणज्ञे वि
शेषेण विधिवत्तां प्रदापयेत्॥ प्रीयतां मे देवदेवेशो मम नित्यं जनार्दनः॥ अनेनैव विधाने
न दद्यात्स्वाचान्ते नमः॥ सर्वं निवर्त्तयेत्सम्यगेकभक्तरतोपि सन्॥ वसिष्ठ उवाच॥ अत्रा
प्युदाहरंतीममितिहासं पुरातनं॥ महत्यरण्ये यद्वृत्तं त्वमिया नम्र एणुषत्॥ देशो दशार्णको
नाम तस्य भागे तु पश्चिमे॥ अतीवासीन्मरुर्देशः सर्वसत्त्वभयंकरः॥ सुतप्तसिकताभूमि
र्वृक्षस्तम्भविहंगमः॥ अल्पच्छायद्रुमाकीर्णो मृतप्राणिसमाकुलः॥ शमीखदिरपालाशकर
ीरैः सपीलुभिः॥ तत्रासीमद्रुमाः केचिद्विषकिंटकेराहता द्रुमाः॥ गंधप्राणिगणाकीर्णा तन्न दृश्यते

हरिदत्त इति ख्यातो पैरपव्रत्क पत्नीय कः ॥ ६५

व्रता० २४१ क्वचित् ॥ अनर्कतापविषमा नीषणा पुरुषाः स्वराः ॥ ज्वलिताग्निसमं चैव यत्किंचित्तत्र दृश्यते
॥ तथापि जीवन्ति वृत्तिसर्वे कर्मनिबंधनाः ॥ नो जलं नो तृणानी मारांज्ञस्तत्र बलाहकाः ॥ कदा
चिदपि दृश्यंते प्लवमाना विहंगमाः ॥ मुक्तांतारं गतैः केश्चिद्दिशि मुनिः दृषितैः समं ॥ सै
कतेष्वेव नश्यंति जलैः सैकतसेवतु वत् ॥ तस्मिंस्तथाविधे देशे कश्चिद्दैवप्रेरणाद्वणि
क् ॥ निजसार्थ परिभ्रष्टः प्रविष्टो मरुजंगले ॥ दृष्टवान् मलिनाग्नि काग्निमांसाम्भीमद
र्शनान् ॥ बभ्रामोत्क्रांतहृदयः क्षुत्तृष्णाश्रमकर्षितः ॥ क्व ग्रामः क्व जनः क्वाहं यास्यामि
बहुधीरभिः ॥ अथ प्रेतान्ददर्शासौ तृष्णाव्याकुलितेंद्रियः ॥ स्नायुबद्धास्थिचरणान् धाव राम
मानानितस्ततः ॥ प्रेतस्कंदसमाख्यमेकं विकृतदर्शनं ॥ ददर्श बहुभिः प्रेतैः समंतात्परिवा २४१
रितं ॥ आगच्छन्तं वावज्जकी सस्तुतिरात्पुरःसरं ॥ प्रेतस्कंधाम हीगत्वा तस्यांतिकमुपागम
त् ॥ सोहि वा वणिक्श्रेष्टमिदं वचनमब्रवीत् ॥ अस्मिन् घोरतले देशे प्रवेशो न वतः कथं ॥ तत्र

वाच वणिक् धीमान् समर्थ नष्ट गोवत्सः ॥ प्रवेशो दैवयोगेन कष्टकर्म कृतेन तु ॥ तृष्णा मे बाधते
सर्वं क्षुद्भ्रमो चप्रशांतया ॥ प्राणः कंठमनुप्राप्तावक्तुं नैव शक्ती च मे ॥ अत्रोपायं न पश्यामि
जीवेयं येन केनचित् ॥ ॥ क्रमस्तु वाच ॥ ॥ इत्येवमुक्तः प्रेतस्तु वणिजं वाक्यमब्रवीत् ॥ पुन्ना
गमिममाश्रित्य प्रतीक्षस्वमुहूर्तकं ॥ कृतातिथ्यो यथा पश्चाद्गमिष्यसि यथासुखं ॥ एवमुक्त
स्तथा चक्रे स वणिक् तृष्णया र्दितः ॥ मध्याह्नसमये प्राप्ते तत्र तं देशमागतः ॥ पुन्नाग वृक्षात्तो
द्वारि धाम मनोरमा ॥ दध्योदनस्य पक्केन वस्त्रमानेन संयुता ॥ अवतीर्य ततः सोग्रं ददौ तथि
येतदा ॥ तेषामामंत्रणे वणिसंराशिमुपागतोः ॥ विदृष्णो विक्रमश्चैव क्रुणेन समपद्यत ॥ ततस्तु
प्रेतसंघस्य तस्माद्भागं कमाददौ ॥ दध्योदनान्नपानीयान्येतानस्तृप्तिपरंगतः ॥ अतिथिं तर्पयि
त्वाथ प्रेतलोकं च सर्वशः ॥ ततः स्वयं च बुभुजे भुक्तशेषं यथासुखं ॥ तस्य भुक्तवतस्त्वन्नपानीयं
चादृश्यं पपौ ॥ प्रेताधिपं ततस्तु सो वणिग्वचनमब्रवीत् ॥ आश्चर्यमेतत्परमं वनेस्मिन्प्रति

DR BHAU DAJI MEMORIAL डाक्टर भाऊदाजी

नातिमे॥ अन्नपानस्यसंप्राप्तिःपरमस्यकृतस्तव॥ स्तोकेनचतथान्नेनबिन्दुस्तुबहुरंध्र
यक॥ तस्मान्मित्रकथंत्वेतेनिर्मांसान्निलकुरूप॥ अपरंचकथंस्नेहमस्वामतावपरिहृयं॥ हिं
सांचजंचकस्मात्वंसंप्राप्तोनिर्जलेवने॥ तृषश्चातिकथांग्रासमात्रेणैवमुनंब्रवीत्॥ शृणु
द्विप्रवक्ष्यामिदुष्कृतंकर्मचात्मनः॥ शाकलेनगरेरम्येअहमासंसुदुर्मतिः॥ वणिगासंपुरा
कालेततोजन्मममानघ॥ तदन्नानिक्षुवेन्निर्वाणात्साथांतुकदाचन॥ प्रवृद्धपक्षतत्रासीच्छ्रवण
गणगुणान्वितम॥ श्रवणाद्वादशीयोगेमासिभाद्रपदेतथा॥ सकदाचिन्मयासार्धंतापीनामनदी
ययौ॥ तस्याःसंगमःपुण्योयत्रासीच्चंद्रभागया॥ चंद्रभागासोमसुतातापीचैवार्कनंदिनी
सीतोद ॥तयोःसलिले----संगमेसुमनोहरे॥ तत्तीर्थवरमासाद्यप्रतिवेदपक्षमेद्विजः॥ श्रवण राम
द्वादशीयोगेस्नानश्चैवतथोषितः॥ चांद्रभागस्यतोयस्यवारिधान्मोनवाहदाः॥ दध्योदनयुते २४२
सार्धंसिंदरैर्वर्धमानकैः॥ छत्रोपानहयुग्मंवस्त्रंप्रतिमांविधिवद्वरेः॥ प्रददौविप्रमुख्यायरह

स्योज्ञामहामुनिः॥ क्लिन्नसंरक्षणार्थयितस्यापिचततोमया॥ सोपवासेनदत्त्वावैवारिधा
निसुशोभना॥ चंद्रभागस्यविप्रायदध्योदनयुतातदा॥ एतत्कृत्वागृहंप्राप्तःततःकालेनके
नचित्॥ पंचत्वमहमासाद्यनास्तिकात्प्रेततांगतः॥ अस्यामटव्यांघोरायांपथाहस्तस्तवपा
नघ॥ ब्रह्मस्वहारिणस्त्वेतेपापाःप्रेतत्वमागताः॥ परदाररताःकेचित्स्वामिद्रोहरताःपरे॥ मित्र
द्रोहरताःकेचिदेतस्मिन्सुदारुणे॥ ममैतेसमतांयाताअन्नपानेकृतेनघ॥ अच्युतोभगवा
न्विष्णुःपरमात्मासनातनः॥ यद्दीयतेतमुद्दिश्यअक्षय्यंतत्प्रकीर्तितं॥ मयाविहितःकिंत्वेतेव
नेऽत्रस्मिन्सुदारुणे॥ पीडामनुभविष्यंतिदारुणांकर्मयोनिजां॥ एतेषांतुमहाभागममा
नुग्रहकाम्यया॥ अनेकनामगोत्राणिगृहीत्वाचलिखेनच॥ अस्तिकश्रागताचेवतत्त्व
संपुटिकाशुभा॥ हिमवंतमथासाद्यनत्वंतस्मसेनिधिं॥ गयाशीर्षंततोगत्वाश्राद्धंकुरु
महामते॥ एकमेकमथोद्दिश्यप्रेतेप्रेतेयथासुखं॥ एवंसंताप्यमाणस्तेनमज्जांबुनदमना॥

समारुह्य विमाने सो स्वर्गलोकमितो गतः॥ स्वर्गते प्रेतनाथेन प्रजा वाञ्छ वणिक्क्रमात्॥ ना
मगोत्राणि संगृह्य प्रपातः स हिमाचलं॥ तत्र प्राप्य निधिं गत्वा वितीर्य स्वके गृहे॥ धनत्या
गमुपादाय गया शीर्षे वटं ययौ॥ प्रेतानां क्रमशस्तत्र चक्रे श्राद्धे दिने दिने॥ यस्य यस्य यथा
श्राद्धं स करोति दिने वणिक्॥ स स तस्य तदा स्वप्ने दर्शयित्वाल्पनस्तनुं॥ ब्रवीति च महाभाग
प्रसादेन तवानघ॥ प्रेतभाव मिमं त्यक्त्वा प्राप्तो परमां गतिं॥ स कृत्वा धनलोभेन तपे तौ स
ज्ञति वणिक्॥ जगाम स्वगृहं तत्र मासि भाद्रे युधिष्ठिर॥ चकार विधिवद्दानं ततो दिष्टांत
मागतः॥ श्रवणाय परं स्थानं दुर्लभं सर्वमानवैः॥ यत्र कामफलं वृक्षाः धेनवः पायसं कु
र्द्दमाः॥ शीतलामलपानीयाः पुष्करिण्यो मनोरमाः॥ तं देशमासाद्य वणिक् महात्मा स
घुष्टं जांबुनदरूषितांगाः॥ कलं समग्रं सुरसुंदरीभिः स्वर्गे स रेमे मुदितः सदेवैः॥ बुध श्रवण
संयुक्ता द्वादशी सर्वकामदा॥ नंद धीरनं शास्त्रं॥ मुपवासस्य रो विधिः॥ सगरेण ककुस्थे

मी
श्रि
धः
राम
२४२

न धुंधुमारेण गाधिना॥ एतैश्चान्यैश्च राजेंद्र कामदा द्वादशी कृता॥ या द्वादशी बुधयुता श्र
वणेन सार्धं सा वैजयंती कथिता मुनिभिः नरस्य॥ तामादरेण समुपोष्य नरो हि सम्य
क् प्राप्नोति सिद्धिमणिमादिगुणोपपन्नां॥ ॥इति हेमाद्रौ भविष्योत्तरे श्रवण द्वादशी व्रतं॥
अस्यामेव वामनजयंति व्रतं॥ हेमाद्रौ स्कांदे भविष्योत्तरे॥ ॥कृष्ण उवाच॥ ॥द्वादश्यास्ते विधिः प्रो
क्तः श्रवणेन युधिष्ठिर॥ सर्वपापप्रशमनः सर्वसौख्यप्रदायकः॥ एकादशी यदा सास्याश्रव
णेन समन्विता॥ विजया सा तिथिः प्रोक्ता व्रती नामजयप्रदा॥ पुरा देवगणैः सर्वैः समेत्य च यु
धिष्ठिर॥ वरदः प्रार्थितो विष्णुः इंद्राग्नि नीलसंयुतैः॥ बलवान्निर्जितो दैत्यो बलिर्नाम महाबु
ध्नः॥ तेन देवगणाः सर्वे पातिता निजमंदिरात्॥ त्वं गतिः सर्वदेवानां शीघ्रं कष्टं त्वमुद्धर॥ जहि दै
त्यं महाबाहो बलिं बलवतां वर॥ श्रुत्वा विष्णुस्तदा वाक्यं देवानां करुणोरपं॥ उवाच वा
क्यं सत्रो देवानां हितकाम्यया॥ जाते वैरोचने पुत्रं बलिनै लोकशंकितं॥ नप मासाभावितात्मा

मुदृत

नंशांतंदांतंजितेंद्रियं॥ मज्जकंसंश्रणंप्राणंसर्वसंधंमहाबलं॥ प्रजापतिसमंत्वात्माप्रजानांत्री
पकारकं॥ नगुणास्तस्यशक्यंतेवक्तुंकेनापिभूतले॥ अवश्यंतपसोपेतैर्लब्धव्यंतपसःफ
लं॥ तपसोंतस्तुबहुनाकालेनास्यभविष्यति॥ यदाविजयदंदेवैसंग्रामेकालेनकेनचित्॥
समाहृत्यश्रियंतस्यतदादास्येदिवौकसां॥ अदितिर्मेचपत्न्याद्वैपुत्रार्थंकुरुगर्धितौ॥ तस्या
मनीषितंदेवकार्यंविष्णुर्विचिंतयत्॥ संचिंतयित्वासुचिरंदेवागम्नविधारणं॥ अदितिंवा
रयामासवांछितंतेभविष्यति॥ अथकालेनबहुतिथेगतेसागुर्विणीभवत्॥ सुषुवेनवमे
मासीपुत्रंसावामनंहरिं॥ ह्रस्वपादंह्रस्वकायंमहाशिरसमन्वितं॥ पाणिपादोदरह्रस्वं
ह्रस्वजंघोरुकेसरं॥ दृष्ट्वातुवामनंजातमदितेमोदितंतपा॥ जयंबभूवदेवानांदेवता राम
तोषमागमत्॥ जातकादीन्स्तुत्यकरान्संस्कारान्स्वयमेवहि॥ चकारकश्यपोधीमान्प्रजा २४४
पतिसमन्वितः॥ आबद्धमेखलोदंडीजटीयज्ञोपवीतवान्॥ कृष्णाजिनधरःकमंडलुविन्

षितः॥ बलेर्बलवतोयज्ञंजगामबहुविस्तरं॥ दृष्ट्वादैत्यबलंसर्ववामनोमेसतत्क्षणं॥ अर्थमाह
यत्पतेदीयतांममभेदिनि॥ पदत्रयप्रमाणेनपदरूण्येंस्थितोत्यत॥ दत्तादत्तानवतथाबलि
:प्रांच्यद्विजोत्तमं॥ ततोवर्द्धितुमारब्धोवामनोनंतविक्रमः॥ पादोभूमौप्रतिष्ठाप्यशिरसाभुस
रोदसी॥ नाभ्यांस्वर्गादिकांल्लोकान्ललाटेब्रह्मणःपदं॥ नतृतीयंपदंलेभेभुवनोंतेदुर्दिवौकसः॥ तं
दृष्ट्वामहदाश्चर्यंस्विश्वादेववर्षयस्तथा॥ साधुसाध्वीतिदेवेशंभगवंतंसुमुदान्विताः॥ ततोदेस
गणास्सर्वाजित्वात्रिभुवनंवशी॥ बलिंप्राहचगच्छपातालंसबलानुगः॥ तत्रत्वमीप्सितान्भो
गान्भुंक्ष्वकामधाहिपालितः॥ अस्मिंद्रस्यावसानेतुत्वमेवेंद्रोभविष्यति॥ एवमुक्तोबलिःप्रा
याद्रसमहत्क्रमनरोत्तमं॥ विसर्ज्यचबलिंदेवोलोकपालानुवाचह॥ स्वामिनिविध्यानिगच्छध्वं
तिष्ठध्वंविगतज्वराः॥ देवेनोक्तागतादेवाप्रकृष्टाह्रस्ववामनं॥ देवःकृत्वाजगत्कार्यंतत्रैवांत
र्धीयत॥ एतत्सर्वंसमभवद्वैदेकादशपांनराधिप॥ तेनेष्टादेवदेवस्यसर्वथाविजयातिथिः॥

एवंच फाल्गुने मासि पुष्येण सहितां तपः॥ विजयाप्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा॥ एकाद
श्यां सोपवासो रात्रौ संपूजयेद्धरिं॥ रौप्ये सौवर्णपात्रे वा दारुवंशमयेपि वा॥ सौवर्णं वामनं कुर्यात्
स्ववित्तस्यानुसारतः॥ त्रिविक्रमं दंडधरः छत्रीयज्ञोपवीतवान्॥ एवंजरूणसंपन्नं वामनं
पूजयेद्धरिं॥ आच्छाद्य पात्रं वाससो निरहतैः फलसंयुतैः॥ मार्गेणाचर्मणा न ह्येनं तत्ता वा दात्म
पेरुया॥ तिलाढ्केन संपूर्णं प्रस्थेन कुडवेनैच॥ अलाभेयवगोधूमैः फलैः स्युक्तिलैर्न
वेत्॥ पुष्पैर्गंधैः फलैर्धूपैः कालोत्थैरर्चयेद्धरिं॥ नानाविधैश्चनैवेद्यैर्नक्तेनोऽयुग्मैर्गुडोदनैः॥
स्वस्यवित्तानुसारेण सहिरण्यं चकारयेत्॥ एभिर्मंत्रपदैस्तत्र पूजयेद्गरुडध्वजं॥ उपहारै
नरश्रेष्ठ श्रुविर्भूत्वा समाहितः॥ अथाग्रेयनविष्णयोः पूजाः॥ धत्वाजलमयं देवं देव
स्यचक्रिणः॥ बलांगुष्टेयस्य महद्भूते रधिष्टितं॥ मायावी वामनः॥ श्रीशोस मायातुज
गस्पतिः॥ आवाहनं॥ अनंतायमहेशायजलज्ञास्मायशायिने॥ नमस्ते केशवानंतवासुदे

वनमोस्तुते॥ स्नानं॥ मलयेषु समुत्पन्नं गंधपुष्पं मनोहरं॥ मयानिवेदितं तुभ्यं गृहाणपुरु
षोत्तम॥ पुष्पं॥ नमः कमलकिंजल्कपीतनिर्मलवाससे॥ महाहवरिपुस्कंधघृष्टचक्रा
यचक्रिणे॥ पूजामंत्रः॥ मत्स्यं कूर्मं वराहं च नारसिंहं च वामनं॥ रामं रामं रामकृष्णं च अर्च
यामि हितेनमः॥ पादौ घेकैकमस्वांगं पूजये छीर्षमंततः॥ पादौ मत्स्याय च नमो नमः कूर्माय
जानुनी॥ वाराहायनमो गुह्यं नरसिंहायेति नामतः॥ उरस्तो वामनायेति कंठो रामाय वै नमः॥
मुखं रामाय च नमः कृष्णाय च नमः शिरः॥ एवं व्रते कृते ब्रह्मन् यत्पुण्यं तन्निबोध मे॥ यावत्कल्पश
तं पूर्णं एकब्रह्मतिरावसति संख्ययं॥ प्राप्य विष्णुपुरं भोगान् भुंजते कालमक्षयं॥ इहागत्य नवे
न्द्राजा लक्ष्मीश्च सुवैसेवितः॥ सर्वांगपूजा॥ धूपोयं देवदेवेश शंखचक्रगदाधर॥ अच्युतानं
त गोविंद वासुदेव नमोस्तुते॥ धूपः॥ त्वमेव पृथिवी ज्योतिर्वायुराकाशमेव च॥ त्वमेव ज्योतिषो
ज्योतिर्दीपोयं प्रतिगृह्यतां॥ दीपं॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं॥ मयानिवेदितं देव

DR BHAU DAJI
MEMORIAL

प्रसीद परमेश्वर॥ अगतीर्यमो वै श्रवणः पापं मे हंतु मे भयं॥ नैवेद्यं॥ जगत्स्रष्टा जगद्वंद्यो अ
नादिर्जगदंतिकृत्॥ जगन्नाथायो जगत्स्रोतिः प्रीयतां मे जनार्दनः॥ अनेककर्मनिर्बंधध्वंसनेन ज
न्मनाशिने॥ गतोस्मि मधुरावासं माधवं मधुसूदनं॥ नमो वामनरूपाय नमस्तेस्तु त्रिवि
क्रम॥ नमस्ते बलिबंधाय वासुदेव नमोस्तु ते॥ नमस्ते कृष्ण गोविंद गमनेश त्रिविक्रम॥
पापस्य संक्षयं कृत्वा सर्वकामप्रदो भव॥ सर्वगः सर्वदेवेशः श्रीधरः श्रीनिकेतनः॥ विश्वे
श्वराय विश्ववेश्मीशाय च नमो नमः॥ सर्वसंपूजये रात्रौ एकादश्यां नरोत्तम॥ जागरं तत्र कुर्वीत
गीतवादित्रमंगलैः॥ एवं पूर्वोक्तविधिना अर्चयेद्वामनं हरिं॥ प्रदेयात्रिदक्षिणं विदुपि ब्राह्मणश्चापि
मंत्रवित्॥ वामनः प्रतिगृह्णाति वामनो वै ददाति च॥ वामनस्तारको नाम्ना वामनाय नमो नमः इ
ति प्रतिग्रहमंत्रः॥ ॥ एवं दत्त्वा ततः प्रातर्भोजनं षड्रसात्मकं॥ पूर्वं दद्यात् ब्राह्मणेभ्यः पश्चाद्भुंजी
त चात्मना॥ न्यायोपार्जितया राजन् सर्वत्रैष विधिः स्मृतः॥ एवं व्रते कृते ब्रह्मन् यत्पुण्यं तन्निबोध

मे॥ सप्तस्वर्णरथवाजीनां दाता भोक्ता च किन्नरी॥ रूपसौभाग्यसंपन्नो दीर्घायुर्नीतिजो नप्तृपु
त्रैः परिवृतो जीवेत् शरदां शतं॥ एषा व्युष्टिः समाख्याता एकादश्यां मया तव॥ पूर्वमेव समा
ख्याता द्वादशी श्रवणान्विता॥ व्युष्टिः फलं॥ उपोष्यैकादशीं पश्चाद्द्वादशीमप्युपोषयेत्॥ न
चात्र विधिलोपः स्यादुभयोर्देवता हरिः॥ बुधश्रवणसंयुक्ता द्वादशी संगमोदकं॥ दानं दध्यो
दनं सम्यक् उपवासः परो विधिः॥ समरेण ककुत्स्थेन धुंधुमारेण गाधिना॥ एतैश्चान्यैश्च राजें
द्रैः कृत्वा वै द्वादशी तिथिः॥ ॥ इति भविष्योत्तरपुराणे वामनजयंती व्रतं॥ ॥ अथ पौषकृष्णद्वाद
श्यां गुर्जरत्राचारप्रसिद्धं॥ सुरूपाद्वादशीफलं॥ ॥ उमोवाच॥ ॥ भगवन् श्रोतुमिच्छामि प्रसादं
कुरु मे प्रभो॥ कथितं मे प्रसादेन यद्यस्मि मपि मोहृदं॥ व्रतेन केन चीर्णेन विरूपत्वं प्रणश्यति॥
॥ सौभाग्यं चैव मनुजः प्राप्नुते कस्य रोचनात्॥ तन्मे कथय देवेश परमानंददायकं॥ ॥ ईश्व
र उवाच॥ ॥ श्रूयतां परमं गुह्यं व्रतं पापहरं शुभं॥ सुरूपा द्वादशी नाम महापातकनाशिनी॥ उभ

व्रता० वृद्धिकरी चैव सर्वसौख्यप्रदायिनी॥ तत्स्कंध एष प्रयत्नेन कथ्यमानं मयानघे॥ पुरा वै द्वापरस्यां
२४५ ते विष्णुर्दैत्येनिषूदनः॥ अतीव रूपसंपन्नो केवसुदेव कुले किल॥ तेनोढा रुक्मिणी नाम भी
ष्मकस्य सुता पुरा॥ अस्तित रूपासु भगा पतिव्रतपरायणा॥ नहि तस्य विना कृष्णं लोके सुखमह
ते सुखं॥ श्वश्रूश्वशुरयोः साध्वी पादवंदनतत्परा॥ केनापि कर्मणो दोषेण कुपिता वि
ष्णुमातरं॥ न प्रसादयति क्षिप्रं मितिज्ञात्वा तु देवकी॥ कृष्णं प्रोवाच कुपिता यदि ते जननीप्रि
हा॥ ततस्त्वया हि वैवास्यां कुलरूपगुणान्वितं॥ मद्वाक्यमन्यथा कर्त्तुं नार्हसि त्वं कुलोद्भवां॥ ॥
कृष्णश्चोवाच॥ ॥ अपापां लक्षणीं त्यक्त्वा सुवहेदं कथं शुभां॥ यः परित्यजते नार्यमविवेको
हि देहिनां॥ स प्राप्नोति हि मंदत्वं सोऽभाग्यं समपोरूपैषं॥ विरूपत्वमवाप्नोति न सुखं विंदते क्व
चित्॥ व्याधिर्वा जायते लोके मिंदतिनामपि ध्रुवं॥ इत्यहं जायमानोपि कुर्यधीश्च नंतवा॥ ॥देव राम
क्युवाच॥ ॥सर्वेषामेव वेदानां तीर्थादीनामपि ध्रुवं॥ माता गुरुतरा पुत्र कस्मात् वचनं त्यजेत्॥ म २४५

मवाक्यस्य करणे कथं पापिष्ठता न वै जेत्॥ जननी दृश्यते ने तत्तार्या यावयदुनंदन॥ ॥कृष्ण उवा
च॥ परित्यजामि नाहं त्वां प्रियां प्राणधनेश्वरीं॥ इति लक्ष्मीपरां त्वं मातरं प्रेक्ष्य केशवः॥ चिंतया
मास परमं कथं मे सौख्यं भवेदिति॥ एतस्मिन्नेव काले तु नारदो भगवानृषिः॥ आजगाम सहसा
विष्णुं संप्रेक्ष्य विस्मितं॥ पूजितः परया भक्त्या चार्घ्यं जग्राह नारदः॥ उपविष्टो यथान्यायं पर्यपृच्छ
दनामयं॥ ॥नारद उवाच॥ ॥ किं त्वं दैत्येदं करोषि त्वं कथमुद्वेगकारणं॥ किं न सिध्यति तेजो
घ्नं त्यजे वेगं यदूत्तम॥ ॥कृष्ण उवाच॥ ॥ मात्रापि युक्तो ब्रह्मर्षे परिणेतुं द्विजोत्तम॥ कस्मात् सुखं हि
दृष्ट्वा मित्कुरु त्वं पांकस्य चित्रत्नो॥ ॥नारद उवाच॥ ॥ शृणुतामभिधास्यामि पूर्ववृत्तांतमादरात्॥
लक्ष्मीयुक्तः पुरा नाथः क्रीडमानो हि नंदते॥ तत्रायते स भगवान् दुर्वासा ऋषिसत्तमः॥ स
कृतस्तु यथाज्ञानमस्तुत्यापनपूर्वकं॥ प्रेक्ष्य वीभस रूपं तं देव्या हास्यं कृतं तदा॥ स कोपेन
महातेजा वैश्वानरसमप्रभुः॥ शशाप लक्ष्मी दुर्वासा मुनिः क्रोधेन संयुतः॥ हसिता हं त्वया मुग्धे

व्रता० आत्मनोरूपमेकंतु। विरूपानचदृश्यते किंत्वज्ञानोत्थहंतया॥ इत्युक्त्वासतयादेव्यायथाज्ञा
२४८ ताप्रसादितः॥ प्रसन्नोजगदेवाकंमत्सापीनान्यथाभवेत्॥ जन्मांतरेणसफलंकरिष्यति
विरूपतां॥ सात्वमर्त्येर्वतीर्णाहिगोपकस्यगृहेशुभा॥ सतनामाविरूपांगीविरूपादर्शीति
तथा॥ कर्णनासानिविकृतास्वजाताततस्तावतः॥ पाणिपादाकरिग्रीवासर्ववैरूपलक्ष
णं॥ तत्राख्यमहाप्राज्ञसातेकन्यांप्रदास्यति॥ ॥कृष्णउ॥ ॥तावत्तविरूपवदनांकथं
देस्यामितिस्मरः॥ नागतिंचगमिष्यामितांविवाह्यविरूपिणीं॥ ॥नारदउवाच॥ ॥तस्याः
शापप्रसादेनलक्ष्मीस्यायदुनंदन॥ उद्वृमंप्रस्यसेरूपंसोभाग्यंपरमंसुखं॥ मातापितासाक्षि
णेवैधर्मकामार्थमीश्वरे॥ एवंभविष्यतीत्येवंसंबंधोविहितःसुरैः॥ त्वयाचनान्यथाकार्य
यंगुरुणांवचनंमहत्॥ मातागुरुतराप्रोक्तेरितिदेवेषुपठ्यते॥ ॥ईश्वरउवाच॥ ॥एवमुक्त्वा राम
महादेविनारदःस्त्रिदिवंगतः॥ कृष्णोपिमातरंप्राहवैवाह्यंहिविधीयतां॥ विवाहिताचमातेनवेद्रो २४८

कविधिनाततः॥ आनीयस्वगृहेमातुःदर्शयामासतांवधूं॥ पश्चाद्यचकवचनंनामापरणीः
तास्तुविश्रुता॥ निर्वृत्तिपरमांगच्छत्वत्प्रसादात्परमाधव॥ इत्युक्त्वाविसृतांकृष्णःप्रणिपत्यचमात
रं॥ जगामकृतकार्याणिकरणायमहाबलः॥ तांदृष्ट्वादेवमाताथवक्तोदुःखाधितानत्रा
॥इदंविरूपाविकृताकथंमन्नास्निगोता॥ चिंतामवापमहतीमतिवोद्विग्नमानसा॥ कस्यापि
नाथवक्षेयाविरूपंतछरीरजं॥ अथकस्मिन्सुकालेतुरुक्मिणीतत्रतावतः॥ नमस्कृत्य
तःश्वश्रूंसंघट्टंगोमयंतदा॥ उवाचमस्तंवाक्यंजनकिंपुत्रकंसुनावहं॥ अंबाहंनुशुमिच्छामि
स्वपत्नीकृष्णवल्लभां॥ तांदर्शयामासशीघ्रंप्रसादंसुविधीयतां॥ देव्युवाच॥ श्वश्रुत्यहं
तेसुनगेमामपिवचनंकुरु॥ पूर्वमाचरितंसुभ्रूःसुरूपाद्यदर्शीव्रतं॥ संप्रयच्छतिचेत्तस्यै
दर्शनंतेभविष्यति॥ ॥रुक्मिण्युवाच॥ ॥कष्टेनक्रियतेधर्मःव्रतंचापिसुदुःकरं॥ कथंतस्यै
प्रयच्छामिकलदेवैःसुदुर्लभं॥ ॥देव्युवाच॥ ॥अर्धंप्रदीयतामस्मैतदर्धमथवापुनः॥ प

चमोऽहमप्योषष्टं षोडशांशमथापि वा॥ ॥रुक्मिण्युवाच॥ सुरूपा द्वादशी पुण्यं पतिनार्व-
मपि नो सहे॥ किं पुनः षोडशांशं तु सपत्न्या दुःखचेतसी॥ एवमुक्त्वा जगामाशु मंदिरं स्वं शुभे-
क्षणा॥ पुनः पप्रच्छ कृष्णं सा प्रणिपातेन वै नृपा॥ देवं पृच्छामि चैवोक्तं न तु ज्ञेषि मन्तो मम
॥कथं पश्यामि तामद्य नवोढां कृष्णवल्लभां॥ ॥कृष्ण उवाच॥ ॥श्वेताद्रस्य तिरोंशं तु विलि-
प्तां तां सुमध्यमां॥ विरूपश्यामवर्णांगीं तां कुरूपां विकृताननां॥ अदृष्टे वै चित्रकृतं रूपाद्य-
नसंश्रयः॥ प्रार्थयाथ प्रियां सुभ्रूं सुरूपा द्वादशी व्रतं॥ तिलदृष्टिपि हि राष्टांशं देहि मसें बिकास्स-
हं॥ सागता तत्सकाशं तु विधाय द्वारमादरात्॥ उवाच रुक्मिणी सा तु सत्यनामाशु चिव्रता॥
एकामथाकृतिं देवि देहि मे षकं नंदिनी॥ अर्धाकृतिं वा मद्देयाय द्यास्ति मपि सौहृदं॥ ॥रु-
क्मिण्युवाच॥ ॥कोपं मति त्वमस्त्येयं सुरूपां द्वादशीं प्रति॥ तिलाकृतिं प्रयच्छामि उच्छामि उच्चाट-
यति पातकं॥ इत्युक्त्वा वरितं सा तावाप्त्वा त्वेकां तिलाकृतिं॥ तस्याश्चैव मद्दत्तायां रूपेण साधिकाभव-

त्॥ तां दृष्ट्वा विस्मयपरा प्रपच्छ शपि तां हरेः॥ कथ्यतां मम का हि त्वं किमर्थमिह चागता॥ ॥सत्य-
नामा उवाच॥ ॥तवाहं भगिनी नद्येकृ स्नेनोदास्मि धार्मिके॥ सत्यनामेति नामेति नमामि
चरणौ तव॥ इति श्रुत्वा तु वचनं विस्मयस्तु ह्वलोचन॥ नोवाच किंचार्वंगी श्रुत्वार्थं विस्मिता
भवत्॥ एतस्मिन्नेव काले तु वाग्बभूवाशरीरिणी॥ त्वद्दानप्रभावेन सत्यव्रतपरायणा॥ सुरूपा द्वाद-
शी पुण्यं देवानामपि दुर्लभं॥ ॥देव्युवाच॥ ॥कर्मणा केन कर्तव्या किमाचारं वदस्व मे॥ नियमं
होमदानं च प्रसादं संविधीयतां॥ ॥ईश्वर उवाच॥ ॥पौषमासे तु संप्राप्ते पुष्यर्क्षं यदा भवेत्
॥ तस्यां रात्रौ संयतात्मा ध्यात्वा विष्णुं सनातनं॥ श्वेतां गौरकवर्णां वा तस्याः प्राप्य तु गोमयं॥ अं-
तरिक्षात्तु पतितं भुवि निर्मलमवाच्छितं॥ तस्य कृत्वाकृतीनां तु शतमष्टोत्तरं तिलैः॥ अस्ती ह्येव द्वाद-
शी कृष्णा उपवासपरायणैः॥ स्नात्वा नद्यां तडागे वा विष्णुमेवाथ चिंतयेत्॥ सौवर्णं तु हरिं कृत्वा
रूप्यं चापि हि शक्तितः॥ तिलपात्रोपरि स्थाप्य ततो विष्णुं प्रपूजयेत्॥ इति सम्प्रविहितपुष्पैर्धूपै-

व्रता० स्तु धूपितैः ॥ नैवेद्यं तिलमिश्रं तु फलानि विविधानि च ॥ नमः परमशान्ताय विरूपाक्ष नमोस्तु
२५० ते ॥ सर्वसंकष्टनाशाय गृहाणार्घ्यं नमोस्तु ते ॥ अर्घ्यमंत्रः ॥ एवं संपूज्य देवेशं कुर्याद्धोमं समा
हितः ॥ आवाह्य देवं लक्ष्मीशं होमयेद्धोमयाकृतीन् ॥ शतमष्टाधितिलकान्याइति मंत्रसं
युतान् ॥ सहस्रशीर्षेति मंत्रेण कृतिं ध्यात्वा जनार्दनं ॥ लक्ष्मीयुक्तं च मेघाभं शंखचक्रग
दाधरं ॥ होमांते कारयेच्छ्राद्धं वैष्णवं द्विजसत्तमैः ॥ दत्वा च भोजनं तेभ्यः कृतकं स्वर्दक्षिणं ॥
॥ धर्मश्रवणसंयुक्तं जागरयात्तु ततो निशां ॥ तत्कुंडलं वैष्णवीं मूर्तिं विप्राय प्रतिपादयेत् ॥ मंत्रही
नं विधिहीनं च सर्वं तत्र क्षमापयेत् ॥ ॥ ईश्वर उवाच ॥ ॥ एवं यः कुरुते देवी सुरूपाद्वादशीव्रतं ॥ न
रो वाप्यथवा नारी तत्र पुण्यं शृणुष्व मे ॥ दौर्भाग्यं न प्रपते तस्य अपि जन्मांतरार्जितं ॥ अपि धूम्रमसस् राम
पक्वं जायते कारणांतरात् ॥ तस्यापि तस्य ते दुःखं वै रूपं तस्य जन्मनि ॥ बंधुभिर्न वियोगं वन २५०
ष्टैः सह वियोगता ॥ जायते गोत्रवृद्धिश्च कीर्तिमान् जायते भुवि ॥ जातिस्मरणमवाप्नोति प

दं निर्वाणमाप्नुयात् ॥ पठेद्वा मानमिदं नत्वा यः शृणोति समाहितः ॥ पुण्यमाप्नोति सततं स्व
र्गलोके महीयते ॥ ॥ इति सुरूपाद्वादशीव्रतं ॥ ॥ इति श्रीभट्टनीलकंठात्मजभट्टशंकरकृ
तौ व्रतार्के द्वादशीव्रतानि ॥ ॥ अथ त्रयोदशीव्रतानि ॥ ॥ तत्राषाढशुक्लत्रयोदश्यां पादिज
या पार्वतीव्रतं ॥ भविष्योत्तरपुराणे ॥ ॥ श्रीलक्ष्मीरुवाच ॥ ॥ देवदेव जगन्नाथ भुक्तिमुक्ति
प्रदायक ॥ कथयस्व प्रसादेन लोकानां हितकाम्यया ॥ नारीणां सुव्रतं चैव अवैधव्यकरं
शुभं ॥ येन चीर्णेन नारीणामखंडफलदो भवेत् ॥ श्रीभगवानुवाच ॥ सम्यक्पृष्टं त्वया देवि भव
मिष्या त्वयोदितं ॥ तद्व्रतं कथयिष्यामि नाख्यातं कस्यचित् शुभे ॥ अकथ्यं परमं गुह्यं पवित्रं
पापनाशनं ॥ येन चीर्णेन नारीणामवैधव्यं च जायते ॥ आषाढे चैव कर्तव्यं शुक्लपक्षे त्रयो
दशी ॥ गृह्णीयान्नियमं तत्र दंतधावनपूर्वकं ॥ दंतधावनमंत्रः ॥ आयुर्बलं यशो वर्चः प्रजाः
पशुवसूनि च ॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ नियमात्तुलमाप्नोति विः फलं नियमं वि

व्रत॰ २५१ ना॥ एतत्सर्वंप्रयत्नेनव्रतंनियमपूर्वकं॥ एकभक्तव्रतंचैककरिष्येचमयाकृतं॥ स्वादुरहितेनधा
न्येनतेनपापंव्यपोहतु॥ उमामहेश्वरौकार्यौसुवर्णरजतादिभिः॥ अथवामृन्मयौकार्यौसिं
दूरेषोपरिस्थितौ॥ गोष्ठेदेवालयेवापितथाब्राह्मणवेश्मनि॥ स्थापयेद्देवमंत्रेणप्रतिष्ठांत
त्रकारयेत्॥ तद्दिनेदंतकाष्ठंहिपुष्पिकांचवरानने॥ स्नानंसुविहितंकृत्वाततःपूजांप्रकल्पये
त्॥ ऋषिभिःसप्तकैःपूजांपूजांकृत्वापृथक्पृथक्॥ कुंकुमागुरुकस्तुरीसिंदूरैःसृष्टगंध
कैः॥ धूपकैःशतपत्रैश्चपुष्पिकादिसतोद्भवैः॥ गौरीवामंत्रेणरुद्रवायाह्वजयित्वाविधानतः॥ अ
र्घेणचापिशृङ्गेणउमावल्लीपुगवच॥ श्रीफलद्राक्षदाडिंबैस्तथाजातिफलेनच॥ आद्यादेवीच
सर्वाणीशंकरस्यसदाप्रिये॥ अर्घ्यंगृहाणदेवेशममोपरिकृपाकुरु॥ इतिपूजाप्रकर्तव्याक राम
थाःचक्रेद्विजोत्तमः॥ लक्ष्मीरुवाच॥ अच्युतायनमस्तुभ्यंपुरुषायादिरूपिणे॥ व्रताध्यक्षम २५१
हाप्राज्ञत्वंहृदिकृत्यकारक॥ कथयस्वप्रसादेनव्रतानामुत्तमंव्रतं॥ केनचादौपुराचीर्णमिस्तुलो

Dr. Bhau Daji Memorial

केवकारितं॥ एतत्सर्वंप्रयत्नेनब्रूहीमेजगदीश्वर॥ श्रीभगवानुवाच॥ अथातःसंप्रवक्ष्यामिपा
र्वसामश्वकथानकं॥ यांश्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥ आसीत्पुराकृतयुगेकौंडि
न्येनगरेवरे॥ ब्राह्मणोवसतेतत्रसत्यशौचपरायणः॥ गुणवान्शीलसंतोषीवामनोनामतो
मतः॥ तस्यभार्याप्रियातस्यरूपलक्षणसंयुता॥ धनाढ्योवेदविदुषःगृहेवैसर्वसंपदः॥ तस्यक
र्मविपाकेनसंतानरहितोभवेत्॥ अपुत्रस्यगृहंपुण्यंश्मशानसदृशंभवेत्॥ दंपतीकेनदुःखेन
क्षामौजातौशरीरतः॥ एककालसमायोगेनारदोगृहमागतः॥ अर्घपाद्यंकृतंतस्यकथांचक्रेसु
नासह॥ वामनउवाच॥ नारदत्वंऋषिश्रेष्ठसर्वज्ञानपरायणः॥ कथयस्वप्रसादेनकथंदुःखंप्र
णश्यति॥ दानेनानेनदेवर्षेव्रतैश्चनियमपुरस्सरे॥ तीर्थेनिचमुनिश्रेष्ठसंतानंचभविष्यति॥ नारदउ
वाच॥ शृणुविप्रप्रवक्ष्यामिसंतानंचभविष्यति॥ वनस्यपश्चिमेपार्श्वेबिल्ववृक्षपतुमध्यमः॥ विद्युल्
लिंगंचविख्यातंभवानीसहितंपरं॥ सपर्यांकुरुयत्नेनतुष्टोदास्यतिसंततिं॥ अथपूजांलिंगमभ्यर्च्यद्विज

व्रता० स्त्वयद्दीयते॥अनाथप्रेतसंस्कारेकोटियज्ञफलंलभेत्॥इत्युक्त्वानारदःस्वर्गेगतोवैमुनिपुंगवः
२५२ ॥वनमध्येगतौदौतुदंपतीपुत्रकांक्षिणौ॥बिल्वमध्येततोदृष्ट्वाशिवलिंगंपुरातनं॥बिल्वपत्रे
णजीर्णेनलिंगंतत्रैवछादितं॥विहायबिल्वपत्राणिनसम्मार्ज्योपलेपनं॥पश्चात्तेनप्रक्षाल्य
पूजांकृत्वामनोरमां॥नित्यंनियमसंयुक्तौपूजयेत्परमेश्वरं॥पंचाब्दंपूजितस्तेनपार्वतीसहि
तोहरः॥एकदातुगतोसौतुपुष्पार्थेब्राह्मणश्चवहिः॥कुसुमंगृह्यतेयावत्तावद्दृष्टोसुपन्नगैः॥प
तितस्तद्वनेघोरेसिंहव्याघ्रसमाकुले॥तृतीयेनमुहूर्तेनतज्जायाचिंतितंतदा॥केनापिकारणे
नैवकथंनायातिमेपतिः॥रुदंतिशोकसंयुक्तावनमध्येगतासती॥आगतातत्रयत्रासौभर्ता
चपतितोपिच॥भर्तारंपतितंदृष्ट्वासापितत्रउपागता॥तमश्वास्यवेतनायुक्तास्मरंतीवनदे राम
वतां॥पार्वतीत्रसमारब्धातापत्रतिष्ठतिब्राह्मणी॥क्रंदमानांचतांदृष्ट्वापार्वतीवरदानवत्॥सु २५२
धात्रीकरहस्तेनविप्रचक्रेविमुंचति॥उत्थितोब्राह्मणोतत्रनिशीथेनिद्रियामिव॥तावेसवरणे

॥

गत्वादंपतीविनयान्वितौ॥पार्वत्यो— दितमिदंवरंवरयसुव्रते॥ब्राह्मण्युवाच॥त्वत्प्रसादेनरु
द्राणीलब्धवान्वांछितंमया॥संतानंचैवमेनास्तिएतत्दुःखंचमेहृदि॥॥पार्वत्युवाच॥॥
व्रतंकुरुविधानेनममताम्नावविश्रुतं॥जयाममव्रतंनामत्रैलोक्येपावनंपरं॥जयापार्वती
व्रतंचआषाढेचारुलोचने॥स्वादुरहितेचान्नेनलवणेनरहितेनच॥भोक्तव्यंदिनपंचकंक
र्त्तव्यंचवटव्रतं॥त्रयोदश्यांव्रतारंभरात्रीयायांसमापनं॥शुक्लपक्षेव्रतारंभंकृष्णपक्षेसमापनं
पंचाब्देपावतानेस्तुव्रतंकार्यंप्रयत्नतः॥पंचाब्देतियवैश्चैवव्रतंतुलवणंविना॥पंचाब्दंतंडुलैः
कार्यंइक्षुरसविवर्जितं॥पंचाब्दंमुद्गैःकार्यंगृह्णीयाद्विंशतिनमेततोऽष्टव्रतोद्भवंसमाचरेत्
॥दंपत्योःपरिधानंहिदद्यादुकूलहेतवे॥भोजनेसुवासिनीनांचरात्रीयायांयथोदितं॥विंशति
प्रथमेपक्षेविंशत्याद्यमतःपरं॥पंचकेपंचकेकार्यंपरिधाने— भोजनैः॥नानारसैःसमा
युक्तंघृतघंटसमन्वितं॥सप्तर्षिकायाश्चदातव्यंभोज्यंसौभाग्यहेतवे॥कुंकुमंकज्जलंदेयं

षष्ठे अष्टे स्वशक्तितः ॥ रात्रौ जागरणं कुर्यात् अखंडफलदं भवेत् ॥ अनेन विधिना यस्तु कुरुते व्र
तमुत्तमं ॥ जागरणे कृते यांति व्रतं संपूर्णतां सदा ॥ व्रतेनैव विना नारी विधवा जन्मनि जन्मनि
॥ शोचता दुःखसंयुक्ता न च सौभाग्यभाग्भवेत् ॥ नारीणां च व्रते दाने पतिर्न ज्ञाततः परं ॥ सौभा
ग्यमतुलं यांति पतिसंतोषदानतः ॥ एतावदुक्त्वा व्रतमिदं तत्रैवांतरधीयत ॥ पश्चात् हंसमाग
त्य संदंपती मुदान्वितौ ॥ पूर्वोक्तेन विधानेन प्राप्तं पुत्रसुखं तयोः ॥ नत्तल्लिंवविशेषेण अवैध
व्यपरं सुखं ॥ भुक्त्वा च विविधान्भोगान् अंते प्राप्तं शिवगृहं ॥ ॥ श्रीभगवानुवाच ॥ ॥ एवं या
कुरुते नारी नरश्च भक्तिविपुलो यते ॥ कुलत्रयं समुद्धृत्य नीयते शिवमंदिरं ॥ सान्निध्यमुत्त
मं प्राप्नोति शिवलोके महीयते ॥ कथं श्रुत्वा विधानेन सर्वपापं विमुच्यते ॥ ॥ इति भविष्यो राम
त्तरे पुराणे जयापार्वती व्रतं इदं च गुर्जराचारप्राप्तं ॥ ॥ अथ भाद्रपदशुक्लत्रयोदश्यादि गोत्रि २५३
रात्री व्रतं हेमाद्रौ भविष्योत्तरे ॥ ॥ युधिष्ठिर उवाच ॥ ॥ भगवंस्त्वत्प्रसादेन बहूनि श्रुतानि

मे ॥ श्रुतानि बहुपुण्यानि कृतानि मधुसूदन ॥ सर्वपापहराणि स्युः सर्वकामप्रदानि च ॥ सांप्र
तं श्रोतुमिच्छामि व्रतानामुत्तमं व्रतं ॥ किंचिद्भो गव्रतं ब्रूहि यदि तुष्टोसि माधव ॥ यत्कृत्वा सर्व
पापेभ्यो नरो नारी विमुच्यते ॥ श्रीकृष्ण उवाच ॥ कथयामि नृपश्रेष्ठ व्रतानामुत्तमं व्रतं ॥ पत्तिकस्य
विदारव्यातं तं शृणुष्व नृपोत्तमं ॥ यान्यान्कामान्वांछयंति नरा नेत्रां नेतां स्तथैव च ॥ तत्क्षणात्सेव
मुच्यंते नरा नार्यश्च सर्वशः ॥ व्रतेनो भगवतो राजन् कामधेनोः प्रसादतः ॥ सौभाग्यं संततिं लक्ष्मीं प्रा
प्नोति व्रतमुत्तमं ॥ युधिष्ठिर उवाच ॥ यदि तुष्टोसि भगवन् व्रतस्यास्य विधिं श्रुतं ॥ ब्रूहि मे राज
शार्दूलेकरो मित्वत्प्रसादतः ॥ के मंत्राः के नमस्कारा देवतायें प्रकीर्तिताः ॥ किं दानमर्घमंत्रं
च कथयस्व सुरोत्तम ॥ कृष्ण उवाच ॥ नारदेन पुरा राजन् यदुक्तं सागरादिषु ॥ स्मारितं यत्त्वया जन
शृणुष्वेकमना व्रतं ॥ मासि भाद्रपदे शुक्ले त्रयोदश्यां समारभेत् ॥ त्रयोदश्यां प्रभाते तु स म्नु
स्याप शुचिर्भवेत् ॥ गृहीयान्नियमं पूर्वं दंतधावनपूर्वकं ॥ आचम्योदकमादाय इमं मंत्रमु

व्रता० २५४

दीरयेत्॥ गोत्रिरात्रव्रतस्यास्योपवासकरणे मम॥ शरणं त्वं व देवि त्वं नमस्ते धेनुरूपिणी॥ प्रसी
दतु महादेवो लक्ष्मीनारायणः प्रभुः॥ लक्ष्मीनारायणं देवं सौवर्णं वास्व शक्तितः॥ पंचामृतेन गंधो
नस्नापयेत्कमलापतिं॥ स्थापयेत्सर्वतोभद्रं मंडले ष्टदलेपि वा॥ गंधपुष्पैस्तु नैवेद्यैः स्तुति
गीतादिनर्तनैः॥ नालिकेरार्घ्यदानेन प्रीणयेन्मां हरिस्तथा॥ लक्ष्मीकांत जगन्नाथ गोत्रिरात्रव्रतं
मम॥ परिपूर्णं कुरुष्वेमं गृहाणार्घ्यं नमोस्तु ते॥ इत्यर्घ्यः॥ आरात्रिकं ततः कुर्याल्लक्ष्मीस
तुष्टिदं॥ नवं कुंभं जलैः पूर्णं हविष्यान्नेन पूरितं॥ कृत्वा दिनत्रयं पार्थ प्रीतये विनिवेदयेत्॥ धेनुश
ग्रां ततः कुर्यात् जलधारां प्रदक्षिणं॥ पुरा दत्वा तु मुकुटं कुंडलं कुंकुमं तथा॥ आन्नाच्छादनगंधादि
दिव्यपुष्पैः सदीपकैः॥ अहोरात्रव्रतं केचिद्युतदीपं दिनत्रयं॥ अर्घ्यदानं ततः कुर्याल्लक्ष्मीक
न्तस्य तुष्टिदं॥ नालिकेरादिभिः फलैरर्घ्यदानमंत्रः॥ पंचगावः समुत्पन्ना मथ्यमाने महोद रा म २५४
धौ॥ तासां मध्ये तु या नंदा तस्यै धेन्वै नमो नमः॥ प्रदक्षिणीकृता येन धेनुर्मार्गानुसारिणी॥ प्रदक्षिण

कृता येन सप्तद्वीपा वसुंधरा॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः॥ गावो मे हृदये संतु ग
वां मध्ये वसाम्यहं॥ आरात्रिकं सनैवेद्यं गीतवाद्यमहोत्सवैः॥ कुंकुमं कलशं सूत्रं धेन्वै द
द्याद्विचक्षणः॥ एवं संपूजितां धेनुं सम्यक् भक्त्या दिनत्रयं॥ यवांश्च पयसा चैव चारयेत्सापसेव
नैः॥ गोमयाद्गतैर्धौतैः कुर्यात्त्रैरेव पारणं॥ धेन्वै प्रजागरं कुर्यात्सर्वपापप्रणाशनं॥ त्रिविधा
न्मुच्यते पापात् प्रहरार्धेन पांडव॥ तस्मात्तरं कृता सा पापात् प्रहरार्धेन मुच्यते॥ भक्त्या त्रिवेणुपात्रा
णि कारयित्वा प्रपूजयेत्॥ नारिकेलाम्रकूष्मांडखर्जूरादाडिमैः शुभैः॥ शुभैर्विलिप्तैः सिं
दूरैः वस्त्रकुंकुमकज्जलैः॥ प्रथमे बीजपूरार्धं द्वितीये दाडिमं शुभं॥ तृतीये नारिकेलेन दद्याद
र्घ्यं दिनत्रयं॥ कस्कासक त्रयः कार्यं हविष्यान्नेन पूजिताः॥ लक्ष्मीनारायणं देवं ब्राह्मणं चापि या
सतः॥ पूजयेत्कुंकुमैर्वस्त्रैर्हेमसूत्रैर्युधिष्ठिर॥ दंपत्योर्भोजिनं देयं धेनुश्चात्मादिनत्रयं॥ पारणे
रिणि विप्रान्निष्ठ वध्वं भोजयेत्॥ गुल्फरूपायतां धेनुं द्विजाय प्रतिपादयेत्॥ सकुंकुमासव

स्त्रींचघंटामुक्तटनूषितं॥गीतावादित्रनृत्यादिइतिपावंपुरःसरं॥पायाद्विप्रग्रहं याक्तप्रापये
त्ततएवच॥ एवंयाकुरुतेपार्थगोत्रिरात्रव्रतोत्तमं॥ इत्थंजंतुसदास्त्रीणांनराणांचुरणमिवच॥
व्रतस्यास्यप्रभावेनलोकेचैवमहीयते॥ कीर्तिदिंधनदंचैवसौभाग्यकरणंनृप॥ आयुरारो
ग्यकरणंसर्वपापप्रनाशनं॥एतस्मात्कारणाद्राजन्सनार्यस्त्वंकुरुव्रतं॥यदिराज्यंचाप्तकीर्ति
निरसमानुमिते ह्यसि॥ तच्छ्रुत्वापांडवश्रेष्ठोव्रतंचक्रेसमाहितः॥व्रतस्यास्यप्रभावेनलब्धरा
ज्यमकंटकं॥ ॥इतिहेमाद्रौभविष्योगोत्रिरात्रव्रतं॥ ॥इदंचगुर्जरेषुप्रसिद्धं॥त्कांरेतु आश्वि
नशुक्लत्रयोदश्यांद्युक्तं॥ ॥अथगुर्जरप्रासंगोत्रिरात्रिव्रतं॥ ॥युधिष्ठिरउवाच॥ ॥येनजसी
सकलापिनराणांभुवनेतवे॥ संततिवर्द्धनीस्त्रीणांतत्व्रतंवदमेप्रभो॥ ॥कृष्णउवाच॥ येनेदं
हसीसकेलंमश्रणुराजन्प्रवक्ष्यामिव्रतानामुत्तमंव्रतं॥येनवैक्रियमाणेनसर्वपापक्षयोभवेत्॥गो
त्रिरात्रमितिख्यातंनरस्त्रीणांफलदायकं॥वांछितंजायतेतेषांयेषांचेतसिवर्तते॥युधिष्ठिरउवा

च॥कीदृशंतद्व्रतंदेवविधानंव्रतकीदृशं॥कथमेषासमुत्पन्नाकस्मिन्कालेतुकेशव॥ ॥श्री
कृष्णउवाच॥ ॥पुराकृतयुगेपार्थमनुनमितुनस्मिबन्नवह॥वैवस्वतकुलेजातोवन्नवष्ट
पिवीपतिः॥तदन्वयेदिलिपश्चप्रसत्तनृपतिसत्तमं॥नृपाःसर्वेवशंतस्यसंजाताःकरदेवकाः
॥निसंधर्मपरोराजाप्रजनियोमनीषिभिः॥नजायतेतुसंतानंतस्यैवंवर्ततःसदा॥वांछतातनयंते
नदत्वामंत्रिषुकोशलाः॥सपुत्रार्थंसपत्नीकोवसिष्ठस्याश्रमंययौ॥पश्यन्विपथिकस्याणिस्मा
रमेस्तोरणंकृतं॥ विविधानिचरूपाणिमार्गेषुफलितानिवै॥सराजामहिषीमार्गेरथारूढस्तु
वाहनः॥ संध्यायांयोगिनस्तस्यमहर्षेःप्रापदाश्रमं॥सारथिंचसमादिश्यवाजिनविश्रामयेत्तं
था॥रथादुत्तीर्यदंपत्यावाश्रमंचगच्छतौमुनेः॥एवंकर्माणिसंध्यायांदिलिपोददृशेगुरुं॥अरुं
धत्यासहासीनंसावित्रेचपितामहं॥तौप्रणम्यगुरुंतत्रमुनीपत्निविशेषतः॥स्थितौतस्यसमी
पेभूमीसाचनंदितौतयोः॥दिलिपंचतदात्यर्थंधर्मज्ञंलोकपालकं॥पप्रच्छकुशलंराजंवसुधा

ब्र.ना०
२५६

याम्युक्तंमुनिः॥ ॥दिलीपउवाच॥ ॥कुशलंतःसदादेवस्थितेत्वयिगुरौमति॥ ॥सुराणांचमनुष्या
णांविपदंरक्षितानवत्॥ विषयेममकातापंचपत्सकितजायते॥किंतुकार्यंधरित्र्यामेनिराशा
:पितरोममः॥तथाकुलमुनिश्रेष्ठपुत्रोनभवतिमेयथा॥राज्ञश्चपदिसंप्राप्तेत्वदापन्नंसुखंमुने॥
वदेतिकथितंराज्ञामुनयेवैयुधिष्टिर॥ तदामुनिःक्षणंतस्थौध्यानस्तिमितलोचनः॥ कारणंस्
ततःराज्ञोमुनिर्दृष्ट्वासमाधिना॥पश्चान्निवेदितंतस्मैदिलीपायप्रयत्नतः॥वसिष्ठउवाच॥ इ
दंवृत्तांतमाधेरध्यवसुधागच्छतस्तव॥ अनल्पकल्पकलस्याधकामधेनुनवोदिता॥जा
तस्तस्यास्तदाकोपोदत्तस्तेशापईदृशः॥नवंदिताहंभवतासांप्रतंयदिनमिपनविष्यति॥नते
पुत्रंतच्छापोनश्रुतस्तवयाः॥ नदृजयेद्यस्यानांवंद्यानंयन्नवंदते॥ नजायतेतुकल्याणंपातकेरे
वलिप्पतेदीलिय०॥कृतोमयापराधोयंकरोमिकिमरंमुने॥संततिजायतेयेनतद्व्रतंवदमेप्र
भो॥ वसिष्ठ०॥ अन्यैर्नानाविधैःपुण्यैस्तपोभिर्नियमैःसहैः॥ नजायतेतुसंतानमेविंशाव्रतं

राम
२५६

BHAU DAJI

न्यपि॥समीपश्चकथंयातिममधेनुर्गुरोरियं॥प्रसादंगच्छदेहंधेनुमुंचसवत्सकां॥भवि
ष्यतिजनन्याश्चवत्सोमार्गंविलोकयत्॥सिंहेननृदिलीपायकथितंवैतदापुनः॥ देहांत
रेचदृष्टागसिन्नपकारिणीकुर्वता॥स्तोकेनहेतुनापार्थकांतंछत्रंचसंस्कृतं॥सर्वस्यजगतो
राज्यंवपुरेतन्नवंचयः॥स्वतुमिच्छसिवाराजन्मूर्खस्त्वमिहराः कथं॥ददामिचकथंप्रा
णान्प्रजापालनतत्परः॥जीवन्नवामहाराजमुनेःकोपश्चयास्यति॥ततोरक्षस्वदेहंस्वंराज्यं
चकुरुन्नमिप॥धाक्षोवाचसिंहोमेनगेनानुगतांगिरं॥दिलीपोपितदापार्थबाणमेतामु
वाचह॥गवानिरिक्षितश्चैवभक्तविपोदिननेत्रया॥किंमेरामेनमेसिंहवीर्ययेनावनेनच
॥यत्रागतंचमेसर्वंयदिधेनुग्रहिष्यसि॥यदिसिंहततश्चाग्नेसिंहस्यपतितस्तदा॥यावद्दि
रूपंचपतितोमांसस्यपिंडवन्नृपः॥तावत्सिंहोवरंकृत्वाधावितश्चभयंकरः॥दृष्ट्वासिंहंनप
तितंचंचलोनवक्तृवत्॥ तावत्तस्योपरिष्टाच्चपुष्पवृष्टिःपपाततवै॥उत्तिष्ठवत्सभूपालना

व्रता० मित्थं निशम्य च ॥ उत्थितस्तत्सुतश्चाग्रे गां ददर्श निवेहरि ॥ सेवयाच गुरोश्चापि नित्यत्वावापि
२५९ विशेषतः ॥ शीलकामदुघाहं च वरं याचय तन्नवान् ॥ योजयित्वा करौ राज्ञा ययाचे तनयं ल
तः ॥ वंशाह्न तन्मित्यप्राप्तो शिवभक्तो निरंतरं ॥ ॥ गौरुवाच ॥ ॥ गोत्रिरात्रव्रतं राजन्यद्गृत्कान्न
वताकृतं ॥ ततो यस्माद्यतेद रूपुत्रपौरुषविग्रहः ॥ ये चान्येपि करिष्यंति गोत्रिरात्रव्रतंम
म ॥ तेषां कामं च दास्यामि मनसीप्सितं संशयः ॥ इत्युक्त्वा चलिता धेनुर्वशिष्ठस्याश्रमं प्रति ॥
दास्तु रवीच बलिनी त्वा आययौ तु सुदक्षिणा ॥ हजां कृत्वा विधानेन राजपत्नी विशेषतः ॥ प्रद
क्षिणाक्रियां कृत्वा चलितावेयुधिष्ठिर ॥ आश्रमं च ततो गत्वा दंपती यो मौ मुतस्तदा ॥ गुरोरग्रे च
तत्सर्वं वृत्तांतमवदीसुनः ॥ नंदितौ च तदा पार्थ दंपती तौ सुकोमलो ॥ पारणं च ततः कृत्वा प्रस्थितौ न राम
गरं प्रति ॥ कृतम्बांचनमस्कृत्य होतारं गां तथैव च ॥ आगतश्च ततो राजा उत्सवतां कं पुरं पुनः ॥ राज्ञा ते २५९
न कृतां गेन राज्यमारोपितं सुजे ॥ दिनैः कतिपयैरेव गोत्रिरात्रप्रभावतः ॥ राज्ञश्च कुर्वतस्तस्य सुत

स्तस्य महाबली ॥ प्रजाते सुमहल्लक्षैव तस्मन्नो रघुसंज्ञया ॥ रम्यं ज्ञानं तदा सर्वं संजाता निर्मला दि
शः ॥ आदेवे च कृतं वर्षि वायवः शीघ्रगा ववुः ॥ मदं गस्य स्वनै रम्यैः पूर्णं स्वर्गमनुत्तमं ॥ प्र
जाः सर्वास्तदा पार्थ वर्द्धंति च पुनः पुनः ॥ गोत्रिरात्रप्रभावाच्च रघुः पुत्रो बभूव ह ॥ पुरंदरस्य जेता
च महाधर्मपरायणः ॥ दिग्विजयस्य यत्तस्य कर्त्तासो पि युधिष्ठिर ॥ यत्तं दिग्विजयं कृत्वा विश्रेभ
श्च ददौ वसु ॥ ददशोय्यश्चाप्य यं सूतो गोत्रिरात्रप्रभावतः ॥ तदा प्रभृति लोकेस्मिन्लोकाकृ
र्वतिते प्रभुं ॥ देवैः सर्वैः कृतं तत्र सर्वकामार्थसिद्धये ॥ सर्वाभिर्देवपत्नीभिः कृतं च व्रतमुत्तमं
॥ गोत्रिरात्रव्रतं पुण्यं विधानेन फलप्रदं ॥ कुरुष्व त्वं महाराज त्वं भवानपि युधिष्ठिर ॥ सान्द्रमद
नतरं मातुः कृत्वा मनसि पार्थिव ॥ भाद्रपदे सवत्सां तु भक्त्या त्वाराधनस्व मां ॥ एवं यः कुरुते भक्त्या
गोत्रिरात्रव्रतं पुनः ॥ सिध्यंति सर्वकार्याणि सुखं चैव प्रवर्द्धते ॥ न जायते त्वपसंतुतस्याः पार्थ भुव
स्तले ॥ नत्मोदं परिकुर्वतितस्य स्याच्च नसंशयः ॥ तपोभिर्विधिः कैरैः किंचितयज्ञैः स्तीर्थयात्रादि

नि॥ मुक्तो रविजेभ्यः पापेभ्यो व्रतमेतद्विधायत॥ कुर्वंतिये व्रतमिदं जगति प्रसिद्धं पापाहं सकलवांछि
तिलकामदं च॥ आरुह्य चैव विमानमनुत्तमं च स्वर्गं प्रयाय मनुजं पुनर्विहायं॥ भविष्योत्तरपुराणे
गोत्रिरात्रव्रतं॥ ॥अथोद्यापनविधिः॥ ॥युधिष्ठिर उवाच॥ ॥कथयस्व महाबाहो गोत्रिरात्रव्रतस्य
वै॥ उद्यापनविधिं कृष्ण येन चीर्णेन तत्फलं॥ ॥कृष्ण उवाच॥ ॥वर्षे चतुर्थे संप्राप्ते गोत्रिरात्रस्य व्रत
स्य वा। उद्यापनविधिं वक्ष्ये सर्वेषां व्रतसिद्धये॥ तृतीये दिवसे स्नात्वा मध्याह्ने विधिपूर्वकं॥ देवामि
ष्टान्नसंसर्ज्य सुहृदेव गृहे व्रती॥ रात्रौ च सर्वतोभद्रं गौरितिलकमेव च॥ पूजयेत्संच लिवलैंश्री
ननं च यथोदितं॥ ताम्रस्य कलशं कुर्यात्ताम्रपात्रसमन्वितं॥ मासैकेन च राजेंद्र लक्ष्मीना
रायणं प्रभुं॥ नवे तु वस्त्रे धृतवस्त्रे देवार्थं च प्रकल्पयेत्॥ वंशपात्राणि कुर्वीत सौभाग्यपचिक्रविन्न
वैः॥ विरूढवल्मपघान्नैर्नालिकेरादिभिः फलैः॥ विलेपनैश्च पुष्पैश्च धूपैर्दीपैस्तथोत्तमैः॥
पंचामृतैश्च नैवेद्यैः पूजयेद्विधिपूर्वकं॥ ततः प्रभातसमये होमं कृत्वा च वैष्णवं॥ आचार्यं वरयेत्

विना॥ सपत्नीकः सवत्सां मे धेनुरात्मन् फलप्रदां॥ आराधयैकाग्रमना गोत्रिरात्रव्रतं कु
रु यादिष्टं दिलीपस्य मुनिना कथितं व्रतं ताश्च नंदिनी धेनुर्वनाद्राव व्रते सुनाकुंडे धीति
लकं सुखफलाङ्गधं सुविविन्नती देवानां वरदा सुनारधिनवा कामप्रदा पाटला॥ गीर्वा
णः सकलाः स्तुतो वपुषि चैति षतियस्याश्चते संपूर्णं शशिनकलां चदधती श्रेयस्करा प्र
लिष्मा॥ भाद्रपदे समनुप्राप्ते सुक्लपक्षे तु पार्थिव॥ प्रातः नीत्वा त्रयोदश्यां नियमं तु सुभक्तितः॥ स
मुपोष्य गोत्रिरात्रं भक्ति कृत्वा ततस्तथा॥ भोस्मेहनि चतुर्थेहं सोभाग्यं देहि गोर्मम॥ ॥नियममंत्रः॥
ततो गावः समभ्यर्च्य मंत्रलेगं धदीपकैः॥ रेतगैः ज्ञातपत्रैश्च चंपकाद्यैः सुनाभनं॥ गावो ममाग्रत
:संतु गावो मे संतु पृष्ठतः॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहं॥ पंच गावः समुत्पन्ना मथ्यमा
ने महोदधौ॥ तासां मध्ये तु या नंदा तस्यै धेन्वै नमो नमः॥ पूजामंत्रः॥ फलैर्नानाविधैः पुष्पैर्गंधै
रपि स्वभक्तितः॥ पूजनीया प्रयत्नेन दद्यादर्घ्यं विधानतः॥ नालिकेरं च कूष्मांडं मातुलिंगं च

दाडिमं॥ हविष्यान्नं च नैवेद्यं कारयेद्घृतसंयुतं॥ गोविंदव्रतार्थाय फलं मया करे धृतं॥ सर्वका
मप्रदा नैरे विरताण्मर्घ्य नमोस्तुते॥ अर्घमंत्रः॥ वस्त्रयुग्मं विधानेन दद्याद्वासांसि दक्षिणां॥ स
पत्नीकाय गुरवे स्वशक्त्या च व्रती नरः॥ दिनानि व्रती निशि … श्रोतव्या च कथाः शुभा॥ जितक्रो
धैः स्ततः सर्वैः स्त्रीभिर्वा पुरुषैरपि॥ एवं संपूज्य विधिवल्लक्ष्मीयुक्तं तु केशवं॥ चतुर्थे दिवसे प्रा
प्ते ततो धेनुं विसर्जयेत्॥ ततो धेनुं सवत्सां तु मंत्रेणानेन पार्थिव॥ दद्याद्विप्राय विदुषे धर्मज्ञाय
शास्त्रपारगे॥ परिपूर्णव्रतं कृत्वा इष्टान्कामान्ददासि तान्॥ विप्राय त्वं मया मातर्गच्छ यथासुखं॥
दानमंत्रः॥ सर्वदानानि देयानि स्वशक्त्या व्रतिभिर्नरैः॥ विविधे मोदिते भक्ष्यैर्दक्षिणां च स्वश
क्तितः॥ वित्तशाठ्यं न कुर्वीत स्थापयेद्व्रततो नरः॥ ग्रंथं यावद्व्रजेत्स्वेष्टे गोप्तारं तं पुरःसरं॥ गोपालानां
च पाथेयं प्रजाकरकस्वरं॥ यवाये चारितां नित्यं फलेन निविधैः सह॥ मुक्त्वा वै कामधेन्वा
च संयुक्तां गोमयेन च॥ पारणं वै प्रकर्तव्यं सर्वैरिष्टजनैः सह॥ सपत्नीकाय गुरवे दत्त्वा चान्नं

सदक्षिणं॥ ॥कृष्ण उवाच॥ ॥एवमाराध्य तां धेनुं राजा वैन्यः क्षितीश्वर॥ ततः प्रजानामधिपः प्र
णाते सुरमिर्मुनेः॥ भाद्रपदे सिते पक्षे त्रयोदश्यां युधिष्ठिर॥ पूजां कृत्वा विधानेन मुमोच
त्वरितं प्रभुः॥ संध्यायामपरे … तिष्ठित्वा आययौ पुनराश्रमे॥ अर्वाक्सुरदक्षिणाक … नीत्वा
च विधिवद्भक्त्या पप्रे धेनोः समीपे तु बलिं दत्त्वा दिनत्रयं॥ अनुयातस्ततो धेनोस्तृतीये दिवसे पुनः
॥ जगती गोरूपधरामिवोदधिपयोधरां॥ नतानिश्चततो राजपुष्पैर्वर्द्धापितस्तदा॥ जयशब्दश्च भा
षते पक्षिणः सुंदरानसाः॥ गीतं च वनदेवीभिः गायमानं तथा परः॥ शुश्राव च ततो राजा सर्वज्ञं न
सिद्धर्षितः॥ चिरं प्रभुते वने ह्यकं क्रमिये नमितेसति॥ धेनुश्च प्रभुनेरजा राजाधेन्वा बद्धो पुनः॥
तद्दिवैवमुने धेनुरागो नावं चपश्यति॥ विवेशागहरं तत्र पार्वत्याश्च पितुर्नृप॥ कृत्रिमश्च ततः
सिंहो मुनि धेन्वा भयंकरः॥ सिंहश्च ददृशे राजा धेनु कर्षन्वलेन वै॥ दृष्ट्वा राज्ञा च सा धेनुः क्रंदमा
नां स्वरोल्वणैः॥ ततो धेनुर्धरः सोपि तां मोक्तुमुपचक्रमे॥ वध्यासिं त्वधार्थाय राजा बाणं करे धौ

व्रता० उत्पन्नस्तु तदा शोकः कोपयुक्तो बभूव सः॥ धनुष्यारोपयन्बाणं चित्रन्यस्त इव स्थितः॥ हस्तस्यानि
२५८ श्चलत्वेन क्रोधस्तस्य व्यवर्धत॥ विस्मयं प्रापयच्छिंहो राजानं वै युधिष्ठिर॥ मानवस्य गिरा प्राह दु
ष्टत्वेन गवि स्थितः॥ सिंह उवाच॥ ॥बाणं प्रयुक्तं भवता वृथा मयि न विध्यति॥ ततः कष्टेच महता त्र
ममाक्रुरु सर्वथा॥ ममाऽतस्य मे गोपि पर्वतो भूतले द्रुमः॥ जायतेन महाराज स्याके वलेन म
नोहरे॥ महेश्वरस्य मां राजन्नाम्ना साक्षं नोदरेणतु॥ सेवकानांच सर्वेषां मुख्यं जानीहि भूमिप॥ बि
लोकये मं पुरतो देवदारुमयेद्रुमं॥ सिक्तः स्नेहेन भूपाल शिवया च सुतः कृतः॥ कदाचिदागतो
हस्तिनगस्तेन महाद्रुमः॥ तस्य संरक्षणार्थाय नियुक्तोऽहं शिवेनतु॥ कृत्वा शिवेन सिंहत्वं
मुक्तोऽहं जीवभोजनः॥ नहीयं खलु गौ राजन् भक्ष्यानुसमुपागता॥ त्यक्त्वा लज्जां निवर्तस्व भ राम
क्तोऽसि गुरवे भवान्॥ आपत्काले रक्षितं तस्माच्छस्त्र भृतो यदि॥ दोषो न जायते तस्य यशो हा २५८
नम्न गच्छति॥ श्रुत्वा गिरं च सिंहस्य राजा चैनमुवाच ह॥ ईश्वरेण समो नाम्नो — वेत्सि हंस्रवा

न्नवेद वेदांग पारगैः॥ तयजयाच कर्तव्यं साधुकर्म प्रयत्नतः॥ गोत्रयं च प्रदातव्यं एकामपि सवत्स
कां॥ वकुड गन्धास्तु श्री लाच तरुणा नरणान्विताः॥ दंपती परिधानं च वस्त्रैराभरणैः शुभैः॥
शय्यां सोपस्करां दद्यात् दानपात्रं कमंडलुं॥ चामरं घृतपात्रं च तिलपात्रं सदक्षिणं॥ दात्राणि
च सुवर्णं च भोज्यागच्छे नवे द्विजाः॥ एवं धेनुं च विप्राय दत्त्वा च स्पृष्ट्वा तो व्रजेत॥ पदे पदेऽश्वमेध
स्य फलं प्रोक्तं न संशयः॥ आचारितानि दानानि दत्त्वा तु च विसर्जयेत॥ तस्य सी दक्षिणां द
द्यात् व्रत संपूर्ण हेतवे॥ गोपालेभ्यः प्रदातव्यं ह्याकुल्यादिकं बलं॥ सर्वं क्षमापयित्वा तु पारणं
च ततश्चरेत॥ अनाथे विधियुक्ते श्वसी दृष्टि श्व कुंड लं च के॥ गवां नक्तिन मंयन्नत ड्येन
परिपाचितं॥ तेनान्नेन प्रकर्तव्या देहस्य शुद्धिमिच्छता॥ एवमुद्यापनं कार्यं व्रतस्य फलमि
च्छता॥ नक्तं गावे द्विजान्तु तां गच्छी युव्रतिनः सदा॥ तया तत्र एनामेति नान्यथापि कदाचन
॥ एवमुद्यापनं कार्यं व्रतस्य फल सिद्धये॥ नारीवा पुरुषो वापि पुत्रवान् जायते ध्रुवं॥ इहलोका

व्रता० २६१

सुखं तु त्यक्त्वा ह्यंते गोलोकमाप्नुयात्॥ ॥श्रीभगवानुवाच॥ ॥एतत्ते कथितं ते ध्रुवंमहत्लोक
तराजनव्रतस्योद्यापनं शुभं॥ श्रोष्यंति वा पठंतीति तेषां सर्वे मनोरथाः॥ ये करिष्यंति
संदेहं तेषां लोकाश्च शाश्वताः॥ ॥इति श्रीभविष्योत्तरपुराणे गोत्रिरात्रव्रतस्योद्यापनं॥
॥ ॥अथाशोकत्रिरात्रव्रतं॥ ॥श्रीकृष्ण उवाच॥ ॥शृणु राजन् सुराध्वत्रमयोध्यायां व्रतं शुभं॥
वसिष्ठेन मुनींद्रेण सीतायै च निवेदितं॥ विधाय रावणवधं यदा रामः पुरे ह्यगात्॥ तदा दे
वी प्रणम्याथ वसिष्ठं वाक्यमब्रवीत्॥ सीतोवाच॥ ॥भगवन् दुष्कारणाद्रावणेन हृता पु
रा॥ नपश्यामि तदा किंचिद्रामी यं विकलेंद्रियः॥ मासमात्रं शोषिता तत्र राक्षसेन हतासती॥
अशोकवृक्षमभ्यन्तात्स्थितं पातत्परायणा॥ उक्तं त्रिजटया तत्र वाक्यं तेत्वर्थसंयुतं॥ अशोकं राम
प्रणता सीते विशोकात्वं भविष्यसि॥ तथैव मुक्तं मया ब्रह्मन्यथोक्तं त्रिजटावचः॥ ततो भ्र २६१
महं शंखवदशोकव्रतमारभं॥ तेन व्रतप्रभावेन हनुमान्पवनात्मजः॥ शतयोजनविस्तीर्णं तितिर्वा सा

Dr. BHAU DAJI MEMORIAL

गरमभ्ययं॥ मया दृष्टोन पश्चेष्टसाभिज्ञातो महाबलः॥ पुनश्चवकुशा लीजातो दग्ध्वा लंकां महाबलान्
॥ ततो मे प्रत्ययो जातो व्रतस्यास्य महाबले॥ नंतरो॥ अस्य च व्रतराजस्य प्रभावेनामयो हरिः॥
ततः कैश्चिदहोरात्रैः भर्त्तामे राघवो बली॥ निहत्य रावणं संख्ये मां विमुधां गृहीत्ववान्॥ तदहं
भगवन्विप्रष्ट्वामि त्वां दृष्टव्रतं अशोकस्य प्रभावं मे वक्तुमर्हसि शेषतः॥ व्रतस्य तस्य पुण्यं
तु पुराणोक्तं महीतले॥ अथवा सुरलोके षु सुरनारीनिषेवितं॥ ॥वसिष्ठ उवाच॥ ॥एवमेतन्नवं
तेयथा वदसि सुव्रते॥ अशोकस्य प्रभावेन तद्वाच मया धनगा॥ शृणु चात्र मयाख्यातं नंदने दि
व्यकानने॥ बृहस्पतिमुखाच्छ्रुत्वाय ज्ञातं परमाद्भुतं॥ पुत्रानिंद्रस्ते वैं दृणल्तो दैवान्महासुरः॥ वि
श्रमत्वाद्बुद्धिहानिस्तस्य धर्मे श्च तापतं॥ बलं तस्याम वाप्याथ देवेंशेन दृचेतन॥ त्रैलोक्यराज्यं
लब्ध्वा शुभमज्ञाशिनयाशिभयाहितः॥ एतस्मिन्नंतरे देवि नहुषो नृपसत्तमः॥ त्रैलोक्यराज्यं सकलं
जहार बलदर्पितः॥ ततः शची प्रयत्नेथिंता हनराज्यमवेक्ष्य सा॥ नंदनांतरमालाद्य तपस्तेपे सुद्

करं॥ तांश्च दृष्ट्वा धर्मनिरतां बृहस्पतिरुदारधीः॥ आगत्य नंदनं देवीं वाक्यमाह महातपाः॥ बृ
हस्पतिरुवाच॥ ॥किमर्थं तप्यते देवी तपः परमदुश्चरं॥ किं त्वया प्रार्थ्यते नेन तपसा ब्रू
हि कारणं॥ शच्युवाच॥ ॥हतानि भूतदेवेंद्र हतराज्यं हतद्विषं॥ क्वापि प्रनष्टं तं विप्र नजा
नेहं प्रियं पतिं॥ एतस्मात्कारणाद्ब्रह्मंस्तप उग्रं समाश्रिता॥ यथा पुनर्निजं राज्यं देवेंद्रः प्राप्नु
यादिति॥ कृतिष्ठ तिमुने ब्रूहि सुरराट् ज्ञातृतापनः॥ प्रसादं कुरु मे देव संयोगेन न चो
क्षयं॥ वाक्पतिरुवाच॥ ॥शृणु पौलोमि देवेंद्रो यथा नष्टोत्र यातुरः॥ मानसांतसि संभूतपं
कजांतरमाश्रितः॥ अग्निभूतमिवापश्यत्ततोप्सु नित्ययं गतः॥ कामं तपः प्रसंगेन सर्वं प्रा
प्स्यसि सुव्रते॥ बकुकाधेप्सितं यस्मात्तपसा लभ्यते फलं॥ स्त्रीणां तुष्टिकरं त्वेकं व्रतं प्रोक्तं
स्वयंभुवा॥ सावित्र्या प्रकृमानाय सत्वं कर्तुमिहार्हसि॥ अशोकव्रतमित्येवं नाम्ना ख्यातं
त्रिविष्टपे॥ येन चीर्णेन पौलोमि नारी दुःखं न संस्मरेत्॥ हरः स्वयंभुवत्येव वृक्षराजेषु नंदने॥

अस्मिंस्तत्क्षेत्रे हरस्तत्क्षण इति विज्ञापि निश्चितं॥ शच्युवाच॥ ॥पुन्नागनागबकुलं चंपका
द्यान्महीरुहान्॥ परित्यज्य कथं चान्यान् हरोस्मिन्नकृत संनिधिः॥ ॥वाक्पतिरुवाच॥ ॥
हरेण निर्मितः पूर्वमशोकोयं कृपालुना॥ लोकोपकारकरणे ततोयं शिववल्लभः॥ वसिष्ठ
उवाच॥ निशम्य गुरुप्रवरं प्रणम्य नत्वार्चयित्वा विधिवद्बुधर्मः॥ पप्रच्छ देवी पुनरात्तनाम्ना
देवी शृणु त्वं विधिमस्य सर्वं॥ वाक्पतिरुवाच॥ आरभ्य तद्व्रतं कार्यं त्रिरात्रं समुपोषणं॥ त्रिरात्र
देवी विरम्यान्तमशोकतरुमस्तके॥ कार्यं नारीभिरमलमौनो वाक्कायकर्मभिः॥ ततः प्रदक्षिणा
देया अष्टोत्तरशतं फलैः॥ नालिकेरैर्मधुरखर्जूरैर्गोस्तनिनिर्दिने दिने॥ मंत्रेणानेन मनसा ध्यात्वा
नित्सदाशिवं॥ अशोक शोकापनुद सर्वकामफलप्रद॥ व्रतेनानेन चीर्णेन यथोक्तफलदो भव॥ इ
ति प्रदक्षिणमंत्रः॥ ततस्तृतीये दिवसे समभ्यर्च्य विधानतः॥ महादेवं वृषयुतं वंशपात्राण्यकारये
त्॥ अनेनैव विधानेन यः कुर्याद्व्रतमुत्तमं॥ वैधव्यं नाप्नुयान्नारी पुत्रसौख्ययुता भवेत्॥ वसिष्ठ उ

 वाच॥ बृहस्पतिमुखाच्छ्रुत्वा शची चक्रे व्रतं शुभं॥ शास्त्रोक्तविधिना सीते तन्नाऽदेवसमागतः॥
 बृहस्पतिमुखात्रतस्मा विनिर्मुक्तो तथा त्वमपि वांछय व्रतमेतत्समाचार यथा साध्वीषु सु
श्रुधीः॥ साधान्नं नापते स्मृतौ व्रतमेतत्कृतं लोके ख्याता देवि भविष्यति॥ व्रतमेतं दं शोकस्य सर्वका
मफलप्रदं॥ कृष्ण उवाच॥ ॥वसिष्ठस्य वचः श्रुत्वा सीता चक्रे व्रतोत्तमं॥ रामायणं समं प्राप्य श्रयो
ध्यायां च कारसा॥ सीता व्रते कृते तस्मिन् दुःखहीना नया रम्त॥॥ युधिष्ठिर उ०॥ अशोकस्य
समाख्याता प्रज्ञा देवविधानतः॥ अशोक वृक्ष विहिताश्रिवाद्याः सर्वदेवताः॥ अशोकसन्नि
धौ राम संपूजनीयः स लक्ष्मणः॥ सितया सहितो राजन् विष्णोरिशो यतो मतः॥ पृथक् मंत्रैः पृथग्वृ
क्षे शोका ख्याय यथाक्रमं॥ तस्मास्त्वन्नरतश्रेष्ठ पुराणोक्तविधानतः॥ अशोकवृक्ष विहिता शिवा
द्याये सुरोत्तमाः॥ अशोककपूजनेनाश्रु तेतु श्रामे नवंविरं॥ गौर्यालिखा तथे प्राणपाल्यरुंधता
यसीतया॥ त्वं समाराधितः पूर्वमशोक फलदो भव॥ इति पूजामंत्रः॥ अशोक वाटिका मध्ये

सीतया त्वं प्रसादितः॥ अशोक संपन्न कल्पो गृहाणार्घ्यं कृतं मया॥ इत्यर्घ्यं॥ रावणस्य वधार्थाय उ
त्पन्नस्त्वं महीतले॥ विष्णो रंशो सि देवेश गृहाणार्घ्यं नमोस्तु ते॥ रामावतार गृह्णं करोषि त्वं प्र
भावतः॥ गृहाणार्घ्यं मया दत्तं सीता लक्ष्मण संयुतः॥ इति रामपूजामंत्रः॥ भ्रातृत्वमनुमुस्त्ववीरं
वने योनौ ययो नर॥ सं लक्ष्मी वर्द्धनं वीरं गौरं लक्ष्मणं प्रजयाम्यहं॥ लक्ष्मणपूजामंत्रः॥ अवनीतल
संभूते सीते सर्वांगसुंदरि॥ गृहाणार्घ्यं मया दत्तं जनकनंदिनि॥ लक्ष्मीत्वं सर्वदेवस्य विष्णो
रंशो महीतले॥ अवतीर्णमहीं स्त्वा गृहाणार्घ्यं नमोस्तु ते॥ इति सीतापूजामंत्रः॥ एवं संपूज्य
विधिना सर्वशोकविनाशनं॥ सर्वपापप्रशमनं सर्वकीर्त्तिविवर्द्धनं॥ अपुत्रया पुरा पार्थ पार्वत्या
मंदराचले॥ अशोकः शोकनाशनः पुत्रत्वे परिकल्पितः॥ जातकर्मादि शोकं तस्य अशोकस्य
महोत्सवे॥ कारितं विधिवत्तत्र तेन वृक्षो नगोत्तमः॥ यावत्तं कुरुते नारी पुराणोक्तविधानतः॥ अशो
कस्य प्रसादेन सर्वान्कामानवाप्नुयात्॥ अवैधव्ययुता स्यान्तुलक्ष्मी सान्निध्यमाप्नुयात्॥ सर्वोप

व्रता० हारान्राजेंद्रब्राह्मणायनिवेदयेत्॥ कथामपिसमाकर्ण्ययःकुर्यात्तिलतर्पणं॥ व्रतस्यफलमा
२६५ प्नोतिसव्रतोपिनसंशयः॥ ॥युधिष्ठिर उ०॥ विशेषंब्रूहिमेदेवअशोकतरुपूजने॥ येनार्चि
तेनरोसर्वंप्राप्यतेसकलंफलं॥ ॥श्रीकृष्ण उ०॥ कथयामितवेराजन्यस्मान्निव्रतमिदंकृतं
॥मनुष्यदेवगंधर्वनारीभिःपुत्रवृद्धये॥ अनुसूयात्रिपत्नीवाअरुंधत्यातथैवच॥ देवक्यासीत
याचैवश्रीशोपद्यासत्यनामया॥ दमयंत्याचसावित्र्याकृतंतद्व्रतमुत्तमं॥ अशोकःपूजितःपू
र्वंयथावच्छृणुपार्थिव॥ अशोकोराजतश्चैवसौवर्णश्चतथाशिवः॥ तथैवशोकाटयेस्मी
तांसोवर्षेरामलक्ष्मणौ॥ पूजयेद्विविधैर्मंत्रैःपूर्वोक्तैर्नृपसत्तमः॥ अशोकंपूजयेद्रक्तं
प्ररूढंसुनपल्लवैः॥ विरूढैःसप्तधान्यैश्चगुरुकर्मोदकैःशुभैः॥ शुभैर्द्राक्षैर्नालिकेरैःश
र्कराभिश्चसदाडिमैः॥ पुष्पादितास्तथाधूपैःपूजयेन्नरुमुत्तमं॥ अशोकेपांडवश्रेष्ठःशो राम
कनाशंतिकुत्रचित्॥ पितृमातृपतिश्रेष्ठैवसुखसुरागणांतथैवच॥ अपशोकस्त्वंशोकहरोजवसं २६५

वंत्रिनःकुजे॥ ॥इतिश्रीभविष्योत्तरे अशोकरात्रिरात्रव्रतं॥ अथकार्त्तिकादिमासेषुशनियुक्ता
यांत्रयोदश्यांशनिप्रदोषव्रतं॥ स्कांदे॥ ॥सोमशर्मोवाच॥ ॥पुरावृत्रादिभिर्दैत्यैर्वर्तमानेमहा
हवे॥ हतःशक्रेणसुचिरंपीफेनेनबलेबली॥ दैत्यान्यजापितान्दृष्ट्वाहन्यमानान्सुरैर्नृशं॥ वृत्रःकोपप
राविष्टोदेवान्योद्धुमथाययौ॥ कालाग्निरूपसहस्रांरूपंकृत्वामहाजवं॥ अवर्द्धतमहातेजारोदसीव्याप्य
न्निवा॥ तेदृष्ट्वाजयवित्रस्तादेवाःशक्रपुरोगमाः॥ कर्त्तव्यंनास्पदंततदागुरुरुवाचह॥ तपसातु
महोग्रेणव्रतेननियमेनच॥ अजेयोयंमहातेजावृत्रःशत्रुविनाशनः॥ आराधयततोदेवं पूर्वेशं
करमव्ययं॥ व्रतेनविधियुक्तेनवृत्रंजेष्यथमाचिरं॥ ॥देवाऊचुः॥ ॥गुरोकेनविधानेनकस्मिन्दिनेन
व्रतेनच॥ आराधनीयोगौरीशोस्माभिर्जयकांक्षुकैः॥ तवदस्वसुराचार्यत्वंहिनःपरमागतिः
॥गुरुरुवाच॥ ॥कार्त्तिकादिषुमासेषुमंदवारेत्रयोदशी॥ विशेषाच्छुक्लपक्षेतुसर्वकामकरीशुभा॥
तस्यांप्रदोषसमयेलिंगरूपिसदाशिवः॥ पूजनीयोहिदेवेशःसर्वकामसमृद्धये॥ स्नात्वामध्याह्नसमये

व्र.ता० २६५ तिलामलकसंयुतं॥ शिवस्य चार्चनं कुर्यात् धूपपुष्पफलादिभिः॥ पश्चात्प्रदोषसमये स्थावरं लिं
गमर्चयेत्॥ स्वयंभू स्थापितं चापि पौरुषेयमपौरुषं॥ जने वातिजने वापि अरण्ये वा तपोवने
॥ ग्रामाद्बहिः स्थितं लिंगं ग्रामाच्छतगुणं स्मृतं॥ बाह्याच्छतगुणं पुण्यं आरण्यस्य च पूजने॥ व
नाच्छतगुणं प्रोक्तं लिंगं वै पर्वतस्थितं॥ पर्वताच्चायुतं पुण्यं तपोवनसमाश्रितं॥ कामदादिसंस्थि
तं लिंगं पूजितं स्यादनंतकं॥ एवं विशेषलिंगानां तीर्थानां निपुणैर्नरैः॥ ज्ञात्वा च शिवपूजायां वि
धिवत्तं प्रपूजयेत्॥ कूपवापीतडागादि देवखातनदीषु च॥ क्रमाच्छतगुणं प्रोक्तं गंगायां स्याद
नंतकं॥ पंचपिंडाननुद्धृत्य न स्नायात्परवारिणि॥ ततः प्रदोषसमये स्नात्वा मौनं समाचरेत्॥
॥ प्रदीपानां सहस्रेण दीपनीयः सदा शिवः॥ शतेनाप्यथवा देयं द्वात्रिंशद्दीपमालया॥ घृतेन राम
दीपयेद्दीपान् शिवस्य परितुष्टये॥ तथा फलैश्च धूपैश्च नैवेद्यैर्विविधैरपि॥ उपचारैः षोडश २६५
भिर्लिंगरूपिसदाशिवं॥ पूजयेत् प्रदोषसमये नरः सर्वार्थसिद्धये॥ नाम्नां शतेन रुद्रोऽसौ स्तोतव्य

वस्तुनिप्रियः॥ नमो रुद्राय भीमाय नीलकंठाय वेधसे॥ कपर्दिने सुरेशाय व्योमकेशाय वै नमः
॥ वृषभध्वजाय सोमाय सोमनाथाय वै नमः॥ दिगंबराय भर्गाय उमाकांतकपर्दिने॥ तपो
मयाय व्याप्ताय शिपिविष्टाय वै नमः॥ व्यालप्रियाय व्यालाय व्यालानां पतये नमः॥ महीधरा
य व्याघ्राय पशूनां पतये नमः॥ त्रिपुरांतकाय सिंहाय शार्दूलायर्षभाय च॥ मितायमित
नाथाय सिद्धाय परमेष्ठिने॥ कामांतकाय कामाय बुद्धिनां पतये नमः॥ कलाय कलपविशिष्टाय शि
ष्टाय परमात्मने॥ वेदवीताय गुप्ताय वेदगुह्याय वै नमः॥ दीर्घाय दीर्घरूपाय दीर्घार्थाय महा
य च॥ नमो जगत्प्रतिष्ठाय व्योमरूपाय वै नमः॥ गर्वकृत्सु महादेव सन्त्रिधकारे सुमेदिने॥ नी
ललोहितशुक्लाय चंडमुंडप्रियाय च॥ भक्तिप्रियाय देवाय ज्ञाताज्ञाताव्ययाय च॥ महेशाय न
मस्तुभ्यं महादेवहराय च॥ त्रिनेत्राय त्रिवेदाय वेदांगाय नमो नमः॥ अर्थाय अर्थरूपाय परमार्था
य वै नमः॥ विश्वरूपाय विश्वाय विश्वनाथाय वै नमः॥ शंकराय च कालाय कालावयवरूपि

व्र.ता० २९९

णे॥ अरूपायविश्वरूपायसूक्ष्मस्थूलस्वरूपायवैनमः॥ श्मशानवासिनेतुभ्यंनमस्तेकृत्तिवाससे॥ श
शांकशेखरायैवरुद्रमिश्रियायच॥ दुर्गायदुर्गपारायदुर्गावियवसाक्षिणे॥ लिंगरूपायलिं
गायलिंगानांपतयेनमः॥ नमःप्रनावरूपायप्रनावार्थायवैनमः॥ नमोनमःकारणकारणाय
तेमृत्युंजयायात्मभवस्वरूपिणे॥ त्रियंबककायामितकंवगर्नगौरीपतेमंगलहेतवेनमः॥॥
बृहस्पतिरुवाच॥॥ नाम्नांशतंमहेशस्यउच्चार्यव्रतिनानरः॥ प्रदक्षिणनमस्कारैस्तंसंरभेःप्रयल
तः॥ कार्यंप्रदोषसमयेतुष्ट्यर्थंशंकरस्यच॥ एवंव्रतंसमारिष्टंतवशाक्रमहामते॥ शीघ्रंकुरुमहाभा
गयश्चायुष्यंकुलमप्नो॥ शंनोःप्रनावात्सर्वतेनविघ्नशिर्याहिकं॥ ॥शक्रउवाच॥ ॥हत्रःकदामहे
शानंसमाराधयत्सुरात्॥ कथंचसवरःप्राप्तःपुराकश्चात्रवद्द्विज॥ ॥गुरुरुवाच॥ ॥वत्रोत्यारंमहा
तेजास्तपस्वीतपसापुरा॥ शिवंप्रसादयामासपर्वतेगंधमादने॥ नाम्नाचित्ररथोराजावनंचित्ररथ
स्यतत्॥ एतस्मिन्निहितोरंगस्त्वपुर्वासिमंततः॥ यस्मिन्वनेमहानागावसंतिमहदुर्मयः॥ तस्मात्वै

राम २९९

DR BHAU DAJI

त्ररथंनामवहंतंपरमंगलं॥ तस्मराज्ञःशिवेनैवपानंचपरमाद्भुतं॥ कामगंकीकिणीयुक्तंसिद्ध
चारणसेवितं॥ गंधर्वैरप्सरोयक्षैःकिन्नरैरूपशोभितैः॥ ततस्तेनैवयानेनइष्टेवीपर्यटसु
र॥ तथागिरसन्सम्मुद्रांश्चविविधांश्चविविधांतथा॥ एकदापर्यटन्राजानाम्नाचित्ररथोमहान्
॥ कैलासमागतस्तत्रददर्शपरमाद्भुतं॥ तथासन्नांमहेशस्यगणैश्चैवविराजितां॥ अर्धांगलग्नया
देव्याशोभितंचमहेश्वरं॥ निरीक्ष्यहेव्याससहितंसदागिरिशंमायान्वितंवाक्यमिदंबभाषे॥ वयं
चशांनोविषयान्विताश्चमत्सरदयस्त्रिजिताश्चापिचात्मा॥ नलोकमध्येवयमेववाताल्लोके
वनेलज्जयानैवकुर्मः॥ एवंवाक्यंमहेशस्तुनिशम्यप्रहसन्निव॥ उवाचन्यायसंयुक्तंसर्वेषा
मपिश्रुण्वतां॥ नयलोकापवादोत्रसर्वेषामपिस्नानात्मथा॥ नहितंकस्यनकर्मेसर्वेषाम
पिदुर्जयं॥ लोकातितंचमेवृत्तंतथापुपहस्यस्वमे॥ तताश्चित्ररथंदेवीगिरिजावाक्यमब्रवी
त्॥ रेदुरात्मन्कथंत्वयाशंकरश्चोपहासितः॥ सवासहैवमंदात्मन्स्वस्मेसेकर्मणःफलं॥ साधू

व्रता० २६१

नांसमचितानां मेषतापं करोति यः॥ देवो वाप्यथवा मर्त्यः सवित्ते योधमाधमः॥ एते मुनीन्द्राश्च म
हानुभावास्तपसा स्वयमी ऋषयो वेदगर्भ्भाः॥ तथैव सर्वे सनकादयो ह्यमी प्रज्ञाननाशाः
शिवस्तुवंयंते॥ रे मूढ सर्वे भुजने घेन्तितः॥ त्वमेक एवासि परो न कश्च॥ तस्मादति त्वंच
महत्कृतत्वां सखि रूपेनैव कुपाहिं यथैव॥ अस्मासत विमानगत्वरे सोऽहत्वासुदुर्मते॥ एवं श
प्तस्तथा रे माजन्म वानराजसत्तमः॥ रजाविचित्ररथः सद्यः पातस्तदादिव॥ आसुरियो ति मास
द्यवक्त्रो नाम्ना नवनंदा॥ तपसां परमेणैव त्वष्ठासंयोजितः क्रमात॥ तपसा ब्रह्मचर्येण शंभोरा
राधनेन च॥ व्रतेनानेन तच्चबति जितेतुशासोन केनचित॥ आसुरेण हि नावेन गणत्वं च वक्रे व्रतंपरं॥
तेन त्विंद्रेण चैवासौ पश्चाज्ज्ञेयो नविष्यति॥ तस्मात्त्वमपि देवेंद्र कृत्वा चेदं व्रतं शुभं॥ हविष्य राम
सि महाबाहो व्रतं नास्य तु संशयः॥ गुरोस्तद्वचनं श्रुत्वा गर्वाचापस्तु क्रतुः॥ सोद्यापनविधिं २६१
ब्रूहि प्रदोषस्य च मे धन॥ गुरुरुवाच॥ कार्तिके मासि संप्राप्ते मंदवारे त्रयोदशी॥ संपूर्ण

तु त्वे पासा समग्रव्रतसिद्धये॥ स्वयं तो रजसः कार्यः दृष्टेतस्य सुपीवकं॥ तस्योपरि न्यसेद् देवं उमाक्रांतं
त्रिलोचनं॥ पंचवक्त्रं दशभुजं सर्वांगे गिरिजासति॥ सौवर्णप्रतिमां कृत्वा ताम्रकुंभेनजन्यावृते॥ पंच
रत्नफलोपेतं पंचपल्लवचर्चितं॥ चंदनेन सुगंधेन मिश्रितेशोणितेन तथा॥ रूप्यपात्रं ततः कृत्वा कुं
भस्योपरि विन्यसेत॥ अशक्तो मन्मयेकुंभे नेवं शपात्र मथापि वा॥ पर्णैशरणवं चास्थाप्यासो वर्णप्रति
मां तथा॥ शक्त्या कृतां परिस्थाप्य वस्त्रमाल्य विनूषणैः॥ पूजयित्वा विधानेन रात्रौ जागरणं चरेत॥ पु
ष्पमंडपिकामध्ये कृत्वा श्रद्धासमन्वितः॥ आवाहयेत्ततयमंमंत्रेणानेनसुव्रत॥ एह्येहि त्वंसुमा
क्रांत सुखस्पर्श निर्मल॥ उपविश्य मजे देवेश सर्वशांतिप्रदो भव॥ आसनं॥ संपाद्यं ते मया दत्तं गं
धपुष्पसमन्वितं॥ गृहाण देववदेवेश प्रसन्नो वरदो भव॥ पाद्यं॥ ताम्रपात्रस्थितं तोयं फलगंधादि
संयुतं॥ अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः॥ अर्घ्यं॥ शीतलं निर्मलं तोयं कर्पूरेण सुवासितं
॥ आचमतां सुरश्रेष्ठ मया दत्तं हि भक्तितः॥ आचमनं॥ पंचामृतेन स्नपनं स्नानं देवं तु कारयेत॥ गोक्षिरंदे

व्रता० २९८ देवदेवेशगोक्षीरेण मया कृतं॥ स्नपनं देवदेवेश गृहाण परमेश्वर॥ दुग्धं॥ दध्ना चैव महादेव स्नपनं
क्रियते तव॥ गृहाण त्वं मया दत्तं मे सुप्रसन्नो भवाव्यय॥ दधि॥ सर्पिषा देवदेवेश स्नपनं क्रिय
ते मया॥ उमाकांत गृहाणेदं श्रद्धया सुरसत्तम॥ घृतं॥ इदं मधु मया दत्तं तव पुष्ट्यर्थमेव च चे
त॥ गृहाण शंभो मे न क्षाम मम शांतिप्रदो भव॥ मधु॥ सितया देवदेवेश स्नपनं क्रियते मया॥
गृहाण श्रद्धया दत्तं सुप्रसन्नो भव प्रभो॥ कावेरी नर्मदा वेणी तुंगभद्रा सरस्वती॥ गंगा च
यमुना चैव ताभ्यः स्नानार्थमाहृतं॥ गृहाण त्वमुमाकांत स्नानाय श्रद्धया जलं॥ स्नानं॥ एतद्वा
सो मया दत्तं सोत्तरीयं सुशोभनं॥ गृहाण त्वं सुरश्रेष्ठ मम चायुः प्रदो भव॥ वस्त्रं॥ यज्ञोपवीतं सौव
र्णं मया दत्तं च शंकर॥ गृहाण परया तुष्ट्या तुष्टिं ते कुरु सर्वतः॥ उपवीतं॥ सुगंधं चंदनं देव मया राम
दत्तं तव प्रभो॥ भक्त्या परमया शंभो सुगंधं कुरु मे भव॥ चंदनं॥ मालती चंपकादीनि कुसुमानि सुम २९८
नानि च॥ बिल्वपत्राणि पूजार्थं स्वीकुरुष्व उमापते॥ पुष्पं॥ धूपं विशिष्टं परमं सर्वौषधिविजृंभितं॥

गृहाण परमेशान मम शांत्यर्थमेव च॥ धूपं॥ दीपं च परमं शंभो घृतप्रज्वलितं मया॥ दत्तं गृहाण देवे
श मम ज्ञानप्रदो भव॥ दीपं॥ दीपावलिं मया दत्तां गृहाण परमेश्वर॥ आरात्रिकाप्रदानेन मम
तेजः प्रदो भव॥ नैवेद्यं विविधं दत्तं भक्त्या मे प्रतिगृह्यतां॥ नैवेद्यं॥ कर्पूरेलालवंगादि पूगीफल
समन्वितं॥ तांबूलं कल्पितं भक्त्या गृहाण गिरिजाप्रियं॥ तांबूलं॥ इदं फलं मया दत्तमिति फलं॥
हिरण्यगर्भगर्भस्थमिति दक्षिणा॥ निपत्य दंडवद्भूमौ प्रणम्य च पुनः पुनः॥ क्षमापयित्वा देवेशं रा
त्रौ जागरणं चरेत्॥ गीतवादित्रनृत्याद्यैर्गृहं च तालयेत्॥ वितानमंडपं कृत्वा नानावर्णैः समन्वितं॥
प्रभातायां तु शर्वर्यां मुदिते रविमंडले॥ स्नात्वा पुनः समभ्यर्च्य तु कुर्यात्सायेसेन च॥ आचार्यं
च सपत्नीकं वस्त्रालंकारचंदनैः॥ तोषयित्वा प्रभु विदानं गां च दद्यात्तपस्विने॥ ब्राह्मणान् भोजये
त्सम्यग्दक्षिणाभिः प्रतोषयेत्॥ दीनानाथांश्च संतर्प्य अच्छिद्रं वाचयेत्ततः॥ लब्ध्वानुज्ञां ब्राह्मणेभ्यो बं
धुभिः सहितः शुचिः॥ हृदि स्मरन् शिवं भक्त्या भुंजीत नियतो व्रती॥ अनेनैव विधानेन कुर्याद्द्यापनं बु

व्रता० धः॥ एवं यः कुरुते नूनं प्रदोषव्रतमुत्तमं॥ शनिवारेण संयुक्तं सोद्यापनविधिं नरः॥ आयुरारोग्य
२६९ मैश्वर्यं पुत्रपौत्रमनंतकं॥ शत्रून्जयते नित्यं प्रसादाच्छंकरस्य च॥ तस्मात्त्वमपि देवेंद्र रज
यस्व सदाशिवं॥ शनिप्रदोषविधिना ध्रुवं शत्रून्विजेष्यसि॥ एवं निशम्य गुरुणा कथितं तदानीं
इंद्रो दयेन विधिना गिरिशं प्रपूज्य॥ लोकं प्रसन्नमिव देवपतिः प्रबंधं तत्तत्कृणादगमयत्क्षणमी
शानुदृष्ट्या॥ ॥इति स्कांदे द्वारखंडे शनिप्रदोषव्रतं॥ ॥स्कांदे॥ ॥व्यास उवाच॥ ॥त्रयोदश्यां तथा रा
त्रौ सोपहारं त्रिलोचनं॥ दृष्ट्वा प्रथमे यामे मुच्यते सर्वपातकैः॥ ॥मदनरत्ने स्कांदे॥ ॥देव्युवाच॥
देव केन विधानेन प्रदोषव्रतमुत्तमं॥ विधातव्यं नरैः स्त्रीभिः संतानफलसिद्धये॥ ॥ईश्वर उवा
च॥ ॥यदा त्रयोदशी शुक्ला मंदवारेण संयुता॥ आरब्धव्यं व्रतं तत्र संतानफलसिद्धये॥ कृष्णे नि राम
मंचिनाय तु सोमवारेण संयुतां॥ सौभाग्यस्त्री समध्यर्थं शुक्रवारेण संयुता॥ एकवस्त्रः प्र २६९
यतिः प्रतिपक्षे त्रयोदशी॥ प्रदोषे शिवमभ्यर्च्य नक्तं भोक्ता समिशंकरं॥ भवाय नमः॥ रुद्राय नमः॥

नीलकंठाय नमः॥ शशिमौलिने० उग्राय० भीमाय० ईशानाय०। भवाद्यैः षोडशोपचारपूजा मंत्रद
क्षिणानमस्कारांश्च प्रकुर्यात्॥ यथा भवान्समस्तानां पश्यतां पापनाशकः॥ तथा व्रतेन संतुष्टः पु
त्रदे हि सुलक्षणं॥ ऋणरोगदारिद्र्यं पापक्षुदपमृत्यवः॥ भयक्रोधमनस्तापा नश्यंतु मम सर्वदा॥
॥निवेद्य कर्मजातं तु दद्याद्वित्तानुसारतः॥ दक्षिणां ब्राह्मणेभ्यश्च ततो मौनं विसर्जयेत्॥ एवं संवत्सरं कु
र्यात्त्रयोदश्यामिदं व्रतं॥ इदमपि स्कांदोक्तमेव॥ ॥अथानंगत्रयोदशीव्रतं॥ श्रीकृष्ण उवाच॥ शृ
णु पार्थ व्रतं श्रेष्ठं नाम्नानंगत्रयोदशी॥ यच्छिवाय पुरा प्रोक्ता प्रसन्नेनेंदुमौलिना॥ ॥गौर्युवाच॥ ॥
परासौभाग्यकरणी ख्यातानंगत्रयोदशी॥ तस्यां व्रतं महादेव ममापि कथय प्रभो॥ कस्मिन्मासे प्र
कर्तव्यं संग्रहणं च कथं भवेत्॥ प्ररूपाणि कानि नामानि विधिना॥ प्ररूपाणि कानि नामानि विधिना केन वै प्र
भुः॥ दुर्भगानां च नारीणां सौभाग्यकरणं परं॥ वंध्यानां पुत्रजननं धनधान्यविवर्धनं॥ एतद्वद महादेव
प्रसादाद्वक्तुमर्हसि॥ ॥ईश्वर उवाच॥ ॥कथयामि न संदेहो महापुण्यं महाफलं॥ चीर्णं तु येन देवे

व्रता० शिसर्वसंपद्यते सुखं॥ नारीणां च नराणां चैव विधातव्यं प्रयत्नतः॥ हेमंते हि ऋतौ प्राप्ते मासि मार्गशि
२७० रे मुने॥ शुक्लपक्षे त्रयोदश्यामुपवासं तु कारयेत्॥ मल्लिका दंतधावनं॥ शंखवर्मणे चरणौ तु॥ ना
रंगेणार्घदानं च नैवेद्यो फेणिकास्तथा॥ गंधैः पुष्पैस्तथा धूपैः सर्चयेद्व यथाविधि॥ अरुते श्र
फले श्वेव वणकाग्ररुदयस्थितं॥ सम्यक् जितेंद्रियो भूत्वा अनंगं हृदि कल्पयेत्॥ पश्चात्प्रदक्षि
णी कृत्वा अर्घं चैव निवेदयेत्॥ नमस्कुर्यादनंगं च मंत्रेणानेन मालिनी॥ नमो स्तु ते गदेवा
य सर्वसत्त्व निवासितं॥ रूद्रूपत्वायनिश्वाय हृत्स्थाय परमेष्ठिने॥ स्वर्गे चैव तु पाताले मर्त्यलो
के तथैव च॥ सर्वव्यापी त्वं नगत्वं गृहाणार्घं नमोस्तु ते॥ इत्यर्घः॥ शजपेत्स्व स्थचित्तेन मधुचप्रा
शयेन्निशि॥ रंभानु सोत्सवेन्नारी सौभाग्यमतुलं भवेत्॥ नश्यंति सर्वपापानि अन्यजन्मकृता राम
नि च॥ लावण्यमतुलं चैव रूपैश्वर्यसमन्वितं॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः॥ पौष २७०
स्येन्तु वै मासस्योदुंबरं दंतधावनं॥ जातिपुष्पैः पूजनं स्याद्दाडिमेनार्घमेव च॥ अशोकवर्तिका

नि गंध्या नैवेद्यं च प्रकल्पयेत्॥ पौषे पूजये देवं भगनाद्येश्वरप्रिये॥ ॐ नमो नाद्येश्वराय ईश्वराय न
मो नमः॥ नमस्ते भुवनेशाय गृहाणार्घं नमोस्तु ते॥ इत्यर्घः॥ व्रतस्थ स्वस्थचित्तेन चंदनं प्राशयेन्निशि॥ स
र्वपापविशुद्धात्मा सौभाग्यविपुलं भवेत्॥ माघस्येव तु मासस्य विष्णुक्रांता दंतधावनं॥ कुंदपुष्पैः
समभ्यर्च्य सर्वपेह्नी जप्तर कैः॥ नैवेद्यं शार्करं दद्याद्देवो योगेश्वरस्तथा॥ ॐ नमो योगेश्वराय योग जंबु
निवासिने॥ गृहाणार्घं मया दत्तं योगेश्वर नमोस्तु ते॥ इत्यर्घः॥ मौक्तिकं प्राशये द्रात्रौ वाजपेय फलं ल
भेत्॥ सर्वाभिप्राय सिध्यर्थं वीरेशं नाम पूजयेत्॥ वीरेश्वर वीर नन्दन उमाकांत सुरेश्वर॥ हिमम
ध्यनिवासि त्वं गृहाणार्घं महेश्वर॥ सीतां तु सोत्सवेन्नारी कंकोलं प्राशयेन्निशि॥ चैत्रस्येव तु मा
सस्य नवमाली दंतधावनं॥ मदनेनार्चयेद्देवं पाद्यार्घं च प्रकल्पयेत्॥ नैवेद्यं खर्जूरकं दद्यात् वि
श्वरूपं प्रपूजयेत्॥ नमस्ते विश्वरूपाय सुरूपाय महात्मने॥ गृहाणार्घं मया दत्तं विश्वरूप नमोस्तु
ते॥ उमां तु सोत्सवेन्नारी कर्पूरं प्राशयेन्निशि॥ वैशाखस्य तु मासस्य पामार्गं दंतधावनं॥ पूजा च मल्लिका

व्रता० २७१

पुष्पैरुत्पलसार्घं तु दापयेत्॥ नैवेद्यं वटकं दद्यात् महारूपं तु पूजयेत्॥ ॐ नमस्ते महारूपाय सर्व
विज्ञानरूपिणे॥ गृहाणार्घ्यं मया दत्तं महारूप नमोस्तु ते॥ ततः शुद्धमना नत्वा जातीफलं प्राशा
येन्निशि॥ अश्वमेधस्य यज्ञस्य फलमष्टगुणं भवेत्॥ ज्येष्ठस्यैव तु मासस्य सहदेवी दंतधावनं॥ पू
जा बकुलपुष्पैस्तु श्रीफलेनार्घकल्पना॥ नैवेद्यं मंडकान्दद्यात् लवंगं प्राशयेन्निशि॥ प्रद्यु
म्नं पूजयेद्देवं सर्वपापप्रणाशनं॥ नमस्ते पशुपतये प्रद्युम्न भुवनेश्वर॥ गृहाणार्घ्यं मया दत्तं प्रद्युम्न
परमेश्वर॥ सुवर्णशतदानस्य फलमष्टगुणं भवेत्॥ आषाढस्य तु मासस्य नारंगी दंतधावनं॥
कदंबैः पूजयेद्देवं नालिकेरार्घकल्पना॥ नैवेद्ये दधिभक्तं चोमापतिं प्रपूजयेत्॥ प्राशयेन्निज
बीजानि निशि स्वस्थेन चेतसा॥ उमापते महाबाहो कामदहनाय ते नमः॥ गृहाणार्घं चंद्रमौले उमाकां
त नमोस्तु ते॥ वाजपेयस्य यज्ञस्य फलमाप्नोति मानवः॥ श्रावणस्य तु मासस्य जातिनिंबं दंतधावनं॥ पू
जयेत्स्वपुष्पैश्च जंबुकैरर्घकल्पना॥ नैवेद्यं क्षीरसं दद्यात् शूलपाणिं तु पूजयेत्॥ प्राशयेद्धतौ

राम २७१

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

यं तु रात्रौ चैव समाहितः॥ ॐ नमः शक्तिधराय भक्तिभावनपूजिने॥ गृहाणार्घ्यं मया दत्तं शूलपाणे
नमोस्तु ते॥ सौत्रामण्याख्ययज्ञस्य फलमष्टगुणं भवेत्॥ भाद्रस्य वरमासस्य अंकोलं दंतधावनं॥ अ
र्चयेच्चंपकैः पुष्पैः नैवेद्ये घृतपूरिकां॥ अर्घे पूगफलं दद्यात् सद्योजातं तु पूजयेत्॥ ततः स्वस्थमना
नत्वा अगुरुं प्राशयेन्निशि॥ त्रिदशेश्वरायदेवाय सद्योजाताय ते नमः॥ गृहाणार्घ्यं मया दत्तं स
द्योजात नमोस्तु ते॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः॥ आश्विनस्य तु मासस्य कंकती
दंतधावनं॥ अर्चयेत्करवीरैस्तु अर्घे कर्कटिकाफलं॥ पूजयेत्त्रिदशाधिपो देवो नैवेद्ये शुष्कमं
डिका॥ प्राशयेत्कनकं तोयं निशि देवं प्रपूजयेत्॥ ॐ त्रिदशाधिपदेवेश उमाकांत महेश्वर॥ त्रिधा
रूपमयस्त्वं हि अर्घेमि प्रतिगृह्यतां॥ चातुर्मास्यस्य यज्ञस्य फलं दशगुणं भवेत्॥ कार्तिकस्य तु मासस्य
करंबदंतधावनं॥ रक्तोत्पलैः पूजनं च कूष्मांडार्घं प्रदापयेत्॥ नैवेद्यं खरिकां दद्यात् पूजयेज्जगदीश्वरं॥
प्राशयेन्मदनफलं निशि चैव समाहितः॥ नमस्ते जगदीशाय पतापीने शूलपाणये॥ गृहाणार्घ्यं महेशा

व्रता० शानजगदीशानमोस्तुते॥ अर्घमंत्रः॥ रजांते जागरं कुर्यात् गीतवाद्यमहोत्सवैः॥ अर्द्धना
२७२ रीश्वरं कुर्यात्सौवर्णं रौप्यमेव वा॥ वस्त्रयुग्मेन संवेष्ट्य शय्यायां विनिवेदयेत्॥ एवं कृत्वा तु
देवेशं तत्र शोभां तु कारयेत्॥ श्वेतपुष्पैस्तु संछन्नं श्वेतचंदनचर्चितं॥ धूपं सुगंधिसंमिश्रं प्र
सवस्रांगं प्रदापयेत्॥ श्वेतवस्त्रपरिधानं घंटाभरणभूषितं॥ सूक्ष्मसूक्ष्मवस्त्रयुग्मं आचार्या
य निवेदयेत्॥ तथैव दक्षिणां दद्यात् आसनं चैव पादुके॥ छत्रं च मुद्रिके चैव कंकणं चैव भूष
णं॥ खड्गादि च प्रदेयात्तु ताम्रपात्रादनसंयुतं॥ गृहोपस्करसंयुक्तां भक्तिसंयुक्तचेतसा॥ तत्रो
पवेश्य चाचार्यमुपवासव्रती ततः॥ पादौ मर्द्दिसमारोप्य प्रांजलिः पत्नीवचो वदेत्॥ भगवंस्त्वत्प्रसा
देन व्रतं संपूर्णतां मम॥ एवमस्त्विति संब्रूयात्तत्र तुष्टोस्तु शंकरः॥ इत्यर्घवाक्यं॥ ॥एवं कृ राम
त्वा प्रयत्नेन दंपती चैव भोजयेत्॥ तयोश्च भोजनं दद्यात् दंपत्योः परितोषयेत्॥ अनेन विधि २७२
नायुक्ताः स्पृहंयुक्तस्त्वंयानघे॥ ते मोदंतं च यत्किंचिद्दक्ष्यं नात्र संशयः॥ आचार्यमग्रतः कृत्वा

तस्माद्देशांतु कारयेत्॥ त्वयाचार्यसमं तीर्थं न त्वाचार्यसमं तपः॥ तस्मात्तं कायमात्मा य धर्म
सिद्धिनमे कृतं॥ तेनैवाचार्यदानेन सर्वं भवति चाक्षयं॥ एतद्भूतोत्तमं श्रेष्ठं इष्टु त्याज्यं तु त्यजेत परं
॥ राज्यमर्थांस्तु ताः सिद्धिमवैध यं च यच्छति॥ रूपं धनं धान्यमायुरारोग्यं च प्रदापयेत्॥ इष्टका
मं च सौभाग्यं वर्धये पुत्रगतने॥ त्रयोदशीव्रता नास्ति सौभाग्यकरणं परं॥ ॥इति भविष्ये अनं
त्रयोदशीव्रतं॥ ॥इति श्रीभट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के त्रयोदशीव्रतानि॥ ॥
अथ चतुर्दशीव्रतानि॥ ॥तत्रे वैशाखशुक्लचतुर्दश्यां नृसिंहचतुर्दशीव्रतं॥ तच्च प्रदोषव्यापि
न्या कार्यं तदुक्तं हेमाद्रौ नृसिंहपुराणे॥ वैशाखे शुक्लपक्षे च चतुर्दश्यां निशामुखे॥ मज्जन्मसंभ
वं पुण्यं व्रतं पापप्रणाशनं॥ वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारणं॥ मिति स्कांदे पि वैशाखस्य चतुर्द
श्यां सोमवासरे निर्दिष्टं इति॥ अवतारो नृसिंहस्य प्रदोषसमये द्विजाः इति॥ अन्य भद्रस्वाति॥ दि
न द्वये तत्प्राप्तावप्राप्तौ वैकदेशसमव्याप्तौ परा॥ अनंगेन समायुक्ता न सोपोष्या चतुर्दशी॥ घ

व्र०ता०
२३३

नापापैर्वियुज्येत तस्मात्तां परिवर्जयेदिति तत्रैव निषेधात्॥ इदं च व्रतसंयोगपृथक्त्वन्यायेन नित्यं का
म्यं च॥ स्कांदे॥ विज्ञाय मद्दिनं यस्तु लंघयेत्तापकृत्॥ स याति नरकं घोरं यावच्चंद्रदिवाक
रौ मत्संतुष्टिकारणमिति फलश्रवणाच्च॥ ॥अथ कथा॥ ॥सूत उवाच॥ ॥हिरण्यकशिपुं हत्
वा देवदेवं जगद्गुरुं॥ सुखासीनं ततस्तुंगे लुंतकोपरमापतिं॥ प्रह्लादो ज्ञानिनां श्रेष्ठो पालय
नराजमुत्तमं॥ एकाकी च ततस्त्वं गे प्रियं वचनमब्रवीत्॥ ॥प्रह्लाद उवाच॥ ॥नमस्ते भगवा
न्विष्णो नृसिंहस्वरूपिणे नमः॥ त्वद्भक्तोऽहं सुरेशो कं त्वां पृच्छामि तु तत्त्वतः॥ स्वामिंस्त्वयि मे
यास्ति लात्तक्तिर्जाता त्वनेकधा॥ कथं च ते प्रियो जातः कारणं वद मे प्रभो॥ श्रीनृसिंह उवाच॥ क
थयामि महाप्राज्ञ शृणुष्वैकाग्रमानसः॥ भक्तेर्यत्कारणं वत्स प्रियत्वस्य च कारणं॥ पुराका
ले समभूद्विप्रः किंचिन्नाप्यधीतवान्॥ नध्यात्व वासुदेवो हि वेश्यासंसक्तमानसः॥ तस्मिन्जातु
न चैव त्वं चकार क्षत कियत्॥ युक्तानुमव्रतं चैकं वेश्यासंगतिलालसः॥ मद्व्रतस्य प्रभावे

राम
२३३

न भक्तिर्जाता तवानघ॥ प्रह्लाद उवाच॥ श्रीनृसिंहोच्यतां तावत् कस्य पुत्रस्य किं व्रतं॥ वेश्यायां
वर्तमानेन कथं तच्च कृतं मया॥ येन त्वद्भिस्तुमहात्म्यं वक्तुमर्हसि सांप्रतं॥ ॥नृसिंह उवाच॥ ॥पुरावंती
पुरेऽभ्यासीत्ब्राह्मणो वेदपारगः॥ तस्य नाम सुशर्मेति त्रिषु लोकेषु विश्रुतं॥ नित्यहोमं क्रियां चै
वविदधाति द्विजोत्तमः॥ श्रौतक्रियासु नियतं सर्वासु किल तत्परः॥ अग्निष्टोमादिभिर्यज्ञैरिष्टास
र्वे सुरोत्तमाः॥ तस्य भार्या सुशीलाख्या विख्याता भुवनत्रये॥ पतिव्रता सदाचारा पतिव्रतपरायणा॥ ज
ज्ञिरे स्यां सुताः पंच तस्माद्द्विजवरात्तथा॥ सदाचाराः सुविद्वांसः पितृभक्तिपरायणाः॥ तेषां मध्ये कनिष्ठ
स्त्वं वेश्यासंगतितत्परः॥ तथापि विद्यमानेन सुराणां तं स्तु पातकं॥ सुवर्णचापपहृतं चौरैः सार्धं त्व
याबहु॥ विलासिन्या युतां तैश्च समाचीर्णमघं बहु॥ विलासिनी वेश्या एकदा तत्र कलहं हे मासीत्मत्प्र
कजित्त्वया सह॥ तेन कलहभावेन व्रतमेतत्त्वया कृतं॥ अज्ञानात्स कृतं चक्रे व्रतानामुत्तमं व्र
तं॥ तस्मा विहाय रयो गेनरात्रौ जागरणं कृतं॥ वेश्यायाश्च तत्र किं चित्तज्ञातं नत्त्वया समं॥ रात्रौ जा

व्रता० गरणं चीर्णं त्वयैकं न्योपमनेकधा ॥ व्रतेनानेन चीर्णेन तमोदंतिरिविदेवताः ॥ सृष्ट्यर्थं च पुरा ब्रह्म
२७४ चक्रे त्येतदनुत्तमं ॥ प्र व्रतस्य प्रभावेन निर्मितं स्वसचराचरं ॥ ईश्वरेऽत्तुरेण पुरा चीर्णं वधार्यं त्रिपुर
स्य च ॥ महाप्राज्ञेन विदितं व्रतमेतन्महाफलं ॥ एतद्व्रतप्रभावेन सर्वसिद्धिमुपागतः ॥ वेश्यापि पु
त्रिया जाता त्रैलोक्ये सुखकारिणी ॥ इदं रामव्रतं ——— त्रैलोक्येषु विश्रुतं ॥ कलहेन विलासी
न्या व्रतमेतदुपस्थितं ॥ प्रसादतेन तेन किंमेपि जानात्यनुत्तमा ॥ धात्रेयाच विलासिम्यां ज्ञात्वा व्र
तमिदं महत् ॥ कलहश्च कृतो येन तम व्रतं यत्कृतं भवेत् ॥ सावेश्या तु वरा जाता तु न्क्रान्तेगान्नेने
कशः ॥ मुक्ता कर्म विलीना तु त्वप्रसादविशास्वतं ॥ कार्यर्थिं च मवानास्ते मछरीरसधकतया
॥ विधाय सर्वकार्याणि श्रीघ्रं चैव गमिष्यसि ॥ ये इदं व्रतमाचरं प्रकरिष्यंति मानवाः ॥ तेषां राम
पुनरावृत्तिर्नास्ति कल्पकोटिशतैरपि ॥ अपुत्रो लभते पुत्रान् धनकामो धनं तथा ॥ ज्ञानिं च मम नक्त्यश्च २७४
दिव्यैर्मोनवेन्नतः ॥ स्त्रियो वा पुरुषो वापि कुर्वंति व्रतमुत्तमं ॥ ते सोऽदाम्यहं मोक्षं भुक्तिमुक्ति

समन्वितं ॥ बहुनोक्तेन किं वत्स व्रतस्य फलमुत्तमं ॥ प्रह्लादोवाच ॥ व्रतस्यास्य फलं साधु त्वयि
मे न क्ति वर्णनं ॥ स्वामिन् ज्ञातं विशेषेण त्वत्तः पापनिकृंतनं ॥ अधुना श्रोतुमिच्छामि व्रत
स्यास्य विधिपरं ॥ कस्मिन्मासे भवेदेतत्कस्मिश्च वा सरे प्रभो ॥ एतद्विस्तरतो देव वक्तुमर्हसि
सांप्रतं ॥ विधिनायेन वै स्वामिन्समग्रफलभुग्भवेत् ॥ ममोपरि कृपां कृत्वा ब्रूहि त्वं सकलं प्र
भो ॥ नरसिंह उवाच ॥ साधु साधु महाभाग व्रतस्यास्य विधिपरं ॥ सर्वं कथयतो मे यत्त्वमेकाग्रम
नाः शृणु ॥ वैशाखस्य शुक्लपक्षे तु चतुर्दश्यां समाचरेत् ॥ मज्जन्मसंभवं पुण्यं व्रतं यायप्रणाशनं ॥ वर्षे व
र्षे तु कर्तव्यं मम संतुष्टिकारकं ॥ महागुह्यमिदं श्रेष्ठं मानुषे भवभीरुभिः ॥ तैनैव क्रियमाणेन स
हस्रद्वादशीफलं ॥ ज्ञायते मत्सुखावसिं मानुषाणं महात्मनां ॥ स्वातिनक्षत्रयोगे तथा निवा
रेण संयुते ॥ सिद्धियोगस्य योगे च वणिजे करणे तथा ॥ पुंसां सौभाग्ययोगेन लभ्यते दैवयोग
तः ॥ सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनं ॥ एतदन्यतरे योगे तद्दिनं पापनाशनं ॥ केवलेऽपि च कर्त

व्रता० यंतद्दिने व्रतमुत्तमं॥ अन्यथा नरकं यांति यावच्चंद्रदिवाकरौ। पर्यायपरवृत्तिस्यात्तात कस्मिन्क
२३५ लौ युगे॥ तथा प्रणम्य पठ्यंति सर्वे धर्मानं संशयः॥ तद्व्रतस्य प्रभावेन मतिर्निस्यादुरात्मनां॥ वि
चार्यस्वं प्रकर्त्तव्यं माधवे मासि यद्व्रतं॥ नियमं च प्रकर्त्तव्यं दंतधावनपूर्वकं॥ श्रीनृसिंहम
होद्यद्यां कृत्वा ममोपरि॥ अद्याहं ते विधास्यामि व्रतं निर्विघ्नतां नय॥ इति नियममंत्रः॥
व्रतस्थेन न कर्त्तव्याः संगतिः पापभिः सह॥ मिथ्यालापो न कर्त्तव्यः समग्रफलकांक्षिभिः॥ स्त्रि
भिः दुष्टैश्च आलापो व्रतस्थो नैव कारयेत्॥ स्मर्त्तव्यं मे महारूपं तद्दिने सकलं शुभेः॥ ततो मध्या
ह्नवेलायां नद्यादौ विमले जले॥ गृहे वा देवखाते वा तडागे विमले शुभे॥ वैदिकेन च मंत्रेण स्ना
नं कृत्वा विचक्षणः॥ मृत्तिका गोमयेनैव तथा धात्रीफलेन च॥ तिलैश्च सर्वपापघ्नैः स्नानं कृत्वा राम
महात्मभिः॥ परिधाय शुचिर्वासौ नित्यं कर्म समाचरेत्॥ ततोऽपराह्ने समागत्य स्मरन्मां भक्तियो २३५
गतः॥ गोमयेन प्रलिप्याय कुर्यादष्टदलं शुभं॥ कलशं तत्र संस्थाप्य ताम्ररत्नसमन्वितं॥ तस्योपरि

सेत्पात्रं वंशजं व्रीहिपूरितं॥ हैमी तत्र च मन्मूर्त्तिः स्थाप्या लक्ष्म्यास्तथैव च॥ पलेन वा तदर्धेन तदर्धा
र्धेन वा पुनः॥ यथाशक्ति मया कार्या वित्तशाठ्यविवर्जितैः॥ पंचामृतेन संस्नाप्य पूजनं तु समा
चरेत्॥ ततो ब्राह्मणमाहूय तमाचार्यमलोलुपं॥ सदाचारसमायुक्तं शांतं दांतं जितेंद्रियं॥ तेनै
व कारयेत्पूजां दृष्ट्वा शास्त्रानुसारतः॥ आचार्यवचनाद्धीमान्पूजां कुर्याद्यथाविधि॥ मंडपं का
रयेत्तत्र पुष्पस्तबकशोभितं॥ ऋतुकालोद्भवैः पुष्पैः पूजयेद्यतमानसः॥ उपचारैः षोडशभिर्मंत्रे
र्वेदोद्भवैस्तथा॥ तत्रः पौराणिकैर्मंत्रैः पूजनीयो यथाविधि॥ चंदनं शीतलं दिव्यं चंदनकुंकुम
मिश्रितं॥ ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वरः॥ चंदनमंत्रः॥ कालोद्भवानि पुष्पाणि तुलस्यादी
नि वै प्रभो॥ पूजयामि नृसिंह त्वां लक्ष्मीसह नमोऽस्तु ते॥ पुष्पमंत्रः॥ कृष्णागरुमयं धूपं श्रीनृसिं
ह जगत्पते॥ तव तुष्ट्यै प्रदास्यामि सर्वदेव नमोऽस्तु ते॥ धूपमंत्रः॥ सर्वतेजोमयं तेजस्तस्माद्दीपं प्रदा
पयेत्॥ दीपमंत्रः॥ नैवेद्यं सौख्यदं चारु भक्ष्यभोज्यसमन्वितं॥ ददामि ते रमाकांत सर्वपापक्षयं कु

व्रता० २९६

रः॥ नैवेद्यं॥ पीतांबर महाबाहो प्रह्लादभयनाशन॥ यथान्नेनार्चनेनेन यथोक्तफलदो भव॥ इति
प्रार्थना॥ रात्रौ जागरणं कार्यं गीतवादित्रनर्तकैः॥ पुराणश्रवणं चैव श्रोतव्याश्च कथाः शु
भाः॥ ततः प्रभातसमये स्नानं कृत्वा जितेंद्रियः॥ पूर्वोक्तेन विधानेन पूजयेन्मां प्रयत्नतः॥ वैष्णवा
न्पूजयेन्मंत्रान्मदग्ने स्वस्थमानसः॥ ततो दानानि देयानि वित्तमानानि चानघ॥ पात्रेभ्यस्तु
द्विजेभ्यो हि सोपदर्पजिगीषया॥ सिंहः स्वर्णमयो देयो मम संतोषकारकः॥ गोभूतिलहिरण्यानि
देयानि च फलेप्सुभिः॥ शय्या सतूलिका देया सप्तधान्यसमन्विता॥ अन्यानि च यथाशक्त्या दे
यानि मम तुष्टये॥ वित्तशाठ्यं न कुर्वीत यथोक्तफलकांक्षया॥ ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो
दद्याच्च दक्षिणां॥ निर्धनेनापि कर्तव्यं देयं शक्त्यनुसारतः॥ सर्वेषामेव वर्णानामधिकारोस्ति मे व्र हेम
ते॥ मद्भक्तैस्तु विशेषेण कर्तव्यं मत्परायणैः॥ तदंशेनातिदुःखानि दोषश्च मत्प्रसादतः॥ तान्समुद्धरे २९६
वेश इत्थं भवसागरात्॥ पातकार्णवमग्नस्य व्याधिदुःखांबुवासिभिः॥ जीवैस्तु परिभूतस्य मो

हा दुःखगतस्य मे॥ करावलंबनं देहि शेषशायिन् जगत्पते॥ श्रीनृसिंह रमाकांत भक्तानां भयनाशन
॥ क्षीरांबुधिनिवास त्वं चक्रपाणे जनार्दन॥ व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव॥ इति प्रार्थना
मंत्रः॥ एवं प्रार्थ्य ततो देवं विसर्ज्य च यथाविधि॥ उपहारादिकं सर्वमाचार्याय निवेदयेत्॥ दक्षिणाभि
स्तु संतोष्य ब्राह्मणांस्तु विसर्जयेत्॥ मध्याह्ने तु समायुक्तो भुंजीत बंधुभिर्नरः॥ य इदं शृणुया
द्भक्त्या व्रतं पापप्रणाशनं॥ तस्य श्रवणमात्रेण ब्रह्महत्यां व्यपोहति॥ पवित्रं परमं गुह्यं कीर्तयेद्यस्तु
मानवः॥ सर्वान्कामानवाप्नोति व्रतस्यास्य फलं लभेत्॥ ॥इति हेमाद्रौ नृसिंहपुराणे नृसिंहचतुर्द
शीव्रतं॥ ॥अथ भाद्रपदशुक्लचतुर्दश्यामनंतव्रतं॥ तच्च त्रिमुहूर्तौदयव्यापिन्यां कार्यं॥ मुहूर्त्तम
प्येव द्वादशे पौर्णमास्यां चतुर्दशी॥ संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययं॥ तिथ्यो भाद्रपदस्यां
ते चतुर्दश्यां द्विजोत्तम॥ पौर्णमास्याः समायोगे व्रतं चानंतकं चरेदिति॥ स्कांदे भविष्योक्तेः॥ मुहूर्ते
ति त्रिमुहूर्त्तप्रशंसापरं॥ अत एव माधवः॥ उदये त्रिमुहूर्तापि ग्राह्यानंतव्रते तिथिरिति पद्यपि म

धाक्केनोद्भवे जायां समुत्तीर्य सरित्तटे॥ इत्यादिना विष्णोर्मध्याह्नः पूजाकालो नातिनत्यापि तत्र पू
जाविध्यभावान्न तद्याप्तिग्राह्येति॥ इतिहासरूपार्थवादादि धुयत्रयनात्माक् प्रसक्तविधितो
दयमापि मांतस्मांत्पूजाविधिनादिति॥ अस्मिन्व्रते पूजितचतुर्दशग्रंथि पुनर्दोरकबंधनप्रधा
न॥ संसारगह्वरगुहासु विहर्तुकामा वांछंति ये कुरुकुलोद्भवशुद्धसत्वाः संपूज्य त्रिभुवनेशमनंत
देवं बध्नंति दक्षिणकरे वरदोरकं ते॥ ॥इति तस्यैव फलसंबंधात्॥ ॥अथ व्रतविधिः॥ ॥मा
सपक्षाद्युल्लिख्य पापनिर्मुक्तपुत्रमसिद्धिपुत्रपौत्रेसितजोगधान्यपरमगतिप्राप्तये चतुर्दशव
र्षविद्ध्यनंतव्रतं करिष्य इति संकल्प्य सर्वतोभद्रमंडलं विधाय॥ तत्र मंडले देवता आवाह्य तद
पर्यंकं कलशं संस्थाप्य तत्र फणासप्तकमंडितं दर्भमयं तदग्रे चतुर्दशग्रंथिपुतदोरकमस राम
र्पितं पूजयिष्य इति संकल्प्य षोडशोपचारैः कलशोपरि पूजयेदित्याद्यप्रयोगे दिता यदोतु गृ २७७
हीतानंतव्रते पूजनं दोरकबंधनं च करिष्य इति संकल्पयेत्॥ ॥अथानंतपूजा॥ ॥मंडले सर्वतो

भद्रे हृत्वा कुंडं तुं विन्यसेत्॥ तत्र चाष्टदले पद्मे पूजयेद्विष्णुमव्ययं॥ कृत्वा दर्भमयं देवं फणा
सप्तकमंडितं॥ तस्याग्रतो दृढं सूत्रं कुंकुमाक्तं सुशोभनं॥ चतुर्दशाग्रंथियुतमुपस्थाप्य त्र पूज
येत्॥ ततस्तु मूलमंत्रेण नमस्कृत्य चतुर्भुजं॥ नवाम्रपल्लवाभासं पिंगभ्रूश्मश्रुलोचनं॥
पीतांबरधरं देवं शंखचक्रगदाधरं॥ प्रसन्नवदनं विष्णुं विश्वरूपं विचिंतयेत्॥ ध्यानं॥ आगच्छा
नंत देवेश तेजोराशे जगत्पते॥ क्रियमाणं मया पूजां गृहाण सुरसत्तम॥ सहस्रशीर्षेत्यावाह
नं॥ ततोंगेष्विदेवताः विष्णुरग्निस्तथा दिशः सहस्राक्षः पितामहः॥ रुद्रः पिनाकी विघ्नेशः स्कंदः
सोमस्तथैव च॥ वरुणः पवनः पृथ्वी वसवोंगधिदेवताः॥ नानारत्नसमायुक्तं कार्तस्वरविभूषितं॥ आ
सनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां॥ पुरुष एवेदमित्यासनं॥ गंगादिसर्वतीर्थेभ्यो मयाप्रार्थनयाहृतं॥
तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यतां॥ एतावानस्येति पाद्यं॥ अनंतानंत देवेश अनंतफल
दायक॥ अनंतानंतरूपोसि गृहाणार्घ्यं नमोस्तु ते॥ त्रिपादूर्ध्वमित्यर्घ्यं॥ कर्पूरवासितं तोयं मंदा

किन्नाः समाहृतं ॥ आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥ तस्मादिति आचमनं ॥ पंचामृतेन स्न
पनं करिष्ये सर्वसिद्धिदं ॥ कार्यमे सिद्धिमायातु पूजिते च पिधातरि ॥ पयो दधि घृतं चैव मक्षितं श
र्करं तथा ॥ पंचामृतेन स्नपनं गृहाण जगतः पते ॥ पंचामृतस्नानं ॥ गंगा च यमुना चैव नर्मदा च सर
स्वती ॥ तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमाहृतं ॥ तोयमेतत्सुखस्पर्शं स्नानीयं प्रतिगृह्य
तां ॥ तत्पुरुषेणेति स्नानं ॥ पीतांबरयुगं देव सर्वकामार्थसिद्धये ॥ मया निवेदितं भक्त्या गृहाण
सुरसत्तम ॥ तं यज्ञमिति वस्त्रं ॥ दामोदर नमस्तेस्तु त्राहि मां भवसागरात् ॥ ब्रह्मसूत्रं सोत्त
रीयं गृहाण पुरुषोत्तम ॥ तस्माद्यज्ञादिति यज्ञोपवीतं ॥ कस्तूरिकुंकुमोपेतं कर्पूरेणैव च
संयुतं ॥ गंधं दास्यामि देवेश अनंताय नमो नमः इति ॥ तस्माद्यज्ञात्सर्वहुत इति गंधं ॥ अक्ष सम
ताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभनाः ॥ वासुदेव जगन्नाथ श्रीमामे स्वीकुरु प्रभो ॥ अक्षताः ॥ २७८
माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो ॥ मयाहृतानि पुष्पाणि पूजार्थं स्वीकुरु प्रभो ॥ त

स्मादश्वा इति पुष्पं ॥ अथांगपूजा ॥ अनंताय नमः पादौ पूजयामि ॥ संकर्षणाय० गुल्फौ ॥ का
लात्मने० जानुनी ॥ विश्वरूपाय० जंघे ॥ विश्वनेत्राय० कटिं ॥ मधुसूदनाय० मेढ्रं ॥ पद्मनाभा
य० नाभिं ॥ परमात्मने० हृदयं ॥ श्रीकंठाय० कंठं ॥ सर्वास्त्रधारिणे० बाहू ॥ हरये० मुखं ॥ वाच
स्पतये० जिह्वां ॥ दामोदराय० दंतान् ॥ केशवाय० ललाटं ॥ कमलासनाय० शिरः ॥ सर्वात्मने०
सर्वांगं ॥ वनस्पतिरसो दिव्यो गंधाढ्यः सुमनोहरः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥
यत्पुरुषमिति धूपं ॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण देवेश त्रैलोक्यति
मिरापहं ॥ ब्राह्मणोस्येति दीपं ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं ॥ नानाभक्ष्यसमायुक्तं नै
वेद्यं प्रतिगृह्यतां ॥ नैवेद्यं गृह्यतां देव भक्तिमे ह्यचलां कुरु ॥ ईप्सितं मे वरं देहि परत्र च परां ग
तिं ॥ चंद्रमा मनस इति नैवेद्यं ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवे
ज्जन्मनि जन्मनि ॥ नाभ्या आसीदिति फलं ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं ॥ कर्पूरादि

व्रता० समायुक्तं तांबूलं प्रतिगृह्यतां॥ संसारपाशमिति तांबूलं॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः
२३९ ॥ पत्रेनयद्रमिति पुष्पांजलि प्रदक्षिणा॥ पंचवर्त्ति समायुक्तं सर्वमंगलदायकं॥ नीराजनं नी रि
क्षस्व अनंताय नमो नमः॥ इति नीराजनं॥ मालती मल्लिकापुष्पैर्नागचंपकसंयुतैः॥ पुष्पांजलि
गृहाणेमं पादांबुजयुगार्पितं॥ विष्णुमंत्रैः पुष्पांजलिः॥ अनंत कामान्मे देहि सर्वकामफल
प्रद॥ अनंताय नमस्तुभ्यं पुत्रपौत्रप्रवर्द्धय॥ अनंतः सर्वकामानामधिपः सर्वकामदः॥ व्रते
नानेन सुप्रीतो भवत्विह सदा मम॥ नमस्ते देव देवेश नमस्ते धरणीधर॥ नमस्ते कमलाकां
त नमस्ते ह्यमरप्रिय॥ नमस्ते सर्वभूतेश वासुदेव नमोस्तु ते॥ प्रार्थना॥ अनंताय नमस्तुभ्यं स
हस्रशीर्षिते नमो नमः॥ नमस्ते पद्मनाभाय नागाधिपतये नमः॥ संसारगह्वरगुहासु सुखं वि राम
हर्तुं वांछंति ये कुरुकुलोद्भव शुद्धसत्वाः॥ संपूजयंति भुवनेशमनंतदेवं बध्नंति दक्षिणक २३९
रे वरदोरकं ते॥ अनंतसंसारमहासमुद्रे मग्नं समभ्युद्धर वासुदेव॥ अनंतरूपे विनियोजय

स्व अनंतरूपाय नमो नमस्ते॥ दोरकबंधनमंत्रः॥ जीर्णदोरकं सर्वव्रतसंपूर्त्यै विसर्जयेत्॥ न्यूनाति
रिक्तानि परिस्फुटानि यानीह कर्माणि मया कृतानि॥ क्षमस्व चैतानि मम क्षमस्व प्रयाहि तुष्टिः पुनरागमा
य॥ इति विसर्जनं॥ दाता च विष्णुर्भगवाननंतः प्रतिगृहीता च एव विष्णुः॥ तस्मात्त्वया सर्वमिदं ततं च प्रसी
द देवेश वरान्ददस्व॥ प्रतिग्रह द्विजश्रेष्ठ अनंतफलदायक॥ त्वत्प्रसादादहं विप्र मुच्येहं कर्मबंध
नात्॥ पक्वान्नफलसंयुक्तं सघृतं दक्षिणान्वितं॥ द्विजवर्याय दास्यामि व्रतसंपूर्त्तिहेतवे॥ अनं
तः प्रतिगृह्णाति अनंतो वै ददाति च॥ अनंतस्तारको ताभ्यां अनंताय नमो नमः॥ इति वायनदान
मंत्रः॥ अथ कथा॥ ॥युधिष्ठिर उवाच॥ ॥अहं दुःखी महं ज्ञातो भ्रातृभिः परिवारितः॥ कथं मु
क्तिर्भवेदस्माकमनंताद्दुःखसागरात्॥ कं देवं पूजयित्वा वै प्राप्स्यामो राज्यमुत्तमं॥ अथवा किं व्र
तं कृत्वा त्वत्प्रसादाद्भवीहितं॥ ॥कृष्ण उवाच॥ ॥अनंतव्रतमस्त्यन्यचिंत्यं त्रिधा वक्ष्यामनुत्तमं॥
सर्वपापहरं नृणां स्त्रीणां चैव युधिष्ठिर॥ शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे भवेत्॥ तस्यानुष्ठा

व्रत॰ नमात्रेण सर्वपापंव्यपोहति॥ ॥युधिष्ठिरउवाच॥ ॥कृष्णकोयमनंतेतिप्रोच्यतेयस्त्वयाविभो॥ किंशे
२८० षनागआहोस्विदनंतस्तक्षकःस्मृतः॥परमात्माथवानंतउताहोब्रह्मगीयते॥ कएषोनंतसं
ज्ञोवैतथ्यंमेब्रूहिकेशव॥ ॥कृष्णउवाच॥ ॥अनंतइत्यहंपार्थममरूपंनिबोधतत्॥आदि
त्यादिग्रहात्मायोयःकालउपपद्यते॥ कलाकाष्ठामुहूर्तादिदिनरात्रिशरीरवान्॥पक्ष
मासर्तुवर्षाणियुगकालव्यवस्थया॥योयंकालोमयाख्यातःसोनंतइतिकीर्त्यते॥ सोहंकृ
ष्णोवतीर्णोत्रभूभारोत्तारणायच॥ दानवानांवधार्थायसाधूनांपालनायच॥अनादिमध्य
पर्यंतंकृष्णंविष्णुंहरिंशिवं॥ वैकुंठंभास्करंसोमंसर्वव्यापिनमीश्वरं॥ विश्वरूपंमहाकालं

वध्या सर्वेषामिति शास्त्रस्य विनिश्चयः ॥ राजानो निपुणा सक्ता स्त्रनयो व्याधिपीडिताः ॥ नहंतव्यो मृगो
राज्ञा मृगी च शिशुनावृता ॥ अथवा धर्मवृद्ध्यर्थं संहनिष्पत्तिमानवः ॥ बालकस्य गृहे मुक्त्वा सरवी
नां च तिवेदये ॥ शपथे रागमिष्यामि आधर्म एव च मोमम ॥ यास्व भर्तारमुत्सृज्य परपुंसि रतास
दा ॥ तस्यापापेन॰ मद्यं मांसं विषं दुग्धं नीलिकुंभफलानि च ॥ एतानि विक्रियेद्यस्तु नरोमोहसमन्वि
तः ॥ तस्यास्तु वचनं श्रुत्वा व्याधो विस्मयमागताः ॥ ततो व्याधेन सा मुक्ता गता मस्वगृहं प्रति ॥ सर्वे
षां वचनं ध्यायन् मृगाणां सत्यवादिनां ॥ एतेषां घातको निसं मरं यास्यामि कां गतिं ॥ क्रमात्स्वं
सद्मा यातो बालकाः क्षुधकावृताः ॥ नाम्नं मो सगृहे तस्य भोजनं येन जायते ॥ निरामिषं तु नं दृष्ट्वा
निराशास्ते भवत्तदा ॥ व्याधो पि च तदा तत्र तेषां वाक्यानि संस्मरन् ॥ न भोजनं न निद्रां च लब्ध्वा ते वि
स्मयान्वितः ॥ आगमिष्यंति ते नूनं शपथैरपि मवृताः ॥ ततो न हं वधिष्यामि सतां व्रतमनुस्मरन्
॥ लुब्धकेन तदा मुक्तो हरिणः शपथे गतिः ॥ स्वमाश्रमं तु संप्राप्तो यत्र तद्धरिणीद्वयं ॥ सद्यः प्रसूता

ब्र०ख० सान्वैकाद्वितीयारतिजा जसा॥ रतीयापि समायाता बालकैर्बहुभिर्वृता॥ सर्वाः समेता एकत्र मरणे
२०८ कृतनिश्चयाः॥ परस्परं भजन्त्यं तोलुब्धकस्य विचेष्टितं॥ आयांतां हरिणीं मुक्त्वा रूपाधारतिजा ज
सां॥ कृतकृत्सोऽभवद्व्यस्ते सोवाक्यमथाब्रवीत्॥ युष्माभिरिह संस्थेयं कर्तव्यं प्राणरक्षणं॥ व्या
घ्राद्वीपा लुब्धकेभ्यो बालकानि प्रयत्नतः॥ अहं सत्यानुगो नार्यं नियुक्ते मोहसंवृतः॥ श्रूण दासन्तु
विज्ञेयस्तस्य जन्म निरर्थकं॥ संतानात्स्वर्गमाप्नोति इह कीर्तिश्च शाश्वती॥ संततिर्यत्नतः पाल्या स्व
र्गसौख्यप्रदायिका॥ अपुत्रस्य गतिर्नास्ति इहलोके परत्र च॥ येन केनाप्युपायेन पुत्रमुत्पादयेत्सु
मान्॥ मया च तत्र गंतव्यमपत्रव्याधस्य मंदिरं॥ सत्यं तु पालनीयं स्यात्सत्ये धर्मः प्रतिष्ठितः॥ एतच्छ्रु
त्वा तु ता नार्यो वाक्यमूचुः सुदुःखिताः॥ वयमप्यागमिष्यामस्त्वया सार्धं मृगोत्तम॥ तथा ते वित्र
यं कांत न स्मरामि कदाचन॥ युष्माभिश्चैव वनांतेषु नदीनां संगमेषु च॥ कंदरेषु च शैलानां युष्मा राम
भिरक्षिता वयं॥ न कार्यं मृत्युमस्माकं क्रीडितेन रूपा विना॥ नारीणां पतिहीनानां जीवितैः किं २०८

प्रयोजनं॥ मितं ददाति हि पिता मितं भ्राता मितं सुतः॥ अमितस्य च दातारं भर्तारं का न पूजयेत्॥ अपि
जीवपुता नारी बहुपुत्रसुतोत्कटा॥ साशोच्या बंधुवर्गस्य पतिहीना कुरंगनाथ॥ गंधमाल्यैः स्त्रि
यो भिस्संश्रियंते भर्तुरग्रतः॥ नातंत्री वाद्यते वीणा नाचक्रो भ्रमते रथः॥ नापतिः सुखमाप्नोति
नारी पुत्रशतैर्वृता॥ नास्ति भर्तृसमो बंधो नास्ति धर्मसमः सुहृत्॥ नास्ति भर्तृसमं सौख्यं नास्ति ध
र्मसमः सुहृत्॥ नास्ति भर्तृसमो नाथः स्त्रीणां भर्ता परा गतिः॥ एवं विलप्यताः सर्वाः मरणे कृतनि
श्चयाः॥ बालकैस्तैः समायुक्ता भर्तृणैकविदुःखिताः॥ मृगस्तासां वचः श्रुत्वा हृदि चिंतापरो
ऽभवत्॥ गंतव्यं किं न गंतव्यं मया व्याधस्य मंदिरं॥ एकतः सुकृतं रक्षन् कुटुंबस्य क्षयो भवेत्॥ त
दंतिकं न चेद्यामि मम सत्यक्षयं भवेत्॥ वरं पुत्रस्य मरणं भार्यायाश्च लनस्तथा॥ सत्यसंक्र
मे निस्यमाकल्पं रौरवं भवेत्॥ तस्मात्सत्यं पालनीयं नरैः श्रेयोर्थिभिः सदा॥ एवं संचिंत्य ह
रिणो धर्मान्नरूढिमानो रमन्॥ ताभिः सहैव शावकैः क्षणेन तदाश्रमं ययौ॥ तस्मिन्सरसि

व्रता० संस्नात्वा कर्मन्यासं च कारह॥ तल्लिंगं प्रणिपत्याशु हृदि ध्यायं सदाशिवं॥ ग्रासं यानं परित्यज्य मे
२०९ पुनंन्नोगमेवच॥ कामक्रोधं तथा मोहं लोभं मायां मोहविनाशिनी॥ वदयित्वा तु तं देवं लुब्ध
कास्तिमुखो ययौ॥ यास नार्याश्च पुत्राश्च मरणे कृतनिश्चयाः॥ अनाशकं व्रतं गत्वा स्पष्टलग्ना
:समभ्यथुः॥ नार्यापुत्रैः परिवृतो मृगस्तं देशमागतः॥ क्षुधितो बालकैर्युक्तो लुब्धको यत्र तिष्ठ
ति॥ मृगस्तं देशमागत्य कुटुंबेन समन्वितः॥ पालयन्सत्यवाक्यानि लुब्धकं वाक्यमब्रवीत्॥॥
मृग उवाच॥ ॥हन मां प्रथमं व्याध पश्चादेताः क्रमेण तु॥ बालकानि ततः पश्चाद्धंस्यतामाविलं
बय॥ लुब्धके तु मृगान्हत्वा नास्ति दोषः कदाचन॥ वयं यास्यामः त्वल्लोकं सत्यव्रतात संशय॥ तथा
ते स कुटुंबस्य प्राणाय श्च भविष्यति॥ एतच्छ्रुत्वा च वचनं मृगेण परिभाषितं॥ आत्मानं निंदयित्वा तु राम
लुब्धको वाक्यमब्रवीत्॥ ॥व्याध उवाच॥ ॥अहो मृग महासत्व गच्छ गच्छ स्वमाश्रमं॥ आमिषेण २०९
न मे कार्यं यज्ञायं तन्न भविष्यति॥ जीवानां घातने पापं बंधने वर्जने तथा॥ नैव पापं करिष्यामि कुटुंबा

र्थे कदाचन॥ त्वं गुरुर्मम धर्मेणं उपदेष्टा मृगोत्तम॥ गच्छ गच्छ मृगश्रेष्ठ कुटुंबिबेन समन्वितः॥ मया
ऽसक्तानि शास्त्राणि सत्यधर्मसमाश्रितः॥ ॥मृग उवाच॥ ॥धर्मन्यासमहं कृत्वा तव सकाशमिहागतः॥
हत्यतां हन्यतां शीघ्रं न ते पापं भविष्यति॥ मया दत्ता पुरा वाचा तया बद्धो न याम्यहं॥ एतच्छ्रुत्वा तु वचनं लुब्ध
को वाक्यमब्रवीत्॥ ॥लुब्धक उ०॥ ॥त्वं बंधुस्त्वं गुरुस्त्राता त्वं मे माता पिता सुहृत्॥ मया सक्तानि शास्त्रा
णि सत्कर्म मायादिकं बलं॥ कस्य नार्यः सुताः कस्य कुटुंबस्य मयान्मृगाः॥ तेः स्वं कर्म च भोक्तव्यं मृग गच्छ
यथासुखं॥ इत्युक्त्वा स तदा तूर्णं विभंजं सद्वारं धनुः॥ मृगं प्रदक्षिणीकृत्य नमस्कृत्य क्षमापयेत्॥ एतस्मिन्नं
तरे नेंदुर्देवं दुंदुभयो दिवि॥ आकाशात्पुष्पवृष्टिश्च पपात सुमनोहरा॥ तत्र हृतः समायातो विमानं गृह्य शे
भनं॥ ॥देवदूत उवाच॥ ॥अहो व्याध महासत्व सर्वसत्व दयं करः॥ विमान मिदमारुह्य सदेहस्त्व
ग्माविश॥ शिवरात्रिप्रभावेण पातकं ते क्षयं गतं॥ उपवासस्तु संजातो निशि जागरणं कृतं॥ यामे या
मे कृता पूजा अज्ञातेनेन शिवस्य च॥ सर्वपापविनिर्मुक्तो गच्छ त्वं शंभुमंदिरं॥ विमानं च समारुह्य स

सच्छित्रपदंव्रज॥ मृगराजमहासत्व नायपुत्रसमन्वितः॥ नायत्रितयसंयुक्तो नक्षत्रपदमाप्नुहि॥ तव
नाम्ना तु तदृक्षं लोके ख्यातं भविष्यति॥ एतच्छ्रुत्वा तु वचनं लुब्धकेन समन्वितं॥ विमानं तु तदारुह्य न
क्षत्रपदमागतः॥ हरिणीवयमन्वेनं पृष्ठतो मृगमेव च॥ तारात्रितयसंयुक्तं मृगशीर्षं तदुच्यते॥ व्या
धकत्रितयं चाग्रे रतीयाः पृष्ठतो मृगी॥ दृष्टं तन्नक्षत्रं भास्मान्मृगशीर्षसमन्निधौ॥ मृगाद्दूरंस्थिते
ष्यापि कृत्वं व्योमगमुत्तमं॥ उपवासं करिष्यंति जागरेण समन्वितं॥ यथोक्तशास्त्रमार्गेण तेषां मोक्षो
न संशयः॥ शिवरात्रिव्रतं नास्ति व्रतं पापक्षयावहं॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥ अश्व
मेधसहस्राणि वाजपेयशतानि च॥ प्राप्नोति तत्फलं सर्वं नात्र कार्या विचारणा॥ ॥इति श्री लिंगपुरा
णे उमामहेश्वरसंवादे शिवरात्रिव्रतं॥ ॥अथोद्यापनं॥ हेमाद्रौ स्कांदे॥ ॥स्कंद उवाच॥ ॥व्रतस्योद्या
पनं कर्म कथं कार्यं च मानवैः॥ को विधिः कानि द्रव्याणि कथयस्व मम प्रभो॥ ॥ईश्वर उवाच॥ ॥शृणुष
ण्मुख तत्त्वेन लोकानां हितकाम्यया॥ उद्यापनविधिं चैव कथयामि तवाग्रतः॥ यथा संजायते वित्तं भक्ति

श्रद्धासमन्वितं॥ स एव व्रतकालः स्यात्तो नित्यं हि जीवितं॥ चतुर्दश्यां प्रकर्तव्यं शिवरात्रिव्रतं शुभं॥ एकभ
क्तं त्रयोदश्यां चतुर्दश्यामुपोषणं॥ संपाद्य सर्वसंभारान्मंडपं तत्र कारयेत्॥ वस्त्रैः पुष्पैः समाछिन्नं पंच
वर्णैश्च शोभितं॥ तन्मध्ये लेखयेद्दिव्यं लिंगतोभद्रमंडलं॥ अथवा सर्वतोभद्रं मंडपांतः प्रकल्पये
त्॥ शोभोपशोभासंयुक्तं दीपैः सर्वत्र योज्वलं॥ आचार्यं वरयेत्तत्र ऋत्विग्भिः सहितं शुचिः॥ शिवरू
पाश्च विप्राः स्मृताः स्रक्चंदपुष्पकैः॥ अनुज्ञातश्च तैर्विप्रैः शिवपूजां समारभेत्॥ रुद्रनाम्ना तमेतेन ब्राह्म
णान्नपि पूजयेत्॥ अव्रणं सजलं कुंभं तस्योपरि तु विन्यसेत्॥ सौवर्णं राजतं ताम्रं मृन्मयं वापि कारयेत्॥ कुंभो
परि न्यसेद्देवं उमया सहितं शिवं॥ सौवर्णे प्यथवा रौप्ये वृषभे संस्थितं शुभं॥ रत्नालंकरणैर्हेमैः रंजकैस्स
म्प्रपूजयेत्॥ पत्नेन वा तदर्धेन तदर्धार्धेन वा पुनः॥ वस्त्रयुग्मेन संवेष्ट्य बिल्वपत्रैः प्रपूजयेत्॥ उमामहेश्व
रं मूर्तिं पूजयेद्वृषभेस्थितां॥ सोमं च मृगणं चैव पूजयित्वा महेश्वरं॥ होमं कुर्यात्प्रयत्नेन तत्सैद्धं मंत्रैर्यथा
विधि॥ ब्राह्मणान्पूजयेज्जात्मनो नयेच्च चतुर्दशीं॥ आचार्यं च सपत्नीकं वस्त्रालंकारभूषणैः॥ पूजये

व्रता०
३११

वीतवस्त्रादितेभ्यो दद्यात्पृथक् पृथक्॥ गां सवत्सां सवसनां नानालंकारभूषणां॥ दद्यादाचार्यवर्याय प्रि
यो मे प्रियतामिति॥ ततः सकुंभां मूर्तिं च सवस्त्रां वृषभेस्थितां॥ सर्वालंकारसहितामाचार्याय निवेद
येत्॥ व्रतमेतत्कृतं यन्मे संपूर्णं वा ऽपूर्णमेव वा॥ सर्वं संपूर्णतां यातु प्रसादाद्भवतां मम॥ इति संप्रार्थ्य
तान्विप्रान्प्रणम्य च पुनः पुनः॥ अजैकपादमितेभ्यो दद्यात्कुंभान्पृथक् पृथक्॥ पुराणस्तोत्रपाठैश्च
रात्रिशेषं नयेद्बुधः॥ ततः प्रभातसमये कृत्वा संध्यादिकाः क्रियाः॥ पुनः प्रजां प्रकुर्वीत ततो होमं समा
रभेत्॥ तिलव्रीहियवैश्चैव पायसान्नेन वाज्यतः॥ त्र्यंबकमिति मंत्रेण नमः शंभवायेति च॥ गौरी मिमेति
मंत्रेण शतमष्टोत्तरद्वयं॥ होमं कुर्याद्यथा मतिमान्बिल्वपत्रैश्च नाममंत्रैः॥ अजैकपादहिर्बुध्न्यो भवः
सर्वश्चमापतिः॥ रुद्रः पशुपतिः शंभुः वरदः शिव ईश्वरः॥ महादेवो हरो नीमो नामान्येवं चतुर्दश॥ पू
र्णाहुतिं ततो कृत्वा कर्मशेषं समापयेत्॥ एते होमः प्रकर्तव्यः कुंभदाने पितान्स्मरेत्॥ भोज्यं दद्या
पयेदेवमेभिर्नामपदैः पृथक्॥ प्रतिमां कुंभसहितामाचार्याय निवेदयेत्॥ शंभो प्रसीद देवेश सर्व

राम
३११

र्वलोकेश्वर प्रभो॥ तवरूपप्रसादेन मम संतु मनोरथाः॥ यज्ञोपवीतवस्त्राणि दद्यात्तेभ्यः पृथक्पृथ
क्॥ आचार्यं पूजयेद्भक्त्या वस्त्रालंकारभूषणैः॥ गां वत्सां च ततो दद्यात्कर्मसंपूर्तिहेतवे॥ अन्येभ्यो
पि यथाशक्तिब्राह्मणेभ्यो हि दक्षिणा॥ आचार्याय प्रदद्याच्च मूर्तिं माहेश्वरीं तथा॥ आचार्यं पूजयेद्भ
क्त्या वस्त्रालंकारभूषणैः॥ चतुर्दश प्रदातव्या विप्रेभ्यो जलपूरिताः॥ कुंभा यज्ञोपवीतानि वस्त्राणि
च पृथक् पृथक्॥ पूर्णमिक्षुवस्त्राणि शाप्यां सोपस्करां तथा॥ अथवा दक्षिणामेव प्रदद्यात्कुंभपा
त्रिकाः॥ व्रतमेतत्कृतं यन्मे पूर्णं वा पूर्णमेव वा॥ सर्वं संपूर्णतां यातु प्रसादाद्भवतां मम॥ इति संप्रार्थ्य
तान्विप्रान्प्रणम्य च पुनः पुनः॥ ततश्च स्वजनैः सार्द्धं स्वयं भुंजीत सद्व्रती॥ ॥ इति स्कांदे शिवशास्त्रोद्यापनं॥
॥ इति श्री भट्टनीलकंठात्मज भट्ट शंकरकृतौ व्रतार्के चतुर्दशीव्रतानि॥ ॥ अथ पूर्णिमाव्रतानि॥॥
तत्र ज्येष्ठपूर्णिमायां वटसावित्रीव्रतं॥ इयं च पूर्वविद्धा ग्राह्या॥ पूर्वविद्धा न कर्तव्या अमावास्या
च पूर्णिमा॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमं॥ मिति ब्रह्मवैवर्तात्॥ वर्जयित्वेति पर्यु

C. BHAU DAJI MEMORIAL

व्रता० दासादष्टादशनाडीवेधः सावित्रीव्रतादिकपर॥ इदं च त्रयोदशीमारभ्य पूर्णिमांतं कर्तव्यं॥ तथाच
३१२ स्कांदे भविष्ययोः॥ ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे॥ व्रतं त्रिरात्रमुद्दिश्य त्वहोरात्रे त्रिरो
त्रवेदित्तु पक्षस्यांते उपसंहृतं॥ ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतं॥ चीर्णं पुरा म ... नत्रा
कथितं ते मयानघे॥ इति॥ ॥धर्मराज उवाच॥ ॥नारी वा विधवा वापि सपुत्रा पुत्रवर्जिता॥ सभर्तृ
का सपुत्रा वा कुर्याद्व्रतमिदं शुभं॥ ज्येष्ठे मासी तुलं प्राप्ते पौर्णमासी पतिव्रताः॥ स्नात्वा चैव शु
चिर्भूत्वा नियमं कारयेत्ततः॥ अमायां च तथा ज्येष्ठे वटमूले सदा सती॥ त्रिरात्रोपोषिता नारी विधि
नाने पूजयेदिति॥ ॥अथ व्रतविधिः॥ ॥आचम्य मासपक्षाद्युल्लिख्य मम भर्तुः पुत्राणां च आयु
रारोग्यप्राप्तये जन्मजन्मनि॥ अवैधव्यप्राप्त्यै च सावित्रीव्रतमहं करिष्य इति संकल्प्य वटं सिंचा राम
मि ते मूलं सलिलैरमृतोपमैः॥ सूत्रेण वेष्टये ... गंधपुष्पाक्षतैः शुभैः॥ ॐ नमो वैवस्वते ३१२
चौ मितैयेति ... प्रदक्षिणं॥ ... धर्मराज सावित्री प्रतिगृह्यतां॥ पाद्यं॥ ... मया

हृतं तोयं फलपुष्पसमन्वितं॥ अर्घ्यं गृहाण सावित्री मम अस्य व्रतसिद्धये॥ अर्घ्यं॥ सुगंधं सहक
र्पूरं सुरनिःस्वाद शीतलं॥ स्वपस्यास्य हसावित्री कुर्याद्वा व मनीयकं॥ अयपंचामृतस्नानं॥ म
याहृतमाचक्रम्पतो मंदाकिन्याः समीतमुदकं च सदा प्रिये॥ सावित्र्यै च धर्मराजाय च स्नानं॥
आचमनं॥ सूक्ष्मतंतुमयं वस्त्रं कार्पासेन विनिर्मितं॥ सावित्री सत्यवत्कांते मया दत्तं प्रगृह्यतां॥
सावित्री सत्यवत्कांते धर्मराज सुरेश्वर॥ सावित्री ब्रह्मणा सार्धं मुपवीतं प्रगृह्य नामित्तुपवीतं
॥कुंकुमागरुकस्तूरी रोचना युतं चंदनं॥ चंदनं ते मया दत्तं सावित्री प्रतिगृह्यतां॥ अक्षताश्च सुर
श्रेष्ठाः कुंकुमाक्ताः सुशोभनाः॥ मया निवेदिता भक्त्या गृहाण परमेश्वरि॥ इति अक्षताः॥ माल्यादी
नि सुगंधिनी माल्यादीनि वै प्रभो॥ मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां॥ पुष्पं॥ अथांगपूजा
॥सावित्र्यै पादौ पूजयामि। सावित्र्यै जंघे॥ कमलापत्रा... करि॥ भूतधारिण्यै उदरं॥ ब्रह्मणःप्रि
यायै शिरः॥ अथ ब्रह्मस्य व्रतरंगपूजा॥ धात्रे नमः पादौ पूजयामि॥ ज्येष्ठायै नमः उदरं॥ परमेष्ठि

तेनमः मेढ्रं॥ अग्निरूपायकटिं॥ वेधसे ऊरू॥ पद्मनाभायहृदयं॥ वेधसेनमः कंठं॥ हिरण्यगर्भा
यमुखं॥ ब्रह्मणेशिरः॥ विश्वे० सर्वांगं पूजयामि॥ देवद्रुमरसोद्भूतः वनजागंधसमन्वितः॥ आघ्रे
यतामयंधूपो सावित्री प्रतिगृह्यतां॥ धूपं॥ चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणं॥ आर्तिक्यं स
र्वलोकानां गृहाण परमेश्वरी॥ दीपं॥ अन्नं चतुर्विधमिति नैवेद्यं॥ आचमनं॥ इदं फलमिति
फलं॥ पूगीफलं महद्दिव्यं इति तांबूलं॥ हिरण्यगर्भगर्भस्थमिति दक्षिणा॥ सावित्री च प्रसावित्री
संततं ब्रह्मणः प्रिये॥ पूजितासि द्विजैः सर्वैः सिद्धैर्मुनिगुणैः स्तथा॥ त्रिसंध्यं देवि भक्तानां वंदना
यासि सुव्रते॥ मयादत्ता च पूजेयं त्वं गृहाण नमोस्तु ते॥ इति पुष्पांजलिं दत्वा ततोर्घं दद्यात्
॥ ॐकारपूर्वके देवि सर्वदुःखनिवारिणि॥ देवि मातर्नमस्तुभ्यं अवैधव्यं प्रयच्छ मे॥ इति व्रतं म
हाभागे वाद्विजाने शुचिस्मिते॥ दृढव्रते दृढमये भर्तुश्च प्रियवादिनी॥ अवैधव्यं च सौभाग्यं दे
हि त्वं मम सुव्रते॥ पुत्रान्पौत्रांश्च सौख्यं च गृहाणार्घ्यं नमो नमः इत्यर्घ्यं॥ अथ प्रार्थना॥ सावित्री ब्रह्मणः

पत्नी सर्वदा प्रियभाषिणी॥ तेन सत्येन मां पाहि दुःखसंसारसागरात्॥ त्वं गौरी त्वं शचिर्गौरि त्वं प्रभा चं
द्रमंडले॥ त्वमेव च जगन्माता त्वमुद्धर वरानने॥ यन्मया दुष्कृतं सर्वं कृतं जन्मशतैरपि॥ भस्मीभवतु
तत्सर्वम वैधव्यं प्रयच्छ मे॥ अवियोगाय यथा देव सावित्री सहितस्तव॥ अवियोगस्तथास्माकं भूया
ज्जन्मनि जन्मनि इति प्रार्थना॥ इति पूजाविधिः॥ ॥ अथ कथा॥ स्कांदे॥ ॥ सनत्कुमार उवाच॥ ॥ कुलस्त्रीणां व्र
तं देव महाभाग्यं तथैव च॥ अवैधव्यकरं स्त्रीणां पुत्रपौत्रप्रदायकं॥ ॥ ईश्वर उवाच॥ ॥ आसीन्मद्र
षु धर्मात्मा ज्ञानी परमधार्मिकः॥ नाम्ना चाश्वपतिर्वीरो वेदवेदांगपारगः॥ अनपत्यः सो महाबाहुः सर्वै
श्वर्यसमन्वितः॥ सपत्नीकस्तपस्तेपे समाराधयते नृपः॥ सावित्रीं च प्रसावित्रीं जपन्नास्ते महामनाः
॥ जुहोति चैव सावित्रीं ब्रह्मा परमया युतः॥ ततस्तुष्टा तु सा देवी सावित्री द्विजसत्तम॥ परिग्रहवती दे
वितस्य दर्शनमागता॥ तां तु दृष्ट्वा जगद्वंद्यां सावित्रीं च नृपोत्तमः॥ प्रणिपत्य नृपो नत्वा भक्त्यैवं
नतात्मना॥ तं दृष्ट्वा पतितं भूमौ तुष्टा देवी जगाद ह॥ तुष्टाहं तव राजेंद्र वरं वरय सुव्रत॥ एवमुक्तस्त

व्रता०
३१४

याराज्ञाप्रसन्नां तामुवाच ह॥ अनपत्योमहं देवि पुत्रमिच्छामि शोभने॥ नाम्नैवरणेमि सावित्री पु
त्रमेवजगन्मये॥ अन्यदपि त्तिमम ग्रंमे ह्रि तौ पञ्चासु दुर्लभं॥ प्रसादात्तवदेवेशि तस्नर्वं विद्य
तेऽस्फुटो॥ एवमुक्तातु सा देवी प्रत्युवाच नराधिपं॥ पुत्रस्ते नास्ति राजेंद्र कन्यैका ते भविष्यति॥ कुलद्व
यंतु सा राजन् उद्धरिष्यति भामिनी॥ मन्नाम्ना राजशार्दूल तस्या नाम भविष्यति॥ इत्युक्त्वा तं मुनि
श्रेष्ठं राजानं ब्रह्मणः प्रिया॥ अंतर्दधे निमं ता देवी संतुष्टो सौ महीपतिः॥ ततः कतिपयाहस्स तस्य राज्ञी
महीभुजः॥ समस्त्वा समजायेत प्रथमे कायेसुखावहा॥ सावित्र्यास्तु प्रसादात्ता सावित्र्या जन्मपातया॥ सावि
त्री तेन वरदात्तस्या नाम बभूव ह॥ राजते देवगर्भासां कन्यां कमललोचनां॥ ददर्श मुनिश्रेष्ठ
चंद्रलेखेव चांबरे॥ सावित्री ब्रह्मणो वैसा श्रीरिवायतलोचना॥ तां दृष्ट्वा हेमगर्भिनीं राजा विनासु — राम
पयिवान्॥ अयास्मानां च वरैरूपेणाप्रतिमां भुवि॥ तस्मात् रूपेण ते सर्वे संतिरुद्धा महीभुजः॥ ततः — ३१४
सा राज्ञा चारु यन्ना च कस्य जेकृणं॥ पुत्री प्रदानकाले तेन वयावंति के चन॥ स्वयंवरं च न द्यातेपति

गुणैः समन्वितं॥ मनोप्रज्ञादनकरं श्रीनेनानिजनेन च॥ इत्युक्त्वा तां स राजेंद्रो वृद्धमात्यैः समहे
वतं॥ वस्त्रालंकारसहितां धनरत्नैः समन्वितां॥ विसर्ज्य वक्रणं तत्र यावत्तिष्ठति भूमिपः॥ ता
वत्तत्र समागच्छन्नारदो भगवन्नृषिः॥ संभ्रमाच्च ततो राजा अर्घपाद्येन तं मुनिं॥ आसने च सुखा
सीनं प्रजित तस्मिन् तु सुशा॥ पूजयित्वा मुनिं राजा प्रोवाचेदं द्विजोत्तमं॥ याचितोऽहं त्वया विप्र दर्शनेन
चनात्स्त॥ यावद्देवं वरे द्विजा तावत्साक मलेक्ष्णा॥ आश्रमादागता देवी वृद्धमात्यैः समन्विताः॥
नारदेन तु तु सा हृष्टा प्रोवाच भूमिपं॥ कस्मै देवगर्भासां किमर्थं न प्रयच्छसि॥ वरायं त्वं महा
ज्ञाहो वरयोग्यापि सुंदरी॥ एवमुक्तस्तदा तेन मुनिना नृपसत्तमः॥ उवाच तं मुनिश्रेष्ठं यमने नार्थे निप्रे
षिता॥ आगतेयं विशालाक्षी मयासं प्रेषितासती॥ अनया च वृतो भर्त्ता पि छत्वं मुनिसत्तम॥ सा
ऋत्वा तेन मुनिना ततस्मे चाचष्ट भामिनी॥ आश्रमे सत्यवान्नाम द्युमत्सेनसुतो मुने॥ भर्त्ता त्वेमनसा
वृतो सो राजनंदनः॥ ॥नारद उवाच॥ ॥ कष्टं कृतं महाराज दुहित्रा तव सुव्रता॥ अज्ञानत्सा वृतो

व्रता० न्नतुगुणवानितिमेमतः॥तथाचाश्वपति यः स्मृतः अश्वैः क्रीडतिमृन्मयैः॥चित्रेपिचलिखत्यश्वा
२१५ चित्राश्वस्तेनचोच्यते॥रूपवान्गुणवांश्चैवसर्वशास्त्रविशारदः॥नतस्यसदृशोलोकेविद्यतेदे
हमानवः॥सर्वैर्गुणैःस्वयंपूर्णैरत्नैरिवमहार्णवः॥एकोदोषोमहानास्तिगुणानावृत्यतिष्ठति॥सं
वत्सरेणक्षीणायुर्देहत्यागंकरिष्यति॥ ॥अश्वपतिरुवाच॥ ॥अन्यंवरयभद्रंतेवरंसावित्रिगम्य
तां॥ विवाहस्यकालोयंवर्ततेशुभ्रलोचने॥ ॥सावित्र्युवाच॥नान्यमिच्छाम्यहंतातमनसापिवरंप्र
भो॥योमयावृतोभर्तासमेमान्योभविष्यति॥विचिंत्यमनसापूर्वंवाचंपश्चात्समुच्चरेत्॥क्रि
यतेचततःपश्चात्पुत्रंवायदिवाशुभं॥तस्मात्मनःपुमांसंचकथंचान्यंवृणोम्यहं॥सकृज्जल्पं
तिराजानःसकृज्जल्पंतिपंडिताः॥सकृत्कन्याप्रदीयंतेत्रीण्येतानिसकृत्सकृत्॥पतिनत्वाऽनमेबु राम
द्धिर्विवेकेसिकथंचन॥सगुणोनिर्गुणोवापिमूर्खोवापंडितएवच॥दीर्घायुरथवाल्पायुःसएवभर्ता २१५
ममप्रभो॥नान्यंवृणोमिभर्तारंयदिवाऽस्याह्नविपतिः॥इतिकृत्वामयातातयत्कर्तव्यंसुखेनच

नारदउवाच॥स्थिराबुद्धिश्चराजेंद्रसावित्र्याःसत्यवान्प्रति॥वरयस्वविवाहायभर्तासहकुरुत्वि
षां॥ईश्वरउवाच॥निश्चितांबुमतिंज्ञात्वास्थिरांबुद्धिश्चनिश्चला॥सावित्र्याश्चमहाराजोप्रतस्थे
सोवनंप्रति॥गत्वातत्रतुवनंराजाद्युमत्सेनस्यसन्निधौ॥स्वल्पानुगोमहाराजोवृद्धामात्यैःसमन्वि
तः॥नारदस्तुततोरवेवैतत्रैवांतरधीयत॥सगत्वाराजशार्दूलोद्युमत्सेनवसंगतः॥वृक्षस्याध
श्चराजासौवृक्षमूलमुपाश्रितः॥स्वश्वपतिराजासौपादोजमाहवार्यवान्॥स्वनामचसमुच्चा
र्यतस्थौतस्यसमीपतः॥अथाश्वराजाऽतंनृपंकिमागमनकारणं॥दत्वापित्वार्घ्यदानेनवन्यमूल
लफलैःश्रमः॥ततःसपत्नकुशलंसराजासुनिसत्तमः॥ ॥अश्वपतिरुवाच॥ ॥कुशलंदर्शने
नाद्यतवराजन्महात्मवै॥दुहितृनाम सावित्रीतवपुत्रमनीप्सति॥भार्यांचराजशार्दूलप्राप्नोति
समनिंदिताः॥ममेदंकांक्षितंसर्वंभर्तारमनयाविदो॥आवयोश्चैवसंबंधोभवेत्वद्यापितः॥ ॥
द्युमत्सेनउवाच॥ ॥वृक्षस्याधश्चराजेंद्रफलमूलाशनोत्सव॥राज्यात्च्युतश्चमेपुत्रोवनेनाद्य

व्रता०
१२६

चजीवति॥ साकथंसहतेदुःखंदुहितातवकानने॥ अनभिज्ञाचदुःखानामिसहनाभिकांरुते॥
अश्वपतिरुवाच॥ ॥ अनयाचहतोभर्त्ताजानंत्यासत्यसंमं॥ अनेनसहवासस्तेतवपुत्रेणमान
वाः॥ स्वर्गतुल्योमहाराजनविष्पतिनसंशयः॥ एवमुक्तस्तदातेनराज्ञाराजर्षिसत्तमः॥ तथेति
सप्रतिज्ञायच्चकारोद्वाहमुत्तमं॥ कृत्वाविवाहंराजेंद्रसंपूज्यविविधैर्धनैः॥ अभिवाद्यद्यु
म्नसेनंजगामनगरंप्रति॥ सावित्रीतुपतिंलब्ध्वाइंद्रंप्राप्यसचीयथा॥ सत्यवानपिब्रलषेतथा
पत्न्याभिनंदितः॥ किंचितेनहतोहेदेशेपोन्नोम्पामद्यवानिवा॥ नारदस्यचतद्वाक्यंहृदयेनम
नस्विनी॥ वहंतितियमंचक्रेव्रतस्यास्यचभामिनी॥ गणयंतिदिनान्येवनलेभेशेषमुत्तमं॥
॥ ज्ञात्वातद्दिवसंविप्रन्नर्तुमरणकारणं॥ अत्रांतरेचनियमंत्रिदिनस्यमनस्विनी॥ अस्मि
न्दिनेचमर्त्तव्यंतदासत्यवतामुने॥ कुठारंसंपरिगृह्यपाविकंचैवसुव्रतः॥ प्रतस्थितंवनायै
वसाविजावाक्यमब्रवीत्॥ नगंतव्यंवनंत्वद्यममवाक्येनमानद॥ अथवागम्यतेसाधो

राम
१२६

मयासहवनंव्रज॥ संवत्सरंचसंपूर्णंआश्रमेस्मिन्ममप्रभो॥ नदृतंद्रष्टुमिच्छामिप्रसादंकुरुमेप्रभो
॥ ॥ सत्यवानुवाच॥ ॥ नाहंस्वतंत्रःसुश्रोणिपृच्छस्वपितरौममम॥ ताभ्यांप्रस्थापिताग‍च्छतयासह
विस्मिता॥ एवमुक्त्वासदातेनभर्त्रासाकलेक्षणं॥ श्वश्रूश्वशुरयोःपादौअभिवाद्यतमब्र
वीत्॥ वनंद्रष्टुमिच्छेयंभ्रातांमत्यनदीयतां॥ उवाचवचनंसाध्वीवरमेकंप्रयच्छया॥ भर्त्रा
सहवनंगंतुमेतत्त्वरयमेमनः॥ तस्यास्तद्वचनंश्रुत्वाद्युम्नसेनोब्रवीदिदं॥ व्रतंकृतं त्वानदेपारणं
कुरुसुव्रते॥ पारणंतेत्रीरुततोगंतुचायत्वमर्हसि॥ ॥ सावित्र्युवाच॥ ॥ नियमश्चकृतोस्माकंरा
त्रौचंद्रेदयेसति॥ जातिमयाप्रकर्त्तव्यंभोजनंतातमेशृणु॥ वनदर्शनकामोस्तिभर्त्रासहमय्या
द्यवै॥ नमेतत्रभवेद्ग्लानिर्भर्त्रासहनराधिपः॥ इत्युक्तस्तुतदाराजाद्युम्नसेनोपमहीपति
ः॥ यत्तेभिलषितंपुत्रितत्कुरुष्वसुमध्यमे॥ नमस्कृत्वातुसावित्रीश्वश्रूश्वशुरयोरपि॥ सहिता
सेजगामहृत्तितेनसत्यवताविभो॥ अवलोकयंतिभर्त्तारंतंचकालंमत्वामनस्विनी॥ वनंचफलितंदृष्ट्वा

Dr. BHAU DAJI

व्रता० ३२६

च जीवति ॥ साकथं सहते दुःखं दुहिता तव कानने ॥ अनभिज्ञा च दुःखानामिति सहं नाभिकांक्षते ॥
अश्वपतिरुवाच ॥ ॥ अनया च वृतो भर्त्ता जानंत्या गुणसत्तमं ॥ अनेन सह वासस्ते तव पुत्रेण मान
वाः ॥ स्वर्गतुल्यो महाराज न विष्पतिन संशयः ॥ एवमुक्तस्तदा तेन राज्ञा राजर्षिसत्तमः ॥ तथेति
सप्रतिज्ञाय चकारोद्वाहमुत्तमं ॥ कृत्वा विवाहं राजेंद्रः संपूज्य विविधैर्धनैः ॥ अभिवाद्य द्यु
मत्सेनं जगाम नगरं प्रति ॥ सावित्री तु पतिं लब्ध्वा इंद्रं प्राप्य शची यथा ॥ सत्यवानपि ब्रलषे तथा
पत्न्याभिनंदितः ॥ किं इति तेन तद्वनोद्देशे पौलोम्यां मघवानिव ॥ नारदस्य च तद्वाक्यं हृदयेन म
नस्विनी ॥ वहंती तियमं च क्रे व्रतस्यास्य च नामिनी ॥ गणयंति दिनान्येव नलेने जोषमुत्तमं
॥ ज्ञात्वा तद्दिवसं विप्रभर्त्तुर्मरणकारणं ॥ अत्रांतरे च नियमं त्रिदिनस्य मनस्विनी ॥ अस्मि
न्दिने च मर्त्तव्यं तदा सत्यवता मुने ॥ कुठारं संपरिगृह्य पाणिं वंचैव सुव्रतः ॥ प्रतस्थिते वनायैव
व सा वित्रावाक्यमब्रवीत् ॥ न गंतव्यं वनं त्वद्य मम वाक्येन मानद ॥ अथवा गम्यते साधो राम ३२६

मया सह वनं व्रज ॥ संवत्सरं च संपूर्णं आश्रमे स्मि न मप्रजो ॥ तद्वनं द्रष्टुमिच्छामि प्रसादं कुरु मे प्रभो
॥ ॥ सत्यवानुवाच ॥ ॥ नाहं स्वतंत्रः सुश्रोणि पृच्छस्व पितरौ मम ॥ तांसां प्रस्या पितागच्छ तया सह
विस्मिता ॥ एवमुक्ता तदा तेन भर्त्रा सा कलेक्षणं ॥ श्वश्रूश्वशुरयोः पादौ अभिवाद्य तमब्र
वीत् ॥ वनं द्रष्टुमिच्छेयं आज्ञां मत्यं न दीयतां ॥ उवाच वचनं साध्वी वरमेकं प्रयच्छ या ॥ भर्त्ता
सह वनं गंतुमेतत्त्वरय मे मनः ॥ तस्यास्तद्वचनं श्रुत्वा द्युमत्सेनोब्रवीदिदं ॥ व्रतं कृतं त्वा नद्ये पारणं
कुरु सुव्रते ॥ पारणं ते न्नीरु ततो गंतु चायत्वमर्हसि ॥ ॥ सावित्र्युवाच ॥ ॥ नियमस्य कृतो स्माकंरा
त्रौ चंद्रोदये सति ॥ जातिमया प्रकर्त्तव्यं भोजनं तात मे शृणु ॥ वनदर्शनकामोस्ति मत्रभिह मस्य
द्यदै ॥ न मे तत्र भवेद्ग्लानिर्भर्त्रा सह नराधिप ॥ इत्युक्तस्तु तदा राजा मे द्युमत्सेनोप महीपति
ः ॥ यन्नेनिलषितं पुत्रि तत्कुरुष्व सुमध्यमे ॥ नमस्कृत्वा तु सावित्री श्वश्रूश्वशुरयोरपि ॥ सहिता
से जगाम हृष्टेन सत्यवता विभो ॥ अवलोकयंति भिन्नरंतं च कालं मनागनस्विनी ॥ वनं च फलितं दृष्ट्वा

Dr. BHAU DAJI

व्रता० पुष्पितं द्रुमसंकुलं॥ द्रुमाणां चैव नामानि मृगाणां चैव भामिनि॥ पश्य पतिमृगयूथानि हृदयेन
२९ प्रवेपती॥ तत्र गत्वा स सत्वान्वै फलान्यादाय सत्वरः॥ काष्ठानि च समादाय बबंध नरकं तदा॥
कविनं शरयामास कृत्वा वृक्षावलोचनं॥ वटवृक्षस्य सा साध्वी उपविष्टा महासती॥ काष्ठान्पा
लयतस्तस्य जाशिरसि वेदना॥ ग्लानिश्रम हतिजाता गात्राणां व्यापयुस्तदा॥ अग्रमवृक्षसामी
प्यं सावित्री इदमब्रवीत्॥ ग्लानिश्रमहतिजाता शिरसश्चापि वेदना॥ कंटकैर्निद्यते न देवि
रोमे श्रूलसमितैः॥ उत्संगे तव सुश्रोणि स्वप्तुमिच्छामि सुव्रते॥ सापि शिरस्तं विश्राणाद्धीत समस्तो मे
तस्थी निः॥ प्राप्तकालं मन्यमाना तस्मिन्नेव भामिनी॥ सत्यवानपि सुप्तस्तु कृत्वोत्संगे शिरस्तथा
॥ तावत्तत्र समागच्छत्पुरुषः कृष्णपिंगलः॥ ज्वलमानो वपुरुषाद्ददर्शपि च भामिनी॥ उवाच राम
वाक्यं वाक्यज्ञा कस्त्वं लोके भयकरः॥ क्षीणपुण्यस्तु वरारोहे नर्त्तितव मनस्विनी॥ विनाकेनापि मां २९
नेतुं शक्यस्त्वदंतकः॥ देवि तु विषहं तेजः सोढुं शक्यं न तेम्युनं॥ इति ज्ञात्वा महाभागे स्वयमागमनं

मम॥ इत्युक्त्वा तं वरारोहं तस्य देहान्महात्मनः॥ अंगुष्ठमात्रं पुरुषं बध्वा पाशेन सुस्वयं॥ निश्चकर्ष
ततो वेगात्कृत्वा मस्थितः पुरी॥ सावित्री तु ततः पश्चादनुयाति स्म तं पतिं॥ यम उवाच॥ ॥निवर्त्तस्व
महाभागे त्वं दूरं समुपागता॥ गत्वा त्वं तवनं शीघ्रं कुरु चैवोर्ध्वदेहिकं॥ एवमुक्ता तु सा तेन
यमस्तुवाच यमं तदा॥ न श्रमो नैव च ग्लानिः सकाशे तव मानद॥ विशेषतश्च भर्त्तुर्मे कुलोगता
तिः सुरेश्वर॥ धर्मेण त्वं पालयसे धर्मेण त्वं विवर्द्धसे॥ नाफलं दर्शनं देव सतां मुक्तं कदाचन॥
आहुः सप्तपदी मैत्री इति वेदविदो विदुः॥ ईश्वर उवाच॥ ॥संतुष्टस्तेन वाक्येन धर्मरा
जो यमस्तदा॥ वरेणेप्सी स्वरो दातावरं तस्मै दिदेश ह॥ सा पश्चादात्मनः पुत्रान्पितुः पुत्रशतं तथा
॥ चक्षुं प्राप्तिं च सा वव्रे श्वश्रूश्वशुरयोस्तदा॥ राज्यप्राप्तिं तथा भर्तुर्जीवितं च यथाविधिः॥ भर्त्तुः
कमलपत्राक्षि निवर्त्तासास्तुमध्यमा॥ प्रदक्षिणं ततः कृत्वा धर्मराजस्य सुव्रता॥ तथेत्युक्त्वाथ
मरिगोजगाम च स्वमाश्रयं॥ सा गत्वा वटसामीप्यं कृत्वोत्संगे शिरस्ततः॥ प्रबुद्धस्तु ततो ब्रह्म

व्रता०
२१८

न्सत्यवानिदमब्रवीत्॥ मयात्वंभवानेहे ह एमद्वैव नामिनि॥ तत्सर्वंकथितंतस्यय द्वृत्तंस
र्वमेवतत्॥ तयाचकथितंसर्वंसंवादंचयमेनहि॥ अस्तंगतेततः सूर्येद्युमत्सेनोमहीपतिः॥ पु
त्रस्यागमनंकांक्षीइतश्चेतश्चधावति॥ आश्रमादाश्रमंगच्छन्पुत्रदर्शनकांक्षया॥ अवयो
र्धयोर्यष्टिः कगतोसिविनावयोः॥ एवंसविविधंक्रोशन्सपत्नीकोमहीपतिः॥ चकार
दुःखितस्तत्रपुत्रपुत्रेतिवासकृत्॥ अकस्मादेवराजेंद्रोलक्ष्यचक्षुर्महीश्वरः॥ तंदृष्ट्वा
परमाश्चर्यंचक्षुः प्राप्तिद्विजोत्तमः॥ तानब्रुवंस्तदावाक्यमूचुस्तेतापसास्तदा॥ चक्षुःप्रा
प्तोसिराजेंद्रचिंतितेमहामते॥ पुत्रेणचसमंयोगप्राप्स्यसेनपसत्तम॥ ईश्वरउवाच॥ यावदेवं
वदंत्येतेतापसाद्विजसत्तम॥ सावित्रीसहितःप्राप्तःसत्यवान्द्विजसत्तमः॥ नमस्कृत्यद्विजा
न्सर्वान्मातरंपितरंततः॥ सावित्रीचततोब्रह्मन्ववंदेचरणावपि॥ श्वश्रूश्वशुरयोर्ब्रह्म
न्सावित्रीकमलेक्षणा॥ मुनयऊचुः॥ किंतुसावित्रीजानासीकारणंवरवर्णिनि॥ वृद्धस्यच

राम
२१८

१

क्षुषः प्राप्तेः श्वशुरस्यवरानने॥ ॥सावित्र्युवाच॥ ॥नजानामिमुनिश्रेष्ठाश्चक्षुषःप्राप्तिकारणं
॥ चिरंस्तुयत्तुमेभर्त्रातेनकालात्यतिक्रमः॥ सत्यवानुवाच॥ अस्याः प्रभावात्संजातंनद
र्शयन्नकारणं॥ तत्सर्वंविद्यतेविप्राःसावित्र्यास्तपसःफलं॥ व्रतस्यैवतुमहात्म्यंदृष्टमेतन्मया
धुना॥ ॥ईश्वरउवाच॥ ॥एवंतुवदतस्तस्यतदासत्यवदःप्रभो॥ पौराः समागताःसर्वआचख्यु
र्नृपतिर्हतः॥ येनराज्यंस्वमाक्रांतंकृतंक्रूरेणमंत्रिणा॥ समासेनहतःसोपिइतिपौराःसमागताः॥
पौराऊचुः॥ उत्तिष्ठराजशार्दूलस्वराज्यंपालयप्रभो॥ अभिषिंचस्वराजेंद्रपुरेमंत्रिपुरोहितैः॥ ईश्व
रउ०॥ सगत्वाराजशार्दूलः स्वपुरंजनसंवृतः॥ पित्र्यंपैतामहंराज्यंसंप्राप्तंचमहात्मनाः॥ सावित्री
सत्यवांश्चैवपरामुदमवापतुः॥ जनयामासपुत्राणांशतंवैवरवर्णिनी॥ व्रतस्यैवतुमहात्म्या
त्तस्याः पितुरजायत॥ पुत्राणांचशतंब्रह्मन्प्रसन्नाचयमात्तथा॥ एतत्तेकथितंब्रह्मन्सर्वंव्रतम
हात्म्यमुत्तमं॥ स्त्रीणामायुर्जीवीतोभर्त्राव्रतस्यास्यप्रभावतः॥ कर्तव्यंसर्वनारीणामवैधव्यफलप्र

व्रत० दं॥ सनत्कुमार उ० विधानं ब्रूहि देवेश व्रतस्यास्य त्र्यंबकं॥ क्रियते विधिना येन स्त्रीणां पुरनि
२१९ षूदन॥ ईश्वर उ०॥ वर्षैकं नियमं कृत्वा एकभक्तेन मानद॥ नक्ताहारेण वा विप्र त्वयुक्तेनाथवा द्वि
जर्षभ॥ त्रिदिनं तु लंघयित्वा चतुर्थे दिवसे मुने॥ चंद्रायार्घ्यं प्रदद्याच्च पूजयित्वा सुवासिनी॥ सा
वित्रीं च प्रसावित्रीं गंधधूपनिवेदनैः॥ मिथुनानि यथाशक्त्या भोजयित्वा यथासुखं॥ नान्ये
हं तु जगद्धात्रि निर्विघ्नं कुरु मे शुभे॥ हितं प्रतिदिनं श्रेष्ठं कुर्यात् न्यग्रोधसेवनं॥ कृत्वा वंश
मये पात्रे वालुकाप्रस्थमेव च॥ सप्तधान्यं ततं पात्रं प्रस्थैकेन द्विजोत्तम॥ कारयेन्मुनिशार्दू
लवस्त्रयुग्मेन वेष्टयेत्॥ तस्योपरि न्यसेद्देवीं सावित्रीं ब्रह्मणा सह॥ सावित्री सत्यवांश्चैव का
यौ रौप्यमयौ बुधैः॥ पीठकं च कुंवारं च कृत्वा रौप्यमयं द्विज॥ फलैः कालोद्भवैर्देवीं पू राम
जयेद् ब्रह्मणः प्रियां॥ हरिद्रारंजितैश्चैव कंवस्त्रैः समर्चयेत्॥ सरवीनोकं वस्त्राणि त्रिदिनं प्र २१९
तिपादयेत्॥ पक्वान्नानि च देयानि नित्यमेव द्विजोत्तमः॥ पुराणश्रवणं कार्यं सतीनां चरितं विभो॥

पूजयेन्निस्मेवेहमंत्रेणानेन सुव्रत॥ सावित्री च प्रसावित्री सततं ब्रह्मणः प्रिया॥ ह्यस्य मे रूपसे
देवि द्विजे मुनिगणैः सदा॥ त्रिसंध्ये देवि सततानां वंदिता त्वं जगन्मये॥ मया दत्ता च पूजेयं प्रतिगृह्ण
नमोस्तु ते॥ नमः सावित्र्यै पादोतु इति पूर्वोक्तिपूजनं॥ सावित्री प्रसावित्री त्वं विधात्रृता त्रिगोनने
॥ जगत्त्रयस्थिता देवी त्रिसंध्या च तथानघे॥ त्रित्वे देवि त्रिलोके च त्रेतागे त्वं महेश्वरि॥ व्यापितं
सकलं लोकं अतो मां पाहि सर्वदा॥ रूपं देहि मे शुभे॥ पुत्रान् देहि धनं देहि मे शुभे॥ पुत्रान् देहि धनं दे
हि सर्वजन्मसु सर्वदा॥ यथा तेन वियोगस्ते न त्वं सहस्रेश्वरि॥ तथा मे सुमहाभागे कुरु त्वं जन्मजन्मनि॥
एवं संपूजयेद्देवं कमलासनसंस्थितं॥ एवं दिनत्रयं नीत्वा चतुर्थेऽहनि सत्तम॥ मिथुनानि च संपूज्य षो
डशैव द्विजोत्तमः॥ अर्चयित्वा तथाचार्यं सपत्नीकं सुसंमतं॥ तस्मै संकल्पितं सर्वं हेमसावित्री सं
युतं॥ मंत्रेणानेन दातव्यं द्विजमुख्याय सुव्रत॥ सावित्री कल्पविडषे प्रीणिपस्तथा मुने॥ सावित्री जग
तां माता सावित्री जगतः पिता॥ मया दत्ता च सावित्री सावित्री प्रतिगृह्यतां॥ अवैधव्यं च मे नित्यं यावत्क

व्रता० न्मनि जन्मनि॥ मृता च वर्तते लोके ब्रह्मणा पतिना सह॥ तत्रैव च चिरं कालं भुंक्ते भोगाननुत्तमान्॥ अ
३२० नेनैव विधानेन कर्तव्यं व्रतमुत्तमं॥ सर्वे मनोरथाः प्राप्य अंते रुद्रोपजायते॥ ॥इति श्रीस्कांदे सावित्री
व्रतं॥ ॥अथान्यत्सावित्रीव्रतं हेमाद्रौ स्कांदे॥ धर्मराजवरदानानंतरं॥ ॥सावित्र्युवाच॥ ॥यामदीयं व्रतं देवत
त्त्वा नारी करिष्यति। भर्त्रा सा सहिता साध्वी समस्तसुखभाजना॥ ॥धर्मराज उवाच॥ नारी वा विधवा वापि
अपुत्रा पतिवर्जिताः॥ सभर्तृका सपुत्रा वा कार्यं व्रतमिदं शुभे॥ ज्येष्ठमासे तु संप्राप्ते पौर्णमास्यां
पतिव्रता॥ स्नात्वा चैव वृक्षमूर्विर्हृत्वा वटं सिंचेदबकदकैः॥ सूत्रेण वेष्टयेद्भक्त्या गंधपुष्पाक्षतैः
शुभैः॥ नमो वैवस्वतायेति भ्रामयेत् प्रदक्षिणं॥ रात्रौ कुर्वीत नक्तं च अष्टमेकं समाहिता॥ तथैव
वटवृक्षं च पक्षे पक्षे प्रपूजयेत्॥ संप्राप्ते तु पुनर्ज्येष्ठे लघु भुक्त्वा दशमीं नयेत्॥ दंतानां धावनं कृ राम
त्वा नियमं कारयेत्ततः॥ त्रिरात्रं लंघयित्वा च चतुर्थे दिवसे त्वहं॥ चंद्राय अर्घ्यं प्रदत्वा च तर्पयित्वा शु ३२०
भा सती। मिष्टान्नानि यथाशक्त्या भोजयित्वा द्विजोत्तमान्॥ भोक्ष्येऽहं तु जगद्धात्री निर्विघ्नं कुरु मे शुभे॥

नियममंत्रः॥ कृत्वा वंशमये पात्रे वालुकाप्रस्थमेव च॥ सप्तधान्ययुतं पात्रं प्रस्थैकेन द्विजोत्तम॥ व
स्त्रद्वयोपरि संस्थाप्य सावित्रीं ब्रह्मणा सह॥ हैमीं कृत्वा तयोः प्रीत्यै त्रिरात्रमुपवासतः॥ न्यग्रोधस्य
ततो तिष्ठेद्यावद्वै दिनत्रये॥ सौवर्णीं चैव सावित्रीं सत्येन सह कारयेत्॥ रौप्यपर्यंकमारोप्य तस्योप
रि निवेशयेत्॥ पलार्द्धं वा यथाशक्त्या रथं रौप्यमयं शुभं॥ काष्ठजातं कुमारं च पर्वतं चैव सुविस्तृतं॥
एवं च मिथुनं कृत्वा पूजयेत्तन्मनस्वराः॥ वर्तुलं मंडलं कार्यं गोमयेन तपोधन॥ पंचामृतेन स्नपनं गंध
पुष्पोदकेन च॥ चंदनागरुकर्पूरैर्माल्यैर्वस्त्रैर्विभूषणैः॥ नमः सावित्र्यै पादौ तु प्रसावित्र्यै च जानु
नी॥ कटिं कमलपत्राक्ष्यै उदरं भूतधारिण्यै॥ उग्राय वै नमः कंठं शिरसि ब्रह्मणः प्रिये॥ अथ ब्रह्म
णस्स्ववतोः॥ पादौ धात्रे नमः जंघे बुलजेष्ठावै नमः॥ परमेष्ठिं च मेढ्रं च अग्निरूपाय वै कटिं॥ वेध
से चोदरं पुण्यं पद्मनाभाय वै हृदि॥ कंठं तु वेधसं भज्य मुखं हिरण्यगर्भते॥ ब्रह्मणे वै शिरः स्वयम
वं गं विश्वं वै नमः॥ अर्घ्यं चैव क्रमेणैव वस्त्रं शास्त्रोक्तविधिना शुभं॥ ततो रजतपात्रेण अर्घ्यं दद्या

व्रता० २२१ प्रयोः॥ अथार्घ्यं॥ ॐकारपूर्विके देवि वीणापुस्तकधारिणि॥ वेदमातर्नमस्तेस्तु अवैधव्यं प्रय
च्छ मे॥ पतिव्रते महाभागे वह्निजाते शुचिस्मिते॥ दृढव्रते दृढमते भर्तुश्च प्रियवादिनि॥ अवैधव्यं
च सौभाग्यं देहि त्वं मम सुव्रते॥ पुत्रान्पौत्रांश्च सौख्यं च गृहाणार्घ्यं नमो नमः॥ अथ ब्रह्मसत्यवतोरर्घ
मंत्रः॥ त्वया सृष्टं जगत्सर्वं सदेवासुरमानुषं॥ सत्यव्रतधरो देव ब्रह्मरूप नमोस्तु ते॥ अथ यमाय
पार्घ्यं॥ त्वं कर्मसाक्षी लोकानां शुभाशुभविवेककृत्॥ वैवस्वत गृहाणार्घ्यं धर्मराज नमोस्तु ते॥ ध
र्मराजः पितृपतिः साक्षी भूतेषु जंतुषु॥ कालरूप गृहाणार्घ्यमवैधव्यं च देहि मे॥ गंधपुष्पैश्च नैवेद्यै
ः फलैः कुसुमदीपकैः॥ रक्तवस्त्रालंकारैः पूजयेत्तन्मनस्वरा॥ अथ सावित्रीप्रार्थना॥ सावि
त्री ब्रह्मगायत्री सर्वदा प्रियभाषिणी॥ तेन सत्येन मां पाहि दुःखसंसारसागरात्॥ त्वं गौरी त्वं शची
लक्ष्मीस्त्वं प्रभा चंद्रमंडले॥ त्वमेव च जगन्माता त्वमुद्धर वरानने॥ सौभाग्यं कुरु वर्द्धि च देवि त्वं म राम २२१
म सुव्रते॥ यन्मया दुष्कृतं सर्वं कृतं जन्मशतैरपि॥ भस्मीभवतु तत्सर्वमवैधव्यं च देहि मे॥ अथ

यमसत्यवतोः प्रार्थना॥ अवियोगो यथा देव सावित्र्या सहितस्तव॥ अवियोगस्तथास्माकं भूयाज्ज
न्मनि जन्मनि॥ यमप्रार्थना॥ कर्मसाक्षी जगत्स्वामिन् सर्वसंपत्प्रसीद मे॥ संवत्सरव्रतं सर्वं परिपूर्णंतर
स्तु मे॥ सावित्री त्वं यथा देवी चतुर्वर्षशतायुषं॥ पतिं प्राप्तासि गुणिनं मम देवि तथा कुरु॥ सावित्री
च प्रसावित्री सततं ब्रह्मणः प्रिया॥ शक्तितासि द्विजैः सर्वैस्त्रिभिर्मुनिगणैस्तथा॥ त्रिसंध्यं देवि नि
तानां वंदनीयासि सुव्रते॥ सपाद्गावप्रजे यंतां गृहाण नमोस्तु ते॥ जागरं तत्र कुर्वीत गीतनृत्यादि
मंगलैः॥ सुवासिन्यः स्तुतः पूजा दिवसे दिवसे गते॥ सिंदूरं कुंकुमं चैव तांबूलं च समर्पकं॥ तथाद
द्याच्च स्वरूपीणि च स्वसौभाग्यमष्टकं॥ सा तिष्ठेच्च दिवारात्रौ कामक्रोधविवर्जिता॥ दिनत्रये पि क
र्त्तव्यमेवमघादिपूजनं॥ ततश्चतुर्थे दिवसे यत्कार्यं तच्छृणुष्व मे॥ मिथुनानि चतुर्विंशः षोडश
द्वा षोडश द्वादशाष्ट वा॥ पूजयेद्दक्षगोदानैर्भूषणाच्छादनासनैः॥ उद्यापं कार्यं च ततः पश्चाद्व्रतस्य
वै विधिकारक॥ सर्वलक्षणसंपन्नं सर्वशास्त्रार्थपारगं॥ वेदविद्याव्रतस्नातं शांतं तं विजितेंद्रियं॥ स

व्रता० ३२२ पत्नीकं सम्यगभ्यर्च्य वस्त्रालंकारकुंडलैः॥ वाप्यां सोपस्करां दद्याद्गृहं चैवातिशोभनं॥ अशक्तस्तु
यथाशक्त्या स्तोकं स्तोकं च कल्पयेत्॥ सौवर्णीं प्रतिमां पुत्रपतिना सह दापयेत्॥ दानमंत्रः॥ सावि
त्री त्वं यथा देवि चतुर्वर्षशुभायुषा॥ सत्यवंतं पतिं लब्ध्वा मया दत्ता तथा कुरु॥ सावित्री जगतां माता सा
वित्री जगतः पिता॥ मया दत्ता च सावित्री ब्राह्मणः प्रतिगृह्यतां॥ प्रतिग्रहमंत्रः॥ मया गृहीता सावित्री त्व
या दत्तास्तु शोभने॥ यावच्चंद्रश्च सूर्यश्च सहमत्रास्तु सुखी भव॥ गुरुं च पुत्रपत्नीं च ततो नत्वा क्षमाप
येत्॥ यन्मया कृतवैकल्यं व्रतेस्मिन्गुरधिष्ठितं॥ सर्वं संपूर्णतां यातु युवयोर्वचनेन तु॥ धर्मराजो यशोधाता
नितः कालांतको यमः॥ वैवस्वतश्चित्रगुप्तः स्तोमस्तु हयो वरः॥ मामिमासितपास्वेतैर्नामभिः सेचयेद्व
टं॥ न्यग्रोधे हं वसे नित्यं तस्माद्यत्नेन सेचयेत्॥ ततो गुरुं सपत्नीकं पूजयेद्वा तु विस्मयात्॥ वृषभैश्वस्तु व राम
स्त्रैश्च कुंकुमैश्च मनोहरैः॥ न्यग्रोधस्य समीपे तु गत्वा स्थंडिले शुभे॥ सावित्र्याश्चैव मंत्रेण घृतं होमं तु का ३२२
रयेत्॥ पायसं तु कृपायज्ञस्मा घृतेन सह भामिनी॥ व्याहृतीश्चैव मंत्रेण तिलव्रीहियवांस्तथा॥ होमांते दक्षि

णां दद्याद्वित्तशाठ्यविवर्जितः॥ क्षमापयेत्ततो विप्रं वंद्य पादौ प्रयत्नतः॥ भुंजीत वा कंसरां तेषु
नक्तेषां तातपस्विनी॥ अर्घं दद्यादरुंधत्यै दृष्ट्वा वैव प्रणम्य च॥ अरुंधति नमस्तेस्तु वसिष्ठस्य
प्रिये शुभे॥ सर्वदेव नमस्कार्ये पतिव्रते नमोस्तु ते॥ अर्घमेतन्मया दत्तं फलपुष्पसमन्वितं॥ पुत्रान्देहि
सुखं देहि गृहाणार्घं नमोस्तु ते॥ सखिभिर्ब्राह्मणैः सार्धं भुंजीत विजितेंद्रियाः॥ एवं करोति या
नारी व्रतमेतदनुत्तमं॥ मातरः पितरौ पुत्राः श्वशुरौ स्वजनस्तथा॥ चिरायुषस्तथारोग्यास्तुश्च जन्म
त्रितयं॥ भर्त्रा च सहिता साध्वी ब्रह्मलोके महीयते॥ ॥ इति व्रतार्के स्कांदे सोद्यापनं सावित्रीव्र
तं॥ ॥ आषाढपौर्णमास्यां गोपद्मव्रतं॥ तत्र पूजा॥ ॥ चतुर्भुजं महाकायं जांबूनदसमप्रभं॥ शंखच
क्रगदापद्मरमागरुडशोभितं॥ सेवितं मुनिभिर्देवैर्यक्षगंधर्वकिंनरैः॥ एवंविधं हरिं ध्यात्वा ततोप
चारमारभेत्॥ ध्यानं॥ आवाहयामि देवेशं भक्तानामभयप्रदं॥ स्निग्धकोमलकेशं च मनसावाह
येद्धरिं॥ सहस्र० आवाहनं॥ सुवर्णमणिनिर्दिष्टैः रचिते रत्ननिर्मिते॥ दिव्यसिंहासने कांत उपविश्य प्र

व्रता०
२२२

सीदमे॥ पुरुष० आसनं॥ पादोदकं सुरश्रेष्ठ सुवर्णकलशोस्थितं॥ गंधपुष्पाक्षतैर्युक्तं पाद्यं मे गृह्य
तां विभो॥ एतावा० पाद्यं॥ अष्टद्रव्यसमायुक्तं स्वर्णपात्रोदकं शुभं॥ नोऽस्मी नर्मदासिंधुकावेरी
भ्यः स्नानं मयाहृतं गृह्ण पंकरभक्ता नाम गृहाचमनीयकं॥ तस्माद्विरा० आचमनी॥ गंगागोदावरी चैव यमु
ना च सरस्वती॥ नर्मदा सिंधु कावेरी ताभ्यः स्नानं मयाहृतं॥ यत्पुरुष० स्नानं॥ वस्त्रयुग्मं समानीतं पट्टसू
त्रेण निर्मितं॥ सुवर्णखचितं दिव्यं गृहाण त्वं सुरेश्वर॥ तं यज्ञं० वस्त्रं॥ कार्पासतंतुभिर्युक्तं ब्रह्मणा निर्मि
तं पुरा॥ अनेकरत्नखचितमुपवीतं गृहाण मे॥ तस्मात्० यज्ञोपवीतं॥ चंदनं मलयोद्भूतं कस्तूर्यग
रुसंयुतं॥ कर्पूरेण च संयुक्तं स्वीकुरुष्वानुलेपनं॥ तस्मा० गंधं॥ शतपत्रैः कर्णिकारैः चंपकैर्मल्लिकादि
भिः॥ तुलस्या युक्तपुष्पाणि गृहाण पुरुषोत्तम॥ तस्मादश्वा० पुष्पं॥ दशांगगुग्गुलं धूपं सुगंधं च
मनोहरं॥ कृष्णागरुसमायुक्तं धूपं देव गृहाण मे॥ यत्पुरुषं व्य० धूपं॥ आज्यं च वर्तिसंयुक्तं वह्निना योजि
तं मया॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापहं॥ ब्राह्मणोस्य० दीपं॥ अन्नं चतुर्विधं स्वादु रसैः षड्भि

राम
२२२

समन्वितं॥ भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यतां॥ चंद्रमा० नैवेद्यं॥ इदं फलं॥ पूगीफलं महद्दिव्यं०
नाग्ना० तांबूलं॥ हिरण्यगर्भगर्भस्था० दक्षिणा॥ यज्ञेन पुष्पांजलिं॥ ततद्वषोत्तं वायनं॥ सुपक्वान्नमिदं
विप्र गृहाण त्वं द्विजोत्तम॥ व्रतस्य समादारदं हि विप्रव्रतस्य फलमाप्नुयात्॥ प्रदक्षिणा॥ मंत्रहीनं० प्रार्थना॥ ॥
॥॥ अथ कथा॥ ॥ सूत उवाच॥ ॥ नाथैकत्वं हि भक्तानां चतुर्वर्गफलप्रदं॥ सर्वरोगप्रशमनं विष्णुसारू
प्यभुक्तिदं॥ नारीणामथवा पुंसां भुक्तिमुक्तिफलप्रदं॥ ब्रूहि चेदस्ति देवर्षे कृपां कृत्वा ममोपरि॥ ॥ नारद
उवाच॥॥ भगवन्सर्वमाख्यातं यत्पृष्टं विदुषा त्वया॥ गोपद्मकं व्रतं त्वेनं व्रतानामुत्तमं व्रतं॥ कर्तुं सिद्धिं
करं दिव्यं विख्यातं भुवनत्रये॥ ॥ सनत्कुमार उवाच॥ ॥ भगवन्नत्र भवेरा सर्वशास्त्रविशारद॥ तत्र
तं ब्रूहि मे ब्रह्मन्कथमुद्यापनं भवेत्॥ पुरेदं केन चाचीर्णं देवर्षे कथय व्रतं॥ ॥ नारद उवाच॥ ॥
आषाढ कार्त्तिको मासौ व्रतग्रहणसिद्धिदौ॥ आषाढ्यां पौर्णमास्यां तु तथा शुक्लां हरेर्दिनो॥ प्रारंभे
कृतमेतच्च कार्त्तिकावधि तत्तिथौ॥ तिलामलककल्केन स्नानं नित्यं विधाय च॥ नदीतीरेथवा गो

व्रता० २२४ देशे शिवागारे हरेर्गृहे ॥ श्रुत्वेदं दावने वापि लिखेद्वेशोयमकं पदं ॥ त्र्यहः स्त्रियास्तु पक्षानि कुर्यात्स्नात्वा
२२४ दिने दिने ॥ तत्रैवं रक्षयामक नैवेद्यार्घ्यप्रदक्षिणनतिः ॥ बाणं कलशं समुद्दिश्य पञ्चरत्नसमन्वितं
गुरुं ॥ गंधाद्यैरुपचारैः स्वयथाशक्त्या समर्पयेत् ॥ ब्राह्मणांश्च ततः पश्चादुपसंख्यात्र मुत्सृजेत
॥ प्रथमे हि पञ्चरके द्वितीये तपके व्रतं ॥ तृतीये शालि मिष्टान्ने चतुर्थे देरिकादिभिः ॥ पंच
मे परमान्नेन स्वसमर्पयेत् व्रती ॥ अत्रैवोदाहरंतीममितिहासं पुरातनं ॥ ऋषीणां हृच्छमाना
नां सूते तेनोक्तं मया श्रुतं ॥ ॥ ऋषय ऊचुः ॥ ॥ केनचादौ पुरा चीर्णमिदं केन प्रकाशितं ॥ कथयु
द्यापनं तस्य किं फलं तस्य कथ्यतां ॥ ॥ सूत उवाच ॥ ॥ पुरा शक्रो मरावत्यां देवदानवकिंनरैः
॥ रुद्रैरादित्यवसुभिः गंधर्वैर्वसुभिः सह ॥ रंजमानं संसभारे मे कीडाजोने नविकला ॥ एवं तस्ये राम
क्रियमाणे स्तुतिं मासि मेऽडलं ॥ क्षणमात्रं विचार्याथ धर्मराजस्तमुक्तवान ॥ ॥ यम उवाच ॥ ॥ २२४
जन्ममध्ये व्रतं येश्च न कृतं प्राणिभिः क्वचित् ॥ न धर्मस्तस्य मुनिः शाक्रकर्तव्यं चास्तं तयोः ॥ नार

देन श्रुतं तत्र जगाम यदुनंदनं ॥ स्वर्चयित्वा तु तं कृष्णो वचनं चेदमब्रवीत् ॥ कृष्ण उवाच ॥ सर्वलो
कस्य देवर्षे भुवनेषु चरस्सदा ॥ तत्र ज्ञातं महाश्चर्यं श्रुतं मे धर्मसंसदि ॥ तत्र सर्वे समायाताः सुरें
द्राश्च तु देवताः ॥ रुद्रा एकादश विधु रादित्या द्वादशापि वा ॥ वसवोष्टौ तथा नागा यक्षराक्षसपन्नगाः ॥
रंजयाश्च समारब्धं नृत्यं शाक्रस्य पश्यतः ॥ त्रुटितं चर्मवाद्यानां ध्रुवं तस्य साधनं ॥ यमः प्राह तदा
दूतान् सुनाशास्य व्रतास्त्रिनो ॥ तामानय च वै तत्र धर्मवाद्ययोग्यं सदा द्विति ॥ तच्छ्रुत्वा तु मया जीमास
र्वेद्यपि निवेदितं ॥ ॥ सूत उवाच ॥ ॥ इति नारदवाक्यं तु श्रुत्वा कृष्णस्तरान्वितः ॥ सुतनाया गृहं
गत्वा हरिस्तास्ताम्बुवाच ह ॥ किंचिद्व्रतं मया जन्मे कृतं वा नेति संशयः ॥ ॥ सुतनयोवाच ॥ ॥ सर्वव्रतानि
नो कृष्ण कृतान्येव न संशयः ॥ नेम्वेतद्वसह देर्यं न स्यामहं नवक्षजं ॥ पुत्रोसि मन्तुश्च कथं कथ
यस्व जगत्पते ॥ ॥ कृष्ण उवाच ॥ ॥ तथापि त्वं महाभागे व्रतमेकं समाचर ॥ मे पञ्चमी च विख्याता त्रिषु लो
केषु विश्रुतं ॥ इति कृष्णवचः श्रुत्वा सुतनया तत्तदा करोत् ॥ कृष्णोपदिष्टविधिना सर्वं तच्च समापितं ॥ सो

द्यापनेव्रतेपूर्णेकालेयमनटायपुः॥ ॥हृताऊचुः॥ ॥सुतद्देतवदेहस्यचमर्त्येष्वागतावयं॥त्व
मस्तुरवाद्यार्थयमेनचप्रकल्पितं॥इतिहृतवंश्रुत्वासव्रतास्मीतिसाब्रवीत्॥ततोभटाःसर्वएव
दृढ्चुःसादरस्तदा॥पश्यतामिवसंतस्यागहेगांचसवत्सकां॥स्थंडिलेहस्तमात्रेतुसुसमिद्धंहु
ताशनं॥कल्पोपदिष्टंवीर्यैवंभटाजग्मुर्यमांतिकं॥प्रापद्यतप्रभावेनसुभद्रापदमच्युतं॥ ॥नार
दउवाच॥ ॥इतितत्तवचःश्रुत्वाऋषयश्चक्रिरेव्रतं॥॥सनत्कुमारउवाच॥ ॥भोभोनारददेवर्षे
सर्वज्ञानसुनिधे॥श्रीग्रंथहिसरवेमेघव्रतस्योद्यापनेविधिं॥नारदउवाच॥पूर्णेतुपंचमेवर्षेव्र
तस्योद्यापनंभवेत्॥श्रीविष्णोःप्रतिमाकार्यासुवर्णस्यपलेनवै॥पुष्पमंडपिकाकार्याचतुर्द्वारा
सुशोभना॥तत्रध्येपूजयेद्भक्त्यारमयासहितंहरिं॥त्रयस्त्रिंशत्ततोविप्रान्हुत्वाहोमंसमाचरेत्॥
अतोदेवेतिमंत्रेणजुहुयात्तिलपायसं॥रक्तवस्त्रयुतांधेनुमाचार्यायनिवेदयेत्॥ब्राह्मणंश्चस
पत्नीकान्भोजयेत्पूजयेत्तथा॥एवंयःकुरुतेविप्रःतस्यश्रीस्थिराभवेत्॥यंयंचिंतयतेकामंतं

तंप्राप्नोत्यसंशयं॥अंतेविष्णुपदंगच्छेत्सर्वपापविवर्जितः॥ ॥इतिनारदीयेगोपद्मव्रतं॥ ॥अत्रमू
लंशिष्टाचारएव॥ ॥अथाषाढपौर्णमास्यांकोकिलाव्रतं॥ ॥आषाढस्याधिमासत्वेलोकानुष्ठा
नंतुनिःप्रमाणं॥तद्विधिः॥आचम्यप्राणानायम्यमासपक्षाद्युल्लिख्यममेहजन्मनिसर्वपापक्षय
पुत्रपौत्रलक्ष्मीअवैधव्यप्रपत्नीनाशसौभाग्यसिद्धिद्वाराकोकिलारूपगौरीप्रीत्यर्थंकोकिलाव्र
तंकरिष्यइतिसंकल्प्य॥आषाढपौर्णमास्यांतुसंध्याकालेह्युपस्थिते॥संकल्पयेन्मासमेकंश्रा
वणेप्यहमहंव्रतं॥स्नानंकरिष्येनियमाद्ब्रह्मचर्यस्थितासती॥भोक्ष्यामिनक्तंभूशय्यांकरिष्ये
प्राणिनांदया॥मित्युक्त्वास्नानंकरोमिदेववरेदेविकोकिलेप्रियतेतवधजलेस्मिन्पावनेपुण्येसर्वदेव
जलनाशाय॥इतिमंत्रेतिलामलकैःसर्वौषधीजलेनवचापिष्टेनवाष्टौदिनानित्रेसेकतिलामलकापि
ष्टेनवन्यौषधीयुतेनच॥षट्दिनान्येवंमासावधिस्नानेक्रमः॥एवंस्नात्वारविंध्यात्वातस्मैअर्घ्यं
दद्यात्॥ततःआदित्यभास्कररवेअर्कस्वरूपदिवाकर॥प्रभाकरनमस्तुभ्यंगृहाणार्घ्यंनमोस्तुते

व्रता०
२२६

इति स्तुत्वा विधिः॥ ततः स्वर्णपक्षां गौरपादां मौक्तिकनेत्रां प्रवालमुखां रत्नपृष्ठां चूतचंपकवृक्षस्थां
पक्षिरूपिणीं कोकिलां लिखित्वा पूजयेदित्युक्तं॥ स्वर्णपक्षां रत्ननेत्रां प्रवालमुखपंकजां॥ कस्तु
रीवर्णसंयुक्तां मुसल्लानंदनेवने॥ चूतचंपकवृक्षस्यां पुष्प — समन्वितां॥ चिंतयेत्पार्वतीं देवीं को
किलारूपधारिणीं॥ ध्यानं॥ आवाहयामि त्वां देवि कोकिलारूपधारिणीं॥ आगच्छ कोकिले देवी
देहि मे वांछितं फलं॥ चंपककुसुमारूढा क्रिडसे नंदनेवने॥ आवाहनं॥ आसनं हैममवस्त्रेणनि
र्मितं त्वनघे तव॥ गृहाणेदं मया दत्तं कोकिले प्रीतिवर्धिनि॥ आसनं॥ तैलस्नेहे तिलमुखे तिल
सौख्ये तिलप्रिये॥ सौभाग्यं धनपुत्रांश्च देहि मे कोकिले नमः॥ तिलपुष्पफलैर्युक्तं पाद्यं
मे प्रतिगृह्यतां॥ पाद्यं॥ रत्नचंपकपुष्पैश्च पीतचंदनसंयुतं॥ हेमपात्रस्थितं तोयं गृह्याणार्घ्यं न
मोस्तु ते॥ अर्घ्यं॥ निर्मलं सलिलं गांगं कोकिले पक्षिरूपिणी॥ वासंतं च सुगंधेन गृहाणाचम
नीयकं॥ आचमनं॥ पंचामृतेन स्नपनं कोकिले कलकंठके॥ मया दत्तेन प्रीतात्वं भव त्वं परमे

राम
२२६

श्वरि॥ मंदाकिनीजलं पुण्यं सर्वतीर्थसमन्वितं॥ स्नानार्थं ते मया दत्तं कोकिले गृह्यतां नमः॥ स्नानं॥
यस्मात्कार्यासिसूत्रेण वासांसि विधानेच॥ पीतवस्त्रप्रदानेन प्रीता भव ममांबिके॥ वस्त्रं॥ कंचुकं च
मया दत्तं नानावर्णविचित्रितं॥ कोकिले गृह्यतां देवी प्रसीद परमेश्वरि॥ हरिद्रारंजितं देवी वस्त्रं भ
व मे बिके॥ कंठसूत्रं॥ यानि रत्नानि सर्वाणि गंधर्वेषु रगेषु च॥ तैर्युक्तं भूषणं हैमं कोकिले प्रतिगृ
ह्यतां॥ भूषणं॥ श्रीखंडचंदनं दिव्यं मलयाद्रिसमुद्भवं॥ विलेपनं सुरश्रेष्ठे गृह्यतां परमेश्वरि
॥ गंधं॥ अक्षताः॥ कुंकुमासक्तकं दिव्यं कामिनी भूषणस्पदं॥ सौभाग्यदं गृहाणेदं प्रसीद हरव
ल्लभे॥ कुंकुमादि॥ शतपत्रैर्जातिपुष्पैश्चंपकैर्मल्लिपत्रकैः॥ पाटलैश्चैव रूपाणि युतपुष्पं गृ
हाण मे॥ पुष्पं॥ वनस्पतिरसोद्भूत इति धूपं॥ आज्यं च वर्तिसंयुक्तं इति दीपः॥ शर्करा खंडखाद्यानि
दधिक्षीरघृतानि च॥ आहारार्थं मया दत्तं नैवेद्यं प्रतिगृह्यतां॥ नैवेद्यं॥ पाटलोशीरकर्पूरसुतं स्वादु सुशी
तलं॥ पानीयार्थं मयानीतं कोकिले प्रतिगृह्यतां॥ चंदनानि गरुकर्पूरकस्तूरीकेशरान्वितं॥ करो

BHAU DAJI MEMORIAL

व्रता० ३२७

यत्तनिकंदे विगत्यग्रतां हरवल्लभे॥ करोद्वर्तनं॥ कूष्मांडं नालिकेरं च पनसं कदलीफलं॥ जांबवं मातुलिं
गंच फलं गृह्ण नमोस्तु ते॥ पूगीफलं महद्दिव्यं इति तांबूलं॥ हिरण्यगर्भेति दक्षिणा॥ कोकिले कल
वर्णे च सदा वसति कानने॥ भवानी हरकांतायै कोकिलायै नमो नमः॥ नीराजनं॥ पूजिता परया भ
क्त्या कोकिला गिरिशप्रिया॥ पुष्पैर्नानाविधैः श्रेष्ठैः वरदास्तु सदा मम॥ पुष्पांजलिः॥ कोकिला
रूपधारिण्यै जगन्मात्रे नमोस्तु ते॥ शरणागतदीनं त्वं त्राहि देवी सदांबिके॥ गंधपुष्पाक्षतैर्यु
क्तं पोपहेमफलान्वितं॥ अर्घ्यं गृहाण देवेशि वांछितार्थं प्रयच्छ मे॥ आषाढस्यासिते पक्षे मेघ
वर्णे हरप्रिये॥ कोकिले त्वं जगन्मातर्गृहाणार्घ्यं नमोस्तु ते॥ पुनरर्घ्यः॥ तिलस्नेहे तिलसुखे रू
पं देहि यशो देहि ति प्रार्थना॥ अंते हैमीं तिलपिष्टजां कोकिलां कृत्वा विप्राय दद्यात्॥ देवि मि
त्ररथे स्पन्ने विंध्यपर्वतवासिनी॥ अर्चिता पूजितासि त्वं कोकिले हरवल्लभे॥ कोकिले कान राम
कंवासि माधवे मधुरस्वरे॥ वसंते वसते देवि गच्छ त्वं नंदनं वनं॥ विसर्जनं॥ ॥इति कोकिलाव्र ३२७

तपूजा॥ ॥अथ कथा॥ ॥युधिष्ठिर उवाच॥ ॥भर्तुर्रतिसंबंधे महास्नेहो यथा भवेत्॥ कुल
स्त्रीणां यथा च स्वव्रतं मम जगद्गुरो॥ ॥कृष्ण उवाच॥ ॥यमुनायास्तटे पूर्वे मथुरास्ति पुरी शुभा
॥तस्यां शत्रुघ्ननामाभूद्राजा राघववंशजः॥ तस्य भार्या कीर्तिमाला नाम्नासीत्स्वपतिव्रता भुवि॥ त
याभ्यागच्छद्भगवान् वसिष्ठो मुनिसत्तमः॥ पृष्टः कथं मुनिश्रेष्ठ सौभाग्यमतुलं लभेत्॥ एवमु
क्तस्तया राज्ञ्या वसिष्ठः कीर्तिमालया॥ ध्यात्वा मुहूर्तमात्रं सौख्यं कोकिलाव्रतमुत्तमं॥ वसिष्ठ
उ०॥ ॥आषाढपौर्णमास्यां तु संध्याकाले ह्युपस्थिते॥ संकल्पयेन्मासमेकं श्रावणे स्वमहं त्वहं॥
स्नानं करिष्ये तिथिना ब्रह्मचर्ये स्थिता सती॥ नो सभक्तं न बाप्पा करिष्ये प्राणिनां दया॥ इति संक
ल्प्य पुरुषो नारी वा ब्राह्मणांतिके॥ प्राप्यानुज्ञां ततः प्रातः सर्वसामग्रिसंयुतः॥ पुरुषः प्रतिपत्काले
दंतधावनपूर्वकं॥ स्नानं कुर्यात्तते पार्थ सुगंधामलकैस्तिलैः॥ दिनाष्टकं ततः पश्चात्सर्वौष
धैः पुनः पुनः॥ वचया पिष्टया चाष्टौ दिनानि दृषधाम्बरेण॥ स्नात्वा ध्यात्वा रविं संध्यां तर्पयित्वा पित्

व्रता० नस्तथा॥ तर्पयित्वा लिखेद्विसिष्टैः कोकिलां पक्षिरूपिणीं॥ कज्जलं कुंकुमं गंधं सुगंधैः पुष्पैः प्रपूजयेत् पक्को
३२८ द्भवैः॥ पत्रैर्वाथ धूपनैवेद्यैः दीपमाल्यकचंदनैः॥ तिलतंडुलदूर्वाद्यैः प्रपूजयेन्नां क्षमापयेत्॥ नि
वेतिल व्रती मंत्रामंत्रेणानेन पांडव॥ तिलस्नेहे तिलसुखे तिलसौख्ये तिलप्रिये॥ सौभाग्यध
नपुत्रांश्च देहि मे कोकिले नमः॥ इत्युच्चार्य ततः पश्चाद्धमम् एव संयतः॥ कृताहारस्वपेत् भार्यया
वन्मासः समाप्यते॥ मासांते ताम्रपात्रां तु कोकिलां तिलपिष्टजां॥ रत्ननेत्रां स्वर्णपक्षां ब्राह्मणाय नि
वेदयेत्॥ वस्त्रैर्गुडैस्तथा युक्तां श्वावर्णां कुलजाय च॥ श्वश्रुश्वशुरवर्गं वा देवरे वा पुरोहिते॥
॥ व्यासेवसंप्रदातव्या प्रतिनिः शुल्कां कृपा॥ तिलस्नेहे इति दानमंत्रः॥ एवं या कुरुते नारी कोकिला
व्रतमादरात्॥ सप्तजन्मनि सौभाग्यं साप्राप्नोति सुविस्तरं॥ निःसपत्नं पतिं लब्ध्वा सस्नेहं प्राप्य भूतले॥ राम
॥ मृतो गौरीपुरं याति विनेतार्कसवर्चसा॥ एतद्व्रतं वसिष्ठेन मुनिना गदितं पुरा॥ तया चानुष्ठितं पार्थ स ३२८
मग्रं कीर्तिमालया॥ तस्माच्च सर्वसंपन्ना वसिष्ठवचनादिह॥ पुत्रसौभाग्यसत्कारं राजुधस्य प्रसाद

जं॥ एवमन्यापि कौंतेय कोकिलाव्रतमादरात्॥ चरिष्यति व्रते तस्याः सौभाग्यं च भविष्यति॥ ये कोकिलां कज
र वां काजलकं वपीगं यद्दुतिसाम्यति लपीश मयी हिजेम॥ तेनेंदनादिवनेषु विहृत्य कामं मर्त्येषु सन्मे
त्पमधुरस्वनयो भवंति॥ इति हेमाद्रौ भविष्योत्तरे कोकिलाव्रतं॥ ॥अथ परमाषाढाधिमासे गुर्ज
रम्वार प्राप्तं कोकिलाव्रतं॥ युधिष्ठिर उवाच॥ स्वजनैः सह संयोगः स्नेहः सौभाग्यमेव च॥ भवेद्य
था कुलस्त्रीणां तद्व्रतं ब्रूहि केशव॥ ॥कृष्ण उवाच॥ ॥यमुनायास्तटे रम्ये मथुरानगरे शुभा॥ तस्यां
शत्रुघ्ननामा नृपजो राघवनंदनः॥ तस्य नार्या कीर्तिमाला नाम्ना सीत्प्रथिता भुवि॥ प्रणम्य भग
वान्दृष्टो वसिष्ठो मुनिसत्तमः॥ ॥कीर्तिमालोवाच॥ वद मे त्वं मुनिश्रेष्ठ सौभाग्यप्राप्तिदं व्रतं॥
पूज्य कथं च भगवान् शिवः केन व्रतेन च॥ ॥वसिष्ठ उवाच॥ ॥पदिष्टं सि मे त्वं हि व्रतानामुत्त
मं व्रतं॥ तारणं सर्वपापानां कथयामि निबोध तत्॥ दक्षप्रजापतेर्यज्ञे पुरा देवाः समागताः॥ ऋ
षयश्च तथा सर्वे विद्याधरगणास्तथा॥ ब्रह्मा विष्णुश्च वायुश्च देवराजस्तथैव च॥ वरुणोपि

व्र.ता. २२९ गर्गः सर्वे ये चान्ये च दिवौकसः ॥ वसिष्ठो वाल्मीकिर्गार्ग्यो विश्वामित्रो महानृषिः ॥ एते चान्ये च
ऋषयः सर्वे यज्ञार्थमागताः ॥ अपरं पन्नारदस्तत्र संतिके आगता इति ॥ ईश्वरेण विना सर्वान्दृष्ट्वा
सर्वान्समागतान् ॥ शिरवांसंस्थ रूपाणि मानन कलहप्रियः ॥ ज्ञात्वा कलहमत्रं च शात्वा कैला
समाययौ ॥ सर्वाधिनाशनं स्थानं कैलासशिखरं शुभं ॥ तत्र दृष्ट्वा समासीनं गौरीसहितशंकरं ॥
कृतांजलिपुटो नत्वा प्रणिपत्य पुनः पुनः ॥ ईश्वरस्तमुवाचाथ निःश्वसंतमनेकधा ॥ किमागम
नकस्तेंते मेदीयं सदनं प्रति ॥ श्वासोच्छ्वासेन संयुक्तस्तन्मे ब्रूहि द्विजोत्तम ॥ ईश्वरस्य वचः श्रु
त्वा शिरवांसंस्थ रूपाणि नाम्ना दुःखयुक्त इवोवाच नारदः कलहप्रियः ॥ ॥ नारद उवाच ॥ ॥ पलि
मित्रं महादेव मर्त्यलोकात्समागतः ॥ त्वदंतिकं दुःखयुक्तस्तच्छृणुष्व जगत्पते ॥ दक्षयज्ञमहं राम
दृष्ट्वा मघदेवास्समागताः ॥ तत्र यज्ञस्थिताः सर्वे दक्षजामातरः प्रभो ॥ दृष्ट्वा त्वं च न तन्मध्ये दृष्टो वि २२९
न्नु वने ईश्वरः ॥ तवावरकृता तेन दक्षेण पुण्यकर्मणा ॥ तेन निःश्वाससंयुक्त आगतोस्मि च

[illegible]कं ॥ ईश्वरेण विना किंचित्सर्वकार्यं न सिध्यति ॥ अतोस्य विफलः सर्वः प्रयासः स्वमखं प्रति
॥ तस्य तद्भाषितं श्रुत्वा न तन्मिथ्येति चिंतयत् ॥ सक्रोधस्तु तदा जात ईश्वरो जगदीश्वरः ॥ गौर्यपि च श्रु
षितो देव श्रुत्वा तन्नारदेरितं ॥ तस्य यज्ञस्य घातार्थं देवदेव व्रजाम्यहं ॥ सुस्वर्णचालिता रो
षाद्दीश्वरेण निवारिता ॥ जगदीशनमस्कृत्य व्रजामि पितृवेश्मनि ॥ नारदेनाथ सहिता गणै
श्शोनाथ संयुता ॥ यज्ञार्थमागता वै वदक्षद्वारे शिवप्रियाः ॥ दक्षो दृष्ट्वा वसोर्धारां जक्रिता च शिवे
प्रियाः ॥ तिष्ठतिद्वारितां दक्षोन ददर्श महासती ॥ क्षणमेकं च तिष्ठंति पराहदक्षोन पश्यति ॥ तदे
वचिंतितं तं गौर्या जीवितव्यं मया कथं ॥ धाविता कुंडनिकटे हाहाकृत्वा च सा ततः ॥ क्षिप्तवत्येत्र
गौर्या शापं दत्वा सुदारुणं ॥ दृष्ट्वा तद्गणेशेन पाशः परसुरु च्यतः ॥ क्रुद्धोत्यसौ तदा सर्वगो
मोऽथ्ययेगणाधिपः ॥ पाशेन बध्वा कतिचित्कोपाल्लिहत वान्सुरान् ॥ दक्षेणमोरिता देवा सर्वे
पुत्रपनिर्ययुः ॥ महायुद्धमभूत्तत्र सह देवैर्गणेशितुः ॥ तं दृष्ट्वा नारदः शीघ्रं पुनः कैलासमाय

व्रता० पो॥ निवेदयामास च तद्वृत्तं स सर्वमीश्वरं॥ तच्छ्रुत्वास्फालयामास जटां कोपाद्रुकमापतिः॥ ततो
२२० जातो विविकटः पुरुषो रक्तलोचनः॥ स बभाषे महादेवं स्वामिन्नाज्ञां च देहि मे॥ विरभद्रेति ना
मास्य कृत्वा चाज्ञां समर्पयत्॥ दक्षयज्ञविधानार्थं गच्छ वीरार्थसत्त्वरं॥ श्रुत्वा तदीश्वरस्य च
:सर्वप्रथमयसं वृतः॥ आययौ वह्निसदनमत्स्य वह्निषु निक्षिपेत्॥ ततश्चन्द्रादयो देवास्तद्धा
यवि निर्ययुः॥ इन्द्राणस्य राजिताः स्तेन विद्रुताश्च दिशो दिश॥ अनुद्रुतश्च तान्सोपि पूष्णो दंतान
पातयत्॥ भगस्य नेत्रे नासा च सरस्वत्या निकृतः॥ एवं विद्राव्य तान्सर्वान्छिरो दक्षस्य
चिच्छिदे॥ कृत्वैवं यज्ञघातं स आजगाम शिवांतिकं॥ नमस्कृत्य पुरस्तस्थौ कृतं कार्यमिति ब्रु
वन्॥ तथाप्युग्रं तं कोपोस्य ज्ञात्वेति ज्ञानचक्षुषा॥ प्रमादयितुमीशानं ब्रह्मविष्णु समीपतुः॥ राम
नमस्कृत्य स्तुतस्तांस्यां प्रसन्नोभूत्सदाशिवः॥ नास्ति तु बुलश्चैव गीतैः शिवमतोषयत्॥ प्रसन्न २२०
वीक्ष्य तं विप्रः शिरवांसंस्थ शूलपाणिना॥ ननर्त नारदस्तत्र तोषयन्नधिकं शिवं॥ एतस्मिन्नतरे ब्रह्मा

विष्णुश्च प्रथमाधिकं॥ आविर्तयक्तं दक्षादीन्कृपादृष्ट्या विलोकय॥ हतांगान्कुरु पूर्णांगान्स्म
तान्संजीवय तत्क्षणात्॥ विलोकितास्ते देवेन कृपादृष्ट्या विलोकिताः॥ दक्षादयः सुरदा अनुवंस्त
त्प्रसादतः॥ उत्थितः पादयोर्लग्नं यया योदक्षः पिनाकिनः॥ अपराधं क्षमस्वेति पुनः पुनरुवाच
ह॥ उत्थापितः करेणासौ दक्षः पिनाकपाणिना॥ अतः क्षमा पुनः कार्षीरेवमीशावमाननं॥ वि
चरस्व सुखेनेति न्यपतत्कोप आविशत्॥ शापं च तदा गौरी यज्ञविघ्नकरीं शिवः॥ मुखे वि
घ्नकृत्तव तिरस्कस्पैपातान शिरात्॥ तिर्यग्योनिसमापन्ना विचरिष्यति नन्दनो॥ ततो गौरी विषा
दैनं प्रणिपत्य सदाशिवं॥ कथं यास्यामि तिर्यक्त्वं जातले च स्थितिः कथं॥ अत्र सा यत्र भविता
उणपश्व सत्त्वयोरित॥ कोकिला मधुरालापा भवेयं नंदनेयतः॥ कोकिलानां स्वरो रूपं नारी रूपं प
तिव्रता॥ विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनां॥ अचिरादेव च पुनः कुले महति जन्मतो॥ स्या
स्त्वमेव नर्तचिन वियोगश्चमेयतः॥ वरये कुलजां प्राज्ञः कुरूपामपि कन्यकां॥ दुःकुलेच समु

व्रता०
२२९

स्त्यस्तन्तुः पातयते द्विजं॥ नदी पातयते कूलं नारी पातयते कुलं॥ नरीतां चैव नारीणां स्वच्छंदं लति
तागतिः॥ ततस्तुष्टो महादेवश्चक्रे शापविमोचनं॥ दशवर्षसहस्राणि कोकिलारूपधारिणी॥
नंदने देवविपिने चरिष्यति ततः परं॥ हिमाचलसुता भूत्वा मत्प्रिया त्वमुपैष्यसि॥ देवानां तु य
था विष्णुः सहकारो महीरुहां॥ गंगा च सर्वतीर्थानां तथा तिर्यक्षु कोकिला॥ आषाढे क्षेपरा
स्मां तां कोकिलायास्तदार्चनं॥ नंदाया कुरुते नारी न सा वैधव्यमाप्नुयात्॥॥ वसिष्ठउवाच॥॥
एतच्छ्राव्यमाने तु गौरीशः कोकिलाऽभवत्॥ तदादि श्रुचि हैवैतं कथितं कोकिलाव्रतं॥ पा
नारी नैव कुरुते मोहस्सा विधवा भवेत्॥ कुरु त्वमेतत्कल्याणि कीर्तिमाले व्रतोत्तमं॥॥ किर्ति
मालोवाच॥ ॥ कथमाराध्यते गौरी कोकिलारूपधारिणी॥ विधानं ब्रूहि तद्विप्र त्वत्प्रसादात्कृतोस्म राम
हं॥ ॥ वसिष्ठ उवाच॥ ॥ कोकिलाव्रतमहात्म्यं विधानं च वदामि ते॥ शृणु देवि प्रयत्नेन मंत्रैः पौरा २२९
णिकैर्युतं॥ मलमासे त्वविक्रांते शुद्ध षाढे समागते॥ आषाढ्यां पौर्णमास्यां तु संध्याकाले ह्युपस्थि

डाक्टर भाऊ दाजी स्मारक संग्रह
Dr BHAU DAJI MEMORIAL

ते॥ संकल्पयेन्मासमेकं श्रावणे प्रतिदिनं ह्यहं॥ स्नानं करिष्ये तस्मिंश्च ब्रह्मचर्यं सितासितं॥ भोसेन
क्तं वर श्राप्पां करिष्ये प्राणिनां दयां॥ सौभाग्यधनधान्यादिप्राप्तये श्रीं वतुष्टये॥ इति संकल्प वि
ग्रे नारी विप्रेभ्य एव च॥ प्राणानुज्ञां तु संपाद्य सामग्री सकलामपि॥ प्रत्युषे च प्रतिदिनं दंतधावन
पूर्वकं॥ नद्यां गत्वाथवा वाप्यां तडागे गिरिनिर्झरे॥ स्नानं करोमि देवेशि कोकिले प्रीतये तव॥ जले
स्मिन्पावने पुण्ये सर्वदेव जलाश्रये॥ स्नानं कुर्याद्व्रती देवि सुगंधामलकैस्तिलैः॥ दिनाष्टकं ततः पश्चा
त्सर्वौषधापुनः स्पृक्॥ बचापीष्टेन च स्नानं दिनाष्टे समाचरेत्॥ दिनाष्टकं पिष्टेन वचौषधीयु
तेन च॥ षट् दिनानि ततः स्नानं संहर्णफलमश्नया॥ स्नात्वा ध्यात्वा रविं तस्मै दद्यादर्घ्यं प्रयत्नतः॥
आदित्य भास्करस्वेत्यर्क सूर्य दिवाकर॥ प्रभाकर नमस्तुभ्यं गृहाणार्घ्यं नमोस्तुते॥ सूर्यार्घ्यमंत्रः
॥ कारयेत्कोकिलां देवीं सौवर्णीं सर्वकामदां॥ रौप्यं चरणयोश्चैव नेत्रयोश्चापि मौक्तिकं॥ रत्नानि
पंचवर्णेस्तु रत्न हृदसमाश्रिता॥ अथवा तिलपिष्टेन कोकिलां पक्षिरूपिणीं॥ निधाय ताम्रपात्रे तां

व्रता० पूजयेत्तुसमाहितः॥उपचारैःषोडशैर्यथावत्तन्निबोधमे॥आवाहयामितांदेवींकोकिलारू-
३३२ पधारिणीं॥अवतारंकुरुष्वात्रप्रसादंकुरुसुव्रते॥आवाहनं॥आगच्छकोकिलेदेविदेहिमे
खिलवांछितं॥चूतवृक्षंसमारुह्यरमसेनंदनेवने॥आसनं॥तिर्यग्योनिसमुद्भूतेकोकिलेकल-
कंठके॥तिलपुष्पादिभिर्युक्तैरर्घ्यंगृह्याणत्वंनमोस्तुते॥अर्घ्यं॥आषाढस्यासितेपक्षेमेघवर्णस्व-
रूपिणी॥कोकिलेनामत्वंदेविस्नानार्थंप्रतिगृह्यतां॥स्नानं॥कोकिलेकलकंठेचमाधवेमधु-
रस्वरे॥वसंतेवससेदेवीवस्त्रंचप्रतिगृह्यतां॥वस्त्रं॥श्रीखंडचंदनंदिव्यंगंधाढ्यंसुमनोहरं॥वि-
लेपनंमयादत्तंप्रीत्यर्थंप्रतिगृह्यतां॥गंधं॥हरिद्राकुंकुमैर्दिव्यैःकोकिलेकामसंभवे॥कुंकुमेना-
र्चितात्वंमतःशांतिंप्रयच्छमे॥हरिद्रा॥कर्पासंकंचुकंचैववासांसिविविधानिच॥पीतरक्तप्रदा-
नेनप्रीयतांसर्वदेवताः॥वस्त्रयुग्मं॥माल्यादीनितिपुष्पं॥वनस्पत्युद्भवस्तिधूपं॥आज्यंचव- राम ३३२
र्तिसंयुक्तमितिदीपं॥सर्वान्नरसमायुक्तंरसैःसर्वैःसमन्वितं॥सर्वदेवसमाहारंनैवेद्यंप्रति-

गृह्यतां॥नैवेद्यं॥कूष्मांडैर्नारिकेलैश्चखर्जूरैर्दाडिमीफलैः॥चूतजंबीरजंबूश्रीफलैरम्ल-
केलया॥द्राक्षानारिंगबदरैर्मातुलिंगैःसशर्करैः॥फलानि॥नागवल्लीदलमितितांबूलं॥
हिरण्येतिदक्षिणा॥प्रार्थना॥नित्यानिकंवस्त्राणिदद्याच्चापिदिनेदिने॥कुंकुमंपुष्पतांबू-
लंप्रकृताश्चापिदिनेदिने॥कुर्यादेवंविधांपूजांश्रावणेनंचसुव्रते॥विसर्जयेत्तुपश्चात्तांसौ-
वर्णांकोकिलांपटीं॥यदातुतिलपिष्टस्यकोकिलाक्रियतेतदा॥कुर्यात्तस्यमहाकानंनिम्ना-
यास्तुविसर्जनं॥रम्यंवनंसमागम्यकृत्वाकोकिलकाननं॥यदानशक्यतेह्येषमुपवासंतुतद्दि-
ने॥कोकिलेकृष्णवर्णेचसदावासोवनेषुते॥सौभाग्यमतुलंदेविगृहाणार्घ्यंनमोस्तुते॥विस-
र्जनमंत्रः॥चैत्ररथवनोत्पन्नेविंध्यपर्वतवासिनि॥गच्छगच्छमहादुर्गेस्वस्थानेनंदनेवने॥वि-
सर्जनं॥रूपंदेहिधनंदेहिसर्वसौख्यंचदेहिमे॥पुत्रान्देहियशोदेहिसौभाग्यंदेहिसंपदः॥इत्यु-
क्त्वाचततःपश्चाद्विप्रान्नेनसुव्रते॥नक्तभोजीभवेत्सार्पयावन्मासःसमाप्यते॥मासांतेता

व्रता० मपात्रे तु कोकिलां स्वर्णनिर्मितां॥ वस्त्रधान्यगुडैर्युक्तां श्रावणे कुडलं तथा॥ दद्यात्स
२३२ द्दक्षिणां चापि देवज्ञे वा पुरोहिते॥ एवमाषाढमासस्य दैवि ध्येसमुपस्थिते॥ सधवा विध
वा वापि या नारी कोकिलाव्रतं॥ करोति सप्तजन्मानि सौभाग्यं लभते तु सा॥ मृता गौरीपुरं या
ति विमानेनार्कतेजसा॥ ॥श्रीभगवानुवाच॥ ॥एतद्व्रतं वसिष्ठेन मुनिना कथितं पुरा॥ तथा कृतं त्व
किमेतद्वो महाभागाः किं पूजायां तु वांछितं॥ किंचास्मानिरनुष्ठेयमिहामुत्र सुमाये॥ इति व्रतं चित्रने
मिश्चक्रे पप्रच्छ सुलोचनाः॥ येनास्मि गिरिजाशापान्मोक्ष्यामि विरड्रविचान्॥ ताऊचुः क्रियमाणे स्मिन्न
मेनद नुत्तमं॥ वरलक्ष्मीव्रतं दिव्यं सर्वकामसमृद्धिदं॥ यदा रवो कुलिरस्थे मासे च श्रावणे तथा॥ गंगा
यमुनयोर्योगं तुं गन्नुज्ञाममस्तदा॥ तस्मिन्वै श्रावणे मासि शुक्लाते नु मृगो दिने॥ प्रारम्भव्यं व्रतं नरपर
लक्ष्मी पनात्मनिः॥ सुवर्णप्रतिमां कुर्याद्वितुर्भुजसमन्वितं॥ सर्वंगृह्मलंकृत तोरणैरंगवल्लीतैः
॥ गृहस्य पूर्वदिग्भागे ईशान्यां च विशेषतः॥ तं दुलान्प्रस्थसं रत्नोकारनौ निक्षिप्य पूजयेत्॥ संस्थाप्य
कलशं तत्र तार्थतोयैः प्रपूजयेत्॥ फलान्यपि विनिक्षिप्य सुवर्णं प्रक्षिपेत्ततः॥ पल्लवांश्च विनिक्षिप्य

व्रता० २६१ वस्त्रेणाच्छाद्य यत्नतः॥ प्रतिमां स्थापयेत्तत्र पूजयेच्च यथाविधि॥ अग्न्युत्तारणं कृत्वा तु शुद्धस्नानं यथा
क्रमं॥ पंचामृतेन स्नपनं कारयेन्मंत्रतः सुधीः॥ शुद्धस्नानं ततः कृत्वा देवीसूक्तेन वै ततः॥ अष्टगंधै
ः समभ्यर्च्य पत्रैर्वैश्च समर्पयेत्॥ अश्वत्थवटबिल्वादि च तथा दाडिमं च मालती॥ एतेषां पत्रमादा
य एकविंशतिसंख्यया॥ नानाविधानि पुष्पाणि मालत्यादीनि वै ततः॥ धूपदीपैर्महालक्ष्मीं पूज
येत्सर्वकामदां॥ पायसं सर्वमन्नं च सर्वं नक्षैश्च संयुतं॥ एकविंशतिसंख्याकैरपूपैः पूजयेत्स्त्रियं॥
॥ दिव्यैः सर्वसमर्प्यार्थ्यं वरं स वृणुयात्ततः॥ एवं संपूजयित्वा तां तांबूलाद्यैश्च षोडश॥ उपचारैर्बहुवि
धैर्नानासंमानने तथा॥ नृत्यगीतादिसहितं देवीं संप्रार्थयेत्स्त्रियं॥ उमा सरस्वती माया शची च प्रि
यवादिनी॥ एताभिश्च कृतं सम्यग्व्रतं सर्वसमृद्धिदं॥ पूजावसानपर्यंतं चित्रनेमिरनुत्तमः॥ हो
मं धूपं समाघ्राय घृतदीपप्रभावतः॥ गतकुष्ठः स्वर्णतेजा सुविस्तृतमानसः॥ तस्मिन्नेव व्रते स
म्यक् मनः संधाय सर्वदा॥ पंचवायनकं दत्वा कथां शृणुवीत यत्नतः॥ तथा मौनं गृहीत्वा तु आरतिमि राम २६१

BHAU DAJI
MEMORIAL

प्रपूजयेत्॥ व्रतं चक्रवर्तीहस्तां देकं रणफलं तथा॥ पर्णैकं च वर्णरहितं चर्वणीयं प्रयत्नतः॥ नक्ष
यित्वा तु चैलं तं वै बंधयित्वा हटं ततः॥ ततः प्रभाते उद्यापयेद्वर्जनीयं प्रयत्नतः॥ आरक्ते सति संजाते
कुर्याद्व्रतमनुत्तमं॥ नो चेन्न तद्व्रतं कुर्याज्जीर्णदा इति मिच्छति॥ अनेनैव क्रमेणैव व्रतं तत्र कृतीत यत्नत
॥ अहं तस्याः करिष्यामि व्रतं सर्वसमृद्धिदं॥ इत्युक्त्वा स वै देव्यास्तु कारयामास तत्क्षणात्॥ सुवर्णनि
र्मितां देवीं वस्त्रालंकारसंयुतां॥ पूर्वोक्तेन विधानेन पूजां कृत्वा प्रयत्नतः॥ पंचवायकं कृत्वा दद्या
त्तेभ्यो यथाक्रमं॥ विप्राय वायनं ये दद्यौ च ब्रह्मचारिणे॥ सुवासिन्यै ततस्त्वेकं अर्पितं चित्रनेमि
ना॥ एवं सम्यक्क्रमेणैव दत्वा वायनपंचकं॥ ततो गृहं गतं तेन देवीं नत्वा यथाक्रमं॥ ततोऽत्यभुक्तं स
आप्य नक्षयित्वा ततो व्रती॥ नागवल्लीदलं त्वेकं क्रमुकं चूर्णवर्जितं॥ नक्षयित्वा तु चैलं तं प्रभाते तं नि
रीक्ष्य च॥ आरक्ते च ततो जाते व्रतस्यास्य प्रभावतः॥ अद्याहं गतपापोस्मि देवीदर्शनयोगतः॥ एतत्स
म्यग्व्रतं चीर्णं व्रतं यन्मे मया कृतं॥ चित्रनेमिव्रतं कृत्वा कैलासं शांकरं जयं॥ गत्वा प्रणम्य देवेशं देवीसा

व्रता
१६२

दरपूर्वकं॥पार्वतीचतदाप्राहविश्वनेमिस्त्वपुत्रवत्॥पालनीयोमयात्वंवैसम्यमित्यवधार्यतां॥वि
श्वनेमिस्तदाप्राहपार्वतींतरवल्लभां॥तवपादांबुजंदृष्टंवरलक्ष्मीप्रसादतः॥महादेवस्ततःप्राहवि
श्वनेमिंशृणुविव्रतं॥अद्यप्रभृतिकैलासेनुत्वंभोगान्मयेप्सितान्॥पश्चाज्जंतासिवैकुंठंव्रतस्यास्यप्र
भावतः॥ततश्चविक्रमादित्योग्रपार्वत्यापिकृतंपूर्वंपुत्रलाभार्थयातया॥दृष्टश्चषण्मुखस्तेन——च
तुर्महाव्रतः॥नंदिश्चविक्रमादित्योराज्यंप्राप्तंतदाज्ञया॥नंदीश्वकांतयाहीनोकांतालब्धाप्रसाद
तः॥तयाचतद्व्रतंकर्तव्यंकर्तव्यंपुत्रहेतुतः॥पुत्रप्रसूषुवेसात्रिलोकजरणक्षमं॥इहामानुषलो
केदिव्रतंचीर्णंसुविस्तरं॥तदाप्रभृतियेनैवंवरलक्ष्मीव्रतंशृणुतेव्रतंपुण्यंनरोवापिकुर्याद्वैत्वनया
गना॥सलक्ष्मीकरोतिविकल्लानोगान्प्राप्यश्रियंव्रजेत्॥व्रतानामुत्तमंपुण्यंवरवरंवरलक्ष्मीव्रतंशृणु॥त
स्कृतिचनरोनारीद्वौपरौस्वर्गमंदिरायच॥यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः॥धनधान्यमवा
प्नोतिवरलक्ष्मीप्रसादतः॥॥इतिश्रीभविष्योत्तरपुराणेवरलक्ष्मीव्रतं॥॥आश्विनशुक्लोत्सवासर

राम
१६२

मारभ्यमाघशुक्लसप्तम्यवधिदानाफलव्रतं॥ ॥मंत्रपूजा॥ ॥ध्येयःसदासवितृमंडलमध्यवर्तीना
रायणःसरसिजासनसंनिविष्टः॥केयूरवान्मकरकुंडलवान्किरीटीहारीहिरण्मयवपुर्धृतशंखच
क्रः॥ध्यानं॥जगन्नाथायनमःआवाहनं॥पद्मासनायनमःआसनं॥ग्रहपतयेनमःपाद्यं॥
तमोहंत्रेनमःअर्घ्यं॥मित्रायनमःआचमनं॥विश्वतेजसेनमःपंचामृतस्नानं॥जगत्पतयेनमः
वस्त्रं॥त्रिमूर्तये॥यज्ञोपवीतं॥हरयेनमःगंधं॥सूर्यायनमःअक्षतान्॥भास्करायनमःपुष्पाणि॥अह
र्पतयेनमःधूपं॥अज्ञाननाशिनेनमःदीपं॥लोकेशायनमःनैवेद्यं॥विश्वतेजसेनमःतांबूलं॥सू
र्यायनमःसुवर्णपुष्पं॥विश्वतेजसेनमःनीराजनं॥भास्करायनमःमंत्रपुष्पं॥नमस्तेदेवदेवेशनम
स्तेसर्वकामद॥नमस्तेपद्महस्तायनमस्तेदेवनत्स्वे॥नमस्कारः॥सर्वात्मनेप्रदक्षिणं॥दिवाकरन
मस्तुभ्यंपापंनाशयभास्कर॥त्रयीमयार्कविश्वात्मन्गृहाणार्घ्यंनमोस्तुते॥द्वादशवामंत्रर्घ्यं॥न
तोब्राह्मणपूजायथाशक्त्या॥ ॥इतिपूजाविधानं॥ ॥अथकथा॥पितुर्गृहेवर्तमानाकुंतीव्यास

व्रता० दर्शयाहि॥ नमस्कृत्वा सकन्याभ्यां पाद्यार्घ्याचमनीयकं॥ दत्वासंप्रार्थ्य तं मासंकुंतिमुकुलितांज
२६२ लिः॥ पतिपुत्रान्नमोक्षार्थं व्रतं ब्रूहि वरानने॥ व्यासउवाच॥ शृणुदानानां फलंनाम वक्षेव्रतमनु
त्तमं॥ कैलासशिखरे रम्ये पार्वतीपरमेश्वरं॥ दानानां सर्वदानानामुत्तमं ब्रूहि तत्वतः॥॥ शंक
रउवाच॥ ॥ साधु देवि त्वया पृष्टमुमे मे सर्वतः शुभं॥ अमोतु भारते वर्षे पुण्ये च यमुनातटे॥ ऋ
षिपत्निसमूहश्च व्रतं गेन सुसंस्कृतः॥ तत्र गत्वा तु हे देवि शृणु सर्वं व्रतोत्तमं॥ शांतोरनुज्ञया
देवि कैलासाद्गतान्तु वि॥ आगच्छमाना मार्गेण ददर्श कुसुमावती॥ किं वने किं तपस्ते ता ते तामु
वाचाथ पार्वती॥ हे देवि वरसे त्वं हि पतिं नष्टास्मि दुःखिता॥ आगच्छ त्वं मया सार्द्धं करिष्यामो व
यं व्रतं॥ भविष्यति पते योगि सुपुत्रो धनवान्सर॥ तया सहाद्य त्वं मे दर्शयंती दर्शयाहि॥ तथैव च राम
पति भ्रष्टा पुत्रहीनाः स्मि दुःखिताः॥ तच्छ्रुत्वा तां गृहीत्वा तु ताभ्यां सार्द्धं जगाम ह॥ पुण्यां च यमुनां २६२
गत्वा सर्वक्लिन्नातु वा सरे॥ तत्र दृष्ट्वा तु सा देवी पप्रच्छ स्त्रीकदंबकं॥ इदं व्रतं किमेतन्मे वक्तव्यं तु

ऋषिस्त्रियः॥ ॥स्त्रियऊचुः॥ ॥पुण्यव्रतमिदं देवि सौरं पापप्रणाशनं॥ सर्वसंपत्करं स्त्रीणां पति
पुत्रान्नमोक्षदं॥ धर्मार्थकाममोक्षाणां सिद्ध्येत व्रतं नृणां॥ कन्यादानसहस्रं तु गोदानं तु त्रिल
क्षकं॥ महाहिरण्यपत्निजादीनां सर्वेषामधिकं व्रतं॥ सर्वदानफलं चैकं तस्माद्दानाफलं व्रतं॥ श्रु
त्वा पार्वती प्राह करिष्यामो वयं व्रतं॥ सांगव्रतं व्रतं ब्रूहि का जाड्य विशेषतः॥॥ स्त्रियऊचुः॥॥
आवाहये जगन्नाथं भास्करं वेदरूपिणं॥ पद्मासनपद्मकरः पद्मगर्भसमद्युतिः॥ सप्ताश्वसप्तव
क्रश्च द्विभुजः स्यात्सदा रविः॥ ध्येयः सदा सवितृमंडलमध्यवर्ती॥ एवं ध्यात्वा द्विजः सम्यक् भास्क
रं देवरूपिणं॥ नमः पद्मासनायेति दद्यादासनमुत्तमं॥ पाद्यं गृह्णपते तुभ्यं मिश्रादर्घ्याचमनं तथा॥
त्रैलोक्यधनमोहत्रे अर्घ्यं दद्यात्सपल्लवः॥ पंचामृतविधानेन स्नापयेद्विश्वतेजसा॥ जगत्स्त
येतु वस्त्रं च उपवीतं त्रिमूर्तये॥ रक्तगंधाक्षतं पुष्पं रवेर्दद्यात्समंत्रकं॥ अहस्पतये तु वै धूपं दी
पमज्ञाननाशिने॥ नैवेद्यं परमान्नं च सफलं चाम्रशर्करं॥ ग्रहाण सर्वकामफलप्रदं मतां हे तु

व्रता० लोकेशसर्वकामफलप्रदं॥ तांबूलंचसकर्पूरंप्रदद्याद्विश्वतेजसे॥ नमस्तेदेवदेवेशनमस्तेदेवमू
२६८ र्तये॥ नमः कमलहस्तायआदित्यायनमोनमः॥ नमस्कुर्याद्दिनेनेवप्रार्थयेद्विश्वतेजसं॥ कृत्वाप्र
दक्षिणंदेवमर्घ्यंदद्यात्प्रयत्नतः॥ रक्तगंधाक्षतैस्ताम्रपात्रेणार्घ्यंसमंत्रकं॥ दिवाकरनमस्तुभ्यंपा
पनाशायभास्कर॥ मयीमयार्कविश्वात्मन्गृहाणार्घ्यंनमोस्तुते॥ एवंद्वादशवारंचव्रतीदद्यात्स
मंत्रकं॥ तैलाम्ललवणक्षारंवर्जयित्वातुभोजयेत्॥ बहुबीजफलंवर्ज्यंशोषद्रव्यंतुभोजयेत्॥ आ
चार्येणाग्निमादायगोमयेनोपलिप्यच॥ सघृतंपरमान्नंचहोमयेच्छौरमंत्रकं॥ पायसंप्रतिमांच
स्वंब्राह्मणायनिवेदयेत्॥ एवंकुर्यात्पंचवर्षंपंचधान्यंसमर्पयेत्॥ पंचप्रस्थप्रमाणंचप्रथमेव्री
हिमेवच॥ गोधूमाश्चद्वितीयेचतृतीयेलवणंतथा॥ चतुर्थेतिलदानंचपंचमेमाषमेवच॥ सफलं राम
दक्षिणांदद्यात्विप्रान्द्वादशभोजयेत्॥ एवंकुर्याद्व्रतंसम्यक्सर्वंसंपूर्णतामियात्॥ नवकृत्वा २६८
तोगृहीत्वाथसर्वंतत्रचकारस॥ पद्मावतिपतिप्राप्यदमयंतितथानलं॥ सुमित्रामित्रपिंडार्थेतस्मा

त्त्यद्विजोत्तमे॥ सर्वभाग्ययुतागौरीस्वर्णसाधूफलंतथा॥ ततःस्त्रीत्वागतेमार्गेदद्दर्शब्राह्मणंस्त्रि
यै॥ तांदृष्ट्वातस्युलंदद्यात्ततः शिवपुरंययौ॥ ततःसफलविप्रश्चगृहंगत्वासविस्मयः॥ धनधा
न्यसमृद्धिस्तत्रगोधनसंकुलं॥ सर्वरत्नमयोभर्त्ताभार्ययायासमब्रवीत्॥ साविष्णुर्विस्मितो
भार्यांप्रष्टवान्किंकृतंमया॥ साब्रवीद्भगवान्स्वामिन्नवाड्फलमागतं॥ स्वर्णसाधूफलंदत्तंयेनके
नधनंतुमे॥ महादेवफलंदत्तंपार्वत्याकृतयामम॥ ततःशिवपुरंप्राप्यभार्ययासर्वमब्रवीत्॥ नमस्कृ
त्वातुसद्भक्त्यापप्रच्छेदंशिवंततः॥ तस्मात्तंमथ्यतांस्त्रीवरंप्राप्यद्विजोत्तमः॥ तद्यारभ्यकृतंसर्वंतत्रैश
नाफलमहत्॥ सपुत्रंलभतेकुंतित्वंकुरुव्रतमुत्तमं॥ यःपठतिदमाख्यानंशृणोतिश्रद्धयान्वितः॥ ते
सर्वेपापनिर्मुक्तायायास्यंतिपरमांगतिं॥ ॥इतिस्कंदेदानफलव्रतं॥ ॥अथचातुर्मास्यैकादशीमासस्यधार
णपारणव्रतं॥ ॥भविष्योत्तरपुराणे॥ ॥कृष्णउवाच॥ ॥शृणुकौंतेयवक्ष्यामिव्रतंधारणपारणं॥ बा
धवादिवधंदोषंसर्वेक्रियानियामकं॥ चातुर्मास्येतथावादौमासिकौंतेयसुव्रत॥ पुण्याहंकारये

व्रता०
२६५

सर्वमेकादश्यां शुभे दिने॥ पश्चाच्छंकरस्य राजेंद्र तदारभ्य व्रतं चरेत्॥ आदौ मासि तिथावंते चातुर्मास्य
मथापि वा॥ एकस्मिन्धारणं कार्यं पारणं च तथापरं॥ उपवासो धारणं स्यात्पारणं भोजनं भवेत्॥ धा
रणं तु ततः कार्यं मंत्रमष्टाक्षरं जपेत्॥ अष्टोत्तरशतं दद्यादर्घं देवाय तन्मनाः॥ समाप्ते मासि राजेंद्र
कुर्यादुद्यापनं बुधः॥ चातुर्मास्यं व्रती चापि मासे मासे तु कारयेत्॥ उपवासदिने प्राप्ते पुण्याहं का
रयेत्सुरः॥ आचार्यं वरयेत्पश्चाद्ब्राह्मणं तु ततः परं॥ कुर्यात्तु प्रतिमां पश्चाल्लक्ष्मीनारायणस्य वै॥
पूर्णकुंभे तु तां स्थाप्य पूजयेत्त्रिदिनमपि॥ पंचामृतैः तथा पुष्पैः तुलसीदलसंयुतैः॥ मालतीकेतकी
निंबमल्लिकाकुसुमैस्तथा॥ रात्रौ जागरणं कुर्यात्पुराणपठनादिभिः॥ प्रातःकाले समायाते ब्राह्मणं
स्तु निमंत्रयेत्॥ मासे विप्रान्स्वदशाद्द्विमासे द्विगुणं भवेत्॥ पश्चात्स्नानादिकं कृत्वा देवपूजां समाच
रेत्॥ पश्चादग्निं समाधाय होमं कुर्याद्यथाविधि॥ विष्णुरीदेति मंत्रेण जुहुयाद्घृतओदनं॥ अपरापिका
णेति मंत्रेण जुहुयाद्घृतओदनं॥ अष्टाक्षरेण मंत्रेण पायसं जुहुयात्ततः॥ लक्ष्मीनारायणो देवस्थान

राम
२६५

त्रयेपि देवताः॥ पूर्णाहुतिं ततो कृत्वा होमशेषं समापयेत्॥ ब्राह्मणान्भोजयेत्पश्चादाचार्यं पूजये
त्ततः॥ एवं कृत्वा महाभाग ब्रह्महत्यादिपातकैः॥ मुच्यते नात्र संदेहस्तस्मात्कुरु महाव्रतं॥ सुग्रीव
स्तु पुरा राजन्हत्वा वालिनमाहवे॥ रामाद्विष्णुततो ज्ञात्वा धारणपारणं पारणं॥ विमुक्तस्तत्कृतादो
षात्तथान्यैः पातकैरपि॥ नारदोपि तथा राजन्पूर्वजन्म निषूदकः॥ द्विजेभ्य उपदेशात्कृतसत्कृधा
रणपारणं॥ होमादिकं विनाप्यपि तस्य पुण्यप्रभावतः॥ जितेंद्रियस्ततो भूत्वा ब्रह्मसर्वविदांवरः॥ त
स्मात्सर्वप्रयत्नेन कुर्याद्धारणपारणं॥ इंद्रियाणां वशार्थाय सर्वपापापनुत्तये॥ तस्मात्सर्वं त्वमपि
राजेंद्र कुरुष्व व्रतमुत्तमं॥ किं दानैस्तपसा किं वा किमन्यैश्च व्रतैर्यमैः॥ धारणं पारणं कुर्याद्व्रता
नामुत्तमं व्रतं॥ सर्वयज्ञेषु तीर्थेषु सर्वदानेषु यत्फलं॥ तत्फलं समवाप्नोति कृत्वा धारणपारणं॥
इदं व्रतं महापुण्यं तपसामुत्तमं तपः॥ यज्ञानां च तथा यज्ञः व्रतानामुत्तमोत्तमं॥ तस्मात्त्वमपि राजेंद्र कु
विंद्विधिपूर्वकं॥ बांधवाश्च विधेदेषि मुच्यते नात्र संशयः॥ इति ते संप्रभाष्याथ विष्णुः स्वां पुरीं

व्रता०
२९६

यपो॥ हृष्यमाणः पौरजनैः समस्तैः पांडुपुत्रकैः॥ युधिष्ठिरोपि राजर्षिश्चकारेदं महाव्रतं॥ विमुक्तः
सर्वपापेभ्यो वंशायश्च ततो जनेन॥ ॥इति भविष्योत्तरपुराणे धारणपारणाव्रतं॥ ॥अथाश्विनशुक्लै
कादश्यादिमासपर्यंतं मासोपवासव्रतं॥ हेमाद्रौ विष्णुरहस्ये॥ ॥नारद उवाच॥ ॥भगवन् श्रो
तुमिच्छामि व्रतानामुत्तमस्य च॥ विधिं मासोपवासस्य फलं चास्य यथोदितं॥ यथाविधानं
कार्यं व्रतचर्या यथा भवेत्॥ आरभते यथा पूर्वं समाप्यं हि यथाविधि॥ यावत्संख्यं हि कर्तव्यं
ब्रूहि प्रपितामह॥ व्रतमेतत्सुरश्रेष्ठ विस्तरेण मयानघ॥ ॥ब्रह्मोवाच॥ ॥साधु नारद सर्वेतमहं
वरतपोधना। प्रातश्च व्रतिमतां श्रेष्ठ तच्छृणुष्व ब्रवीमि ते। सुराणां च यथा विष्णुः तपतां च यथा र
विः॥ मेरुः शिखरिणां तद्वत् वैनतेयस्तु पक्षिणां॥ तीर्थानां तु यथा गंगा प्रजानां तु यथा वणिक्।
श्रेष्ठं सर्वव्रतानां तु तद्वन्मासोपवासनं॥ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यद्भवेत्॥ सर्वदानोद्भवं
वापि तन्मेन्मासोपवासकृत्॥ अग्निष्टोमादिभिर्यज्ञैर्विधिवद्भूरिदक्षिणैः॥ तत्पुण्यमवाप्नो

राम
२९६

DR BHAU DAJI

ति षण्मासपरिलंघनात्॥ तेन दत्तं कृतं जप्तं तपस्तप्तं स्वधा कृतं॥ यः करोति विधानेन नरो मासमुपो
षणं॥ प्रविश्य वैष्णवीं वंशं येनाभ्यर्च्य जनार्दनं॥ गुरोराज्ञां ततो लब्ध्वा कुर्यान्मासोपवासनं॥ वै
ष्णवानि यथोक्तानि कृत्वा सर्वव्रतानि तु॥ द्वादश्यादीनि पुण्यानि ततो मासमुपावसेत्॥ अतिकृ
च्छ्रं पराकं च कृच्छ्रं चांद्रायणं ततः॥ मासोपवासं कुर्वीत गुरुविप्राज्ञया ततः॥ आश्विनस्यामले पक्षे
एकादश्यामुपोषितः॥ व्रतमेतत्तु गृह्णीयाद्यावत्रिंशद्दिनानि तु॥ वासुदेवं समुद्दिश्य कार्तिकं
सकलं नरः॥ मासं चोपवसेद्यस्तु स मुक्तिफलमाप्नुयात्॥ भक्त्या तस्यालये भक्त्या त्रिकालं कुसुमैः
शुभैः॥ मालतीदिव्यैः पद्मैः कमलैस्तु सुगंधिभिः॥ कुंकुमोशीरकर्पूरैर्विलिप्य वस्त्रचंदनैः॥ नै
वेद्यं धूपदीपाद्यैरर्चयेत जनार्दनं॥ मनसा कर्मणा वाचा पूजयेद्गरुडध्वजं॥ कुर्यान्निरत्तिपवणं
वृजक्षितितिद्रियः॥ नाम्नामेवतथा जापविष्णोः कुर्याद्दहर्निशं॥ भक्त्या विष्णोः स्तुतिर्वाच्या मृषावाद
विवर्जयेत्॥ सर्वसत्वदयायुक्तः शांतचित्तो रतिसकः॥ सुप्तो वा आसनस्थो वा वासुदेवं प्रकीर्तयेत्॥

व्रता० २६७ स्मृता लोकनगंधादिस्वादनं परिकीर्तितं॥ अन्नस्य वर्जयेत्सर्वं ग्रासानां चातिकांक्षणं॥ गात्रा
भ्यंगं शिरोभ्यंगं तांबूलं च सविलेपनं॥ व्रतस्थो न स्पृशेत्किंचिद्धिकर्मस्थान्न चालयेत्॥ देवतायतने ति
ष्ठेन्नगरस्य स्वरे हतं॥ कृत्वा मासोपवासं तु यथोक्तविधिना नरः॥ नारी वा विधवा साध्वी वा सुरे
वं समर्चयेत्॥ अस्मृतां विकमेवं तु व्रतं त्रिंशाह्निनेरितं॥ कृत्वा मासोपवासं तु संयतात्मा जितेंद्रियः
॥ ततोर्चयेन्महद्भक्त्या द्वादश्यां गरुडध्वजं॥ कुर्यान्नरस्त्रिषवणं पूजयेत्पुष्पमालाभिर्गंधधूपविले
पनैः॥ वस्त्रालंकारवाद्यैश्च तोषयेदच्युतं नरः॥ स्नापयेत हरिं भक्त्या तीर्थचंदनवारिभिः॥ चंदनेन
तु लिप्तांगं पुष्पधूपैरलंकृतं॥ वस्तुदानादिभिश्चैव भोजयेत द्विजोत्तमान्॥ दद्याच्च दक्षिणां तेभ्यः
प्रणिपत्य क्षमापयेत्॥ क्षमापयित्वा विप्रांश्च विसर्ज्याभ्यर्च्य प्रभुं च॥ एवं वित्तानुसारेण भक्तियु
क्तेन शक्तितः॥ एवं मासोपवासं तु कृत्वाभ्यर्च्य जनार्दनं॥ भोजयित्वा द्विजांश्चैव विष्णुलोके महीयते॥ ए राम
वं मासोपवासांश्च सम्यक्कृत्वा त्रयोदश॥ निवर्तयेत्ततस्तद्वै विधिना येन तच्छृणु॥ कारयेद्वैष्णवं य २६७

ज्ञमेकादश्यामुपोषितः॥ पूजयित्वाच्युतं देवं श्रीमाचार्यानुज्ञया हरिं॥ अर्चयित्वा हरिं भक्त्याग्निवाद्य गुरुः
तथा॥ ततो नु भोजयेद्विप्रान्भोजनपीतयथाविधि॥ विशुद्धकुलचारित्रान्विष्णुपूजनतत्परान्॥ पूज
यित्वा द्विजान्सम्यग्भोजयित्वा त्रयोदश॥ तावंति वस्त्रयुग्मानि भाजनान्यासनानि च॥ योगपट्टानि
शुभ्राणि वस्त्राण्युत्तराणि चैव हि॥ दद्याच्चैव द्विजोग्रेभ्यः पूजयित्वा प्रणम्य च॥ ततो नु कल्पयेच्छय्यां
शय्यास्तरणसंस्थितां॥ सच्छादनशुभांश्रेष्ठांसोपधानसमलंकृतां॥ कारयित्वात्मनो मूर्तिं कांच
नीं तु स्वशक्तितः॥ न्यसेत्तस्यां तु शय्यायामर्चयित्वा स्रगादिभिः॥ आसनं पादुके छत्रं वस्त्रयुग्ममुपा
नहौ॥ पवित्राणि च पुष्पाणि शय्यायामुपकल्पयेत्॥ एवं शय्यां तु संकल्प्य प्रणिपत्य च तान्द्विजान्
॥ प्रार्थयेच्चानुमोदार्थं विष्णुलोकं व्रजाम्यहं॥ एवमभ्यर्चिता विप्रा वदेयुर्भीतिनं तदा॥ व्रज व्रज जनश्रे
ष्ठ दिव्योस्त्वानमनामयं॥ विमानं वैष्णवं दिव्यं सशय्योपस्कितं॥ तेन विष्णुपदं याहि सदानंदम
नामयं॥ ततो विसर्जये द्विप्रान्प्रणिपत्यानुगम्य च॥ ततस्तु हरये भक्त्या गुरुर्ज्ञानप्रकाशकं॥ तां

व्रता० शय्यां कल्पितां सम्यग्गुरुं व्रतसमापकं॥ प्रणम्य शिरसा शान्तो मुगुरवे प्रतिपादयेत्॥ एवं प्रमह
३६८ रिविमानगुरुं ज्ञानप्रदायकं॥ कृत्वा मासोपवासं च निवाप्य विधिवन्मुने॥ कुलानां शतमु
द्धृत्य ब्रह्मलोकं व्रजेन्नरः॥ यस्मिन्ज्ञातो महापुण्ये कुले मासोपवासकृत्॥ सर्वपापविनिर्मुक्तो
विष्णुलोके महीयते॥ नरो मासोपवासानां कर्त्ता पुण्यकृतां वरः॥ पितामहकुलास्यां च समं विष्णु
पुरीं व्रजेत्॥ नारी वास्तु महाभागा यथोक्तव्रतमास्थिता॥ कृत्वा मासोपवासं च व्रजेद्विष्णुसना
तनं॥ ॥नारद उवाच॥ ॥सुदुष्करमिदं देव सर्वग्लानिकरं परं॥ व्रतं मासोपवासाख्यं न शक्तिर्जनय
ते च्युते। पंडितस्य त्वयां देव मुमुक्षोर्व्रतिनः सदा॥ त्यागो वानुग्रहो वाय किं तु कार्यं पितामह॥
ब्रह्मोवाच॥ व्रतस्थं कर्षितं दृष्ट्वा मुमूर्षुं व्रतिपोधन॥ दृष्ट्वा तु ब्राह्मणास्तस्य कुर्युः सम्यगनु राम
ग्रहं॥ अमृतं पाययेत्क्षीरमिक्षुमानं कृनिशि॥ हयेहनवियुक्तेन प्राणैः कृषपीडितो व्रती॥ च्य ३६९
ती सर्वान्वितं क्षीरमुख संकृत्य पीडितं॥ यायपि तावत्तं क्षीरं दद्याद्दत्वा फलानि च॥ अहोरात्रं च

योनिस्पं व्रतस्थः परिपालयेत्॥ पयोमूलं फलं दत्वा विष्णुलोकं व्रजेत्नुसः॥ एवं मासोपवासस्य
माहात्म्यं प्राणसंक्षये॥ अव्रतघ्नगुणैर्दिव्यैः परिसे ब्राह्मणास्या॥ नैते व्रतं विनिघ्नंति हविर्विप्रानु
मोदितं॥ क्षीरोदधेर्गुरोराज्ञा आपो मूलं फलानि च॥ एवं कृत्वा निरर्द्दतस गुडं पायसं तदा॥ पाप
येदर्चितो यस्मात्समाप्नोति पुनर्व्रतं॥ अर्थविष्णुर्चनं विष्णुर्दाता विष्णुर्व्रती तथा॥ सर्वं विष्णुमयं ता
त्वा व्रतस्थं क्षीणमुदरो॥ पराभुत्पुत्तिश्चवे ष्पापरि स्नानोनीतिमर्हति॥ तदा समुद्धरेत् क्षीणमिच्छंतं विभुरवं
स्थितः॥ परिपाल्य व्रती देहं व्रतशेषं समापयेत्॥ यथोक्तं द्विगुणं तस्य फलं विप्रमुखोदितं॥ इंद्रियार्थे
स्वसंशान्तमसा हेवविमन्नामतिः॥ परितोषयते विष्णुं नोपवासोपतात्मनां॥ किं तस्य बहुभिस्तीर्थैः
स्नानहोमनपव्रतैः॥ जितेंद्रियगणो घोरो निश्चितो दुष्टचेतसा॥ जितेंद्रियः सदा शांतो सर्वभूतहि
तेरतः॥ वासुदेवपरो नित्यं न स क्लेशं कर्तुमर्हति॥ कृत्वान्नतं यथोक्तं तद्वैष्णवं पदमव्ययं॥ प्राप्नोति विष्णु
रूपो नित्यं पुनरागमवर्जितं॥ ये स्मरंति सदा विष्णुं विशुद्धेनांतरात्मना॥ ते प्रयांति न यं स्यत्का विष्णु

व्रता० लोकमनामयं॥प्रज्ञातेवार्षिकेवामध्याह्नेदिवसक्षये॥अच्युतंयेकीर्तयंतितेनरंतिमवार्ण
३६९ वं॥अनंदितोथदुःखार्तःक्रुद्धःशांतोयवाहरिः॥योनुकीर्तयतेनक्तासगच्छेद्वैष्णवींपुरीं॥ग
र्भजन्मजरारोगदुःखसंसारबंधनैः॥नबाध्यतेनरोनित्यंवासुदेवमनुस्मरन्॥स्थावरेजंगमेमृते
स्थूलेसूक्ष्मेशुभाशुभे॥विष्णुपश्यतिसर्वत्रयःसविष्णुःस्वयंनरः॥सर्वंविष्णुमयंज्ञात्वात्रैलो
क्यंसचराचरं॥यस्तज्ञानमतिस्तेनप्रजितोगरुडध्वजः॥इतिकथानुकथानांव्रतानामुत्तमस्यच
॥सविष्णुलोकमाप्नोतिप्रसादाच्चक्रपाणिनः॥विधिर्मासोपवासस्ययथावत्परिकीर्तितः॥सु
तस्तेहात्मुनिश्रेष्ठसर्वलोकहितायच॥कृत्वास्त्रावाचसंपन्नानरोविष्णुपुरींव्रजेत्॥नान
ख्यायप्रदातव्यंनदेयंदुष्टचेतसे॥॥इतिश्रीविष्णुरहस्योक्तंमासोपवासव्रतं॥॥अथमल रम
मासव्रतं॥॥हेमाद्रौपाद्मे॥॥देवेशंशंकरंशंभुंसर्वदेवनमस्कृतं॥षडाननोमहातेजाःप्रणम्यप ३६९
र्यपृच्छत॥॥स्कंदउवाच॥॥किंव्रतंकस्यवेदानंदेवदेवसर्वधर्मप्रवर्त्तक॥व्रतानिबहुपुण्यानि

श्रुतानित्वत्प्रसादतः॥नतृप्तिमधिगच्छामिधर्मतत्त्वेसुरेश्वर॥व्रतांतरंमहापुण्यंकथयस्वमहा
प्रभो॥॥ईश्वरउवाच॥॥शृणुवत्सप्रवक्ष्यामिव्रतपापहरंशुभं॥तस्यानुष्ठानमात्रेणतुष्टोभवति
भास्करः॥दुःखंहरतियःक्षिप्रंप्रदद्यात्सौख्यमुत्तमं॥॥स्कंदउवाच॥॥॥किंव्रतंकस्यवेदानंकस्यदे
वस्यपूजनं॥केनचारीपुराचीर्णंतत्सर्वंकथयस्वनः॥॥ईश्वरउवाच॥॥मलमासंसंव्रतंस्कंदसर्व
पापहरंनृणां॥सकांस्यमन्नदानंचपूजनंभास्करस्यच॥यस्यानुष्ठानमात्रेणपुत्रदौहित्रवान्नरः॥
धनधान्यसमायुक्तःसर्वपापैःप्रमुच्यते॥आसीत्पुरामहाराजानहुषःपृथिवीतले॥धर्मप्रियस्त
पोनिष्ठोदेवपूजनतत्परः॥प्रजानांपालकोनित्यमतिथीनांचपूजकः॥सुगंतुशक्रपदंसोथब्राह्म
णांवरवाहने॥लोकमाकारयत्देवादगस्त्यंमुनिपुंगवं॥मुक्तासमारुह्यसोपतदानिमिंद्रमाव
या॥मेहितेनतुतेनैवमुक्तोब्रह्मविदांवरः॥सपदावातिमूढेनताडितश्चमुनिस्तदा॥क्रुद्धेनमुनि
नातेनशापितःकुंभयोनिना॥सर्पोभवेतिहेपापमतान्राष्ट्रस्तदाभवत्॥राजाप्राप्तस्तथास्कंद

व्रता० सपत्विमतिदारुणं॥महारण्येमहाप्राज्ञसत्तोयवर्जितः॥देहत्यागेनतेनापिकृतस्यपापराशयः
३५० ॥एकदातुमहारण्येकृष्णद्वैपायनोमुनिः॥आजगाममहाप्राज्ञस्तस्ययोगेननोदितः॥तयोस्तुसंग
मन्दूदरण्येतरुसंकुले॥तद्दर्शनाद्रासस्मारपूर्वजन्मविचेष्टितं॥ततश्चविकलीभूतःप्रणम्य
शिरसामुनिं॥पतितोदंडवद्भूमावुवाचबहुवचनंरुदन्॥पपातचमहीपृष्ठेपापिष्ठंत्रायवत्प्रभो
॥मादृशानांपापिनांतुत्वमेवशरणंसदा॥तस्माद्दुःखादिमंमुंचत्वांकृपांकुरुमयिप्रभो॥इति
श्रुत्वावचस्तस्यसमुनिःकरुणायुतः॥तस्माद्दुःखादिमंमुंचत्वांकृपाउवाचवचनंसर्पश्रेण
घ्रमनसेप्सितं॥ ॥सर्पउवाच॥ ॥तातकेनविमुच्येयंघोरंदुःखसागरात्॥मुक्तिर्नवेद्मिनो
स्माकंकस्येदंकर्मणःफलं॥व्यासउवाच॥ ॥पूर्वजन्मनिराजेंद्रमलमासेसमागते॥नार्चितोनाप्य राम
शेविष्णुविधिनानकृतंव्रतं॥तत्कर्मपरिपाकेनबुद्धिस्तेविषयेजने॥त्रिविक्रमायांसमजवच्छ्रमा ३५०
यासहामतः॥तस्मात्सर्वप्रयत्नेननृपत्वंव्रतमाचर॥यस्यानुष्ठानमात्रेणस्वपदंप्राप्स्यसेध्रुवं॥सर्प

उवाच॥केनवाविधानेनकर्त्तव्यंव्रतमीदृशं॥किंदेहंहिव्रतेदानंसर्वंकथयसुव्रत॥व्यासउवाच॥वि
ष्णुरूपसहस्रांशुंमलिनेमासिपूजयेत्॥पूजितेचसहस्रांशौविष्णुर्भवतिपूजितः॥मलमासस्तुमा
सानांमलिनःपापसंभवः॥तस्यपापविशुध्यर्थंमलमासव्रतंचरेत्॥दिनेदिनेप्रदेयानिविविधा
न्नानिभक्तितः॥दक्षिणाघृतयुक्तानिकांस्यपात्रयुतानिच॥विष्णुरूपीसहस्रांशुःसर्वपापप्रणा
शनः॥अपूपपात्रप्रदानेनममपापंव्यपोहतु॥अधिमासेतुसंप्राप्तेगुडसर्पिर्मायुतान्॥दद्यादनेनमं
त्रेणत्रयस्त्रिंशदपूपकान्॥त्रयस्त्रिंशदधिपूपादीनिदातव्यानिदिनेदिने॥साज्यानिगुडमिश्राणि
अधिमासेनृपोत्तम॥यावंतितत्रछिद्राणिअपूपस्यचपार्थिव॥तावद्वर्षसहस्राणिस्वर्गलोकेमही
यते॥चंद्रांशुनिर्मलाःपूपाःशालितंदुलमिश्रिताः॥आहारःसर्वदेवानांतेभ्यःकुर्वंतिमंगलं॥सहिरण्य
घृतान्यन्नान्त्रयस्त्रिंशदपूपकान्॥अधिमासेतुसंप्राप्तेत्रयस्त्रिंशत्तुदेवताः॥उद्दिश्यपूपदानेनपृ
थिवीदानफलंलभेत्॥मासाधिकेतुसंप्राप्तेयावत्स्वत्रिंशपकान्॥तावद्वर्षमवाप्नोतिविष्णुलोकं

व्रता० २७१

नाग्नतनं ॥ त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे निधाय च ॥ सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् ॥ नारा
यण जगद्बीज भास्कर प्रतिरूपक ॥ व्रतेनानेन पुत्रांश्च संपदं चाभिवर्धय प्रार्थनामंत्रः ॥ अधिमासे प्र
दातव्यं तदशीवाय पूर्णिमा ॥ व्यतीपातदिने वापि दद्याद्दानं च शक्तितः ॥ ताम्रपात्रे दिसगुडं त्रयस्त्रिं
शदपूपकान् ॥ कांस्यपात्रे विनिःक्षिप्य हिरण्येन समन्वितान् ॥ उपानच्छत्रसंयुक्तान् विप्राय विनिवेदये
त् ॥ इदं वाक्यपरं तत्र मंत्रः ॥ यस्य हस्ते गदा चक्रे गरुडो यस्य वाहनं ॥ शंखः करतले यस्य स मे विष्णुः प्र
सीदतु ॥ कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥ यो वंचयति भूतानि तस्मै कालात्मने नमः ॥ कु
रुक्षेत्रमयो देशः कालः पार्थो द्विजो हरिः ॥ पृथ्वीसममिमं दानं गृहाण पुरुषोत्तम ॥ मलानां च विशु
द्ध्यर्थं पापप्रशमनाय च ॥ पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर ॥ मंत्रेणानेन वै दद्यात्त्रयस्त्रिंश
दपूपकान् ॥ अन्नदानात्परं दानं मलमासे न विद्यते ॥ एतेन स्याच्चिरा लक्ष्मीर्यदि स्यात्सूर्यसन्निधौ ॥ राम २७१
दारिद्र्यं न भवेत्तस्य रोगशोकविवर्जितः ॥ व्याधिभ्यो मुच्यते रोगी मूको वाचस्पतिर्भवेत् ॥ एवं तु विधि

Dr BHAU DAJI

ना राजन् मलमासव्रतं चरेत् ॥ पुत्रपौत्रैः समायुक्तो मोदते पालयन्महीं ॥ इत्युक्त्वा स मुनिः स्कंद तत्रैवां
तरधीयत ॥ नहुषो मानुषं सर्वं व्रतमेतच्चकार ह ॥ व्रतस्यास्य प्रभावेन स पो मानुषतां ययौ ॥ पुनर्व्रतं
चकारेदं मुनिवर्योपदेशितं ॥ विमानवरमारुह्य जगामेंद्रस्य मंदिरं ॥ तस्मात्स्कंद नरैः कार्यं व्रतमे
तदनुत्तमं ॥ व्रतेन तोषितो देवो भास्करो भक्तवत्सलः ॥ ददाति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः ॥ इ
ति व्रतार्के मलमासव्रतं ॥ अथ मलमासे व्रतांतरं ॥ श्रीकृष्ण उवाच ॥ देवदेव जगन्नाथ भुक्तिमुक्ति
प्रदायक ॥ कथयस्व प्रसादेन लोकानां हितकाम्यया ॥ मुनिश्वराः प्रवदंति कृष्णद्वैपायनादयः ॥ अह
न्नैव चलत्येतत्तच्चैवोपतिष्ठते ॥ यथा वंध्यागृहस्थस्य पतिषंडस्य नामिनी ॥ तथा दानविहीनं तु जन्म
सर्वं निरर्थकं ॥ तथापि कथयंतीह देवताः शास्त्रकोविदाः ॥ मलिम्लुचे सदा प्राप्ते क्रियाः कार्याः कथं प्रभोः ॥
द्वौ रमौ तौ विवाहस्य व्रतं काम्योपवासिकं ॥ मलिम्लुचे सदा त्याज्यं प्रत्यक्षेण विशेषतः ॥ श्रीरुवाच ॥ अधि
मासे च संप्राप्ते किं कार्यं ब्रूहि मे प्रभो ॥ कस्मै उद्देशेन कर्तव्यं परत्रैकः प्रदायकः ॥ श्रीकृष्ण उवाच ॥ मलदे

व्रता० वी महालागे सर्वलोकस्य हेतवे ॥ स्वयंदात्वात्स्वयंलोकायो ददाति द्विजायते ॥ नान्यो दाता न लोकाश्च इ
३५२ हलोके परत्र च ॥ असंक्रांतेपि संप्राप्ते मामुद्दिश्य व्रतं चर ॥ अधिमासस्याधिपत्ये अहं वै पुरुषोत्तमः ॥
स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणं ॥ देवार्चनमथान्यच्च ये कुर्वंति मनुष्यजाः ॥ अक्षयं तद्भवेत्सर्वं
ममोद्देशेन कारणं ॥ मलमासो गतः शून्यो येषां देवी प्रमादतः ॥ दारिद्र्यं पुत्रशोकं च पापपंचकविगर्ह
नं ॥ मर्त्यलोके भवेज्जन्म तेषां देवि भवे सदा ॥ सुखप्रसादिदे विस्तयेवैनं ति द्विजोत्तमाः ॥ यदा मलि
म्लुचो मासः प्राप्यते मानवैः प्रिये ॥ महोत्सवस्तदा कार्य आत्मनो हितकांक्षिभिः ॥ कृष्णपक्षे चतुर्द
श्यां ---- सुरेश्वरि ॥ अष्टम्यां वाथ कर्त्तव्यं व्रतं शोकविनाशनं ॥ यथा जातोपहारेण मासे वा मलि
म्लुचे ॥ पुण्येह्नि प्रातरुत्थाय कृत्वा पूर्वाह्निकीं क्रियां ॥ गत्वा शिवालयं सम्यक् पश्चाद्वासुदेवं हरिस्म
रन् ॥ उपवासस्य नक्तस्य एकभक्तस्य नामिनि ॥ एकस्य निश्चयं कृत्वा ततो विप्रान्निमंत्रयेत् ॥ सपत्नि राम
कान्सदाचारान्सुरूपान्सुखवेषकान् ॥ श्रुताध्ययनसंपन्नान्कुलीनान्ज्ञातिसंभवान् ॥ ततो मध्य ३५२

कलशमये लक्ष्मीयुक्तं सनातनं ॥ स्थापयेद्ब्राह्मणैः कुंभे वेदमंत्रैर्द्विजोत्तमैः ॥ पूजयेत्स रयमन्त्रमागो विधि
ः सपितामह ॥ गंधतोयेन संस्नाप्य पंचामृतमधुनेन च ॥ चंदनेन सुगंधेन पुष्पैर्नानाविधैः प्रिये ॥
मिष्टान्नैर्नैवेद्यैर्धूपदीपादिरंजितः ॥ आच्छाद्य सवस्त्रैश्च पीतवस्त्रैर्विशेषतः ॥ घंटामृदंगनिर्घो
षैः शंखध्वनिसमन्वितः ॥ अरात्रिकं व्रती कुर्यात्कर्पूरागरुचंदनैः ॥ अज्ञानेनाल्पकेनापि फलमाप्नो
ति हेतवे ॥ ताम्रपात्रस्थिते तोये चंदनाक्षतपुष्पके ॥ अर्घं दत्वा सपत्नीकः प्रहृष्टेनांतरात्मना ॥ मंत्रे
णानेन देवेशं ब्राह्मणैः सह मां स्मरन् ॥ नारिंगैर्नारिकेरैश्च फलैर्नानाविधैः शुभैः ॥ पंचरत्नसमायुक्तं
जानुनीकृतभूतले ॥ आरोप्य नाजपेद्धस्तां श्रद्धाभक्तिसमन्वितः ॥ अर्घ्यदानमंत्रः ॥ देवदेव महाभाग प्र
लयोत्पत्तिकारक ॥ कृपासर्वसिन्नते ज्ञजगदानंदकारक ॥ गृहाणार्घमिमं देव दयां कृत्वा ममोपरि ॥ अ
थ प्रार्थनामंत्रः ॥ स्वयंभुवे नमस्तुभ्यं ब्रह्मणेमिततेजसे ॥ नमोस्तु ते श्रियानंद दयां कृत्वा ममोपरि ॥ एवं प्रा
र्थयित्वा विदं जपेद्ब्राह्मणैः सह ॥ सपत्नीकान्सुचित्तान्नानान्लक्ष्मीनारायणं स्मरन् ॥ पूजयित्वा वि

व्रता०
२७३

धानेनभोजनपद्धतपायसैः॥ भोजनपित्वाविधानेनसपत्नीकंस्मरन्विभुं॥ स्मर्तव्योद्विजरूपेणपत्नी
चवैमनुस्मरन्॥ परिधाप्पयथाशक्त्यावस्त्रालंकारकुंकुमैः॥ द्राक्षाभिश्चकपित्थैश्चपनसैःक
दलीफलैः॥ नालिकेलैश्चनारिंगैःकुष्मांडैर्दाडिमैःप्रिये॥ घृतपक्वान्नगोधूमैःसुतैःसोर्नालिके
र्वटैः॥ शर्करैर्घृतपूपैश्चफणितैःषडमंडकैः॥ वृंताकीकर्कटीशाकैःश्रृंगवेरैःसमूलकैः॥ अन्यै
श्चविविधैःशाकैःरम्यपाकैःपृथक्पृथक्॥ नस्नोत्सैश्चलेत्यादिकटुकानिविशेषतः॥ गोरसानां
चचित्राणिवासितानिस्लादिभिः॥ अन्यान्यपिचदेयानिदानानिविविधानिच॥ वित्तशाठ्यंनकुर्वीत
आत्मनःश्रेयइच्छता॥ यथाचसरसंप्राप्यपरिवेष्यमदुब्रवीवन्॥ इदंस्वाद्इदंभोज्यंनवदर्यविचिं
तयेत्॥ पात्रतांशोचयेद्यचयन्मयापाचितंप्रभो॥ धर्मोस्यनुग्रहीतोस्मिसार्थकंतंचमंदिरं॥ वि
सर्जयित्वतोभक्त्यादत्वातांबूलदक्षिणां॥ पत्राणिशगवंश्चनिचूर्णंचरवदिरंसुभं॥ एलाकर्पूरलवंगानि
जातिफलजत्वपा॥ मृगनाभीमरिचिनिमुखमांसीनखस्तथा॥ चतुर्भिर्मिलितैर्देविताम्बूलंममवल्ल

राम
२७२

भं॥ योददातिद्विजाग्र्याणांसभवेत्सुभगोनरः॥ सुभगाचसदाचारावध्नानास्वजनेसुते॥ पुत्राःसौभाग्यसं
युक्तातांहृत्जाज्ञायतेबलाः॥ पत्रैःसुकेशवःप्रीतःपूगैःशसदाबया॥ चूर्णेनलक्ष्मीशारवं
दिरेणतुमन्मथः॥ चतुर्भिर्विश्वरूपोसौपःपुष्णातिजगत्त्रयं॥ परितोषसपत्नीकान्हस्तेदद्याद्विमोदका
न्॥ आसीमंतमनुव्रज्यत्तुंजीतबंधुभिःसह॥ असंक्रांतव्रतंनारीयाकरोतिहरिप्रिये॥ दारिद्र्यंपुत्रशो
कंचैवैधव्यंनभवेसदा॥ पुरुषोप्येवंविधोदेवियदिकुर्यान्मजिम्लुचे॥ प्राप्नतःरजितोयैःश्रीनाथ
देवपरेभक्तमा॥ कथंभवेन्नेषुसुखंचसंपत्पुत्रांस्तुरूस्वजनजायनायां॥ ॥इतिश्रीभविष्योत्तरपुराणे
मलमासव्रतांतरंदेवीपुराणे॥ ॥ईश्वरउवाच॥ शृणुदेविमहात्म्यंचमलमासस्यपार्वति॥ येनमासो
मसंक्रांतास्तेषांस्वामिरविस्मृतः॥ असंक्रांतरूपेमासापेषांस्वामीजनार्दनं॥ नमुद्दिश्यचयत्किंचित्स्वल्पंवा
यदिवाबहु॥ अक्षरूपंतभवेत्कर्तुर्जन्मनामयुतंध्रुवं॥ मलिम्लुचेतुसंप्राप्तेयोनकुर्यात्स्वशक्तितः॥ दानं
वाथव्रतंवापिविप्रभोजननैमेवचा॥ मलिम्लुचेनदेहेनसयातिनिरयंनरः॥ एकभक्तेननक्तेनतथैवायाचि

व्रता॰ नेन च॥ उपवासेन नक्तं वै तिमनसा सप्रयत्नतः॥ दाने वाथ व्रते वापि यस्य शक्तिर्न विद्यते॥ शरी
२५७ रशोषणं तेन कर्त्तव्यं तीर्थसेवनं॥ वचनाद्द्विजमुख्यानां सर्वव्रतफलं लभेत्॥ सर्वव्यापि प्रभुर्यो वि
ष्णुः सर्वभूतकृपाकरः॥ मलिम्लुचे यथा दानं लोकद्वयसुखावहं॥ श्रीदेव्युवाच॥ भाग्यहीनाश्च ये मर्त्या
पशुवद्विचरंति हि॥ विवेको नास्ति वै येषां किं कार्यं तैर्मलिम्लुचे॥ निर्द्धनाश्च दुराचाराः परान्नोपो
पजीविनः॥ ईश्वर उवाच॥ दाने व्रते यथाशक्ते आयासे कायशोषणे॥ सर्वथा नास्ति सामर्थ्यं कर्त्तव्यं वि
प्रसेवनं॥ साधूनां सेवनं देवी सर्वतीर्थफलप्रदं॥ कालेन लभते तीर्थं सद्यो वै साधुसेवनात्॥ सा
धूनां दर्शनं चैव कर्त्तनं श्रवणं तथा॥ मलमासे तथा देवी कर्त्तव्यं श्रेय इच्छता॥ पुण्यक्षयेन संप्रा
प्ते संपदो विविधा गृहे॥ तानि पुनः प्रकर्त्तव्यं श्रेयद्भ्याः संचयः पुण्यकर्मभिः॥ अभावेन महादेवीपः राम
प्राप्तो धनसंचयः॥ पुण्यकर्मक्षयान्नेह प्राप्यते पुण्यसंचयः॥ तस्मात्सर्वाणि संप्राप्ते इदं प्राप्ते प्रकल्प २५७
येत्॥ यथा बीजांकुरन्यायो विद्वद्भिर्धर्मतत्परैः॥ विचार्य निश्चयः प्राप्तो धर्माद्यर्थे निसंशयः॥ धर्मबी

जं अर्थबलं फलाद्बीजं सुरक्षितं॥ कर्त्तव्यं तत्प्रयत्नेन परोहार्थं नवे नवे॥ बीजांकुरं ततो लक्ष्म्येत्पोन
दयमृद्धनं द्विज॥ लक्ष्मीनारायणं प्रसन्नो जयेद्द्विजोत्तमान्॥ ॥इति श्रीदेवीपुराणे मलमासव्रतं॥ ॥
॥अथ विशेषपूजा॥ ॥मत्स्याय नमः॥ कूर्माय॰ सहस्रशीर्ष्णे नमः॥ देवाय नमः॥ सहस्राक्षपदे नमः॥
पुरुषोत्तमाय नमः॥ महादेवाय नमः॥ सृष्टिस्थित्यंतकारिणे॰ कृष्णाय॰ वासुदेवाय॰ सुरेश्वराय॰ स्व
यंभुवे॰ लक्ष्मीमितजसे नमः॥ ब्रह्मप्रियाय नमः॥ ब्रह्मगोत्रे नमः॥ लक्ष्मीशे नमः॥ कमलायै॰॥ प देवाय नमः
द्मायै॰ श्रियै नमः॥ पद्मवासायै नमः॥ हरिवल्लभायै नमः॥ क्षीराब्धितनयायायै॰ श्रियै नमः॥ इं
दिरायै नमः॥ श्रीसूक्तेन पूजा॥ अर्घ्यमंत्रः॥ पुराणपुरुषेशान सर्वलोकनिकेतन॥ अधिमासे व्रतस्या
तो गृहाणार्घ्यं श्रिया सह॥ पुराणपुरुषेशान जगद्धाता सनातन॥ सपत्नीकोद्यादस्मदर्घ्यं सृष्टिस्थित्यंतका
रिणे॥ देवदेव महाभाग प्रलयोत्पत्तिकारक॥ कृपासर्वसमस्त जगदानंदकारक॥ गृहाणार्घ्य
मिमं देव दयां कृत्वा ममोपरि॥ ॥इति श्रीनीलकंठात्मजशंकरकृतो व्रतार्के मासव्रतानि

व्रता० ॥।॥अथवारव्रतानितत्ररविवारव्रतं॥ ॥मदनरत्नेसौरधर्मे॥ ॥यस्योदयेस्याद्गतःप्रबोधोयःकर्म
३७५ साक्षीभुवनप्रगोप्ता॥कुष्ठादिकव्याधिविनाशनोयःनमस्करोमियोदुरितंनिहन्ता॥ ॥मांधातोउ
वाच॥ ॥भगवन्व्रतानितांश्रेष्ठकथयस्वप्रसादतः।तदहंश्रोतुमिच्छामिव्रतपापप्रणाशनं॥सर्व
कामप्रदंचैवसर्वव्याधिविनाशनं॥पूजार्घ्यदानसहितंनैवेद्यप्राशनान्वितं॥एतत्कथयसर्वस्वं
प्रसन्नोयदिमेप्रभो॥ ॥वसिष्ठउवाच॥ ॥शृणुराजन्प्रवक्ष्यामियत्पृष्टंत्वंव्रतमुत्तमं॥सर्वकाम
प्रदंपुंसांकुष्ठादिव्याधिनाशनं॥तानोस्तुष्टिकरंराजन्भुक्तिमुक्तिप्रदायकं॥यस्योदयेसुरगणा
मुनिसंघाश्चचारणाः।दैत्यदानवयक्षाश्चकुर्वंतिसततमर्चनं॥यस्योदयेतुसर्वेषांप्रबोधोनृप
सत्तम॥तस्मादेवस्यवक्ष्यामिव्रतंराजन्सविस्तरं॥पूजार्घप्राशनंदानंनैवेद्यंशृणुतत्वतः॥सर्व
तीर्थेषुयत्पुण्यंसर्वयज्ञेषुयत्फलं॥सर्वदानेनतपसायत्पुण्यंसमवाप्यते॥प्रातःस्नानेनयत्पुण्यं राम ३७५
यत्पुण्यंरविवासरे॥मासमार्गशीर्षादिमासेषुद्वादशस्वपिनृपते॥सूर्यव्रतंकरिष्यामियावद्वर्षदिवा

करः।व्रतंसंपूर्णतांयातुत्वत्प्रसादात्प्रभाकर॥नियममंत्रः॥ततःप्रातःसमुत्थायनद्यादौविम
लेजले॥स्नात्वासंतर्प्पयेद्देवान्पितॄंश्चवसुधाधिपः॥उपलिप्यशुचौदेशेसूर्यंतत्रसमर्चयेत्
॥संलिखेत्तत्रपद्मंतुद्वादशारंसकर्णिकं॥ताम्रपात्रेतथापद्मंरक्तचंदनवारिणा॥ततःसंपूजयेद्दे
वंदिननाथंसुरेश्वरं॥मासेमासेचयेराजन्विशेषांस्तान्शृणुष्वमे॥मार्गशीर्षेयजेन्मित्रंना
लिकेरार्घ्यमुत्तमं॥नैवेद्यंतंडुलादेयाःसाज्याश्चसगुडाःस्मृताः॥पत्रत्रयंतुलस्यास्तुप्राश्य
तिष्ठेज्जितेंद्रियः॥दद्याद्विप्रायभोज्यंतुदक्षिणासहितंनृप॥पौषेविष्णुंसमभ्यर्च्यनैवेद्यंशार्क
रांतथा॥बीजपूरेणचैवार्घ्यंप्राशनंघृतपलत्रयं॥दद्याद्धुतंतुविप्रायभोजनेनसमन्वितं॥मा
घेवरुणनामानंसंपूज्याज्यंतिलान्गुडं॥भोजनंदक्षिणांदद्यान्नैवेद्यंतत्ततोफलं॥अर्घ्यंतेनैवद
त्वातुप्राशनंप्रमुष्टित्रयंतिलाः॥फाल्गुनेसूर्यमभ्यर्च्यजंबीरंचनिवेदयेत्॥पलत्रयंदधिप्राशनं
नैवेद्यंसघृतंदधि॥दधितंडुलदानंचभोजनेसमुदाहृतं॥चैत्रेभानुंतुसंपूज्यनैवेद्यंघृतपू

व्रता० २७६

रिकाफलेनतुदाडिमंप्रोक्तंप्राशनंपंचगव्यपलत्रयं॥ विप्रायभोजनंदद्यान्मिष्टान्नंतुसदक्षिणं॥ वैशा
खेतपनइत्समाषान्नसघृतंस्मृतं॥ अर्घ्यंदद्यात्तुद्राक्षाभिः प्राशनेगोमयंस्मृतं॥ कुर्यान्माषा
न्नदानंतुसघृतंवैसदक्षिणं॥ इंद्रंज्येष्ठेयजेद्राजन्नैवेद्यंतुकरंभकं॥ अर्घ्यंश्रीमत्कारेणप्राशं
जलांजलित्रयं॥ दध्योदनसमायुक्तंभोजनंब्राह्मणायतु॥ आषाढेरविमभ्यर्च्यपूजांविपिटिकं
तथा॥ विप्रायभोजनंदद्याद्दक्षिणासहितंनृप॥ प्राशयेन्मरिचत्रयं॥ गभस्तिमान्श्रावणेथैव
पुसीफलमेवच॥ मुष्टित्रयंचसक्तूनांप्राशनेसमुदाहृतं॥ विप्रायभोजनंदद्याद्दक्षिणासहि
तंनृप॥ यमोभाद्रपदेपूज्यः कूष्मांडंतंदुलान्वकं॥ गोमूत्रंप्राशनेयुक्तंब्राह्मणेभ्योभोजनंत
था॥ हिरण्यरेताश्चाश्विनेचनैवेद्यंशर्करास्मृतं॥ दाडिमेनार्घदानंतुप्राशापंचपलत्रयं॥ वि
प्रायपरमान्नंभोजनेशालिशर्करा॥ दिवाकरःकार्तिकेचरंभायाःफलमेवच॥ पायसं
चैवनैवेद्यंपायसंप्राशनेस्मृतं॥ एवंव्रतंसमाप्यैवतत्रतदुद्यापनंचरेत्॥ ततोगुरुंगृहंगता

राम २७६

Dr. BHAU DAJI

ह्णीयाद्वरणंगुरो॥ उद्यापनंकरिष्येहमागच्छममवेश्मनि॥ माषकेनसुवर्णस्यप्रतिमांकारये
द्बुधः॥ रथरूप्यमयःकार्यःसर्वोपस्करसंयुतः॥ कृत्वाष्टदलपत्रंतुकमंडलंरक्ततंडुलैः॥ स्था
पयेत्कलशंकुंभंपंचरत्नसमन्वितं॥ तस्योपरिन्यसेत्पात्रंताम्रंतंडुलपूरितं॥ रक्तवस्त्रसमाछि
न्नंपुष्पमालाभिर्वेष्टितं॥ पंचामृतेनस्नपनंमंत्रोच्चारणपूर्वकं॥ प्रतिष्ठांचततःकृत्वापूजयेद्देवर
पेत॥ चंदनैःकुसुमैरन्यैर्विविधैःकालसंभवैः॥ अरुणंरक्तवस्त्रेचकमंडलुमुपानहो॥ वर्ध
नीत्रितयंतत्रस्थापयेद्दिवसाधिपौ॥ संज्ञायावस्त्रयुग्मंतुकौसुंभंतुमहीपते॥ प्रतिपत्रेषुसंपू
ज्यसूर्यंद्वादशनामभिः॥ मित्रोविष्णुःसवरुणःसुदर्भसंज्ञयासह॥ पूगीफलैर्धूपदीपैर्वस्त्र
रूपेणांशुमत्स्यैवच॥ तपनेंद्रोरविःस्वर्णोगभस्तिःसमनस्तथा॥ हिरण्यरेतादिनकृत्स्नाएतेप्रबल
तः॥ मध्येसहस्रकिरणःसंज्ञासंज्ञयासह॥ पूगीफलैर्धूपदीपैर्वस्त्रनैवेद्यसंयुतैः॥ नालिकेरे
णचैवार्घ्यंदद्याद्देवस्यभक्तितः॥ मंत्रेणानेनराजेंद्रव्रतस्यपरिपूर्तये॥ नमःसहस्रकिरणसर्वव्याधि

व्रता०
२११

विनाशन॥ गृहाणार्घंमयादत्तंसंज्ञयासहितोरवे॥ आरात्रिकंततःपश्चात्प्रणामंकल्पमेवच॥ संक-
ल्पंचततःकुर्याच्छ्रद्धवैस्सूर्यदैवतं॥ ब्राह्मणान्भोजयेद्भक्त्यामिष्टान्नैर्षद्रसप्रभो॥ दंपतीभोजयेन्नं दे-
यंपरमान्नसमन्वितं॥ ततस्तुदक्षिणांदेयासमंस्वर्णस्रगादिभिः॥ उपहारादिकंसर्वंगुरवेप्रतिपाद-
येत्॥ गुरुंतत्रैवसंतोष्यब्राह्मणांश्चविसर्जयेत्॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंतुयत्कृतं॥ तत्सर्वंपूर्ण-
तांयातुत्वमिदेवप्रसादत॥ अनुव्रज्यगुरुंविप्रान्ब्राह्मणांश्चविसर्जयेत्॥ मंत्रहीनंक्रियाहीनंभ-
क्तिहीनंतुयत्कृतं॥ सर्वंसंपूर्णतांयातिनत्वादेवंदिवाकरं॥ दद्वैश्चबंधुभिःसार्द्धंभोजनंतुसमाचरेत्॥ ए-
वंयःकुरुतेमर्त्योविघ्नैशाद्यविवर्जितः॥ सूर्यव्रतंमहाराजतस्यपुण्यफलंशृणु॥ ब्राह्मणोलभतेवि-
द्यांक्षत्रियोराज्यमाप्नुयात्॥ वैश्योसमृद्धिविपुलांशूद्रःसुखमवाप्नुयात्॥ अपुत्रोलभतेपुत्रंकुमा-
रीलभतेपतिं॥ रोगार्त्तोमुच्यतेरोगाद्बद्धोमुच्येतबंधनात्॥ यंयंचिंतयतेकामंसतस्यभवतिध्रुवं॥ पठेच्छ-
शृणुयाद्भक्त्यायेकचित्तोभवेन्नृप॥ सर्वान्कामानवाप्नोतिप्रसादाद्भास्वतोनृप॥॥ इतिसोधर्मोक्तंसूर्य-

---

व्रतं॥॥ आश्विनादिरविवारेष्वादित्यव्रतं॥॥ स्कंदउवाच॥॥ शृणुदिव्यंपरंपुण्यंआदित्याराधनंपरं॥ यत्कृ-
त्वासर्वकामानांसकलंफलमाप्नुयात्॥ समुद्रतीरेविप्रेंद्रापुरीद्वारावतीशुभा॥ वासुदेवेयदुवरेपुरारा-
ज्यंप्रशासति॥ दुर्वासाःशंकरस्यांशश्चाजगामावनौक्वचित्॥ कृष्णेनपूजितस्तत्रअर्घ्यपाद्यासनादिभिः॥
भोजनंतस्ययद्दत्तंयथाविधिवितंमुनेः॥ संपूजितःसकृष्णेनयावत्तिष्ठत्यसौमुनिः॥ शांबेनहसितंतस्य
स्रुतेनसहसाकिल॥ क्रुद्धोपिमुनिशार्दूलःकोपंसंहृतवान्स्वयं॥ हसितेनमयेदानींनात्रत्वत्कृतेको-
पंकृतं॥ सगत्वानारदंप्राहशांबेनहसितोस्मिनो॥ अतोमंचरतःकार्यंतस्यप्रतिकृतंत्वया॥ इत्यु-
क्तोनारदःप्रायात्प्रासादकंकृष्णसन्निधौ॥ सकंसेसंदर्पयित्वापिसममस्वेवकीनंदन॥ देवयात्रामिषंकृत्वा
हस्त्यश्वरथसंकुलं॥ नारदेनैवमुक्तस्तुतथैवकृतवान्विभुः॥ दर्शितेतुबलस्याहस्यात्रशांबःप्रह-
र्षते॥ मयैवानीयतेशीघ्रंपारवत्यास्तवांतिकं॥ गत्वैवमुक्तोमुनिनाश्रेष्ठोजांबवतीसुतः॥ सम्यग्मेस्य-
यानीतोमकरध्वजदर्शनः॥ गत्वालिंगचुंबुबुस्तगोप्यःकृष्णपरिग्रहः॥ नारदःप्राहभगवान्ऊश्वस्ति

व्रता० तयानघ॥ क्रुद्धेन शौरिणा शप्तः कुष्ठी त्वं भव नराधमः॥ एवमुक्ते तया पुत्रः कुष्ठरोगातुरोऽभवत्॥ सांबः
२५८ प्रणम्याह पितः किमर्थं शापितस्त्वया॥ स्वशक्तिं तां न दृष्ट्वा तु विचार्य सुविनिश्चयं॥ ध्यानाडुर्वासतो
ज्ञाता विक्रियात्यंतकारणं॥ अनुग्रहो मया पुत्रं कार्यस्ते स्वतपे शुचौ॥ आदित्यस्य व्रतं चैव कुरु
कुष्ठविनाशनं॥ सांब उवाच॥ कथं तात मया कार्यं व्रतं सर्वफलप्रदं॥ किंविधानं तु के मंत्राः किंदा
नं किं च पूजनं॥ कृष्ण उवाच॥ मासमाश्वयुजं प्राप्य यदा रविदिनं भवेत्॥ तदा व्रतमिदं ग्राह्यं नरैः
स्त्रीभिर्विशेषतः॥ यावत्संवत्सरं तावद्विधिनानेन पुत्रक॥ गोमयेन क्षितौ कुर्यान्मंडलं वर्तुलं पुनः
॥ रक्तपुष्पैरक्षताभिर्घृतेन प्रदापयेत्॥ मंत्रेणानेन नास्वंतमाचार्यः प्रतिवासरं॥ यथाशा विमलाः
सर्वाः सूर्य भास्करभानुभिः॥ तथाशाः सफलाः मह्यं कुरु नित्यं मयार्चितः॥ अर्घमंत्रः॥ एवं तमर्चयेन्ना
वद्यावद्वर्षसमाप्यते॥ समाप्ते तु व्रते वत्स कुर्यादुद्यापने विधिं॥ गोमयेनानुलिप्तायां भूमौ मंडल राम
मालिखेत्॥ रक्तचंदनरेखाभिः कुंकुमेन विशेषतः॥ तन्मध्ये द्वादशदलं पद्ममाकारयेद्बुधः सि २५८

तपरितदलं पक्कसुमपूजितं॥ तन्मध्ये स्थापयेत्कुंभं प्रवालांकुरसन्निभं॥ शालितंडुलसंपूर्णं
शर्करा चंदनान्वितं॥ तस्योपरि न्यसेत्पात्रं ताम्रजं मृदादिनिर्मितं॥ सौवर्णं भास्करं कृत्वा पद्मह
स्तं स्वशक्तितः॥ रक्तवस्त्रयुगोपेतं पात्रोपरि निवेशयेत्॥ अथ पंचामृतेनादौ जपाकुसुमलेपितं
॥ रक्तपुष्पैस्तु नैवेद्यैः फलैः कालोद्भवैस्तथा॥ पूजयेत्कपतामिशरीप धूपैस्तथोत्तमैः॥ सूर्याय न
मः॥ वरुणाय नमः॥ माधवाय॰ धात्रे॰ हयाय॰ भर्गाय॰ सुवर्णरेतसे॰ अत्रये॰ दिवाकराय॥ भानवे॰
हंसाय नमः॥ इति द्वादशभिः पूजा कार्या वै व्रतिभिः सदा॥ नमो नमः पापविनाशनाय विश्वात्मने सप्त
तुरंगमाय॥ सामर्ग्यजुर्धामनिधे हितर्न्नवाब्धिपोताय नमः सवित्रे॥ प्रार्थनामंत्रः॥ अनेन मंत्रेणार्घं
॥ एवं संपूज्य भानुं तु नक्तं भुंजीत वाग्यतः॥ आचार्यं पूजयित्वा तु वस्त्रैराभरणैः शुभैः॥ तस्मै तां प्रतिमां
कुंभं सहिरण्यं प्रदापयेत्॥ प्रीयतां भगवान्देवो मम संसारतारकः॥ ब्राह्मणान्भोजयेत्पश्चाद्दशा
न्नादिविस्तरैः॥ तेभ्यः सत्कलशान्दद्याद्यथाशक्त्या सुदक्षिणं॥ एवं यः कुरुते सम्यक् व्रतमेतत्सुत्तमं

व्रता० आशादित्येतिविख्यातंतत्सपुण्यफलंमहत्॥ निष्पापोधिनिपुणोजस्वी पुत्रपौत्रसमन्वितः॥ नक्ष्का
२५८ चनोगानमलानमरैरपिदुर्लभात्॥ देहांतरेविसापुत्रंप्राप्नुयादुत्तमोत्तमं॥ प्राप्स्यसेपरमामहि वि
मुक्तःकुष्टरोगतः॥ आशागंगोनतस्यास्तिकदाचिदपिजन्मनि॥ एतस्मात्कारणाद्वत्सकुरुष्टव्रतमु
त्तमं॥ एतच्छ्रुत्वावचःसोपिपित्राकृत्स्नेनभाषितं॥ व्रतंचरित्वासंप्राप्तासर्वसिद्धिस्सुदुर्लभा॥ इदंयः
शृणुयान्नक्ताश्रावयेद्वापिमानवः॥ तावुभौपुण्यकर्माणौरविलोकमवाप्नुयात्॥ ॥इतिस्कांदेआ
शादित्यव्रतं॥ अथसोमवारव्रतं॥ देशकालौस्मृत्वाअमुककामइदंव्रतंकरिष्यइतिसंकल्प्यम
हाकालामृत्युंजयेसंनवेइतिमंत्रेणषोडशोपचारान्कृत्वापरिवारदेवताःपूजयेत्॥ प्रागादिक्र
मेणब्रह्माणंविष्णुस्कंदंमहाकालंमृत्युंजयमनमहेश्वरंनंदिकेश्वरंआवाहनाद्युपचारैः॥
चंडायनमः॥ इतिमंत्रेणैशान्यांपंचोपचारैःश्वेतंपूजयेत्॥ ततःप्रार्थना॥ त्र्यंबकायत्रिनेत्रायपंच राम
वक्त्रायशूलिने॥ श्वेतवृषानुरूढायसुरैःश्वेताम्बरप्रियवोउमांसहितायनमः॥ त्राहिमांकृपयादेवशर २५८

णंत्वंमहेश्वरंनंदिकेश्वरायनमइत्यनेनंनंदिकेश्वरंप्रपूजयेत्॥ ततपुष्पाणिगृहीत्वांगपूजांकारयेत्प्रका
रः॥ देवाधिदेवायनमःपादयोः शंकरायनमःजंघयोःशिवायनमःइतिजान्वोःशूलपाणयेनमइति
गुल्फयोः॥ शंभवेनमइतिकट्यां स्वयंभुवेनमइतिगुह्ये॥ महादेवायनमइतिनाभौविश्वकर्त्रेनमः
उदरे॥ सर्वतोमुखायनमःपार्श्वयोः॥ स्थाणवेनमः॥ स्तनयोःनीलकंठायनमःकंठे॥ श्रीरुद्रायन
मः॥ शिवायनमःमुखे॥ त्रिनेत्रायनमःनेत्रयोः॥ शिशिरभूषणायनमःमुकुटे॥ देवाधिदेवायन
मः॥ सर्वांगे॥ ॥इतिपूजाविधिः॥ ॥अथकथा॥ ॥नारदउवाच॥ ॥अन्नदपितेहितयेनाहंसमाप्नु
यांपदं॥ अप्रकाश्चशिवेनक्तिपुत्रसौभाग्यसंपदः॥ नंदिकेश्वरउवाच॥ ॥सोमवारव्रतंपुण्यंकथ्य
मानंनिबोधमे॥ श्रावणेचैत्रवैशाखेमासेवामार्गशीर्षके॥ प्रथमेसोमवारेचप्रकुर्याद्व्रतमुत्तमं
॥ पदाश्रद्धान्वेत्कर्तुंसोमवारव्रतंप्रति॥ तदाचापिपुरस्कृत्यश्रद्धाभक्तिसमन्वितः॥ सुस्नातश्च
शुचिर्भूत्वाशुक्लांबरधरोनरः॥ कामक्रोधाद्यहंकारद्वेषयेश्चसमवर्जितः॥ आहारेबूतपुष्पाणिमः

व्रता० २८०

लतिमल्लिकादिकं॥ श्वेतपद्मानि दिव्यानि चंपकानि तथैव च॥ कुलमंदारजैः पुष्पैः पत्रैश्च शतप
त्रजैः॥ आचार्येण मया सार्धं शंकरं लोकशंकरं॥ मंत्रेण जेन धूपेन धूपयेत्पार्वतीपतिं॥ अन्यानि या
नि नैवेद्यानि सर्वाणि दापयेत्॥ नागपुष्पैश्च नक्तैश्च पूजयेत्पार्वतीपतिं॥ कामिकेन तु मंत्रेण
व्यापकेन महेश्वरं॥ पूजयेन्मूलमंत्रेण त्र्यंबकेन ततः परं॥ नवाय नवनागाय महादेवाय धीमहि
॥ उमाप्रियाय नाथाय सर्वाय शशिमौलिने॥ रुद्राय नीलकंठाय शिवाय नवहारिणे॥ शंकरा
य नमो जंघे शिवायेति च जानुनी॥ शूलपाणये नमो गुल्फे कट्यां शंभुं प्रपूजयेत्॥ गुत्येस्वयंतु
नामानं पूजयेत्पार्वतीपतिं॥ महादेवाय रतिः पूजयेन्नामस्निमंडले॥ विश्वकर्त्रेति पार्श्वयोः सर्वतो
मुखे स्वाणु॥ ——— स्तनौ च संहर्त्रे नीलकंठाय कंठतः॥ मुखे संपूजयेद्देवं श्रीकंठाय शिवाय च राम २८०
॥ त्रिनेत्राय नमो नेत्रे मुकुंदेशाशिभूषणे॥ नमो देवाधिदेवाय सर्वांगं पूजयेद्विभुं॥ एवं संपूज्य दे
वेशमुपहारैर्मनोहरैः॥ यथाविभवसारेण तस्य पुण्यफलं शृणु॥ सोमवारे यजंते ये पार्वतीसह

शंकरं॥ तेलसंतस्यालोकाल्लुनरावर्त्तिदुर्लभात॥ एकनक्तस्य यत्पुण्यं कथयामि समासतः॥ सप्तज
न्मार्जितं पापमल्पे वदंदेवदानवैः॥ तत्क्षणे चैकनक्तेन नात्र कार्या विचारणा॥ मासैकस्य तु यत्पुण्यं
शृणु यत्नेन सुव्रतः॥ अन्नाद्योजातनागस्मात् उद्भगः सुव्रगोभवेत्॥ पुत्रार्थी लभते पुत्रान् धनार्थी
लभते धनं॥ कन्यार्थी लभते कन्यां रूपलावण्यशालिनीं॥ यंयं चिंतयते कामं तंतं प्राप्नोति मानवः॥
गृहे तस्य वसेल्लक्ष्मी सौख्यानि विविधानि च॥ रुद्रलोको धर्ममार्गस्थो विग्रहे न क्षितिं चरेत्॥ अश्वमेधसह
स्त्राणि फलं प्राप्नोति मानवः॥ इहलोके चिरं स्थित्वा भुक्त्वा भोगानतोरयान्॥ विमानवरमारुह्य रुद्र
लोके महीयते॥ यथात्मानं तथा देवं यथा देवं तथा गुरुं॥ तोषयेच्च परं भक्त्या तेन पूर्णं भवेद्व्रतं॥ नंदि
केश्वर उवाच॥ उपवासेन चैवेदं समाचरति मानवः॥ यदा चित्तं च वित्तं च जायते पुरुषस्य वै॥ तदैवोद्या
पनं कुर्यात् व्रतसंपूर्णहेतवे॥ चलं चित्तं चलं वित्तं चलं जीवितमेव च॥ एवं ज्ञात्वा प्रयत्नेन व्रतस्योद्या
पनं चरेत्॥ उमामहेश्वरौ हैमौ रूपेणैव समन्वितौ॥ यथाशक्त्या प्रकर्तव्यौ विशाखाद्यं कारयेत्॥ मंडलं

व्र.ता० २५१

कारयेद्दिव्यं लिंगोद्भव कृतं शुभं॥ कलशं पयसा पूर्णं श्वेतवस्त्रयुगान्वितं॥ ताम्रपात्रं वैणुमयं कुं
भयोलिपविन्यसेत॥ स्थापयेन्मंडले दिव्ये कलशं कनकोज्वलं॥ तस्योपरिन्यसेद्देवमुमया सहितं सा
शिवं॥ श्वेतक्षीरेकमंत्रैस्तु पूजयेत्पार्वतीपतिं॥ नानापुष्पैः फलैर्दिव्यैर्नानारत्नैः समर्चयेत॥ श्वे
तवस्त्रयुगेनैव तन्नाममंत्रैर्महेश्वरं॥ उपवीतं सोत्तरीयं भूषणानि विविधानि च॥ धान्यानि यान्य
भीष्टानि तानि चामानि कल्पयेत॥ पुष्पमंडपिका कार्या वितानं तत्र शोभितं॥ शाण्यात्तजीतयार
तं दिवस्याग्रे प्रकल्पयेत॥ रात्रौ जागरणं कुर्यात् गीतवादित्रनिःस्वनैः॥ स्वगृह्योक्तविधाने
न कृत्वाग्निस्थापयेत्ततः॥ ततो होमं चरुणा वा होमं मंत्रे कार्ये निति तस्तदा॥ पालाशास्सु शमी समि
त्कृया शादिकं शतं॥ आप्यायस्वेति मंत्रेण प्रदद्यादाज्येः घृतस्तदा॥ यच्चव्रीहितिलाजैस्तेन पूर्णं पू
र्णाहुतियकस्यकं॥ पूर्णाहुतिं ततो दद्यात्कृत्वा स्विष्टकृदादिकं॥ होमांते च गुरुं श्रेष्ठं सपत्नीकं स
माहितं॥ वस्त्रेराभरणैः श्रेष्ठैर्गृहोपकरणादिभिः॥ श्वेता वा कपिला वापि सुशीला च पयस्विनी

राम २५१

सवत्सा रत्नपुच्छा च घंटा वस्त्र विभूषिता॥ दक्षिणा सहिता देया शिवो मे प्रीयतामिति॥ धेनुर्वै जं
गतानित्यं विष्णुपदे स्थिता॥ सर्वपापक्षयाद्यस्तु प्रीयतां मे सदाशिव॥ ब्राह्मणान्भोजयेत्पश्चात् त्रयो
दशास्तु शोभनान्॥ वस्त्रालंकारखनाद्यं तेभ्यो देयं सदक्षिणं॥ त्रयोदशाघटा देया वंशपात्रसम
न्विताः॥ पक्वान्नफलसंयुक्ता नाम्ना मस्यसमन्विताः॥ पूजितं तु ततो देवं देवो पकरणान्वि च॥ आचा
र्याय ततो दद्यात्प्रणिपत्य पुनः पुनः॥ इमं देवं गृहाणत्वं सर्वोपस्कर संयुतं॥ परिपूर्णं व्रतं मेस्या द्वि
वो मे प्रीयतामिति॥ गच्छामि देवदेवेश त्वया ज्ञातं गुरुं॥ शांतिरस्तु शिवं चास्तु व्रतस्यास्य विक
लं---॥ यज्ज्ञाताद्देवदेवेश मया व्रतमिदं कृतं॥ न्यूनं वाप्यक्रियाहीनं परिपूर्णं तदस्तु मे॥ इति संप्रार्थ्य
ये देवदिवं चैव पुनः पुनः॥ भुंजीयाच्च ह धर्मात्मा विशिष्टैरिष्टबंधुभिः॥ अनेनैव विधानेन पदं
व्रतमाचरेत॥ यंयं चिंतयते कामं तं तं प्राप्नोति मानवः॥ दाता सुखी च तेजस्वी त्रिषु लोकेषु विश्रुतः॥
विमानवरमारूह्य सोमलोके महीयते॥ मन्वंतरं च वर्मनं यावत्तावत्तत्रैव मोदते॥ शिवलोकं ततो गत्वा

व्रता०
३७८

शिवेन सह मोदते ॥ क्रीडते ऽसौ चतुरूपेण पुनरागत्य त्रिदुर्लभं ॥ कस्तेनाचरितं पूर्वं सोमवारव्रतं शुभं ॥
नृपैः श्रेष्ठैः पुराचीर्णमास्तिकैर्धर्मतत्परैः ॥ इति पवित्ररहस्यं यः शृणोति च नित्यं त्वनुवदति ददाति
श्रद्धयास्य यो वै ॥ सकलकलुषहानौ वंद्यमानो गणौघैः शिवविमलविमाने याति शैवं पुरं स
॥ ॥ इति श्रीस्कांदे सोमवारव्रतं संपूर्णं ॥ अथ भौमवारव्रतं ॥ तत्र तद्यंत्रप्रकारश्च ॥ संग्रहे ॥
त्रिकोणं पूर्ववत्पंचधा विजेत्ततः ॥ तृतीये रेखाचिह्नमांतं छये समागतः ॥ आद्यरेखाग्र
युगलं तृतीये चिह्नयोः समेत ॥ चतुरेखा तृतीयां तु समामस्य समांशमांशतः ॥ तयोश्चिह्नद्वयेनाथ त्रित्रि
श्चिह्ने स्तः पंचमी ॥ तृतीयाग्रे पुष्पकवीत पंचम्यामधिचिह्नगो ॥ तुर्याग्रे योजयेत्सम्यक् पंचमस्य चि
ह्नयोर्द्वयोः ॥ अथ मांतद्वये द्याच्च त्रयुग्मं विचक्षणः ॥ एवमेकाधिकासंख्या कोणानां विंशति राम
र्भवेत् ॥ तृतीयां तु यर्ययोमध्यस्थितिचिह्नगं लेखयेत ॥ देवं तदंतो मंत्री त्रिकोणे दक्षिणक्रमात ॥ मंग ३७८
लाद्यान् तारपूर्वान्नमोंतानेकविंशति ॥ एकविंशतिकोष्ठेषु नाममंत्रान्समालिखेत् ॥ ततः पूजा प्र

कर्तव्या पुष्पसंपत्तिर्विहितैस्तवैः ॥ पूजाप्रकारमाह ॥ एहि मे भगवन्भौम अंगारक महाप्रभो ॥ त्वयि सर्वं
समायातं त्रैलोक्यं सचराचरं ॥ भौमभावाहयिष्यामि त्वं भौम त्रिदुरासदं ॥ रक्तरूप महिद्धिं रक्तकंबल
धिरप्रियं ॥ अग्निर्मूर्धेति मंत्रेण गायत्र्या मंगलस्य च ॥ अंगारकाय विद्महे शक्तिहस्ताय धीमहि तन्नो
भौमः प्रचोदयात् ॥ अथ पूजाविधिः ॥ ॥ मंत्रमहोदधौ ॥ मार्गशीर्षे वैशाखे वा शुक्लपक्षे भौमवारे
अरुणोदयकाले वा अपामार्गकाष्ठेन दंतधावनं दंतधावनं विधाय नद्यादौ स्नात्वा रक्तवस्त्रपरिधा
यस्को नीलं बध्वा मासपक्षाद्युल्लिख्य कर्णच्छेदाय पुत्रावाप्त्यर्थं वा भौमवारव्रतसंकल्पं प्रार्थये
त् ॥ अथ देवेशाते नत्वा करिष्ये व्रतमुत्तमं ॥ ऋणव्याधिविनाशाय धनसंतानहेतवे ॥ इति ॥ ततः क
र्णिकादेहे न्यासान्कुर्यात् ॥ यथा ॥ अं भौमें मंगलाय नमः ॥ जानुनी भूमिपुत्राय नमः ॥ ऊरू ॥ ऋण
हर्त्रे० कटिदेशे० धनप्रदाय० गुह्ये० ॥ स्थिरासनाय० उरसि ॥ महाकायाय० वामबाहौ ॥ सर्वकर्मविरो
धकाय० दक्षिणबाहौ ॥ लोहिताय गले ॥ लोहिताक्षाय० मुखे ॥ सामगानां कृपाकराय० नमो धरात्मजा

व्रता० १८३

य० कुक्षौ ॥ कुजाय० ललाटे० ॥ भौमाय० भ्रुवोर्मध्ये ॥ भूतिदाय शिखायां ॥ अंगारकाय० चरणान्मस्त
कावधि ॥ वृष्टिहर्त्रे० नाम्नो ॥ आराय वससि ॥ वक्राय० मूर्द्धनि० भूमिजाय नम इति न्यासः ॥ ० कृत्वा षड
न्यासं कुर्यात् ॥ यथा ॥ क्रां हृदयाय नमः ॥ क्रीं शिरसे स्वाहा ॥ क्रूं शिखायै वषट् ॥ ॐ क्रैं ॐ हूं कवचा
य हुं ॥ हंसनेत्रत्रयाय वौषट् ॥ रवं रवः अस्त्राय फट् ॥ करन्यासः ॥ ॐ कुं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रं
मध्यमाभ्यां नमः ॥ ॐ ह्रां ह्रीं ह्रूं तर्जनीभ्यां० ॐ हं सं अंगुष्ठाभ्यां० ॐ रवं रवः करतलकरपृष्ठाभ्यां मिति न्या
सान् कृत्वा आवाहयेत् ॥ रक्तमाल्यांबरधरः शक्तिशूलगदाधरः ॥ चतुर्भुजो मेषगमो वरदः स्याद्धरा
सुत इति ध्यानं ॥ एह्येहि भगवान् ब्रह्मन् अंगारक महाप्रभो ॥ त्वमपि सर्वसमायातं तैजसं संस्तवान्व
रं ॥ भौम मावाहयिष्यामि तेजोमूर्तिं दुरासदं ॥ रक्तमल्पमति हृद्रूपं वक्रं च रुधिरप्रियमिति ॥ ततोऽपि राम
मूलेति मंत्रेण सर्वोक्ति भौमगाय आवाह्य आसनादि पुष्पांतं ॥ पूजां कृत्वा मंत्रस्यैकविंशतिकोष्ठेष्वंगानि १८४
पूजयेदेकविंशतिनामभिः ॥ यथा मंगलाय नमः पादौ पूजयामि ॥ भूमिपुत्राय० जानुनी० ऋणहर्त्रे० ऊरू

॥ धनप्रदाय० कटिं स्थिरासनाय० गुह्यं ॥ महाकायाय० उरः ॥ सर्वकर्मविरोधकाय० बाहू ॥ लोहि
ताक्षाय० कंठं ॥ सामगानां कृपाकराय मुखं ॥ धरात्मजाय० नासिकां ॥ कुजाय० अक्षि० भौमाय० लला
टं ॥ भूतिदाय० भ्रूमध्यं ॥ भूमिनंदनाय० मस्तकं ॥ अंगारकाय शिखां ॥ यमाय० सर्वांगं पू० सर्वरोगा
पहारकाय पंचवाकृत्य पे पू० ॥ वृष्टिकर्त्रे नमः मूर्द्धादि पादांतं पू० वृष्टिहर्त्रे नमः चरणादि मस्तकपर्यंतं
पू० वृष्टिहर्त्रे नमः दिशां पू० अत्र मूलमंत्रे महोदधिमात्रः ॥ अस्य कवचं मयात्र प्रकारः स च यथा ॥
शिखायां मंगलं पातु भूमिपुत्रश्च मूर्द्धनि ॥ ललाटे ऋणहंता च चक्षुषोश्च धनप्रदः ॥ स्थिरासनश्च श्रो
त्रयोश्च महाकायश्च नासिके ॥ आस्यं दंतोष्ठ जिह्वास्तु सर्वकर्मविरोधकः ॥ हनुमे लोहितः पातु लोहि
ताक्षश्च कंठके ॥ स्कंधयोर्भुजयोर्हस्ते सामगानां कृपाकरः ॥ धरात्मजो भुजौ पातु कुजोरस्के स्वरूपं
॥ भौमो मे हृदयं पातु भूतिदस्तु तथोदरे ॥ भूमिनंदनश्च नाभौ गुह्येंगारकस्तथा ॥ ऊरू मम यमो र
क्षेज्जान्वोरोगापहारकः ॥ जंघयोर्वृष्टिकर्ता च अपहर्ता च गुल्फयोः ॥ पादांगुष्ठे च पादौ च सर्वकामप्र

व्रता०
३०४

दः॥शक्तिर्मेपूर्वतोरक्षेत्खड्गंरक्षेद्दक्षिणे॥पश्चिमेधनुषःपातुउत्तरेचक्रधारस्तथा॥ऊर्ध्वंपिडाननः
पातुअधस्तात्पृथिवीमम॥एवंन्यस्तशरीरोसौचिंतयेद्भूमिनंदनं॥॥अथकथा॥॥सूतउवाच॥॥
पूजितोदेवदेवैस्तुमंगलोमंगलप्रदः॥गौतमेनपुरापृष्टोलोहितांगोमहाव्रतः॥॥गौतमउवाच॥॥
कथयस्वमहाभागपुत्रप्रजननमुत्तमं॥मंत्रमाराधनंदानंसर्वपापप्रणाशनं॥रूपंसुवर्णसंका
शंवाहनायुधसंयुतं॥येनपूजितमात्रेणजायंतेसुतमुत्तमं॥धर्मार्थकाममोक्षाणांकालेनैव
फलप्रदं॥सर्वपापप्रशमनंसर्वव्याधिविनाशनं॥सर्वसौभाग्यदंदेवदत्वापातकनाशनं॥स
र्वयज्ञफलंप्रोक्तंसर्वकामफलप्रदं॥तपसाजपदानानांफलंचैवतुलभ्यते॥तद्व्रतंब्रूहिमेदेव
लोहितांगमहाग्रह॥यस्मिन्नाराधितेमर्त्यःसर्वसौभाग्यवान्भवेत्॥॥मंगलउवाच॥॥शृणु राम
विप्रमहाभागसर्वज्ञऋषिगौतम॥व्रतंचप्रजननंदानंयत्कृतंभुवनत्रये॥आसीत्पूर्वंहिसर्वतोब्रा ३०४
ह्मणोवेदपारगः॥तस्यभार्यासुनंदाचनाम्नाख्यातासुलोचना॥तस्यापत्यंनसंजातंवृद्धत्वान्नक

दाचन॥तेनात्मसुतापुत्रार्थंगृहीत्वापोषिताध्रुवं॥ब्राह्मणस्यकुलेजातासुरूपारूपसंयुता
॥सर्वलक्षणसंपन्नाप्रयत्नेनतेनैवगौतम॥पुराजन्मतयाचाहमेकभावेनपूजितः॥त्वांपुत्रीस्वगृ
हेनीत्वाब्राह्मणेनैवपालिता॥नित्यंहिपुष्पतेतस्याअष्टांगकनकद्युतिः॥ततस्तुवर्णेनविप्रो
सौधनाढ्योबलगर्वितः॥कोटिकोश्वरोजातोराजतेनरविमंडले॥स्वानंदकविप्रेणदशवर्षावि
दर्पिता॥विवाहार्थंचविप्रस्यदत्तासोमेश्वरस्यच॥वेदोक्तविधिनातेनविवाहमकरोत्तदा॥वर्षैः
कतिपयैर्विप्रसाकन्याप्राप्तयौवना॥ततःस्वदेशमार्गेणव्रतान्विप्रोप्यहर्निशं॥निशांतेप्रहरेघोरे
अरण्येपर्वतोत्तमे॥सर्वस्वंव्रतंतस्मिन्मत्कालोनेनजावितः॥मार्गेजलातिविप्रोसौचौरैश्चविनि
पातितः॥तपस्विन्यस्तथालोकमसातारीशोकपीडिता॥पतिनासहविप्रेणमरणेकृतनिश्चया॥स्व
पतिंनत्वंविश्वंचिंतयंतिपदेपदे॥पतिप्रदक्षिणीकृत्यचितायांश्चसमीपतः॥तस्मिन्क्षणेतुतुष्टोहं
वरार्थंप्रचोदिता॥वरंब्रूहिमहाभागेयत्तिष्ठेमनसिवर्तते॥इत्येवंचततोवव्रेसानारीपतिमान

व्रता० स॥ ब्राह्मण उवाच॥ ॥यदि तुष्टोसि मे देव वरदाजीवतु मे पतिः॥ ॥मंगल उवाच॥ ॥देवदेव जरामरण
१०५ वर्जितस्तु भविष्यति॥ अन्यं ब्रूहि मयाख्यातं व्रतं त्रिभुवनोत्तमं॥ ब्राह्मण उवाच॥ ॥यदि तुष्टोसि मे दे
व ग्रहाणामधिपेश्वर॥ ये त्वां स्मरंति देवेश रक्तचंदनचर्चितं॥ रक्तपुष्पैश्च संपूज्य प्रत्यक्षे भौमवा
सरे॥ बंधनं व्याधिरोगं च कदाचिन्नोपजायते॥ न मृत्युः शत्रुभयं वियोगं तु विषस्य वै॥ मा कुरु
ष्व महीपुत्र भक्तानां सौख्यदो भव॥ ॥मंगल उवाच॥ ॥एकविंशति भौमाश्च भक्तश्च जितेंद्रियः॥ एक
भक्तेनाशितान्नेन चतुर्दशी पांतरे गते॥ अर्घं च मंगलैर्मंत्रैर्वेदपौराणिकैस्तथा॥ सुवर्णरक्तमनडुहं
सर्वोपस्करसंयुतं॥ स्वशक्त्या भोजयेद्विप्रान्दतिवंचहिरएयकं॥ तेषां वै गृहपीडा यत्नं वै नुक
दाचन॥ भूतवेतालशाकिन्यो न भवंति हि हिंसकाः॥ एवमुक्त्वा स्तुवन्तत्र मंगलोपि दिवंगतः॥ ॥मं राम
गल उवाच॥ ॥इदं व्रतं न चाख्यातं सर्वसौख्यप्रदायकं॥ इदं व्रतं करिष्यंति तेषां पीडा न जायते॥ १०५
स्त्रीभिर्व्रतं प्रकर्तव्यं पुरुषैश्च विशेषतः॥ तेषां मुक्तिर्न संदेहो स्वर्गवासो न संशयः॥ ॥इति भविष्योत्त

रपुराणे भौमव्रतं॥ अथोद्यापनविधिं भविष्ये॥ सौवर्णं मंगलं कृत्वा स्वर्णपुष्पैः प्रपूजनं॥ रक्तां
बरधरं विप्र रक्तचंदनचर्चितं॥ रक्तैः पुष्पैः ससंपूज्य मेरुजं च विधानतः॥ अष्टांगैरघ्यपुष्पैश्च फ
लैरर्घ्यं प्रदापयेत्॥ नारिकेलादिभिश्चैव कुंभांश्चैव निवेदयेत्॥ एकविंशतिकुंभांश्च रक्तचंदनच
र्चितान्॥ ब्राह्मणान्भोजयित्वा तु ततः कुंभान्प्रदापयेत्॥ रक्तधेनुं वृषं चैकमेव दद्याद्यथाविधि॥ श
य्यां सोपस्करां दद्यात्प्रतिमां मेकं च॥ भौमं तत्र प्रदातव्यं क्षिप्रं तमासये॥ उमामहेश्वरं तत्र परिधा
यस्वशक्तितः॥ आचार्यं च सपत्नीकं वित्तशाठ्यविवर्जितः॥ आचार्यं च सपत्नीकं वित्तशाठ्यविव
र्जितः॥ तस्य जन्मकृतं पापं विलयं यांति तत्क्षणात्॥ सदा च तिपमारूढप्रत्यक्षे सुसमाहितः॥ यावज्जी
वं प्रकर्तव्यं व्रतमेतद्विधानतः॥ समस्तांश्च भविष्यंति पुत्रपौत्रधनादिभिः॥ यश्च कश्चन विप्रेंद्र करोति मा
नवो भुवि॥ धनं सर्वमवाप्नोति व्रतस्यास्य प्रभावतः॥ अंते च परमं स्थानं यत्र सूर्यादयो ग्रहाः॥ गच्छतीति
शेषः॥ यः स्मरेणेति व्रतं विप्र भौमेन व्रतपरायणः॥ तस्य मासकृतं पापं विलयं याति तत्क्षणात्॥ नवकनकश

व्रता० रीरस्तेनसादुर्निरीक्ष्योऽकृत्वहसमर्कोर्निर्मानिवजध्वजन्मा॥ अवनितनय एषस्तु यत्नेनार्त्तेसौयत
३८६ नुत्वविंन्नू तिर्न्नमिजः सुप्रसन्नाते॥ एवं यः कुरुते विप्र संक्रमणे फलं नाकं भवेत्॥ ॥इति व्रतार्के सोद्या
पनेनोमक्रंसंक्रमणं॥ ॥इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के वासरव्र
तानि॥ ॥अथ संक्रांतिव्रतानि॥ हेमाद्रौ स्कांदे॥ ॥नंदिकेश्वर उवाच॥ ॥अथातः संप्रवक्ष्यामि धा
न्यव्रतमनुत्तमं॥ यत्कृत्वाहि नरो राजन् सर्वान्कामानवाप्नुयात्॥ अयने विषुवे चैव स्नानं कृत्वा वि
चक्षणः॥ व्रतस्य नियमं कुर्यात् ध्यात्वा देवं दिवाकरं॥ करिष्यामि व्रतं देव त्वद्भक्तस्त्वत्परायणः॥ त
द्विघ्नेन मे यातु तव देव प्रसादतः॥ इत्युच्चार्य लिखेत्पद्मं कुंकुमेनाष्टपत्रकं॥ भास्करं पूर्वपत्रे तु
आग्नेये च तथा रविं॥ विवस्वंतं तथा सौम्ये नैर्ऋत्ये पूषणं तथा॥ आदित्यं वारुणे पत्रे वायव्ये तप राम
नं तथा॥ मार्तंडमिति कौबेरे ऐशाने भानुमेव च॥ एवं चक्रमशो मर्च्य विष्णात्मानं मध्यदेशतः॥ कृता ३८६
जलिपुटो भूत्वा अर्घं दद्यात्समंत्रकं॥ कालात्मा सर्वदेवात्मा वेदात्मा विश्वतोमुख॥ व्याधिमृत्युजरा

DR BHAU DAJI

शोकसंतापनाशन दत्तार्घमंत्रः॥ पुष्पैर्धूपैः समभ्यर्च्य शिरसा प्रणिपत्य च॥ रविं ध्यात्वा ततो द
द्याद्धान्यप्रस्थं द्विजातये॥ प्रतिमासं तु नक्तेन धान्यप्रस्थं द्विजातये॥ एवं संवत्सरे पूर्णे कुर्यादुद्यापनक्रि
यां॥ अर्घ्यपात्रं हि सौवर्णं कारयेन्मंडलं शुभं॥ द्विजं तु पूजयेद्भानुं रक्तवस्त्रयुगान्वितं॥ धान्यद्रोणेन सहि
तं तद्देयं स्वशक्तितः॥ स्वर्णशृंगी रौप्यखुरी कांस्यदोहा पयस्विनी॥ रविरूपं द्विजं ध्यात्वा तस्मै वै वि
निवेदयेत्॥ अग्निष्टोमसहस्राणां फलं प्राप्नोति मानवः॥ सप्त जन्मसहस्राणि धनधान्यसमन्वितः॥ नि
र्व्याधिर्नीरुजो धीमान् रूपवानभिजायते॥ ॥इति धान्यसंक्रांतिव्रतं॥ ॥अथ लवणसंक्रांतिव्रतं तत्रैव
॥ ॥अथातः संप्रवक्ष्यामि लवणसंक्रांतिमुत्तमं॥ संक्रांतिवासरं प्राप्य स्नानं कृत्वा शुभैर्जलैः॥ वस्त्रांजक
रसंवीतो नक्तिजनवसमन्वितः॥ कुंकुमेन लिखेत्पद्मं अष्टपत्रं सकर्णिकं॥ भास्करं पूजयेत्तत्र सधान्यस
मन्वितः॥ तदग्रे लवणं पात्रे सगुडं स्थापयेद्बुधः॥ पूजितस्त्वं यथाशक्त्या प्रसीद मम भास्कर॥ लवणं सगुडं
पात्रं ब्राह्मणाय निवेदयेत्॥ एवं संवत्सरे पूर्णे भानुं कुर्याद्धिरण्मयं॥ रक्तवस्त्रयुगच्छन्नं रक्तचंदनं च

र्चितं॥ कमलं लवणपात्रे धेन्वा सार्द्धं द्विजायते॥ प्रदद्याज्जातु मुद्दिश्य विश्वात्मा प्रीयतामिति॥ एवं कृत्वा
तु यत्पुण्यं प्राप्यते तु विमानवैः॥ नत्केन गदितुं शक्यं वर्षकोटिशतैरपि॥ लवणाचलदानस्य फलं प्रा
प्नोति मानवः॥ सर्वकामसमृद्धात्मा विमानवरमध्यगः॥ सूर्यलोके वसेत्कल्पं पूज्यमानः सुरासुरैः॥
इति लवणसंक्रांतिव्रतं॥ ॥अथ भोगसंक्रांति॥ ॥तत्रैव॥ संक्रांतिदिवसं प्राप्य योषितत्कसमाकृपे
ता॥ कुंकुमं कज्जलं चैव सिंदूरं कुसुमानि च॥ सुगंधीनि च द्रव्याणि तांबूलं शालिसंयुतं॥ तंदुलान्मुल
संपूर्णान्सा सोदपात्र्यं च दक्षिणां॥ दद्यात्प्रहृष्टमनसा मिथुनेभ्यः प्रयत्नतः॥ भोजयित्वा यथाशक्ति
वस्त्रयुग्मं प्रदापयेत्॥ एवं संवत्सरस्यांते रविसंक्रम पूर्ववत्॥ धेनुं सदक्षिणां दद्यात्सपत्नीक द्विजन्म
ये॥ स्यात्कुर्वीत सर्वमस्मिन्सु भोगी जन्मनि जन्मनि॥ ॥इति संक्रांतिव्रतं॥ ॥अथ रूपसंक्रांतिव्रतं॥ ॥त

त्रैव॥ संक्रांतिवासरे स्नानं तैलेन कृत्वा विचक्षणः॥ हेमपात्रे घृतं कृत्वा हिरण्येन समन्वितं॥ स्वरूपं
वेक्ष्य तत्पात्रं ब्राह्मणाय निवेदयेत्॥ एकभक्तं ततः कृत्वा नक्तं चैव समन्वितं॥ व्रतांते कांचनं दद्या

द्रूप धेनुसमन्वितं॥ ॥इति रूपसंक्रांतिव्रतं॥ ॥अथ तेजसंक्रांतिव्रतं॥ शालितंडुलसंयुक्तं करकं कारये
त्सुधीः॥ तन्मध्ये दीपकं स्थाप्य प्रज्वलंते स्वतेजसा॥ तन्मुखे मोदकं स्थाप्य ब्राह्मणाय निवेदयेत्॥
अर्द्धे च पूर्ववत्कार्यमेकनक्तं च पूर्ववत्॥ संवत्सरे तु संप्राप्ते पूर्णे चोद्यापनं बुधः॥ सौवर्णं दीपकं का
र्यं सुवर्णेन तु नारद॥ ताम्रेण करकं कार्यं तन्मध्ये दीपकं न्यसेत्॥ कपिलां सह दातव्या करकेण द्वि
जातये॥ ॥अथ सौभाग्यसंक्रांतिः॥ पूर्ववन्नक्तमर्चयेत्तथा चैव सुवासिनीः॥ सौभाग्याष्टकसंयुक्तं व
स्त्रयुग्मं स योषिते॥ विप्राय वेदविदुषे नक्तांते तत्प्रतिपादयेत्॥ एवं संवत्सरे पूर्णे कृत्वा ब्राह्मणभोज
नं॥ पर्वतं लवणं कृत्वा यथाविभवसारतः॥ कांचनं कमलं कृत्वा तस्यैकैस्य कारयेत्॥ गंधपुष्पादिना
भ्यर्च्य विप्राय प्रतिपादयेत्॥ सौभाग्याष्टकं तु॥ ऐक्षवं राजकं राजिकं तद्वनिष्पावाश्च सुगोत्तनं॥ धान्य
कं जीरकं चैव कौसुंभं कुंकुमं तथा॥ लवणं चाष्टमं तद्वत्सौभाग्याष्टकमुच्यते॥ अथ तांबूलसंक्रांतिः॥ ॥तांबू
लं चंदनं तस्य चद्यान्तांश्च द्विजोत्तमे॥ एवं संवत्सरं पूर्णं भोगानोति ततः परां॥ तांबूलं जलरूपे द्विप्रेः कारयेत्

व्रता० वनांतरं॥ वत्सरांते तु कमलं कृत्वा चैव तु कांचनं॥ पर्णकोशं च कुर्वीत ततः पात्रं गफलालयं॥ चूर्णभांडं प्रकु
२८८ र्वीत पूगप्रस्फोटनं तथा॥ मुखवासादिचूर्णानि नागानि च द्विर्षन्न॥ द्विजदांपत्यमावाह्य सर्वोपस्कर
संयुतैः॥ द्रव्यैः सम्पूजयेद्भक्त्या षड्रसैर्भोजयेद्द्विजान्॥ उपकल्पितं तु यत्किंचिद्ब्राह्मणाय निवेदयेत्॥ ए
वं करोति या नारी तांबूलाख्यव्रतोत्तमं॥ सा पुत्रैश्च पौत्रैश्च मोदते स्वर्गहेतद॥॥ अथ मनोरथसंक्रां
तिव्रतं॥॥ गुडेन पूर्णकुंभं च वत्सरं तु स्वशक्तितः॥ संक्रांतिवासरे दद्याद्ब्राह्मणाय कुटुंबिने॥ एवं सं
वत्सरे पूर्णे स्वशक्त्योद्यापनं मुने॥ गुडेन पर्वतं कृत्वा वस्त्ररत्नैश्च भूषितं॥ अयने चोत्तरे दद्याद्द्वि
जाग्र्यं न कारयेत्॥ यं यं कामयते कामं तं तं माप्नोति पुष्कलं॥ शेषं धान्यसंक्रांतिवत्॥ ॥ अथ शोक
संक्रांतिव्रतं॥॥ तत्रैव चायने विषुवे चैव व्यतीपाते भवेद्यदि॥ एकभक्तं तु यः कुर्यात्तिलदानपू रम
र्वकं॥ कांचनं भास्करं कृत्वा यथाविभवशक्तितः॥ स्नापयेत्पंचगव्येन गंधपुष्पैः प्रपूजयेत्॥ संछाद्य २८८
रक्तवस्त्राभ्यां ताम्रपात्रे निधापयेत्॥ भास्कराय नमः पादौ रवे जंघेति वै नमः॥ आदित्याय नमो जानु

ऊरू चैव दिवाकर॥ अर्यम्णेति कटिं सम्यग्भानु चैवोदरे तथा॥ नमः पुष्णेति बाहू च अर्यम्णे
ति पुनस्तनौ॥ विवस्वते नमः कंठे सहस्रांशो मुखं स्मृतं॥ प्रभाकर नमो नेत्रे तेजोराशे नमः शिरः
॥ वरुणाय नमः केशान् पादादौ पूजयेद्रविं॥ अर्घ्यं च पूर्ववत्कार्यं ब्राह्मणाय निवेदयेत्॥ एवं संव
त्सरे पूर्णे कांचनेन दिवाकरः॥ सपत्नीकं ससंपूज्य यथाविभवशक्तितः॥ कारयेत्पूजयेद्भक्त्या रक्तवस्त्रेण वे
ष्टयेत्॥ ततो होमं प्रकुर्वीत सर्वमंत्रैः स्तुनारद॥ दक्षिणां कपिलां दद्यात् वस्त्रालंकारसंयुतां॥ अशोकं क
पिलामेकां वित्तशाठ्यविवर्जितः॥ आयुरारोग्यमैश्वर्यं भार्यापुत्रसमन्वितः॥ ॥ अथायुःसंक्रांतिव्रतं॥॥
अथान्यच्च प्रवक्ष्यामि आयुःसंक्रांतिमुत्तमं॥ संक्रांतिदिवसे प्राप्य पूर्ववद्धि दिवाकरं॥ कांस्ये क्षीरघृ
तं दद्यात्सहिरण्यं स्वशक्तितः॥ मंत्राः पृथक्पृथक्दाने पूजा चैव प्रकीर्तिता॥ सुवीरं सुरभिजातं
पीयूषमसमं सर्पिः पुष्कं॥ आयुरारोग्यमैश्वर्यं मनोदेहि द्विजार्पितं॥ अनेन विधिना वर्षं सर्वं स्याद
तंद्रितः॥ उद्यापनादिकं सर्वं धान्यसंक्रांतिवद्भवेत्॥ निर्व्याधिश्चैव दीर्घायुस्तेजस्वी कीर्तिमांस्तथा॥

व्रता० २८९

अपमृत्युजयंनास्तिजीवेद्वर्षशतंध्रुवं॥ ॥इत्यायुःसंक्रांतिः॥ ॥अथधनसंक्रांतिः॥ हेमाद्रौस्कांदे॥ संक्रां
तिदिवसेप्राप्तेभास्करंतुविधानतः॥ कलशंनिर्व्रणंगत्वावारिपूर्णंनिधापयेत्॥ सुवर्णपुत्रकंकृत्वा
प्रतिमांसंतुस्थापयेत्॥ विधिनातेनवर्षांतेप्रीयतांमेदिवाकरः॥ एतद्विधानंसर्वंतुधामसंक्रांतिवद्भ
वेत्॥ सौवर्णंसकलंकृत्वासूर्यंचोपरिविन्यसेत्॥ हस्तेसुवर्णघटितं॥ पंकजंवैनिवेशयेत्॥ गोक्षर्णं
तत्रदातव्यमेवंसंपूर्णतांव्रजेत्॥ जन्मनांशतसहस्रंधनयुक्तोभवेन्नरः॥ आयुरारोग्यसंपन्नःसूर्य
लोकेमहीयते॥ ॥अथसंक्रांत्युद्यापनं॥ ॥हेमाद्रौमात्स्ये॥ नंदिकेश्वरउवाच॥ अथान्यदपिवक्ष्या
मिसंक्रांत्युद्यापनंपरं॥ विषुवेचायनेचैवसंक्रांतिव्रतमाचरेत्॥ पूर्वेद्युरेकभक्तेनदंतधावनपूर्वकं
॥संक्रांतिवासरेप्रातःतिलैःस्नानंविधीयते॥ रविसंक्रमणेभूमौचंदनेनाष्टपत्रकं॥ पद्मंसकर्णि
कंकुर्यात्तस्मिन्नावाहयेद्रविं॥ कर्णिकायांन्यसेत्सूर्यमादित्यंपूर्ववस्ततः॥ नमःसोमायविषेयाम्येन राम २८९
शंकरंकद्रुंडलायतु॥ नमःसवित्रेनैरृत्येवरुणंतपनंबुधः॥ मार्तंडमुत्तरेविष्णुमीशानेवीन्यसेत्स

दा॥ द्वितीयसोदकंकुंभंतिलपात्रंहिरण्मयं॥ कमलंतुयथाशक्त्याकारयित्वानिवेदयेत्॥ चंदनोदक
पुष्पैश्चदेवायार्घ्यंन्यसेद्भुवि॥ विश्वायविश्वरूपायविश्वधाम्नेस्वयंभुवे॥ नमोऽनंतनमोधात्रेऋ
क्सामयजुषांपतये॥ अनेनविधिमानासर्वंमासिमासिसमाचरेत्॥ वत्सरांतेतथाकुर्याच्चवित्तादश
धातरः॥ संवत्सरांतेघृतपायसेनसंतर्प्यवह्निंद्विजपुंगवांश्च॥ कुंभान्सुनवद्विरदाधेनुरद्याहलंस्वर्णहैरण्य
—पद्मगर्भमिति॥ पयस्विनीशीलवतीश्चदेयातास्तास्वरूपास्वसुखस्वयुक्ताः॥ गावोप्यवासस्तलकांस्य
दोहामार्यावरावाचतुरोऽष्टपत्रकं॥ देवायदद्यात्कपिलांसमस्थैकांनिवेदयेद्ब्राह्मणपुंगवाय॥ हेमी
चदेयासपिवीचशेषंकृत्वायथाशक्त्यामयवाचताम्री॥ योहित्वमर्कात्मोपतिलेर्विधायसौवर्णसूर्येण
समंप्रदद्यात्॥ नवित्तशाठ्यंपुरुषोऽत्रकुर्यात्कुर्वन्नधोयातिनसंशयोऽत्र॥ यावन्महेंद्रप्रमुखान्नगेंद्रा
पृथ्वींवसमांधिसुतेहतिष्ठेत्॥ तावत्सगंधर्वगणैरशेषैःसंपूज्यतेनारदनाकपृष्ठे॥ ततस्तुकर्मक्षयमाप्यसा
प्तद्वीपाधिपःस्यात्कुलशीलयुक्तः॥ दृष्टेर्नुरवेस्यांगवपुःसमार्याःप्रभूतपुत्रान्वयवंदितोहि॥ ॥इति

संक्रांसुद्याप्नं ॥ ॥ अथ घृतस्नपनं ॥ हेमाद्रौ न विष्णौ ॥ उत्तरे त्वयने प्राप्ते घृतप्रस्थेन यो रविं ॥ स्नापयि
त्वा प्राणमण्यप्य उपवासं प्रयच्छति ॥ सर्वपापविनिर्मुक्तः सूर्यलोके चिरं वसेत् ॥ ततो भवति भूपालः प्र
जानंदविवर्द्धनः ॥ ॥ इति रवेर्घृतस्नपनं ॥ ॥ अथ शिवरहस्ये घृतकंबलं ॥ माघे मासि महादेवे यः कुर्या
त् घृतकंबलं ॥ स भुक्त्वा सकलान् भोगानंते मोक्षं च विंदति ॥ मेरुमृपतयो जाता घृतकंबलदान
तः ॥ जातिस्मराश्च ते जाता मुक्तिमंते शिवार्चकाः ॥ पुरा सुनाग संविप्र जाबाला श्रुतिपारगं ॥ पप्र
च्छ शुंदकर्णा शिधर्मं शारि अनाशनं ॥ ॥ सुनाग उवाच ॥ ॥ असिताया पाथवा धेनोर्घृतं दिव्यमनुत्तमं
॥ संपादनीयं यत्नेन घनीभूतं च द्रोणमितं ॥ तदर्द्धं तु जघन्येऽत्र प्रस्थं सार्द्धशतत्रयं ॥ महाकंबलमे
तद्धि घृतस्य परिकीर्तितं ॥ तदर्द्धं वा तदर्द्धं वा सामर्थ्ये नैव यं शिवालये ॥ घृतेनानेन देवेश मभिषिंचेन्म
हेश्वरं ॥ घनीभूतं घृतं देयं ततः शंकरमस्तके ॥ ततस्तिलैः सर्षपैश्च बिल्वपत्रैश्च कोमलैः ॥ हे
मपद्मैश्च देवेशो पूजनीयो महेश्वरः ॥ धूपदीपादिकं देयं महावैभववेद्यमादरात् ॥ ततो नीराजनं द

त्वा देयः पुष्पांजलिस्ततः ॥ प्रदक्षिणानमस्कारान् कृत्वा च तदनंतरं ॥ शैवं पंचाक्षरं जप्त्वा शिवायैतन्नि
वेदयेत् ॥ ततो जागरणं कार्यं शिवस्मरणपूर्वकं ॥ ततः प्रातः समुत्थाय कृत्वा स्नानादिकं पुनः ॥ पूज
नीयो महादेवो घृतसेनपूर्वकं ॥ भोजनीयास्ततः शैवा अन्नैर्भोज्यैश्च यत्नतः ॥ ततः स्वयं च भोक्तव्यं
बंधुभिः सह सादरं ॥ अनेन न वदारिद्र्यं नाशमेष्यति सर्वथा ॥ भोगांश्च विपुलान् भुक्त्वा शिवलो
कं गमिष्यति ॥ ॥ इति घृतकंबलविधिः ॥ ॥ इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृ
तौ व्रतार्के संक्रांतिव्रतानि ॥ ॥ अथ व्यतीपातव्रतानि ॥ ॥ हेमाद्रौ मत्स्यतत्त्वे च वाराहे ॥ ॥ धरण्युवाच ॥
यस्त्वयोक्तो व्यतीपातस्तस्य कर्म वदस्व तत् ॥ कदा पुनः कथं पुंसः पूजितेवात्र किं फलं ॥ ॥ वाराह उ
वाच ॥ ॥ यदा बृहस्पतेर्भार्यां तारां जग्राह शीतगुः ॥ मित्रत्वात्प्राह तं सूर्यस्त्यज भार्यां बृहस्पतेः ॥ चं
द्रे चंद्रेण तव यत्सहितं रुपितं परा ॥ वृहस्पतस्तदा किंचिदादिसोदी सह दृष्ट्वा सुदेदृन ॥ तावत्सोमोपि रु
ष्टोस्य ततोन्योन्यमवेक्षतां ॥ अनयोर्दृष्टिसंपाते क्रुद्धयोः सोमसूर्ययोः ॥ उद्भूतास्पोनवह्वोरः पुरुषः पिं

व्रता० ३७१

गलेक्षणः॥ ह्रस्वोष्ठदीर्घदशनो भ्रुकुटीकुटिलाननः॥ कपिलश्मश्रुकेशांतो लंबभ्रूः स्थूलोदरः॥ शि
रालो दीर्घजिह्वश्च सूर्याग्नियमसन्निभः॥ समोनु कामस्त्वै लोकं रवीदु स्पांनिवारितः॥ क्रोधरुद्धो
मां बाधेते पापेते कृत्रते मया॥ सूर्यसोमाऊचतुः॥ कोपदृष्टितेविविधाद्व्यतिपाताद्भविष्यान्॥ व्यती
पातस्ततो नाम भवान् भुक्तिन्निविष्यति॥ यस्मिन्कालेत्वडुसन्निस्तदा कल्याणकारिणः॥ व्यतीपातान्नजंते
त्वयियः पापकारकः॥ तदन्नं क्षुधितोनु त्वमत्र कोपोनिपास्तां॥॥ व्यतीपात उवाच॥ नमो वां पितरो मे
स्तक्रोधपातसमोऽजन॥ दत्तो भवद्भ्याम धुना प्रसादः क्रीयतां मयी॥॥ रवींदू ऊचतुः॥॥ स्नानदानज
पहोमपूर्वकं यस्त्वदीयसमये समाचरेत्॥ तस्य पुण्यमिह ते प्रसादतो नंतमस्तु तव वासतनुग्रहा
त्॥ तत्कालेविदधाति पूजनं यस्तस्यैष्ट भवतु भवेभ्यनदरूपं॥ पुत्रायुधनसुखकीर्तिपुष्टिरूपा राम
रोग्यपशुभिर्न भवत्वनेन पूर्वं॥॥ वाराह उवाच॥॥ एतस्मात्कारणाद्भूमो व्यतीपातोर्च्यते नरैः॥ अर्चना ३७१
त्फलं यस्मात्तदुक्तं च समासतः॥ विस्तरेणार्चितफलं गदितुं केन शक्यते॥ यथार्च्यते व्यतिपातः स

DR BHAU DAJI MEMORIAL

विधिः श्रूयतामिह॥ स्तुत्य व्यतीपातदिने वगाहयेऽसंसे ध्यमानेन महानदीजलं॥ उपावसे द्वै पवमा
नता पको जपेद्व मंत्रं व्यतीपात तेनमः॥ इत्यादितेता म्रपात्रेण शर्करापूरितेघटे॥ कांचनात्वे प्रतिष्ठा
प्यहैमम क्षनुजं नरं॥ अष्टनुजमष्टादशनुजं॥ उपसन्निव्यतिपातमूर्तेरिष्टार्थदास्तु जत्वश्रवणात॥ उस
त्रिवाका नुसारित्वा द्व विनियोगबा कास्य॥ तथा भगवती तास्तु॥ चलामनवस्तपाइतिचत्वारश्च तुर्दशी
स्पर्थः॥ गंधपुष्पाक्षतैर्धूपैर्दीपवस्त्रनिवेदनैः॥ नरैनेत्जैः फलैश्चित्रैर्मासिमार्गशीर्षेर्चयेत्॥ नम
स्ते स्तव्यतीपातसोमसूर्यस्तु नप्रनो॥ यद्दानादिकृतं किंचित्तदनंतमिहास्तु मे॥ स्तुत्वा पंचरत्नाद्यस्त
पुष्पाक्षतमंजलिं॥ प्रक्षिप्य तरुणादेव सर्वपापक्षयो भवेत्॥ यदिद्वितीये च दिने व्यतीपातो भवेन्न
हि॥ तदा पारणं पुत्वाद द्यात्तत्सक लंगुरोः॥ पारणं च व्यतीपाते कुर्यात्किंग्रा ह्यणो मयं॥ अथैकस्मिन्दि
ने धात्री व्यतीपाते कुर्यात्किंमा ह्यणो मयं॥ अथैकस्मिन्दिने धात्री व्यतीपातो भवेद्यदि॥ तत्रैवाधिनरो
दत्वा उपवासं समाचरेत॥ ऊर्ध्वं द्वैमासि मासि व्यतीपातां त्रयोदश॥ चतुर्दशी तु संप्राप्ते कुर्याद्व्या

व्रता० ३९२ यत्नंबुधः॥ व्यतीपातायस्वाहेतिक्षीरवृक्षसमिद्धुतं॥ आज्यंक्षीरंफलानांचहोतव्यंवैशतंशतं॥ शर्क
राघटसहस्रेणसहसोपस्करंनरः॥ शय्यांसोपस्करैर्युक्तांप्रदद्याद्व्रतदेशिने॥ वंदेव्यतीपामहंमहांतंस्वे
दस्तनुसकलेनलब्धो॥ समस्तपापस्यममक्षयोस्तुपुण्यस्यचानंतफलंममास्तु॥ इतिसमीर्य
गुरुःपरिहृष्यतेकरकंकुंडलकंचविभूषणैः॥ सकलमेवसमर्घ्ययथोचितंतदुपदिष्टांमदत्तपत्रि
ल्वम्मितस्यएतन्महि॥ गांचपयस्विनींदद्यात्सुवर्णंवरदक्षिणां॥ तस्मैशय्यांसमादायसारदारुम
यींदृढां॥ रक्तपत्रसितांरम्यांहेमपट्टैरलंकृतां॥ हेमरत्नविप्रतिच्छन्नांसुपर्यंकोपधानकां॥ प्रच्छादनप
टियुक्तांधूपगंधादिवासितां॥ तांबूलकुंकुमक्षोदकर्पूरागरुचंदनं॥ दीपिकोपानहौछत्रंप्रदद्या
च्चामरासनं॥ देहांतेस्वर्यलोकायविमानैरत्नसप्रभैः॥ अप्सरोगणसंघोपगीतस्तविलासिभिः राम
॥गत्वाकल्पांबुशतंसादरंचिरमाचिरितः॥ तदंतेराजःस्यात्पुपरमोभाग्यभागत्रवेत॥ कीर्त्यायोगुणपु ३९३
आयुरारोग्यधनधान्यवान्॥ पतापाद्यो महैश्वर्ययुक्तोभोगीवक्रकृतः॥ जनतेसोभाग्यसंपन्नोयावत्

जन्माष्टकायुतं॥ दर्शेदशगुणंदानंतच्छतघ्नंरविक्षये॥ शतघ्नंतच्चसंक्रांतौशतघ्नंविषुवेततः॥ गु
णंदीतदशगुणंमयनेतच्छताहतं सोमग्रहेतच्छतघ्नंतच्छतघ्नंरविग्रहे॥ असंख्येयंव्यतीपातेदानंवेदवि
दोविदुः॥ उसन्तोलक्षगुणंकोटिगुणंभ्रमणनाडिकायांतु॥ अर्बुदगुणितपततेजयदानाद्यक्षयं
यांतिते॥ जन्मक्षाविंशतिनाडीभ्रमणांत्येकविंशति॥ व्यतीपातस्यपतनंदशसंख्यातिविदुः॥ संश
यितंयव्यतीपातकालेपुन॥ पुनस्तचविज्ञीतरक्षम॥ प्रयच्छतःकस्यशताबुदानिविवर्द्धमानंनहिही
यतेतत्॥ तस्मान्महित्वंव्यतीपातराजांकुरुष्वचेतुणमनंतमिष्टं॥ यदिस्थिरत्वंसततंतवेष्टंसम
स्तरत्वंयदिविप्सितंतव॥ गणयित्वाव्यतीपातकालेवार्चयतेनरः॥ सर्वपापहरोतस्यव्रतेभ्यानुरुण
तयुः॥ पठतिलिखतियःशृणोतिवैतत्कथयतिपत्रप्रतिकारयस्यवश्यं॥ रविस्रविद्विदिवसमाप
सोपिदेवैश्चिरसमयंपरिहरिहृज्यमानश्रास्ते॥ ॥इतिवाराहोक्तंव्यतीपातव्रतं॥ ॥अथतत्रैवनार
दीयपुराणोक्तंव्यतीपातव्रतं॥ ॥युधिष्ठिरउवाच॥ ॥केनव्रतेनचीर्णेननपश्येद्यमशासनं॥ परित्यज्य

व्रता० स्पर्हं विप्रव्रतानामुत्तमं व्रतं॥ तद्व्रतं ब्रूहि देवर्षे कृत्वा जपति विप्रियं॥ मार्कंडेय उवाच॥ शृणु
१५४ राजन्व्रतमिदं हर्यश्वेन पुरा कृतं॥ तेनैव राज्ञा तद्वृत्तं शूकराय च दुःखिने॥ एकदा तु महाराज मृ
गां त्वा राजसत्तमं॥ श्रांतश्चरन्वने राजन् दृष्टवांस्तत्र शूकरं॥ दग्धपादकरं चैव दग्धग्रीवमुखोद
रं॥ दृष्ट्वा तथाविधं तं तु कृपांचक्रे दयापरः॥ केन कर्मविपाकेन त्वीदृशत्वं प्राप्तवानयं॥ अहो कष्ट
महो कष्टं शूकरेणोपभुज्यते॥ अवश्यमनुकर्तव्यं कृतं कर्म शुभाशुभं॥ इत्युक्त्वा तस्य रूपेण रा
जानं प्राह शूकरः॥ इयती किमवस्थाने तन्मम ब्रूहि शूकर॥ तच्छ्रुत्वा नृपतेर्वाक्यं विश्वसन् शूकरो मुदा॥
स्मृत्वा पुराकृतं कर्म प्रत्युवाच कथांतरं॥ शृणु राजन्नहं पूर्वं वैश्यो विश्वसखो भवं॥ आजन्मतः प्र
नदाता हमाश्रितेभ्यश्च किंचन॥ श्रुताश्च बहवो धर्माः पुराणश्रुतिचोदिताः॥ तथापि पापबुद्धात्वं राम
न कस्येम्यात्मनो हितं॥ आत्मा पात्रामवुभ्यस्मान् गतास्तत्र विनिर्गताः॥ कृतवान्पापमेवाहं न किंचित्सु १५४
कृतं कृतं॥ एकदा तु द्विजः कश्चिद्व्यतीपाते गृहे मम॥ आगतो याचते मां स न किंचिद्दत्तवानहं॥ म

मया निराकृतोऽसंतं॥ वचोक्तिर्निष्ठुरैस्तथा॥ व्यतीपातोऽद्य ते वैश्य किंचिद्देह्यपि निरवरं तु॥ तन्मे फलमुपैष्य
ति प्राप्स्यसे त्वन्यजन्मनि॥ कुपितेन मया तस्मै निष्ठुरा वाक् समीरिता॥ ततश्च कुपितो विप्रो मम
शापमथाददात्॥ आशातिर्दहते यत्त्व ममां॥ गानिष्टयक ष्टयकः॥ तथैव त्वं गतनिद्रा चाग्नि पुरु
षाधमः॥ अरण्ये निर्जले देशे निर्जने द्रुमवर्जिते॥ तत्र त्वं शूकरयोनौ त्वं प्रसूतिं समवाप्नुहि॥ प्रसा
दितो मया तत्र पुनः पुत्रकवान् स्मर॥ ज्ञानी त्वं शूकरत्वेपि इत्युक्त्वाथ जगाम सः॥ तेन शापेन राजन्वै
शूकरत्वमवाप्नुयां॥ अहं दुःखी समं जातो निर्जने निर्जले वने॥ राजा उवाच॥ केन त्वं मुच्यते
पापान्ममाचक्ष्व हे शूकर॥ येनत्रासो मया कर्तुं तव शापस्य संक्षयः॥ वाराह उवाच॥ अस्य
तं मम राजेंद्र मुक्तिः स्यात् येन कर्मणा॥ व्यतीपातव्रतं नाम कृतं राजन्त्वया पुरा॥ पयमस्मासु तस्येह
सर्वपापं व्यपोहति॥ यथा विष्णुर्ददाती हन गणपरम — निर्वृति॥ इहस्ये वनसंदेहस्तथा व्रतमिद
शुभं॥ शतमिंदुक्षये दानं सहस्रं तु दिनक्षये॥ विषुवे शतसाहस्रं व्यतीपाते त्वनंतकं॥ व्यतीपातव्र

व्रता० तस्यास्य विधानं शृणु तत्त्वतः॥ माघे वा फाल्गुने वापि अन्यस्मिन्मासि वा भवेत्॥ व्यतिपातो दिने य
२९४ स्मिन् प्रारम्भे व्रतमुत्तमं॥ तिलैः पूर्णं शरावं च सगुडं गुरवेऽर्पयेत्॥ शंखचक्रगदापाणिं पद्मह
स्तं हिरण्मयं॥ वस्त्रयुग्मेन संवेष्ट्य पूजयेत् गरुडध्वजं॥ गोक्षीरेणैव संपूर्णं कांस्यभाजनमुत्त
मं॥ स्थापयेद्देवदेवेशं स्थानं तत्रैव कल्पयेत्॥ शय्यां च सन्निधौ तत्र स्थाप्य देवमनुस्मरेत्॥ अ
नंतशायिनं देवमनंतफलदं शुभं॥ लक्ष्म्या सहान्वितं विष्णुं लक्ष्मीं संपूजयेत् गुरुं॥ वैदिकेनै
व मंत्रेण जातीपुष्पैः समर्चयेत्॥ पायसेनैव नैवेद्यं शर्करासंयुतेन वा॥ दत्वा निवेद्य देवस्य अ
र्पितां प्रार्थयेद्व्रती॥ व्यतिपातदिने देवस्तव सर्वं समर्पितं॥ व्रतोपदेष्ट्रे देवाय ब्राह्मणाय विशेषतः॥
तस्मिन् वर्षे सुवर्णं वा दक्षिणां तु विधीयते॥ ब्राह्मणान् भोजयित्वा तु व्रतमेतत् समापयेत्॥ इदं व्र
तं त्वया देव गृहीतं पूर्वजन्मनि॥ स्वर्गापवर्गदं नृणां फलं त्वद्दास्य हो॥ एवमुक्त्वा नपश्रेष्ठ स्यक राम
रायफलं ददौ॥ तत्क्षणात्तेन च पुरा सकल्मषमुक्तकिल्विष॥ मुक्तः स्वकर देहस्थ सर्वाभरणभूषितः॥ दि २९४

व्यं विमानं स्थाप्य वाक्यं वेदमुवाच ह॥ हे जनाः किं न जानीध्वं व्यतीपातं व्रतोत्तमं॥ इहैव सुखदं नृणां
परत्र च परां गतिः॥ दृष्ट्वा मया विनिर्मुक्तं व्रतस्यास्य प्रभावतः॥ विश्वासः क्रियतामस्मिन् व्यतीपातव्र
तोत्तमे॥ इत्युक्त्वा स्वर्गतः सोऽथ राज्ञो वै पश्यतस्तदा॥ तं दृष्ट्वा विस्मितो भूत्वा देवदेवस्य च क्रियणः॥ ह
र्षितः प्राप्तवांस्तेन विष्णोस्तत्परमं पदं॥ अतस्त्वं कुरु राजेन्द्र व्यतीपातव्रतोत्तमं॥ सर्वपापक्षयकरं न
णामिह सुखप्रदं॥ इदं यः कुरुते मर्त्यः श्रद्धया भावसंमितः॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुया
त्॥ भार्या तु पुत्रकामिन्या कृतं सा लभते सुतान्॥ स्त्रीकामो लभते वश्यां नारीमनुत्तमां॥ व्यतीपातव्रत
मिदं व्यतीपातदिने पठेत्॥ ज्ञानवान् धनवान् श्रीमानिहं चैव सुखी भवेत्॥ य इदं शृणुयाद्भक्त्या विष्णु
लोके महीयते॥ ॥ इति व्यतीपातव्रतं॥ ॥ अथ लक्षपूजाविधिः॥ ॥ ब्रह्माण्डपुराणे॥ ॥ ईश्वर उवाच॥ ॥ ल
क्षपूजाविधिं देवि कथयामि समासतः॥ यं कृत्वा प्राणिनः सर्वे मम सन्निधिभागिनः॥ शिवरात्रौ तथाष्टम्यां
सोमवारे समारभेत्॥ शुभे यस्मिन् दिने वापि शिवभक्तो द्विजोत्तम॥ सपत्नीकं सपुत्रं तमन्तर्वा मननिंदकं

॥धर्मज्ञं दोषरहितं मंत्रतंत्रपरिग्रहम्॥ आचार्यं वरयेत्प्रातः सुस्नातो भूषितो व्रती॥ सत्यं च वृषलं नंदी
नमतिदीर्घजंघं तथा॥ देवतानन्निसकं च बधिरं दीर्घलिंगकं॥ देवहीनं दुराचारं मलिनं बहुभाषि
णं॥ निंदकं पिशुनं दुष्टमंधकं च विसर्जयेत्॥ नित्यं निर्वर्त्य सकलं संकल्प्य मनसेप्सितं॥ पंचकैर्म
ल्लिकापुष्पैर्जातिकिंशुकपाटलैः॥ नंद्यावर्तैः श्रियावर्तैर्द्रोणपुष्पैः कदंबकैः॥ अन्यैः शिवागम
प्रोक्तैर्बिल्वशाखादलैस्तथा॥ नागवल्लीदलैर्वापि फलैर्नानाविधैरपि॥ धान्यैश्च विविधैः शुद्धैरख
ंडैर्व्रीहितंदुलैः॥ लक्षपूजां प्रकुर्वीत मूलमंत्रेण संभवे॥ स्वर्णपुष्पं प्रत्ययुतं कर्तरावर्तिकं भवेत्॥ इ
त्येकस्मिन्दिने वापि द्वयोर्वा त्रिदिनेपि वा॥ पुष्पलाभानुसारेण बहुभिर्वा दिनैर्यजेत्॥ शिवार्चनचंद्रि
काख्यं॥ पत्रं वा यदि वा पुष्पं फलं नैवेद्यमधोमुखं॥ दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणं॥ चित्रस्था
सु सर्वासु न विद्यते दूषणं॥ अधोमुखार्पणं नैवं पुष्पांजलिविधौ भवेत्॥ लक्षपूजासु सर्वासु पुष्पमे
केकमर्पयेत्॥ समुदायेन चेत्पूजा लक्षपूजार्पणं ततः॥ समाप्तौ श्रीशिवायैकं सौवर्णं पुष्पमर्पयेत् राम ३९५

पुष्पांजलित्रयं स्वर्णबिल्वशाखासमन्वितं॥ भवः शर्वस्तथा रुद्रस्ततः पशुपतिस[illegible]ः॥ उग्रो महातपो
भीम ईशानश्चाष्टनामभिः॥ पुष्पांजलित्रयं दत्वा स्तुत्वा पुनः पुनः॥ क्षमाप्य च महादेवं प्रार्थयेत्तद
नंतरं॥ विरूपाक्ष महेशान विश्वरूप महेश्वर॥ मया कृतं लक्षपूजां गृहीत्वा वरदो भव॥ ॥इति प्रा
र्थनामंत्रः॥ ॥मृत्युंजयाय रुद्राय देवदेवाय ते नमः॥ ॥इति नमस्कारमंत्रः॥ ॥इति नमस्कारः॥
॥॥इति लक्षपूजाविधिः॥ ॥अथोद्यापनं॥ शिवस्य शतपलेन पंचामृतस्नपनं॥ नालिकेरार्घ्यदानं
च ध्वजपताके शिवोपरि॥ श्वेतवस्त्रद्वयं देयं पूजायां विशिवस्य च॥ पूजांते च तथा होमं तिलद्रव्येन का
रयेत्॥ ततस्तदनंतरं पूजामाचार्येणैव कारयेत्॥ ततः प्रार्थनामंत्रः॥ नमः शिवाय शांताय सगणाय ससू
नवे॥ सर्वेश्वराय देवाय कारणाय त्रयहेतवे॥ निवेदयामि चात्मानं त्वं गतिः परमेश्वर॥ यन्मोत्स्वलितपाद
नोऽस्मि रेवावलंबनं॥ त्वयि जातापराधानां त्वमेव शरणं प्रभो॥ ततो विप्रान्भोजनीयाः शक्त्या वा द्विरा
पवा॥ आचार्यं पूजयेत्पश्चाच्छक्त्या दद्याच्च दक्षिणां॥ एतेन व्रतनाकृत्वा मम संनिधिभाक् भवेत्॥ पश्च

व्रता० २९६

रेमत्तमातंगाः वायुवेगास्तुरंगमाः॥ पूर्णेंदुवदना नार्यो लक्षपूजाविधिः फलं॥ ॥इति ब्रह्मांडपुराणे ल
क्षपूजा तदुद्यापनविधिः॥ ॥लक्षपूजाविधिं वक्ष्ये शृणुनान्यमनाः कचित्॥ यं कृत्वा मुच्यते पापैर्ना
री वाथ नरोपि वा॥ ब्रह्महा गुरुगामी च मद्यपो वा धनापहः॥ लक्षपूजनमात्रेण मुच्यते किमुनान्य
तः॥ नातः परतरं किंचित् त्रिषु लोकेषु विद्यते॥ किं कुलेन किमाचारैः किं शीलेन गुणेन च॥ यो हरिं
पूजयेत्सम्यक् स कुलीनः स बुद्धिमान्॥ जंबुद्वीपे महापुण्ये जन्म यः प्राप्य मानवः॥ इमामकृत्वा मंद
त्मा कोन्यस्तस्मादधोगतिः॥ धर्महीनस्य मर्त्यस्य दिनायांमपयांति च॥ लोहकारस्त्रेव तस्य ज
न्म निरर्थकं॥ पूजयेत्पूजयेत् विष्णुं यो पि पूजयेत्॥ माघे वा कार्त्तिके चैत्रे आषाढे श्रावणे पि वा॥
अन्येषु पुण्यमासेषु व्रतमेतत्समाचरेत्॥ प्रातः स्नानं विधायाथ दंतधावनपूर्वकं॥ धौतवस्त्रध
रो भूत्वा नित्यकर्म समाचरेत्॥ देवपूजागृहे वापि देवालयमथापि वा॥ गोमयेनानुलिप्याथ धातु
नामन्मयेन वा॥ चतुर्भिर्ब्राह्मणैः सार्द्धं कृत्वा च स्वस्तिवाचनं॥ नांदीश्राद्धं प्रकुर्वीत लक्षपूजाविधौ

राम २९६

BHAU DAJI

द्विजः॥ प्राणायामत्रयं कृत्वा देशकालौ व धेत्सुधीः॥ सुसंकल्प्य यथात्रात्मा प्रसहे पूजयाम्यहं॥ ए
वं संकल्प्य विधिवन्मंत्रमेतदुदीरयेत्॥ गृहीतेस्मिन् व्रते देव पंचत्वं यदि मे भवेत्॥ तदा भवतु संपू
र्णं त्वत्प्रसादाज्जगद्गुरो॥ एवं संप्रार्थ्य देवेशं नियमात्तुलसीदलैः॥ पंचामृतैः स्नापयित्वा शालग्रा
मशिलां शुभां॥ गंधपुष्पाक्षतैर्भक्त्या पूजयेत्प्रथमं बुधः॥ प्रत्यहं यावती पूजां तावत्सावर्त्तिनिर्व्रती॥ प
श्चात्सपिच्चतावंति लिखेत्संच निर्धानुलिः॥ महाव्रतमिदं वत्स न देवानामपि दुर्लभं॥ तुलसीदलैः
शुभ्रैः स्वच्छैरव्रणैरतिशोभनैः॥ कम्मंडवर्त्तितैर्देवं पूजयेन्नाममंत्रिः॥ विष्णुनामसहस्राणि व्यथ
वान्यनाममंत्रिः॥ संख्यापूर्णफलापूजा संख्याहीनातु निःफला॥ तद्विशेनातन्वान्म भूत्वा विष्णुलो
कपरायणः॥ एवं संपूज्य विधिवत्पूजांते होममाचरेत्॥ सहस्रनामभिर्होमं स्वाहाकारसमन्वितं॥
मधुमिश्रैस्तिलैर्लाजैर्मिश्रितैः क्रमीवर्जितो॥ होमसंख्याविधानेन लक्षसंख्या परा भवेत्॥ पूर्णाहु
तिं ततः कृत्वा प्रणिपत्य समापयेत्॥ लक्ष्मीनारायणं देवं शंखचक्रगदाधरं॥ सुवर्णप्रतिमां कृत्वा

व्रता०
२९७

वित्तरूपं विचक्षणः॥ ब्रह्मघ्नाय सुरांताय स्वदारनिरताय च॥ पत्नीपुत्रवते दानमल्पंफलम
श्नुते॥ जपशाली व्रतपि वा पन्नगनैः सनातनः॥ अनेन तन्नोग शायनः प्रीयतां परमः पिता॥ इति दा
नमंत्रः॥ तुलस्या भावे पुत्रैर्वा बिल्वैर्वा त्रिणवर्जितैः॥ सुगंधैर्जतुसंभूतैः शतैः पादपपल्लवैः
॥ सहस्रं द्विसहस्रं वा त्रिसहस्रं यथाविधि॥ उपक्रमदिने यावत्प्रत्यहं तावत्निवेत॥ उपक्रमदि
ने वापि त्व्यवसाने पि वा व्रती॥ उद्यापनं प्रकुर्वीत पूर्वोक्तेनैव मार्गतः॥ अमयो दोषमाप्नोति हीनांगो
जायते भुवि॥ एवं यः कुरुते मर्त्यो नारी वा गतकल्मषः॥ देहांते ज्ञानवान्भूत्वा विष्णुलोकमवाप्नुया
त्॥ ब्राह्मणान् भोजयेद्भक्त्या स्वयं भुंजीत वाग्यतः॥ तुलसीदर्शनं स्पर्शो नमस्कारः प्रदक्षिणा॥ दानं च
हरिपूजा च धारणं तत्फलं च यत्॥ स्मरणं हर्षदं चैव विष्णुलोकप्रदायकं॥ महापातकयुक्तो वायु
क्तो वा सर्वपातकैः॥ विष्णुपूजाविधानेन जीवन्मुक्तो न संशयः॥ इत्यग्निपुराणे लक्षपूजाविधिः
॥ अथ लक्षनमस्कारविधिः॥ ॥ भविष्योत्तरे॥ ॥ अंबरीष उवाच॥ ॥ इक्ष्वाकूणां कुलगुरो भो ब्रह्म

राम
२९७

न्धर्मवित्तर॥ ब्रूहि पापक्षयकरं व्रतं सर्वोत्तमोत्तमं॥ ब्रह्मघ्न ब्रह्मसुरापस्य गुरुदाराभिमर्षिणः॥
सुवर्णस्तेयिनश्चैव यैश्च संपेषणमपि॥ संकर्षणपापिनश्चैव सकलीकारिणोपि वा॥ असमं
पश्यतो न्याय द्विपंक्त्येन चेतसा॥ स्वस्रगम्यजनपत्नीनां गामिनः कामिनोपि वा॥ गुरौ विश्वासहितस्य पा
र्श्वस्थुन्मादवर्तिनः॥ दासीवेश्यासंगमिनश्चांडालीगामिनस्तथा॥ परस्वहारिणश्चैव देवद्रव्यापहारकः
॥ ब्राह्मणेभ्यो नीतिदस्यैवं वृत्तिच्छेदकरस्य वा॥ परस्वं लोलुपस्याथ हस्तकृतपापिनः॥ पंचयज्ञविहिन
स्य दुःशास्त्रनिरतस्य च॥ गुरुनिंदादिसंयुक्तो गुर्वाज्ञापहारिणः॥ नारीणां च विशेषेण प्रायश्चित्तं महा
व्रतं॥ चतुर्वेदपुराणेषु स्मृतिषु चैव निश्चितं॥ ॥ वसिष्ठ उवाच॥ ॥ ब्रह्महत्यादिपापानां प्रायश्चित्तं यदी
च्छसि॥ तदा लक्षनमस्कारं व्रतं कुरु महीपते॥ ब्रह्महत्यादिपापानां प्रायश्चित्तं महद्व्रतं॥ संकीर्णकानां पा
पानां प्रायश्चित्तं यदीच्छसी॥ तदा लक्षनमस्कारं व्रतं कुरु महीपते॥ सकलीकरणानां च मलिनीकरणस्य
च॥ अपात्रीकरणानां च प्रायश्चित्तं यदिच्छसि॥ तदा लक्षनमस्कारं व्रतं कुरु महीपते॥ भ्रातपत्नीसुता

व्रता० नांत्यगामिनः कामिनस्तथा॥ स्वस्त्रष्टस्वमातृबंधूनामिच्छयागमनस्य च॥ दासीवेश्यासंगजस्य संग्र
२९८ यं यदि वांछसि॥ तदा लक्षनमस्कारं व्रतं कुरु महीपते॥ अथ एतत्स्वरूपविधिविशेषं कल्पनियमादि
कं॥ चातुर्मास्ये तु संप्राप्ते केशवे शयनं गते॥ आषाढस्य सिते पक्षे एकादश्यां समाहितः॥ सं
कल्पयेद्देवदेवस्य पुरतश्चक्रपाणिनः॥ मम लक्षनमस्कारव्रतस्य पुरुषोत्तमं॥ निर्विघ्नेन व्रतं सां
गं कुरु त्वं कृपया हरे॥ पापपंकनिमग्नं मां पापशोकस्य भाजनं॥ व्रतेनानेन सुप्रीतः सद्य एव जगत्पते
॥ इति संकल्प्य मनसा कार्त्तिकांतु समापयेत्॥ प्रातः स्नात्वा व्रतं कुर्याद्दामध्याह्ने सदा मुनिः॥ यदा त
दा न भुंजीत भुंजीत लघुभोजनं॥ अनृतं न वदेत्क्वापि नाम ध्यायेत्कथंचन॥ देवतानां जपं होमं न
त्यजेत्तु कदाचन॥ अतिथिं पूजयेन्नित्यं यथाशास्त्रानुसारतः॥ कार्त्तिके मासि संप्राप्ते पौर्णमास्यां राम
ततः परं॥ संस्थाप्य कलशं तत्र पूर्णं सवस्त्रं सपिधानकं॥ विष्णोश्च प्रतिमां तत्र पूजयेद्विष्णुनामिका २९८
॥ नाममंत्रैः केशवाद्यैश्चांगपूजा विधीयतः॥ नैवेद्यांते समभ्यर्च्य कुर्यात्पश्चाद्व्रतार्पणं॥ पौरुषेयेण

सूक्तेन तिलगोधूमतंडुलैः॥ देवदेव जगन्नाथ सर्वव्रतफलप्रद॥ व्रतेनानेन सुप्रीतो गृहाणार्घ्यं
मयार्पितं॥ इति चार्घ्यत्रयं दत्त्वा पश्चाद्धोमं समाचरेत्॥ पौरुषेयेण सूक्तेन शतमष्टोत्तरं सदा॥ होम
शेषं समाप्याथ पूर्णाहुतिमतः परं॥ आचार्यं पूजयेत्पश्चाद्दद्याद्गोमिथुनं गुरोः॥ ब्राह्मणान्भोज
येत्पश्चाच्छतं विंशति पंच वा॥ दक्षिणां च यथाशक्त्या वाचयेदाशिषस्ततः॥ अनुज्ञातश्च तैः सोऽपि
स्वयं भुंजीत बंधुभिः॥ इदं व्रतं महापुण्यं पापारण्यदवानलं॥ पापपर्वतकुलिशं पापाब्धितरणोडुपं
॥ सर्वपापहरं सद्योरूपेण विष्णोः प्रसादनं॥ नानेन सदृशं किंचित्त्रिषु लोकेषु विद्यते॥ सर्वेषा
माश्रमाणां च विहितं श्रुतिनोदितं॥ ॥ इति श्रीभविष्योत्तरे वसिष्ठांबरीषसंवादे लक्षनमस्का
रविधानं॥ ॥ अथ कार्त्तिकमाघवैशाखे वा लक्षवर्त्तिविधिः॥ ॥ मासपक्षाद्युच्चार्यामुकका
मो लक्ष्मीसहितं विष्णुं सावित्रीसहितं ब्रह्माणं उमयासहितं शिवं यथामिलितोपचारैः पूजयिष्ये
इति संकल्प्य षोडशोपचारपूजां कुर्यात्॥ अथ सोद्यापना कथा॥ ॥ सूत उवाच॥ ॥ आर्यावर्त्तेषु राजा·

व्रता० विदेशाग्निलक्षणानिधा॥ तस्मा भुजंगश्रेष्ठो भूतदासो नाम महाबली॥ तं लक्षणां तु संत्यातां स्थितां
२९९ गोदावरीतटे॥ बालवैधव्यदोषेण रुदंती कुररीमिव॥ मृतं पतिं पुरः स्थाप्य बंधुभिः परिवारि
ता॥ आक्रंदंति ततो वीक्ष्य ज्ञानेनैतां प्रत्यपद्यत॥ भुवंति भुवि कायेन मुञ्चंति सुरो बकः॥ ज
ज्ञानाभ्यधिकात्कारणं जायते तां नुपश्यतां॥ भूतदासः लक्षणावाक्यं स भुजंगमुवाच ह॥ कुलजाताश्च
नारीणां दृश्योपमतिदारुणं॥ अवस्थात्रयमेतासां तत्रैयं तु सुदारुणं॥ कन्यात्वं जीवनत्वं वि
धवात्वमिति त्रिधा॥ पारवश्यं च नारीणां दुःखमामरणांतिकं॥ मृतापत्यत्ववैधव्ये तथैवापुत्र
ता स्त्रियः॥ असत्यमेतत्त्रितयं वैधव्यं तत्र चोत्तरं॥ शोचंति नो च नारीणां कस्येदं कर्मणः फलं॥ नि
वर्त्तते यकेनैवं सत्त्वं तिमितितामपा॥ उवाच दासनामासौ भुजंगः सुनृतं वचः॥ शृणु भद्रे प्रव राम
क्ष्यामि तत्त्वराह्णाः पुरा द्विजाः॥ देवानां चैव लोकानां हितार्थं मंत्रकोविदाः॥ शास्त्रज्ञानात्स्वभावस्त्र २९९
स्त्रीणां प्रसूराकृतं॥ जानंति कर्मजफलं तेष्वाधृतव्रताः॥ भुजंगवचनं श्रुत्वा तथेवोमितिसा

पुनः॥ तत्रागतं महावृद्धं याजकं नाम वै द्विजं॥ पप्रच्छ तं तदानीं दीना प्रणम्य पांतरमानसा॥ मुने व
हं दुराचारा वैरूपासि निरलक्षणा कथा॥ तथापि ते दयापात्री पृच्छामि मे सुबोधय॥ साधूनां हि ततः मु
र्वसमो भुवि सममचित्तानां जातः सर्वसमो भुवि॥ दुर्गंधो वा सुगंधो वा वायोरपि समो भवेत्॥ मुनेर
श्रेयं नारीणां तृतीयात्तिबुद्धःसह॥ कर्मणा जायते केन केन वाथ निवर्त्तते॥ एतद्विस्तार्य मे ब्रह्मन्
कृपया वद सुव्रत॥ इति तस्या वचः श्रुत्वा याजको वाक्यमब्रवीत॥ दैवे कर्मणि पैत्रे च नार्यः याके व
वस्थिताः॥ अरे कस्माच्च रजोदृष्टा -- नां शाद्युपस्करान्॥ अतानाद्वानयाद्वापि कामाल्लोभात्क
चित्स्त्रियाः॥ अवेदयित्वा गच्छंति तेन दुष्यंति सत्क्रियाः॥ क्रियालोपगतास्ते तेनाः पापात्तस्मात्सुदुस्स
जात्॥ द्वरणमिमां प्राप्नुवंति सर्वाश्चापि न संशयः॥ बाल्ये वा यौवने वापि वार्द्धके वा कदाचन॥ नत्रायाया
ति दुराचारा परमेवाति कंदति॥ स्वपतिश्वपतिं बंधूनां दुराचारा द्विःसह॥ एतत्सहायती नारी या व
र्धयितसत्क्रिया॥ बाल्ये वैधव्यमाप्नोति सा नारी नात्र संशयः॥ एतत्कर्मसहायेन रजसा दूषिता च या॥

॥मृतापत्यातथामृत्वावैधव्यंयोवनेव्रजेत्॥यानारीतुरजोदुष्टासर्वमंगदृशंकरं॥कृते
यदिसानारीवैधव्यंवार्द्धकेव्रजेत्॥याचानुकूलरहितापतिधर्मेषुसर्वदा॥बाल्येवैधव्यमाप
न्नागतिहीनाभवत्यलं॥सर्वसामपिवैधव्यानिदानंपुष्पिताचवै॥शांतिंतस्यप्रवक्ष्यामिक
र्मणासापिलक्ष्मणे॥कृतेतुमुनिपंचम्यांव्रतेपापंचशोषितं॥रूपंगच्छतिनारीणामितिवेदविदो
विदुः॥सूर्यसमवायनंदत्वाकृतेलक्ष्मीव्रतादिके॥मलावशेषंव्रजंतिरजोदोषोनसंशयः॥निर्मू
लंतुव्रजत्याशुलक्ष्मीव्रतेकृते॥रजसोत्थंमहापापंनारीणांनात्रसंशयः॥इतितद्वचनंश्रुत्वा
पुनःपप्रच्छलक्ष्मणः॥मनसासंकितांमत्वासादरंमुनिपुंगवं॥साधुसाधुमहाभागवित्तंमेत्वयवि
कलं॥लक्ष्मीव्रतस्यास्यविधानंकीदृशंवद॥कस्मिन्मासेतुकर्तव्यंकस्यवातत्समर्पणं॥उ
द्यापनंकथंकार्यंकिंफलंतस्यवामुने॥त्वयादृष्टेपात्रकोपिलोकानांहितकाम्यया॥फलंवि
धानंतत्सर्वमवदद्वदतांवरः॥मुनिरुवाच॥ ॥लोघ्रशास्यमुनिनांचसंवादंकथयामिते॥

कालोहिकार्तिकोमासोवैशाखोमाघएववा॥सहस्रगुणितंधत्तेव्रतमेतद्धिकार्तिके॥तस्मा
त्कोटिगुणंधत्तेमाघमासेव्रतोत्तमं॥तस्मादनंतगुणितंफलंवैशाखमासिके॥एतस्मिन्मास
त्रितयेयस्मिन्मासेसमाप्यते॥तस्मान्मासद्वयात्सर्वंप्रारब्धव्यमिदंव्रतं॥अंतेमासिप्रकु
र्वीतसमाप्तिंचविचक्षणः॥सहस्रवर्तिभिःकुर्यान्नीराजनंविष्णवेन्वहं॥गोघृतेनाप्लुतैरेन
सम्यग्युक्तैर्मनोहरैः॥यस्मिन्मासेसमाप्तिःस्यात्पौर्णमास्यांतुकारयेत्॥उद्यापनविधानेनव्र
तसंपूर्णकारकः॥प्रातःस्नात्वाशुचिर्भूत्वापंचगव्यंतुप्राशयेत्॥पुण्याहवाचनंकृत्वाआचा
र्यंवरयेत्ततः॥त्रयोदशर्त्विजोलक्ष्मीसाग्निकान्वृणुयात्ततः॥सतिलैःश्रयवैःकुर्याद्ग्नेनयकु
चाद्विजः॥वर्षादशांशतःकुर्यात्तर्पणंतुविचक्षणः॥तर्पणस्यदशांशेनहोमंकुर्याद्विचक्ष
णः॥तर्पणोक्तेनमंत्रेणपायसंचघृतान्वितं॥पालाशसमिधैश्चैवमंत्रेणानेनवैस्रवैः॥घृ
तंचविष्णुगायत्र्याहोमस्यायंविधिःस्मृतः॥कलशेषुतथास्थाप्यविधानंचसवस्त्रकं॥सुवर्ण

प्रतिमांकृत्वाग्न्युत्तारणपूर्वकं॥ प्राणप्रतिष्ठयास्थाप्य प्राणांस्तस्यांस्तस्यां समाहितः॥ आ
वाहनादिपुष्पांतं पूजां कुर्याद्यथाविधि॥ तत्रत्रयो रुक्ममयाः प्रतिमाः कारयेत्ततः॥ श्रियाच सहि
तं देवं मध्यगं पूजयेद्धरिं॥ तद्दक्षिणे चतुर्वक्त्रं सावित्र्या सहितं तथा॥ उत्तरे चोमया शंभुं परतो गरु
डं तथा॥ कालो विष्णुस्तथा वह्नी रविर्द्विजो निशाकरः॥ रुद्रः शेषो जगद्व्यापि तेजोरूपी महेश्व
रः॥ निरंजनः कलाध्यक्षो विश्वरूपी जगत्प्रभुः॥ स्वप्रकाशः स्वयंज्योतिश्चतुर्व्यूहो तुलाशयः प
रब्रह्मेति हि दशनामभिः पूजयेद्धरिं॥ शिरोललाटके नेत्रे कर्णे नासे मुखे तथा॥ कंठस्कंधौ तथा
बाहू स्तनौ वक्षस्तथोदरे॥ नाभौ कट्यां च जघने ऊरौ जानौ च गुल्फके॥ पादौ तदा प्रक्रमशोंऽग
गानि वै तु पूजयेत्॥ धूपं दीपं ततो दत्वा नैवेद्यं च निवेदयेत्॥ यद्धर्मं लक्षपूजायास्तु द्रव्यं कनक
स्य च॥ कृत्वा निवेदयेत्तस्मै पश्चात्पूजां समाचरेत्॥ देवदेव जगन्नाथ भक्तानां कार्यकारक॥ त्व
त्प्रसादादहं यच्चेश घं कार्यं प्रदो भव॥ अनेनैव विधानेन लक्षपूजां करोति यः॥ पुत्रपौत्रैः प्र

पौत्रैश्च सुखमाप्नोति निश्चितं॥ आचार्यं पूजयेत्पश्चात् ब्राह्मणानृत्विजांस्तथा॥ गौर्दोहा
च सवत्सा वै सालंकारगुणान्विता॥ त्रिंशत्पलं कांस्यपात्रं घृतेन परिपूरितं॥ सुवर्णवर्तिसंयुक्त
माचार्याय निवेदयेत्॥ अथवा तदर्धपलं तथा घृतसमन्वितं॥ अथवा तु यथाशक्ति दद्याद्दाव
स्यकं त्विदं॥ व्रतान्ते वै तु वै दद्यात्कांस्यं वै घृतपूरितं॥ यावज्जीवं जीवयति जन्मवेद्वनत्संशयः॥ र
जोदोषविमुक्तः स्यात्पौर्णमास्यां ददाति या॥ ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाद्यं न कारयेत्॥ एवं
करोति या नारी तस्याः पुण्यफलं शृणु॥ अथ सर्वाणि पापानि रहस्यानि कृतानि वा॥ प्रकाशितानि स
र्वाणि व्रतस्यास्य प्रभावतः॥ चांडालगामिनी वापि तथा शूद्राभिगामिनी॥ कारुकंटकचारीणां गामिनी
दुष्टचारिणी॥ ब्रह्मक्षत्रियविट्शूद्र प्रतिलोमानि गामिनी॥ मातुलेयपितृव्यादीन् भ्रातृपुत्राभिगा
मिनी॥ बालघ्नी वा पतिघ्नी वा मातापित्रोर्वधे रता॥ गोघ्नी वा तस्करी वापि रजःशंकरकारिणी॥ एव
मादि महापापैरावृता पि कुलांगना॥ कृत्वा चैतद्व्रतं सम्यक् मुच्यते नात्र संशयः॥ व्रतानामुत्तमं चैत

व्रता० ४०२ तत्स्त्रीणां त्वावरूपकं त्विदं॥ एववर्त्तिप्रदानेन विष्णोरमिततेजसः॥ कोटयो ब्रह्महत्यानामगम्यागम
कोटयः॥ तथैवान्तुग्रपापानि कोटयोप्यसहस्रशः॥ नरंपति नात्र संदेहो नारीणां वा वरस्य वा॥ किं
लक्षवर्त्तिभिर्विष्णोः कृते चारार्त्तिकार्पणे॥ किमत्र बहुनोक्तेन नानेन सदृशं व्रतं॥ पुरुषोपि व्रतं कृ
त्वा पूर्वोक्तैः पापसंचयैः॥ मुच्यते नात्र संदेहो मधुशासनशासनात्॥ एतत्सर्वं मयाख्यातं यत्पृष्ट
स्त्वमानद॥ व्रतं कुरुष्व वैतिष्ट यथा ते रोचते मनः॥ इति तद्वचनं श्रुत्वा पुनः पप्रच्छ लक्ष्मणः॥ अ
ज्ञानात् दुष्टमनावा दानविश्वासोममेत्वै॥ प्रत्ययार्थं ममब्रह्मन् प्रत्यक्षं कुरु मेधुना॥ इति तस्या वचः
श्रुत्वा याजको वाक्यमब्रवीत्॥ कथं तत्प्रत्ययो नृत्वा याचतां करुणानिधिः॥ साप्युवाच पुनर्विप्रं
विष्णतुष्य लोचना॥ नववैधव्यमापन्ना रोदिसे षा कुमारिका॥ अस्याः पतिः कथं जीवेद्वैधव्यं नैव राम
गच्छति॥ यथा कुरु मुनिश्रेष्ठ दयां नाम भवतां धनं॥ इति तस्या वचः श्रुत्वा विस्मितो वाक्यमब्रवीत्॥ अ ४०२
द्यैव मकरं प्राप्तो भास्करो लोकभास्करः॥ माघोयं च वरो मासो सर्वक्रतुफलाधिकः॥ अथ यत्नात्कु

व्रता० ४०३ स्माद्यो माघमासस्य सहायं वा करिष्यति॥ धर्मस्य तत्फलं प्राप्य मुच्यते नात्र संशयः॥ नित्यं स्नातुम
शक्तस्तु कुर्यात्स्नानं तु दिनत्रयं॥ द्वादश्यां रथसप्तम्यां पौर्णमास्यां तथैव च॥ सोपि पूर्णफलं प्राप्य विष्णु
लोके महीयते॥ तदेव कर्मजफलं महापातकनाशनं॥ योन स्नाति नरो माघे मकरस्थे दिवाकरे
॥ ब्रह्महा स तु विज्ञेयो विलकर्म स्रुगहितः॥ नारी वापि नरो वापि न स्नायादरुणोदये॥ रौरवं नर
कं प्राप्य यावदाहूतसंप्लवं॥ रोगास्तु पहतो यस्तु पादौ प्रक्षाल्य वा पतः॥ धौतवस्त्रं परिधाय त्रि
राचम्य च वारिणा॥ गायत्र्यामंत्रितं चांबुः प्रोक्षयेन्मस्तके संशयत्न॥ सोपि स्नानफलं प्राप्य मोदते
विष्णुमंदिरे॥ ये च शृण्वंति सततं ये पठंति नरोत्तमाः॥ ते सर्वे पापनिर्मुक्ता यांति पदमव्ययं॥
इति वायुपुराणे लक्ष्मवर्त्ती कथा॥ ॥ अथागस्त्यार्घः॥ ॥ हेमाद्रौ मदनरत्ने च पद्मपुराणे॥ क राम
थमर्घप्रदानादि कर्त्तव्यं तस्य वै मुने॥ दत्वार्घं यदगस्त्यस्य प्रजानंतं वदस्व मे॥ पुलस्त्य उवाच॥ ४०३
प्रत्यूषसमये विद्वान् कुर्यादस्योदये निशि॥ स्नानं शुक्लतिलैस्तद्वच्छुक्लमाल्यांबरो गृही॥ निर्गुद

स्नाते गंगायामघहारिणि॥ स्नानं कृत्वार्पणं कृत्वा देहि तस्मै मतायवै॥ तेन जीवेदयं चैतं ब्रह्म
घ्नोयं सुरापि च॥ तस्माद्यं राजयक्ष्मरोगेणानुमतिं गतः॥ तयापि माघमासस्य पुण्ये ऽजीवते कं
वा॥ दापयित्वा तथा वर्तिकां स्वपात्रं निधाय ततः॥ जीवपतिं निवेदाशु यावदामरणांतिकं॥ जन्मना
तद्वचः श्रुत्वा जलं स्म दत्त्वाय वाप्य ततः॥ स्नानं कृत्वार्पणं कृत्वा ददौ तस्मै फलं तदा॥ तत्पुण्यस्य प्रभावे
न तत्क्षणं देव बोधितुं॥ स च तु जंगमे षपित्वा कृत्वा कांस्यं च पात्रकं॥ कुमार्यै दापयामास वैध
व्यस्यापनुत्तये॥ एतत्पुण्यप्रभावेन कुमारी सापि शोभना॥ तदा च जीवपतिं लब्ध्वा बहुपुत्रिका
॥ कुमारी शोभना नाम तत्संततिः कण्वो ऽब्रवीत्॥ तद्बांधवास्तदा सर्वे तुष्टुवुस्तां सलक्षणां॥ यात्वकं
चापि संप्रीता जग्मुस्ते स्वं निकेतनं॥ लक्षणापि च दोषेण जंगेन च संयुता॥ माघस्नानं तदा
कृत्वा व्रतमेतच्च कारसा॥ ततस्तु मरणं प्राप्तो दासः स्वस्यामतायकं तं॥ गयो नाम महाराजा चक्रवर्ती
बभूव ह॥ सा लक्षणा च तत्पत्नी सर्वलक्षणसंयुता॥ बभूव लोकविख्याता जीवत्त्रीसुपुत्रिका॥ त

ये दिनस्तु वै स्नानं कुर्यात् इति हेमाद्रि॥ स्थापयेत्स्वर्णकुंभं मानवस्त्रविभूषितं॥ पंचरत्नस
मायुक्तं घृतपात्रेण संयुतं॥ नानानक्षफलैर्युक्तं ताम्रपात्रसमन्वितं॥ अंगुष्ठमात्रं पुरुषं तथैवे
वसौवर्णमिस्यायतबाहुदंडं॥ चतुर्भुजं कुंभमुखे निधाय धान्यानि सप्तांकुरसंयुतानि॥ सकाण
पुष्पाक्षतस्फुक्तियुक्तं मंत्रेण दद्यात् द्विजपुंगवाय॥ उदीर्ण अलंबोदर दीर्घबाहु नत्वेनायमद्
म्युरवस्त्र॥ श्वेतां दद्यात् पदिश्राक्षिरसिरौप्यैस्तुरैर्हेममयी सवत्सां॥ हेममयी हेमशृंगी॥ धेनुं बहु
क्षीरवतीं प्रणम्य सवस्त्र घंटाभरणं द्विजाय॥ आसप्तरात्रा ऽदद्याद्यमस्य दातव्यमेतत्कल्पवरेण॥
यमस्य व्रागस्य॥ उदयाद्दूर्ध्वमासप्तरात्रात्सप्तरात्रमवधीकृत्यैतस्मिन् दिने अर्घो दातव्य इत्यर्थः
॥ यावत्सप्तरात्राथवा रस्पुरयोर्घमप्यन्नवदंति केचित्॥ प्रत्यहं च फलं सागमेवं कुर्वन्नमुत्यति॥
होमं कृत्वा ततः पश्चाद्जपेन्मानवः फलं॥ होमं वस्समाणार्घमंत्रेणाम्नेन॥ अनेन विधिना यस्तु
पुमानर्घं निवेदयेत्॥ चक्रवर्तित्वमाप्नोति रूपारोग्यसमन्वितः॥ स सैव लोकानाप्नोति स्वार्घ

 न्यः प्रयच्छति॥ यावदायुश्च यः कुर्यात्स परं ब्रह्म गच्छति॥ प्रकारांतरमत्र विष्णो॥ कन्यायामागतेसू
 र्येऽर्वाग्दिने सप्तमे दिने॥ कांचनं कारयित्वा च यथाशक्त्या सुशोभनं॥ पुरुषाकृतिसुशांतं च जटा
मंडलधारिणं॥ कमंडलुकरं शिष्यैः सर्वैश्च परिवारितं॥ मस्तुप्रं विषहंतारं दर्भहस्तधरं मुनिं
॥ तस्मिन्कुंभे समालग्नं चंदनेन ततोऽभ्यसेत्॥ स्नापितं चानुलिप्तं च चंदनेन सुगंधिना॥ पूजितं वा
तिकुसुमैर्वर्धयात्धूपैः सुधूपितं॥ ततश्चार्घ्यः प्रदातव्यो यैर्द्रव्यैस्तांस्तच्छृणुष्व मे॥ खर्जूरैर्नालि
केरैश्च कूष्मांडैस्त्रपुषैरपि॥ कर्कोटिकारवल्लैश्च कर्मरैर्जंबीरकैः॥ वृंताकैर्दाडिमैश्चैव
नारिंगकदलीफलैः॥ दूर्वांकुरैः कुशैः पद्मैर्नीलोत्पलदलैस्तथा॥ नानाप्रकारैर्नैवेद्यैश्च गोधि
वस्त्रैरसैः शुभैः॥ विरूढसप्तधान्यैश्च वंशपात्रे निधापितैः॥ सौवर्णरौप्यपात्रेण ताम्रवंशम
येन च॥ भूम्निस्थितेन मंत्रेण जानुभ्यामवनीं गतः॥ दक्षिणाभिमुखो भूत्वा ध्यायेदगस्त्यं रूपतः॥
दद्यादर्घ्यं प्रयत्नेन चतस्रः कुरुनंदन॥ शुचयाकारमर्घपात्रं सकाशपुष्पाकृतं॥ काशपुष्पप्रती

काशवह्निमारुतसंभव॥ मित्रावरुणयोः पुत्र कुंभयोने नमोऽस्तु ते॥ विंध्यवृद्धिक्षयकर मेघतोयवि
षापह॥ रत्नवल्लभ देवर्षे लंकावास नमोऽस्तु ते॥ वातापिर्भक्षितो येन समुद्रः शोषितः पुरा॥ लो
पामुद्रापतिः श्रीमान्योऽसौ तस्मै नमो नमः॥ येनोदितेन पापानि विलयं यांति व्याधयः॥ तस्मै नमोऽस्त्व
गस्त्याय सशिष्याय सपुत्रिणे॥ ब्राह्मणो वेदमंत्रेण दद्यादर्घ्यं नृपोत्तमः॥ अगस्त्यः खनमानः ख
नित्रैः प्रजामपत्यं बलमिच्छमानः॥ उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम॥ दत्त्वैवम
र्घ्यं कौरव्य प्रणिपत्य विसर्जयेत्॥ अचिंत्यस्त्वं यथा ब्रह्मा नमोऽगस्त्य महर्षये॥ ऐहिकामुष्मिकीं द
त्त्वा कार्यसिद्धिं व्रजस्व मे॥ विसर्जनमंत्रः॥ विसर्जयित्वागस्त्यं तं विप्राय प्रतिपादयेत्॥ देवज्यासरूपा
य वेदवेदांगवेदिने॥ अगस्त्यो मे नमस्योऽस्तु अगस्त्यो मे धने स्थितः॥ अगस्त्यो द्विजरूपेण प्रतिगृह्ण
तु सत्कृतः॥ अगस्त्यः सप्तजन्मोत्थं नाशयित्वा च यो वरो॥ अमलं विमलं सौख्यं प्रयच्छ त्वं महामुने॥ प्र
तिग्रहमंत्रः॥ एवं यः कुरुते नज्ञा अगस्त्यव्रतमादरात्॥ तथा॥ दत्त्वार्घ्यं सप्तवर्षाणि क्रमेणानेन योऽश्व

व्रत॰ ४०५

पुमान्पुत्रमवाप्नोतितमेकाग्रमनाःशृणु॥ब्राह्मणःस्याच्चतुर्वेदःसर्वशास्त्रविशारदः॥क्षत्रियः
पृथिवींसर्वांप्राप्नोत्यर्णविमेखलां॥वैश्यानांधान्यनिष्पत्तिर्गोधनंचापिविंदति॥शूद्राणांधनमा
रोग्यंसत्यंनवाधिकंभवेत्॥स्त्रीणांपुत्राःप्रजायन्तेसौभाग्यंरत्नसंपदिमत्॥विधवानांमहापुण्यंवर्द्ध
तेपांडुनंदन॥कन्याभर्तारमाप्नोतिव्याधेर्मुच्येतदुःखितः॥येषुदेशेष्वगस्त्यार्घ्यप्रदेयंक्रियतेनरैः
॥तेषुदेशेषुपर्जन्यःकामवर्षीप्रजायते॥ईतयःप्रशमंयांतिनश्यंतिव्याधयस्तथा॥पठंतियेत्वगस्त्य
स्यव्रतंशृण्वंतियेपरे॥तेसर्वेपापनिर्मुक्ताश्चिरंस्थित्वामहीतले॥हंसयुक्तविमानेनस्वर्गंयांतिन
रोत्तमाः॥मर्त्योयदिदिच्छतिगृहंपरमर्द्धियुक्तंभोगांश्चशारीरमरुजंपशुपुत्रपुष्टिं॥तत्कलवत्र
भयमुनेरुदयेमहार्घ्यमर्घप्रदेयचफलैर्वस्त्ररसैःसधान्यैः॥विष्णुरहस्येपि॥काशपुष्पम
यीरम्यांकृत्वामूर्तिंतुवारुणीं॥प्रदोषेविन्यसेत्तांतुप्रस्थेकुंभेस्वलंकृते॥कुंभस्थंपूजयेत्तत्तु
ष्पधूपविलेपनैः॥दध्यक्षतबलिंदद्याद्रात्रौकुर्यात्प्रजागरं॥प्रभातेतांसमादाययाया

राम ४०५

त्पुण्यंजलाशयं॥तिशावसानेतांपश्यन्जलांतेप्रतिमांमुने॥अर्घ्यंदद्यादगस्त्यायभक्त्यासम
गुपोषितः॥पुष्पैर्मूलैःफलैर्धूपैर्गंधैरयसुगंधिभिः॥शर्कराखर्जूरकर्कंधुनालिकेरादिभिः
शुभैः॥पंचरत्नसमायुक्तंहेमरूप्यसमन्वितं॥सप्तधान्ययुतंपात्रंचंदनेनसमायुतं॥तत्तुताम्र
मयंकृत्वादद्यादर्घ्यंद्विजोत्तमे॥अगस्त्यःखननानेतिपद्यमंत्रमिमंमुने॥पथानान्यकृतार्थेनसर्वे
षांचस्वशक्तितः॥अर्घंदद्यादगस्त्यायश्रद्धमंत्रविधिस्त्वयं॥काशपुष्पप्रतीकाशवह्निमारुतसं
भव॥मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते॥तथारत्वार्थंतुविधानेननमःकुंभोद्भवायच
॥तत्रेदगस्त्यमुद्दिश्यधान्यमेकफलंरसमिति॥तथाद्विजोलानमुपाहृतार्थःप्राप्नोतिवेदंप्रमदांश्च
पुत्रान्॥क्षेत्रंमहींभूरिधनंवैश्यःशूद्रःसुखंधर्मफलंचसर्वं॥अगस्त्यमर्घंस्त्वयंयेपूजयिष्यंति
मानवाः॥तेषांसांवत्सरंपुण्यंसन्निधौगाव्यविष्पति॥उग्रस्यमुखयेपि॥अप्राप्तेभास्करेकन्यांशोपम
सदिनेषुच॥अर्घंदद्यादगस्त्यायपावकन्यांरविर्व्रजेत्॥शर्पनामेन॥येनोदितेनपापानियांतिसर्वा

व्रता० ४०६ धियोत्तयं॥ तस्मैनमोस्त्वगस्त्यायसशिष्यायसपुत्रिणइति॥॥ इतिव्रतार्केअगस्त्यार्घविधिः॥
अथव्रतसारेअथर्वणरहस्यानुसार्यश्वत्थकल्पः॥ ॥भगवन्सर्वधर्मज्ञसर्वशास्त्रविशार
द॥ स्त्रीणांपुत्रविहीनानांनराणांसुखसंपदां॥ उपायंचैवमेब्रूहिसुखसिद्धिःकथंभवेत्॥॥ अ
थर्वणउवाच॥॥ पुराब्रह्मादयोप्युशामनमस्माकंब्रूहिमेप्रभो॥॥ श्रीविष्णुरुवाचम[illegible]देवाःसर्ववि
ष्णुसमाश्रिताः॥ अस्मद्वन्देवदेवेशराक्षसैःपीडितावयं॥ कथमस्योपशमनमस्माकंब्रूहिमेप्र
भो॥ ॥श्रीविष्णुरुवाच॥ अहमश्वत्थरूपेणसंभवामिचभूतले॥ तस्मात्सर्वप्रयत्नेनकुरुध्वंतत्से
वनं॥ तेनसर्वाणिभद्राणिभविष्यंतिनसंशयः॥ विष्णुर्यदुक्तवांस्तेभ्यस्तत्तंतेवदाम्यहं॥ नदानेनतपोभि
श्चनाध्वरैर्भूरिदक्षिणैः॥ अश्वत्थसेवनादन्यत्कलौनास्तिपराक्रिया॥ तद्विधानंनिमित्तानिसंरसास्
सिश्रप्रजनं॥ हवनंतर्पणंविप्रभोजनंनियमंतथा॥ व्रताधिकारिणस्तत्रविधानंचविशेषतः॥ एतत्स
र्वंपिप्पलादीनवक्ष्यामितच्छृणुव्रत॥ दारुणेविविधोत्पातेदिविभौमांतरिक्षगे॥ परचक्रभयेदेशेविध्वरे राम ४०६

शविग्रहे॥ दुःस्वप्नेदुर्निमित्तेचसंग्रामेद्भुतदर्शने॥ मारीभयेराष्ट्रभयेतथाचोराग्निजेभये॥ कुष्ठाप
स्मारकुष्ठादिप्रमेहाविविधेज्वरे॥ उदरेमूत्रकृच्छ्रेचगलसंस्थेभयेक्च॥ अन्येषुरक्तरोगेषुव्रणरोगेत
थैवच॥ एतेषांरोगनाशायकुर्यादश्वत्थसेवनं॥ प्रातरुत्थायनद्यादौस्नात्वासम्यक्कृतक्रियः॥ अश्व
त्थदेशमाश्रित्यगोमयेनोपलिप्यच॥ तमश्वत्थंमंडलस्थंसुधायांगैरिकेनवा॥ पूजाद्रव्याणिसंपाद्यपु
ण्याहंवाचयेत्ततः॥ ऋत्विजांवरणंकृत्वाततःपूजांसमारभेत्॥ आदावाराधयेद्विष्णुंध्यानावाहनपूर्वकं
॥ तथैवपिप्पलतलेनारायणमयंद्विजं॥ श्वेतगंधाक्षतैःपुष्पैःधूपदीपनिवेदनैः॥ अर्चयेत्पुरुषसू
क्तेनतथैवध्यानपूर्वकं॥ तैनैवहवनंकुर्यात्तर्पणंवानमस्कृतः॥ श्वेतवर्णंसलक्ष्मीकंचिंतयेत्पुरुषो
त्तमं॥ इतिध्यात्वावाहनादौलपचारैश्चषोडश॥ ततःप्रदक्षिणांकुर्यात्तत्सर्वंसफलंभवेत्॥ लक्ष
मेकंद्विलक्षंवाचतुःपंचमलक्षकं॥ कार्यस्यगौरवंज्ञेयंपश्चाद्दशांतंसमाचरेत्॥ ब्रह्मचारीहविष्याशीत्व
धःशायीजितेंद्रियः॥ मौनीध्यानपरोभूत्वापिप्पलस्यक्तिंपवेत्॥ विप्रोनमितस्कंचपीरुषंवत्स

Dr. BHAU DAJI MEMORIAL

व्रता० वेतथा॥वेदत्रयेण पुण्यानि सूक्तानि च पठेत्पुनः॥ तस्मात्स्कंदशांशेन सघृतं पायसं चरुं॥ जुहुयाच्च
४०१ त्स्वं वह्नौ स्वगृह्योक्तविधानतः॥ तत्संख्यातर्पणं चैव कुर्यादिति न वारिणा॥ उक्तैः षोडशाकृतिग्नि
ः कुर्याद्धोमं यथाविधिः॥ हवनस्य दशांशेन मिष्टान्नं भोजयेत् द्विजान्॥ ब्राह्मणानां स्वयं कुर्यात्त्य
थोक्तनियमं तथा॥ असमर्थस्य पत्न्या वै स्वपमन्येन कारयेत्॥ उक्तप्रमाणदधिकं फलं दशगुणं न
वेत्॥ ततश्चतुर्गुणं पीवरं जतं चतुरस्रकं॥ द्रोणमर्द्धं तदर्द्धं वा तिलोपरि विनिक्षिपेत्॥ श्वेतवस्त्रेण
संस्थाप्य पूर्ववत्पूजयेन्नरः॥ दरिद्राय सुशीलाय श्रोत्रियाय कुटुंबिने॥ उदङ्मुखाय विप्राय स्वयं
पूर्वमुखस्थितः॥ सुवर्णादिस्रगाज्य च मंत्रेण प्रतिपादयेत्॥ इह जन्मनि चाप्यस्मिन् बाल्ययौवनवार्द्धके॥
मनोवाक्कायजैर्दोषैर्यद्यमेव विधि करोत्विति सर्वं विप्रेण कारयेत्॥ इत्थं कृतं व्रतस्यांते व्रतस्यापि पूर्व राम
र्पये॥ हेमाश्वत्थतरुं दद्याद्वुक्तं गां च पयस्विनीं॥ स्वर्णशृंगीं रौप्यखुरां वस्त्रादिभिरलंकृतां॥ पलमेकं ४०१
तदर्द्धं वा तदर्द्धार्द्धेन वा पुनः॥ हेमाश्वत्थतरुं कुर्यात्स्कंधशाखासमन्वितं॥ उत्तमः प्रथमः कल्पो द्वि

योमध्यमःस्मृतः॥ तृतीयं कल्पमप्युक्तं संप्रदानाय पिप्पलः॥ पिप्पलो वृक्षराजेंद्र अग्निगर्भसमप्र
भाकृतिः॥ अनुवनेस्मती नां च पूर्वजन्मनियत्कृतं॥ अघौघनाशाय क्षिप्रं तव रूप प्रदानतः॥ इति
दानमंत्रः॥ अमुमश्वत्थं गृहाण विष्णुरूप द्विजोत्तम॥ स्वीकारमदःकृतघोरं क्षिप्रं शांतिं प्रयच्छ मे
॥विप्रप्रार्थनामंत्रः॥ एवं व्रतं यः कुरुते तस्य पुण्यफलं शृणु॥ पुत्रार्थी लभते पुत्रं धनार्थी लभते ध
नं॥ राज्यार्थी लभते राज्यं बद्धो मुच्येत बंधनात्॥ क्षयापस्मारकुष्ठादि सर्वरोगैः प्रमुच्यते॥ मनसोशान्तु
पीडा च न चराज्य भयं तथा॥ इह जन्मनि चान्यस्मिन् कृतैः पापैः प्रमुच्यते॥ यं यं कामयते कामं तं तं प्रा
प्नोति निश्चितं॥ इहैव भोगानाप्नोति विष्णोः सायुज्यमाप्नुयात्॥ ॥इति व्रतार्के सोद्यापनमश्वत्थव्र
तं॥ ॥अथ लिंगोद्यापनं॥ लैंगे रुद्रयामले च॥ अथातः संप्रवक्ष्यामि प्रतिष्ठां लिंगकस्य च॥ प्रतिष्ठापन
मुद्यापरं॥ येन यस्य विधानेन व्रतं संस्मरणीतामयात्॥ सत्स्रंवाय लक्षं वा प्रजपित्वा यथाविधि॥ कोटि
वाथ विधानेन कामनावा प्रवर्त्यते॥ समाप्ते तु व्रते राजन् विनिमयिमहेश्वरं॥ स्थापयित्वा तु कलशे संर

स्वाघीदिभिः क्रमात्॥ गंधैर्माल्यैस्तथा धूपैर्नैवेद्यैर्विविधैस्तथा॥ हिरण्यं गां च वासांसि स्त्रियो वाय विनि
वेदयेत्॥ दंडवत्प्रणतो भूत्वा ततो मंत्रमुदीरयेत्॥ अंगहीनं विधिहीनं क्रियाहीनं क्रियाहीनं महे
श्वरः॥ पूजितोसि मया देव तत्क्षमस्व मया कृतं॥ यद्वाप्यपहतैः पुष्पैः प्रशस्तैर्न विदूषितैः॥ केश
कीटापविद्धैश्च पूजितोसि मया प्रभो॥ अन्यथा सक्तचित्तेन क्रियाहीनेन वा प्रभो॥ मंत्रेण रूद्रहीने
न पुष्पेण विकलेन च॥ पूजितोसि महादेव तत्सर्वं क्षम्यतां मम॥ व्रतं संपूर्णतां यातु फलं चारूय
मस्तु ते॥ एवं स्तुत्वा नमस्कृत्य विसर्जयेन्महेश्वरं॥ नैवेद्यादि च तत्सर्वं तस्मा गायनिवेदयेत्॥ ब्राह्म
णान्भोजयित्वा च दद्यात्तेभ्यश्च दक्षिणां॥ यथाशक्त्या धेनु वस्त्रं हिरण्यं व्रतदक्षिणां॥ अथान्यः प्र
काशेन विष्णो॥ ॥ नारद उवाच॥ ॥ कथमुद्यापनं चास्य किंप्रकारं महाफलं॥ कथयास्मु मत्य
देवलोकानामुपकारकं॥ ॥ ईश्वर उवाच॥ यैः शिवं समुपास्यैवं लेभे प्राप्तो मनोरथः॥ तत्प्रमाणं
तु सौवर्णं यथाशक्त्याथवा सुधीः॥ रौप्यताम्रमयापि स्याद्दृष्टम्यां च यथोक्तता॥ चतुर्दशां मनकापो

सोमे वाथ प्रयोजयेत्॥ मंडले लिंगतोभद्रे कलशं तत्र विन्यसेत्॥ उपोष्य प्रथमे चाह्नि संपूज्य परमेश्व
रं॥ गीतवादित्रनिर्घोषैर्जागरं तत्र कारयेत्॥ स्तोत्रैश्च विविधैः सूक्तैः पूजयेत्परमेश्वरं॥ चतुर्दशी
दर्शयुता अष्टमी नवमीयुता॥ पारणं तत्र कर्तव्यं रौद्रयुक्ते पुनर्वसौ॥ पंचकं दश वा होमं समधि
कविंशतिः॥ चत्वारिंशच्च तुर्निश्च ब्राह्मणान्भोजयेत्ततः॥ आचार्यं प्रथमं संपूज्य ब्राह्मणं च ततः प
रं॥ गणेशं च दिगीशांश्च पूजयेद्विधानतः॥ वस्त्रैश्च दक्षिणाभिश्च पूजयेच्छिवतत्परान्॥ मत्संजये
न मंत्रेण अग्नौ कृत्वाथ पायसं॥ अग्नौ कृत्वा तु शक्तितः स्यपिकं पिविस्रावः॥ तदा तु घृतमेव स्यात्॥
रुद्रेणाप्यथवा कृत्वा नमो मंत्रेण वा पुनः॥ नमो मंत्रो नमो नवायेति शंनवायचयरारु देण तद्दा
प्रति मंत्रेण पराम त्संजयमंत्रो मंत्रो वा तद्दाकृतलिंगस्थांखेन होमस्य दशांशेन तर्पणं तद्दशांशो
न मार्जनं॥ लिंगं तु पूजया युक्तमाचार्याय निवेदयेत्॥ शिवनन्नात्मकं यस्मात्तज्जगदेतच्चराचरे॥
तस्मादेतेन मे सर्वं किरोतु भगवाञ्छिवः॥ कैलासवासि गौरीशो भगवान्भगनेत्रहित्॥ परावरा

मकोलिंगरूपिद्रिशातुवांछितं॥ ततश्चदक्षिणांवाचानमस्कुर्यात्पुनःपुनः॥ सोद्यापनंव्रतंकृत्वाप्रा
नोयात्परमंपदं॥ शिवलोकंसमासाद्यतत्रैववसतेध्रुवं॥ ॥इतिव्रतार्केपार्थिवलिंगोद्याप
नं॥ ॥ अथतुलसीवीविवाहविधिः॥ ॥विष्णुयामले॥ ॥ आदावेवाथतुलसीवनेवास्वगृहेपिवा
॥ मासत्रयेनसंवर्ध्यततोयजनमारभेत्॥ सौम्यायनेनकर्त्तव्यंगुरुशुक्रोदयेतथा॥ अथवा
कार्त्तिकेमासिभीष्मपंचदिनेषुवा॥ वैवाहिकेषुऋक्षेषुपूर्णिमायांविशेषतः॥ मंडपकारयेत्तत्र
कुंडवेदीविवाहवत्॥ ब्राह्मणांश्चशुचीन्स्नातान्वेदवेदांगपारगान्॥ ब्राह्मणंदेशिकंचै
वचतुरश्चतथात्विजः॥ ग्रहयज्ञंपुरःकृत्वामातृणांयजनंतथा॥ कृत्वानांदीमुखंश्राद्धंसौवर्णं
स्थापयेद्धरिं॥ कृत्वाचरोपतुलसीलग्नेत्वष्टमीनेरवौ॥ लग्नेत्वष्टमितेरवौ इतिज्योतिःशास्त्र
प्रसिद्धगोधूलिकलग्नेइत्यर्थः॥ संरज्यालंकृतांतांचप्रदद्याद्विधिनाहरे॥ षष्ठीचतुर्थ्यर्थे॥
वासःकृतेनमंत्रेणवस्त्रयुग्मेनचेष्टयेत्॥ यदाबध्नेतिमंत्रेणकंकणपाणिबंधने॥ कोअदादिति

मंत्रेणकरग्रहाविधीयते॥ कर्त्तव्यश्चततोहोमोविशेषाद्विधिपूर्वकं॥ आचार्योवेदीकांकुंडेषुऊपाख्य
नवाकृतिः॥ ॐनमोभगवतेवासुदेवायनमःस्वाहा॥ ॐनारायणा० ॐगोविंदायः विष्णवे० मधुसू
दनाय०॥ त्रिविक्रमाय० वामनाय० श्रीधराय० हृषीकेशाय० पद्मनाभाय० दामोदराय० उपेंद्राय०
वासुदेवाय० अनिरुद्धाय० अच्युताय० अनंताय० गदिने०॥ चक्रिणे० विष्वक्सेनाय० वैकुंठाय०
जनार्दनाय० मुकुंदाय० अधोक्षजाय० यजमानःसपत्नीकः॥ सहामात्यैश्चगोत्रजातःप्रदक्षिणःप्रकु
र्वीतचतस्रोविष्णुनासह॥ सहविष्णुनासहतुलस्याइत्यर्थः॥ पठेयुःशांतिकोध्यायान्तथा
वैष्णवसंहितां॥ गायंतिमंगलंनार्योनेरीतूर्यादिनिस्वनैः॥ गांपदंचतथाराशामाचार्यायप्रदापये
त्॥ कृत्विग्भ्योदापयेद्वस्त्राण्येषांचैवदक्षिणां॥ ब्राह्मणान्भोजयेत्पश्चात्सर्पिःक्षीरैःस
शर्करैः॥ एवंप्रतिष्ठितांदेवींविष्णुनाचसमर्चयेत्॥ आजन्मोपार्जितंपापंदर्शनेनप्रणश्यति
॥ ॥ इतिव्रतार्केतुलसीवाहः॥ ॥इतिश्रीमन्मीमांसापारावारपारीणधुरीणनहरशंकरसूरी

नुजहनीलकंगलमञ्जनहर्त्रांकरकृतौ व्रतार्कः समाप्तः ॥ ॥श्रीरविः शरणं परं ॥ ॥व्रतार्के वितनेग्रं
थेस्तु ग्रहार्थे विपश्चितां ॥ बहून्यत्र पंचीतानर्थानदर्शयामि यथाक्रमं ॥ व्रतस्य लक्षणं चादौ दे
शकालौ ततः परं ॥ व्रताधिकारिणः पश्चाद्व्रतधर्मास्ततः परं ॥ उपवासस्य धर्माश्च हविष्याणि व्र
ते तथा ॥ पंचरत्नस्वरूपं च मंत्रास्तस्य यथाक्रमं ॥ पंचामृतस्वरूपं च षड्रसानां तथैव च ॥ चतुःसमं
सर्वगंधयक्षकर्दमकौ तथा ॥ पंचवर्णास्ततः प्रोक्ताः कौतुकाख्यमतः परं ॥ धूपाश्चापि ततः प्रोक्ताश्चा
तवस्त्रसमाः स्मृताः ॥ सप्तधान्यं ततः प्रोक्तं नपाष्टादसंख्यकं ॥ कुंभस्य लक्षणं पश्चात्प्रतिमाद्रव्यत
न्मितिः ॥ अन्नादेशांश्च संख्याया अष्टोत्तरशतादिका ॥ होमद्रव्यप्रतिनिर्मित्रदेवतयोस्तथा ॥ कथनं चा
प्यतादेशेद्रव्यप्रतिनिधेः स्तथा ॥ पवित्रलक्षणं पश्चादिध्मेध्मांसि ततः परं ॥ धूपाश्चापि ततः प्रो
क्ता होमयोग्यास्तयोपि च ॥ हेमरूप्यादि धातूनां धान्यानां मानमीरितं ॥ होमद्रव्यस्य मानं च
कृत्विजां वरणं तथा ॥ सर्वतोभद्रतंत्रं च लिंगतोभद्रमेव च ॥ अथ मंडपदेवाश्च मुद्राणां लक्ष

णानि च षोडशाद्युपचाराणां कथनं च पृथक्पृथक् ॥ विधिश्चोद्यापनानुक्तौ व्रतस्यांगे यथाविधिः ॥ उ
पयुक्तपदार्थानामित्येवं परिभाषणं ॥ अथ व्रतानि कथ्यंते प्रतिपत्प्रभृतिक्रमात् ॥ चैत्रशुक्लप्रतिप
दि संवत्सरविधिः स्मृतः ॥ आरोग्यप्रतिपच्चैव विद्याप्रतिपरस्तथा ॥ तिलकव्रतकं प्रोक्तं बिल्वरो
टाख्यकं तथा ॥ विधिर्यमद्वितीयाया स्तृतीयायामथोच्यते ॥ सौभाग्यशयनं चादौ गौर्यादोलोत्सव
स्ततः ॥ अरुंधतीव्रतं पश्चाद्रूपाख्यं तृतीयकं ॥ स्वर्णगौरीव्रतं पश्चाद्धरितालिव्रतं ततः ॥ हस्तगौरी
व्रतं चाथ कोटिश्वरव्रतं तथा ॥ बृहद्गौरीव्रतं पश्चात्ततः सौभाग्यसुंदरी ॥ चतुर्थ्यामथ कथ्यंते व्रतानि च य
थाक्रमं ॥ गणेशस्य व्रतानि तु संकष्टाख्यचतुर्थिका ॥ दूर्वागणपतेः कपर्दीवगौरीव्रतमतः परं ॥ पंचम्या
मथ कथ्यंते व्रतानि च यथाक्रमं ॥ व्रतं च ऋषिपंचम्या उद्यापनं समन्वितं ॥ व्रतं च नागपंचम्या नागद
ष्टव्रतं तथा ॥ उपांगललितायाश्च व्रतं सम्यक्प्रकीर्तितं ॥ षष्ठ्यां व्रतमथोच्यंते अथ तु ललिताव्रतं ॥ क
पिलाव्रतमत्रतु स्कंदषष्ठीव्रतं ततः ॥ सप्तम्यामथ कथ्यंते व्रतं गंगाख्यमादिमं ॥ शीतलाख्यव्रतं प

श्चाद्मुक्ताभरणव्रतं॥ व्रतं वैरंभसमम्यास्तस्यां स्नानविधिस्तथा॥ अवन्ध्याव्रतं तस्यामथोष्टम्यां व्र
तानि वै॥ कथ्यंते प्रथमं तत्र बुधयुक्ताष्टमीव्रतं॥ दशाफलव्रतं पश्चात्कृतो जन्माष्टमीव्रतं॥ ज्येष्ठाव्र
तं ततः प्रोक्तं ततो दूर्वाष्टमीव्रतं॥ महालक्ष्मीव्रतं प्रोक्तमशोकाख्यमतः परं॥ नवम्यामथ कथ्यंते श्री
रामनवमीव्रतं॥ देव्यास्तत्पूजनं पश्चान्नवम्यां सम्यगीरितं॥ दशम्यामथ कथ्यंते व्रतमाशारभमा
दिमं॥ पश्चाद्दशहराख्याया विधिस्नानादिको मतः॥ दशावतारसंज्ञं च विजयादशमीव्रतं॥ एकाद
श्यामथोच्यंते सामान्यव्रतमादिमं॥ निर्जलाख्यव्रतं पश्चाच्छयन्येकादशीव्रतं॥ गोपद्माख्यव्रतं प
श्चात्प्रबोधनविधिस्ततः॥ भीष्मपंचकसंज्ञं च ततो वैतरणीव्रतं॥ सोद्यापनं च शुक्लायां कृष्णा
यां च प्रकीर्तितं॥ अन्यैकादशी पश्चात्तद्वदेव प्रकीर्तिता॥ द्वादश्यामथ कथ्यंते श्रवणद्वादशीव्रतं
॥ वामनाख्यं जयंत्यां च सुरूपाख्यमतः परं॥ त्रयोदश्यामथोच्यंते जयापार्वतीसंज्ञकं॥ गोत्रिरात्रिव्र
तं पश्चाद्दशोकाख्यमतः परं॥ प्रदोषाख्यव्रतं पश्चात्ततोऽनंगत्रयोदशी॥ चतुर्दश्यामथोच्यंते नृसिं

हाख्यव्रतं शुभं॥ अनंतस्य व्रतं पश्चादुद्यापनसमन्वितं॥ कलीदंसंज्ञकं पश्चात्त्वैकुंठाख्यचतुर्द
शी॥ शिवरात्रिव्रतं पश्चादुद्यापनसमन्वितं॥ पूर्णिमायामथोच्यंते सावित्रीव्रतमादितं॥ गोपद्माख्य
व्रतं चान्यत्कोकिलाख्यमतः परं॥ रक्षाबंधविधिः प्रोक्तः पूर्णिमायां ततः शुभः॥ उमामहेश्वराख्यं
च ततः कोजागरात्मिधं॥ अमाव्रतान्यथोच्यंते तत्र गौरीतपोव्रतं॥ अर्कदीपव्रतं पश्चात्सोमवत्या
स्ततः परं॥ मासव्रतानि कथ्यंते तत्रादौ स्वस्तिकव्रतं॥ वरलक्ष्मीव्रतं पश्चात्तद्दानफलव्रतं तथा॥ धा
रणापारणाख्यं च व्रतं मासोपवासकं॥ मलमासव्रतं पश्चाद्वासरस्य व्रतान्यथा॥ रविवारव्रतं चा
दावाशादित्यव्रतं ततः॥ सोमवारव्रतं पश्चाद्भौमवारव्रतं ततः॥ संक्रांतिरथ कथ्यंते व्रतानि विवि
धानि वा॥ उद्यापनं ततः प्रोक्तं घृतेन स्नपनं ततः॥ घृतकंबलकः प्रोक्तो व्यतीपातं ततः॥ लक्षपूजा
विधिः प्रोक्तो नमस्कारविधिस्ततः॥ लक्षवर्तिविधिः पश्चाद्दूर्गसाध्यविधिस्ततः॥ अश्वत्थस्य वि
धिः प्रोक्तो लिंगसोद्यापनं ततः॥ तुलस्याश्च विवाहश्च इत्येवं कथितः क्रमः॥ सुनिर्णयानियामैनीह

व्र०ता० कपितामिव्रतानितु॥तेषांद्रुतासयेनेहद्वांकरोनुक्रमंअधात॥ ॥इतिव्रताकनुक्रमंसंपूर्णं॥ ॥श्रीरस्तु॥
४१२ ॥ ॥कल्याणमस्तु॥ ॥श्रीहनुमानजीसत्यछे॥ ॥श्रीरामाचंद्रायनमः॥ ॥ ॥श्री॥ शके १७०८॥
॥माघशुध१०

राम
४१२

॥श्रीगणेशायनमः॥
अथव्रताकौनुक्र
१ माणिकालिख्यते
२ व्रतलक्षणं
३ देशकालव्यवस्था
४ व्रताधिकारिण
५ व्रतधर्माहा
६ उपवासधर्मा
९ हविष्याणि
१० पचरत्नानि
११ पंचामृतस्वरूप
११ पंचगव्यस्वरूप
११ सर्वगंधस्वरूप
११ पक्षकर्दमस्वरूप
११ यवर्णस्वरूप

११ कौतुकास्थेरत्वस्वरूप
११ रूपस्वरूप
११ धातवः
११ सप्तधान्य
११ अष्टादशधान्य
१२ कुभलक्षणं
१२ प्रतिमाद्रव्य
१२ द्रव्यपरीमाण
१४ होमद्रव्यमानं
१४ मंत्रदेवतयोःप्रतिनिधिः
१६ सर्वतोभद्र
१८ लिंगतोभद्र
१८ मंडुकदेवता
१९ मुद्रालक्षणं
२० षोडशोपचार
२१ अनुक्तोद्यापनविधि
[illegible]

२३ सर्वव्रतेषुसामान्यप्रतिविधिः
२५ प्रतिपद्व्रतानि
२७ चैत्रशुक्लप्रतिपत्तिथि
२८ आरोग्यप्रतिपत्व्रतं
२८ विद्याप्रतिपत्व्रतं
२९ तिलकव्रतं
३० राटकव्रतं
द्वितीयाव्रतानि
३२ कार्तिकशुक्लद्वितीयानिर्णयः
३३ भ्रातृद्वितीयाविधिः
३४ अथतृतीयाव्रतानि
३५ सौभाग्यशयनव्रतं
३६ गौर्यादोलोत्सवः॥
३६ अरुंधतीव्रतं
[illegible]

३० अथशुक्लतृतीयाव्रतविधिः
४१ स्वर्णगौरीव्रतं
४४ हरितालिकाव्रतं
५० हस्तगौरीव्रतं
५२ कोटीश्वरव्रतं
५३ बृहद्गौरीव्रतं
५६ सौभाग्यसुंदरीव्रतं
६० चतुर्थीव्रतानि
६० संकष्टचतुर्थीव्रतं
६५ दूर्वागणपतिव्रतं
६९ सिद्धिविनायकव्रतं
८६ पंचमीव्रतानि
११ [illegible]दिव्रतानि
११ [illegible]
१२० [illegible]

१७२ रामनवमी
१९३ दशमिव्रतानि
१९८ येकादशीव्रत
२३० द्वादशीव्रतानि
२६० त्रयोदशीव्रतानि
२७२ चतुर्दशीव्रतानि
३१२ [illegible]व्रतानि
३२५ [illegible]व्रतानि
३२६ [illegible]मासव्रतानि
३०२ [illegible]व्रतानि
३०९ वारव्रतानि
३९८ संक्रांतीव्रतानि
३९१ [illegible]व्रतानि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

३९६ लक्षपूजाविधि
३९७ लक्षनमस्कारविधि
३९९ लक्षवर्तिविधि
४०८ लिंगोद्यापनं
४०९ अथ तुलसीविवाहः ४०९
इति व्रतार्कस्यानुक्रमणिका
समाप्ता
पत्रे ४१२